

वाचकवरश्रीउमास्वातिविरचितम्

# प्रशमरतिप्रकरणम्

(टीकात्रयसहितम्)

वाचकवरश्रीउमास्वातिविरचितम्

# प्रशमरतिप्रकरणम्

(टीका-विवरण-अवचूर्णिसहितम्)

श्रुतभवन संशोधन केन्द्र

ग्रन्थनाम : प्रशमरतिप्रकरणम् । ( टीकात्रयसहितम् )
ग्रन्थकर्ता : वाचक श्रीउमास्वातिजी
टीका+अवचूरि : अज्ञात
विवरणम् : आ. श्री हरिभद्रसू.म.
पूर्वसम्पादक : अज्ञात + पू.आ.श्री आनन्दसागरसू.म.
पूर्वप्रकाशक : जैनधर्मप्रसारक सभा, भावनगर ( वि.सं. १९६६ )
देवचंद लालभाई पुस्तकोद्धार फंड, सुरत
सम्पादक : मुनिश्रीवैराग्यरतिविजयजीगणिवर
प्रकाशक : श्रुतभवन संशोधन केन्द्र - शुभाभिलाषा रीलीजीयस ट्रस्ट
आवृत्तिः : प्रथमा

~: प्राप्तिस्थान :~

पूना : श्रुतभवन संशोधन केन्द्र
४७-४८, अचल फार्म, आगममंदिर से आगे,
सच्चाइ माता मंदिर के पास, कात्रज, पूणे-४११०४६
Mo. 7744005728 (9-00am to 5-00pm)
www.shrutbhavan.org Email : shrutbhavan@gmail.com

अहमदाबाद : श्रुतभवन ( अहमदाबाद शाखा )
C/o. उमंग शाह
बी-४२४, तीर्थराज कॉम्पलेक्स, वी. एस. हॉस्पिटल के सामने
मादलपुर, अहमदाबाद. मो. ०९८२५१२८४८६

अक्षरांकन : अखिलेश मिश्र, विरति ग्राफिक्स, अहमदाबाद
फोन : मो. ०८५३०५२०६२९, ०९८७९३८८४९०

## प्रकाशकीय

પરમાત્મા શ્રી મહાવીરદેવે જગતને બે અણમોલ ભેટ આપી. અહિંસા અને અનેકાંત. ભગવાનનો ઉપદેશ આગમ અને શાસ્ત્રોના માધ્યમે જનસામાન્ય સુધી પહોંચ્યો. આગમ અને શાસ્ત્રો જૈનધર્મની આધારભૂમિ છે, એટલું જ નહીં પરમાત્માનો અમૂલ્ય વારસો છે. પરમાત્માના નિર્વાણ પછી હજાર વરસ બાદ આગમો અને શાસ્ત્રો લખાયા. શરૂમાં તાડપત્ર પર લખાયા, ત્યારબાદ કાગળ પર લખાયા. આજે જૈન સમાજ પાસે લગભગ પંદરહજાર શાસ્ત્રોની દસ લાખ હાથેથી લખેલી (=હસ્તલિખિત) પ્રતો છે. મુદ્રણયુગ શરૂ થતા આગમ અને શાસ્ત્રો છપાવા લાગ્યા.

લેખન અને મુદ્રણ દરમ્યાન આગમ અને શાસ્ત્રોમાં માનવના સહજ સ્વભાવવશ ભૂલથી અશુદ્ધ પાઠોનો પ્રવેશ થયો. આજે જે શાસ્ત્રો મુદ્રિત છે તેમાંથી મોટા ભાગના શાસ્ત્રોનું સંશોધન અપેક્ષિત છે, જે માત્ર પ્રાચીન હસ્તપ્રતોના આધારે જ શક્ય છે.

'શ્રુતભવન' આ દિશામાં કાર્ય કરે છે. પ્રાચીન હસ્તપ્રતોના આધારે સંશોધન કરવું એ તેનું મુખ્ય લક્ષ્ય છે. સાથે જ જે શાસ્ત્રો આજ સુધી મુદ્રિતરૂપે ઉપલબ્ધ નથી તેનું પ્રકાશન કરવાનું પણ ધ્યેય ધરાવે છે.

પ.પૂ.આ.દેવ.**શ્રીમદ્‌વિજયરામચંદ્રસૂરીશ્વરજીમ.**ના શિષ્યરત્નો પૂ.મુનિશ્રી **વૈરાગ્યરતિ-વિજયમ**. અને પૂ.મુનિશ્રી **પ્રશમરતિવિજયમ**.ના દિશાદર્શન અનુસાર આ કાર્ય વેગથી આગળ વધી રહ્યું છે. કાર્યની વિશાળતા, મહત્તા અને ઉપયોગીતાને જોતાં વિશેષજ્ઞ પંડિતોની નિયુક્તિ પણ કરવામાં આવી છે.

જે શાસ્ત્રો ગૃહસ્થ ઉપયોગી છે તેમનો સરળ સારાંશ ગુજરાતી, હિંદી અને અંગ્રેજીમાં પ્રસ્તુત કરવાની પણ નેમ છે.

શ્રુતસેવાના આયોજનના પહેલા ચરણ રૂપે **'પ્રશમરતિ પ્રકરણમ્'**ની સંશોધિત આવૃત્તિ સંઘ સમક્ષ મૂકતાં અમને અપાર આનંદની લાગણી થાય છે. **શ્રીસુરત તપગચ્છ રત્નત્રયી આરાધક સંઘે** જ્ઞાનનિધિમાંથી આ પ્રકરણ પ્રકાશિત કરવાનો લાભ લીધો છે અમે તેની હાર્દિક અનુમોદના કરીએ છીએ.

પૂજ્ય મુનિશ્રી **વૈરાગ્યરતિવિજયમ**. એ અપાર મહેનતથી આ શાસ્ત્રનું સંપાદન કર્યું છે.

શ્રુતભવન સંશોધન કેન્દ્રના સહાયકો **શ્રી અમિત ઉપાધ્યે, શ્રી સુકુમાર જગતાપ**ની મહેનત પણ ધન્યવાદ પાત્ર છે. અક્ષર યોજના માટે **શ્રી અખિલેશમિશ્રા**એ ઉઠાવેલ શ્રમ ખૂબ પ્રશંસાપાત્ર છે.

શ્રુતભવન સંશોધન કેંદ્ર, પુણેની સંપૂર્ણ ગતિવિધિઓના મુખ્ય આધારસ્તંભ માંગરોળ (ગુજરાત) નિવાસી શ્રી ચંદ્રકલાબેન સુંદરલાલ શેઠ પરિવાર અને ભાઈશ્રી (ઈન્ટરનેશનલ જૈન ફાઉન્ડેશન, મુંબઈ) પરિવારના અમે હંમેશા ઋણી છીએ.

તા. ૨૭-૭-૧૧

**– ભરતભાઈ શાહ**

માનદ અધ્યક્ષ

તપાગચ્છાધિરાજ
પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્વિજય
રામચંદ્રસૂરીશ્વરજી મહારાજાએ
વિ.સં. ૧૯૬૯ની સાલમાં ૧૭મા
વર્ષે દીક્ષા ગ્રહણ કરી આજીવન મુક્તિ
અને વિરતિનો ઉપદેશ આપ્યો હતો.
તેમના ઉપદેશમાં 'પ્રશમરતિ' પ્રકરણ
નો પડઘો પડતો હતો.
તેઓ શ્રીમદ્‌ને અતિપ્રિય એવા
प्रशमरतिप्रकरणનું તેમના જ
કરકમલમાં સમર્પણ

**શ્રીસુરત તપગચ્છ રત્નત્રયી આરાધક સંઘ**

આ.શ્રી.વિ. રામચંદ્રસૂરીશ્વરજી આરાધના ભવન
આરાધના ભવન રોડ,
સુભાષ ચોક, ગોપીપુરા સુરત-૧

## संपादकीय

**હસ્તપ્રત પરિચય :**

**प्रशमरतिप्रकरण**નું પ્રસ્તુત સંપાદન મુખ્યત્વે ચાર હસ્તપ્રતોના આધારે થયું છે.

(૧) **हे.** પ્રત. પાટણના હેમચંદ્રાચાર્ય જ્ઞાનભંડારની તાડપત્રીય પ્રત. આ પ્રતની પ્રતિછાયા (xerox) પ.પૂ.પ્ર.શ્રી જંબૂ વિ.મ.એ કરાવી હતી. તેની નકલ કોબાના પૂ.આ.શ્રી કૈલાસસાગરસૂ. જ્ઞાનભંડારથી મળી છે. આ પ્રતમાં પ્રાચીન ટીકા છે. અંતિમ પુષ્પિકામાં જણાવ્યું છે કે આ પ્રત સં. ૧૪૮૭માં કા.સુ.૧૦ના દિવસે દેવલપાટકમાં લખાઈ છે. આ પ્રતના કેટલાક પાનાં મોગલોના આક્રમણને કારણે તૂટી ગયા હતા. પંડિત હેમસાગરગણિ પાસે તૂટેલી પ્રત હતી અને હેમમેરૂગણિ પાસે તેની આદર્શનકલ હતી. તેના આધારે ચંડગચ્છ (ચંદ્રગચ્છ)ના પૂ. આ.શ્રી પૂર્ણચંદ્રસૂ.મ.ના શિષ્ય આ.શ્રીહેમહંસસૂ. અને પુણ્યમેરુગણિએ આ પ્રતના ખૂટતાં પાનાંની પૂર્તિ કરી લખી છે. આ પ્રતમાં સૂત્ર નથી, કેવળ વૃત્તિ છે. અર્થાત્ સં. ૧૪૮૭માં નવાં પાનાં લખાયા તે કરતાં મૂળ આદર્શ પ્રાચીન છે. પ્રત ઘણેખરે અંશે શુદ્ધ છે. પાછળથી લખાયેલી પ્રતોના આધારે મુદ્રિત થયેલી પ્રતોની અશુદ્ધિઓ આ પ્રતના પાઠ મળતાં શુદ્ધ થઈ શકી છે.

(૨) **कै.** પ્રત. આ પ્રત કાગળની છે. તે કોબા સ્થિત પૂ.આ.શ્રીકૈલાસસાગરસૂ. જ્ઞાનભંડારમાં છે. આ પ્રત ત્રિપાઠી છે. તેમાં મૂળ અને પ્રાચીન ટીકા લખાઈ છે. સં. ૧૬૪૭માં પોષ વ. ૧૪ રવિવારે નાગોરમાં તેની પ્રતિલિપિ થઈ છે. લિપિકાર શ્રીજયક્ષેમ ગણિ છે. આ પ્રતના પાઠ અશુદ્ધ છે.

(૩) **अ.** સંજ્ઞક પ્રત ક્યાંની છે તે ખ્યાલ આવતો નથી. પાટણની હોવી જોઈએ તેવી સંભાવના છે. હાલ તેની પ્રતિછાયા અમદાવાદ સ્થિત ગીતાર્થગંગાના શાસ્ત્ર સંગ્રહમાં છે. પ્રત શુદ્ધ છે. તેમાં મૂળ સાથે પૂ.સા.શ્રી હરિભદ્રસૂ.મ. કૃત વિવરણ છે.

(૪) **ड.** સંજ્ઞક પ્રત અમદાવાદસ્થિત ડહેલાના ઉપાશ્રયની છે તેની પ્રતિછાયા ગીતાર્થગંગાના શાસ્ત્ર સંગ્રહમાં છે. આ પ્રત પંચપાઠી છે. તેમાં અવચૂરિ લખાઈ છે.

**મુદ્રિત સંસ્કરણ :**

'પ્રશમરતિ' પ્રાચીન ટીકા, અવચૂરિના અંશ સાથે જૈન ધર્મપ્રસારક સભા, ભાવનગર દ્વારા વિ.સં. ૧૯૬૬માં પ્રકાશિત થયું છે. આ પ્રકાશનના સંપાદક અજ્ઞાત છે. તેનું સંશોધન પૂ. મુનિશ્રી ગંભીરવિ.મ.એ કર્યું છે. પ્રસ્તુત સંપાદનમાં તેમની સંસ્કૃત પ્રસ્તાવનાનો સમાવેશ કર્યો છે.

બૃહદ્ ગચ્છના આ.શ્રીહરિભદ્રસૂ.મ.ના વિવરણ અને અવચૂરિ સાથે દેવચંદ લાલભાઈ પુસ્તકોદ્ધાર ફંડ, સુરત દ્વારા વિ.સં. ૧૯૮૫માં પ્રકાશિત થયું છે. તેના સંપાદક પૂ.આ.દે. શ્રી સાગરાનંદસૂ.મ. છે. તેમના સંસ્કૃત ઉપોદ્ઘાતનો, બૃહદ્ વિષયાનુક્રમનો અને પ્રકાશકના કિંચિદ્ વક્તવ્ય તથા Prefaceના જરૂરી અંશનો અત્રે સમાવેશ કર્યો છે.

**ટીકાકાર પરિચય :**

પ્રશમરતિ પ્રકરણની પ્રાચીન ટીકાના કર્તા અજ્ઞાત છે. તે જ રીતે અવચૂરિના કર્તા પણ અજ્ઞાત છે.

વિવરણના કર્તા પૂ.આ.શ્રી હરિભદ્રસૂ.મ. છે. તેઓ વાદીદેવસૂરિમ.ની (સ્યાદ્વાદરત્નાકરના કર્તા) પરંપરામાં થયેલા પૂ.આ.શ્રી માનદેવસૂ.મ.ના (તેઓ વિરહાંક પૂ.આ.શ્રી હરિભદ્રસૂ. કૃત શ્રાવકધર્મવિધિનીના ટીકા કર્તા હોવાની સંભાવના છે તેવું મો.દ.દેસાઈ જૈન સાહિત્યનો સંક્ષિપ્ત ઈતિહાસમાં પેરા નં. ૩૪૭ની ટિપ્પણી નં. ૨૮૫ જણાવે છે) ના સંતાનીય શ્રી જિનદેવ ઉપાધ્યાયના શિષ્ય હતા. શ્રીજિનદેવ ઉપાધ્યાય તેમના દીક્ષાગુરુ હતા કે વિદ્યાગુરુ તે વિષે સ્પષ્ટતા નથી. પ્રશમરતિ વિવરણની પ્રશસ્તિ પ્રમાણે તેઓ વિદ્યાગુરુ જ જણાય છે. 'જૈન સાહિત્યનો સંક્ષિપ્ત ઈતિહાસ'માં શ્રી મો.દ. દેસાઈ તેમનો આ રીતે પરિચય આપે છે.

*૩૪૭ બૃહદ્‌ગચ્છના **માન**દેવસૂરિ-**જિન**દેવ ઉપાધ્યાય શિષ્ય **હરિભદ્રસૂરિએ જયસિંહ** રાજ્યે સં. ૧૧૭૨માં **બંધ**સ્વામિત્વ-**ષડ**શીતિ આદિ કર્મગ્રન્થ પર વૃત્તિ, (જે. પૃ. ૨૬, જે. પ્ર. ૩૪, પ્ર. આ. સભા નં. ૫૨), પ્રાકૃતમાં **મુનિ**પતિચરિત (પ્ર. હેમચંદ્ર ગ્રં. મા., વે.નં. ૧૭૪૭) અને **શ્રે**યાંસચરિત રચ્યાં. **ષડ**શીતિનું બીજું નામ **આ**ગમિકવિચારસાર પ્રકરણ છે તે પરની વૃત્તિ **આ**શાપુરની વસતિમાં ૧૧૭૨માં રચી. (બૃહ્. ૬, નં. ૭૭૬ પા. સૂચિ નં. ૧૯ (૩) પ્ર. આ. સભા ભાવ.), અને સં. ૧૧૮૫માં ઉમાસ્વાતિકૃત **પ્ર**શમરતિ પર વૃત્તિ (પ્ર. જૈન ધ. સભા ભાવ.) અને **ક્ષે**ત્રસમાસવૃત્તિ (જે. નં. ૨૬૮ (૧), શ્રીધર ભાં. ૨, ૮૦) રચી. (જે. પ્ર. પૃ. ૩૪-૩૫).*

પ્રસ્તુત સંપાદનમાં જેમની હસ્તપ્રત વિ. ભૌતિક અને પ્રસ્તાવના વગેરે બૌદ્ધિક સામગ્રીનો ઉપયોગ કર્યો છે, તે સર્વ પ્રત્યે કૃતજ્ઞતા અભિવ્યક્ત કરું છું.

**– સંપાદક**

●●●

## प्रस्तावना ।[१]

इह हि जन्मजरामरणाधिव्याधिव्याकुलेऽसारे संसारे भ्रमद्भिर्जीवैः कथमपि मर्त्यत्वमाप्य संसृतिमूलं कर्म समूलमुन्मूल्य मुक्त्यङ्गनालिङ्गनसुखाय यतितव्यमित्येतमेव भव्यजीवोद्धरण-बद्धकटीनां श्रीमज्जिनेश्वराणामुपदेशमनुसृत्यानेकैः पूर्वसूरिभिः कर्मक्षपणोपायभूता अनेके ज्ञानक्रियाभक्त्यादिप्रतिपादका ग्रन्था ग्रथिताः । तेभ्यश्च सारमुद्धृत्य समुद्धृतमिदं प्रशमरतिनाम प्रकरणं वैराग्यरसतरङ्गतरङ्गिणीसिष्णासूनामल्पायुर्मेधानां भव्यप्राणिनां सानन्दमुपकाराय पञ्चशतप्रकरणसौधावलिसूत्रणसूत्रधारैः समस्तश्वेताम्बरकुलाम्बररजनीवल्लभैरन्यूनदशपूर्वधरैः श्रीउमास्वातिवाचकमुख्यैः । पूज्यापादाश्चेमे कदा कतमं भूमिमण्डलं स्वपादन्यासैर्मण्डयामासुः ? का च प्रकरणपञ्चशती तन्निर्मितेति सम्यङ्नावगम्यते ।

प्रकरणस्यास्य सङ्क्षिप्तत्वाद् गूढाशयत्वाच्चान्यैर्महाशयैराचार्यैर्दिद्वित्राष्टीकाः कृताः सन्ति, परं ताः कैः कैर्निर्मिता इत्येतत्कुत्राप्युल्लेखाभावान्न निश्चीयते, अतोऽस्मन्मुद्रितैतट्टीकाकर्तुर्नामात्र नाङ्कितुं शक्यते । अत्र मुद्रितं विवरणं त्वस्य विवृतं श्रीहरिभद्राचार्यैरिति–

**''श्रीहरिभद्राचार्यै रचितं प्रशमरतिविवरणं किञ्चित् ।**
**परिभाव्य वृद्धटीकाः सुखबोधार्थं समासेन ॥१॥**

**अणहिलपाटकनगरे श्रीमज्जयसिंहदेवनृपराज्ये ।**
**बाणवसुरुद्र ( ११८५ ) सङ्ख्ये विक्रमतो वत्सरे व्रजति ॥२॥**

**श्रीधवलभाण्डशालिकपुत्रयशोनागनायकवितीर्णे ।**
**समुपाश्रये स्थितैस्तैः समर्थितं शोधितं चेति'' ॥३॥**

इत्यादिना निश्चीयते । इदं च विवरणं प्रतिपत्राणां जीर्णत्वात्प्रभूतस्थलेषु खण्डिततत्वेन प्रत्यन्तरालाभात् कृपापरैर्मनीषिभिः पं० श्रीमद्गम्भीरविजयगणिभिः कृपाप्रधानानां सतां विदुषां स्वमतिभ्रमस्खलनशोधनायाभ्यर्थ्य सन्धितमिति तेषां महोपकारकारित्वम् ।

इह च प्रकरणे १ पीठबन्धः, २ कषायाः, ३ रागादयः, ४ अष्टविधं कर्म, ५ पञ्चेन्द्रियविषयाः, ६ अष्टौ मदस्थानानि, ७ आचारः, ८ भावना, ९ दशविधो धर्मः, १० धर्मकथा, ११ जीवादिनवतत्त्वानि, १२ उपयोगः, १३ भावाः, १४ षड्विधं द्रव्यं, १५ चरणं, १६ शीलाङ्गानि, १७ ध्यानं, १८ क्षपकश्रेणिः, १९ समुद्घातः, २० योगनिरोधः, २१ मोक्षगमनविधानं, २२ अन्तफलं चेति द्वाविंशत्यधिकारा मुख्याः । तथाहि–

पीठबन्धाभिधाने प्रथमाधिकारे प्रथमार्याद्वयेन मङ्गलादि, द्वितीयार्याद्वयेनाबहुश्रुतानामत्र दुःप्रवेशं, ततः पञ्चदशश्लोक्या सज्जनचेतश्चमत्कारिणीं स्वलघुतां, वैराग्यरागद्वेषाणां पर्यायांश्चोपन्यस्तवन्त आचार्याः ॥१॥

---

१. जैनधर्मप्रसारकसभोपक्रमेण प्रकाशिततायाः प्रतेः प्रस्तावना । सम्पादकोऽस्या अज्ञातः ।

कषायाख्ये द्वितीयाधिकारे विंशात्त्रयोविंशावधि कीदृगाचरणेन जीवः कषायी भवतीत्येतद्दर्शितं दर्शनचतुरैः ॥२॥

रागाद्यभिधाने तृतीयाधिकारे चतुर्विंशात्त्रयस्त्रिंशत्तमश्लोकैः क्रोधादिकषायैरुत्पद्य-मानाननर्थान् रागद्वेषयोः स्वरूपं च प्रतिपादितवन्त आचार्याः ॥३॥

कर्माख्ये तुर्याधिकारे चतुस्त्रिंशादष्टत्रिंशावधिके प्रकृतिस्थितिरसप्रदेशभेदैः कर्मबन्धस्य विचित्रता तत्कारणं च प्रदर्शितम् ॥४॥

एकोनचत्वारिंशादारभ्यैकोनाशीतश्लोकपर्यन्ते पञ्चमाधिकारे पञ्चेन्द्रियविषयनामके पञ्चेन्द्रियार्थपराधीनस्यात्मनो हानिः, तान्येव स्ववशीकर्तुश्च स्वाभाविकं सुखं व्यावर्णितम् ॥५॥

मदस्थानाख्ये षष्ठाधिकारे आशीतादेकोत्तरशततमैर्मदस्याष्टौ भेदाः, ततश्चेहामुत्रानर्थसम्भवो जीवस्य दर्शितः ॥६॥

आचारनाम्नि सप्तमाधिकारे द्व्यधिकशततमादारभ्याष्टचत्वारिंशदधिकशततमपर्यन्ते इन्द्रियजन्यं विषयसुखं किम्पाकफलमिव दुरायति ज्ञात्वा तद्विरक्त्या पञ्चविधाचारसम्यगारा-धनतत्परैर्भाव्यं सर्वैः, निर्ग्रन्थैस्तु विशेषत इत्युपदिश्य निर्ग्रन्था निर्ग्रन्थत्वसिद्धयेऽभ्यर्थिताः ॥७॥

भावनानामन्यष्टमाधिकारे एकोनपञ्चाशदधिकशततमात् षट्षष्ट्युत्तरशततमपर्यन्ते-ऽनित्याशरणादिद्वादशभेदभिन्नाया भावनायाः स्वरूपं सूक्ष्मदृष्ट्या प्रत्यक्षीकृत्य संयममार्ग-बाधकविषयकषायादिविकारान्निवारयितुं प्रार्थिता मुमुक्षवो मुमुक्षुसार्थवाहैः ॥८॥

धर्माधिकारे नवमे सप्तषष्ठ्युत्तरशततमादेकाशीत्यधिकशततमपर्यन्तेन श्लोकसन्दर्भेण क्षमामार्दवार्जवादिदशविधयतिधर्माराधनपूर्वकरागद्वेषमोहादिप्रबलदोषदूरीकरणेन सत्साधनयोगेन च वैराग्यवासनावृद्ध्यर्थं विशेषतो यतितव्यमिति साग्रहेण भणितं भणितिदक्षैः ॥९॥

धर्मकथाभिधाने दशमाधिकारे द्व्यशीत्युत्तरशततमादष्टाशीत्युत्तरशततमपर्यन्तश्लोकै-राक्षेपण्यादिधर्मकथाकरणं, स्त्र्यादिकथात्यजनं, परगुणदोषकीर्तनाद्विशुद्धध्यानस्य श्रेष्ठता, शास्त्रा-ध्ययनाध्यापनतत्त्वचिन्तनादिविधानं, शास्त्रशब्दव्युत्पत्तिश्च व्युत्पादिता व्युत्पन्नैः ॥१०॥

जीवादिनवतत्त्वाख्ये एकादशाधिकारे एकोननवत्युत्तरशततमात्त्रिनवत्युत्तरशततमश्लोकै-र्जीवाजीवादिनवतत्त्वनिरूपणपूर्वकं जीवतत्त्वस्य विविधभेदा भेदिताः स्वपरसमयभेदज्ञैः ॥११॥

उपयोगनामनि द्वादशाधिकारे चतुर्नवत्युत्तरशततमपञ्चनवत्युत्तरशततमाभ्यामुपयोगस्य साकारानाकारभेदौ आद्यस्याष्टधात्वमपरस्य च चातुर्विध्यमावेदितं सुविदिततत्त्वैः ॥१२॥

भावाख्ये त्रयोदशाधिकारे षण्णवतिसप्तनवत्युत्तरशततमाभ्यां श्लोकाभ्यां जीवस्यौद-यिकादिभावपञ्चकस्य षष्ठस्य सान्निपातिकस्य च भेदा विवृता विवरणनिरतैः ॥१३॥

षड्द्रव्यात्मके चतुर्दशाधिकारेऽष्टनवत्युत्तरशततमात्सप्तविंशत्युत्तरद्विशततमश्लोकसमूहेन जीवस्यौदयिकादिभावैः स्थानादिप्राप्तिः, तस्यैव द्रव्याद्यष्टधात्वं, द्रव्यात्मादीनां स्वरूपं, ऊर्ध्वलोकादिस्वरूपं, नवतत्त्वस्वरूपं, सम्यग्दर्शनसम्यग्ज्ञानयोश्च लक्षणं लक्षितं लक्षणज्ञधुर्यैः ॥१४॥

चारित्राख्ये पञ्चदशाधिकारेऽष्टाविंशत्युत्तरशतद्वयाद् द्विचत्वारिंशदधिकशतद्वयावधि चारित्र-भेदा:, तदाराधनेनात्मलाभसम्भव:, प्रशमगुणमाहात्म्यं, तद्योगेन चावर्ण्यसुखप्राप्तिश्चेत्येतत्सङ्क्षेपेण कथितं कथकाग्रगण्यै: ॥१५॥

शीलाङ्गाख्ये षोडशाधिकारे त्रयश्चत्वारिंशदुत्तरशतद्वयात्पञ्चचत्वारिंशदुत्तरशतद्वय-पर्यन्तश्लोकत्रितयेन शीलाङ्गस्याष्टादशसहस्रभेदभिन्नत्वं तत्प्राप्त्युपायश्चोपपादित उपपत्तिनिपुणै: ॥१६॥

ध्याननामके सप्तदशाधिकारे षट्चत्वारिंशदधिकशतद्वयादेकोनपञ्चाशदधिकशतद्वयावधि धर्मध्यानस्याज्ञाविचयादिभेदचतुष्कं, तल्लक्षणानि च लक्षितानि लाक्षणिकै: ॥१७॥

क्षपकश्रेण्यभिधानेऽष्टादशाधिकारे पञ्चाशदधिकशतद्वयादेकसप्तत्यधिकशतद्वयावधिके धर्मध्यानेन मोहादिजयात् क्षपकश्रेणिमारुह्य कर्मोन्मूलनपूर्वकं केवलज्ञानादिशाश्वतर्द्धिं प्राप्य जीवोऽव्याबाधमोक्षसुखभाग्भवतीति भावितं भगवद्भि: ॥१८॥

समुद्घातात्मके एकोनविंशाधिकारे द्विसप्तत्यधिकशतद्वयात् षट्सप्तत्यधिकशतद्वयावधिके केवलिन आयुषोऽतिरिक्ततरं कर्मत्रयं समीकर्तुं समुद्घातकरणं तत्प्रकारश्च प्रकाशित: प्रकाशनकुशलै: ॥१९॥

योगनिरोधस्वरूपे विंशाधिकारे सप्तसप्तत्यधिकशतद्वयात् द्व्यशीत्यधिकशतद्वयावधिके समुद्घातान्निवृत्तस्य केवलिन: सम्पूर्णयोगनिरोधकरणक्रमो दर्शितो दर्शनज्ञवर्यै: ॥२०॥

शिवगमनविधानाभिधाने एकविंशाधिकारे त्र्यशीत्यधिकशतद्वयात्पञ्चनवत्यधिकशतद्वया-वधिके योगनिरोधानन्तरं केवली भगवान् ह्रस्वपञ्चाक्षरकालमानां शैलेशीं प्रतिपद्य प्रतिसमयं सत्तागतावशिष्टाशेषप्रकृतिक्षपणपूर्वकं देहातीतो भूत्वा समयेनैकेन समश्रेण्या लोकाग्रं गत्वा समग्रजन्मजरामरणरहित: साद्यनन्तानुपमाव्याबाधसुखं प्राप्नोतीत्येतत् सिद्धान्तितं सिद्धमार्गज्ञै: ॥२१॥

अन्तफलाख्ये च द्वाविंशाधिकारे षण्णवत्यधिकशतद्वयान्नवोत्तरशतत्रयावधिके सम्पूर्णसामग्रीविकलोऽपि मुनि: प्रबलपुरुषार्थाभावेऽपि यथाशक्ति तपोजपसंयमप्रभावेण सद्गतिं प्राप्याचिरेण मोक्षसुखं प्राप्नोति । मुनिमार्गपालनासामर्थ्येऽपि जिनाज्ञापालनाभिरुचि: श्राद्धोऽणु-व्रतादिकथितधर्मानुष्ठानेन सप्ताष्टभवमध्ये सिध्यतीत्यपि सङ्क्षेपेणोदितं वदान्यवर्यै: ॥२२॥

ततश्चरमे श्लोकचतुष्टये जिनशासनार्णवाज्जरत्कपर्दिकातुल्येयं धर्मकथिका समुद्धृतेत्युक्त्या स्वलाघवं, दोषत्यागेन गुणग्रहणं, प्रशमसुखार्थं यतना, छन्द:प्रभृतिदूषणमर्षणं, श्रीमदर्हच्छासन-जयश्चेत्येतत्कथितं ग्रन्थकर्त्रा ग्रन्थोपसंहारं कुर्वता इति ।

उक्तेष्वेष्वधिकारेषु शुद्धवैराग्यगोचर: को विषयो न चर्चित: ? कोऽनुपयुक्त: ? कश्च न विदुषां चेतश्चमत्कारी ? किं बहुना ! श्रुतेन पठितेन चिन्तितेन चानेन प्रकरणेन मुमुक्षूणां जिज्ञासा सर्वतो विरम्यत इति स्पष्टतरमिदमेव प्रकरणं स्वाधिकारिणां प्रकटयतीत्यलं विस्तरेण ।

प्रसिद्धयित्री

संवत् १९६६ — **श्री जैनधर्मप्रसारक सभा**

भाद्रपद शुदि १५ — भावनगर

## કિંચિદ્ વ્યક્તવ્ય

ગ્રંથનો વિષય શાંતરસનો એકાંત ઉપદેશ છે, એ ''પ્રશમરતિ'' નામથી સ્પષ્ટ જણાઈ આવે છે. મૂલગ્રન્થના રચયિતા પૂર્વધર આચાર્ય શ્રીમાન્ **ઉમાસ્વાતિ**–વાચક છે. તેઓશ્રી ક્યારે થયા અને એમણે ક્યા દેશની ભૂમિ પોતાના જન્માદિથી પવિત્ર કરી હતી, તે બાબતનો ચોક્કસ નિર્ણય તેવા સાધનોના અભાવે જો કે અદ્યાપિ થઈ શક્યો નથી, છતાં સભાષ્ય–તત્ત્વાર્થસૂત્રના રચયિતા **ઉમાસ્વાતિવાચક** એ જ પ્રસ્તુત ગ્રન્થના મૂલ પ્રણેતા છે. સ્વયં **ઉમાસ્વાતિજી**ની રચેલી તત્ત્વાર્થભાષ્યની સમ્બન્ધ કારિકામાંના –

वाचकमुख्यस्य **शिवश्रियः** प्रकाशयशसः प्रशिष्येण ।
शिष्येण **घोषनन्दि**क्षमाश्रमणस्यैकादशाङ्गविदः ॥१॥

वाचनया च महावाचकक्षमणमुण्डपादशिष्यस्य ।
शिष्येण वाचकाचार्यमूलनाम्नः प्रथितकीर्तेः ॥२॥

न्यग्रोधिकाप्रसूतेन विहरता पुरवरे कुसुमनाम्नि ।
**कौभीषणि**ना **स्वाति**तनयेन **वात्सी**सुतेनार्घ्यम् ॥३॥

अर्हद्वचनं सम्यग्, गुरुक्रमेणागतं समवधार्य ।
दुःखार्तं च दुरागमविहतमतिं लोकमवलोक्य ॥४॥

इद**मुच्चैर्नागर**वाचकेन सत्त्वानुकम्पया दृब्धम् ।
तत्त्वार्थाधिगमाख्यं स्पष्टमुमास्वातिना शास्त्रम् ॥५॥ त्रिभिर्विशेषकम् ।

यस्तत्त्वाधिगमाख्यं ज्ञास्यति च करिष्यते च तत्रोक्तम् ।
सोऽव्याबाधसुखाख्यं प्राप्स्यत्यचिरेण परमार्थम् ॥६॥

આ છ શ્લોકોથી **શ્રીઉમાસ્વાતિ**જી સમ્બન્ધે ખુદની લખેલી માત્ર આટલી જ વિગતો સ્પષ્ટ જણાઈ આવે છે :–

''એઓશ્રીના દીક્ષાગુરુ અગિયાર અઙ્ગના ધારક **ઘોષનન્દી** ક્ષમાશ્રમણ, અને ગુરુના ગુરુ વાચકમુખ્ય **શિવશ્રી** હતા. વિદ્યાગુરુ મહાવાચક **મુણ્ડપાદના** શિષ્ય **મૂલ** નામના વાચકાચાર્ય હતા. એઓશ્રીનું જન્મસ્થાન **ન્યગ્રોધિકા** ગામ, અને એમનું **કૌભીષણિ** ગોત્ર હતું. [1]પિતાનું નામ

---

૧. ''कौभीषणिनेति गोत्राह्वानम्, स्वातितनयेनेति पितुराख्यानम्, **वात्सी**सुतेनेति गोत्रेण, नाम्ना **उमे**ति मातुराख्यानम्'' ॥

स्वाति अने मातानुं नाम **वात्सी**गोत्रीय उमा हतुं. पोते आर्य [१]**शांतिश्रेणिक**थी नीकळेली **उच्चनागर** शाखा[?]मां दीक्षित हता. ए श्रीउमास्वाति-वाचकश्रीए गुरुपरम्पराथी प्राप्त करेला आर्हत-उपदेशने भली रीते हृदयमां धारण करीने, तथा दुरागमो (मिथ्याशास्त्रो) द्वारा हतबुद्धि दु:खित लोकने देखीने प्राणीओना उपर अनुकम्पाथी प्रेराई **तत्त्वार्थाधिगम** नामनुं स्पष्ट (अर्थनी स्पष्टतावालुं) [२]शास्त्र विहार करतां **कुसुमपुर** (बिहार देशना पट्टना-पाटलीपुर) नगरमां रच्युं.''

आमां यद्यपि एमना समयनो चोक्कस निर्णय थई शकतो नथी, छतां एटलुं चोक्कस छे के एओश्री पूर्वधरोना समयमां थयेला **चतुर्दशपूर्वधर** होई विक्रमनी पांचमी-छठ्ठी शताब्दीथी पहेला थयेला अति प्राचीन आचार्य छे. पोते ५०० ग्रन्थ-प्रकरणना प्रणेता हता.

विवरणकार **श्रीहरिभद्रसूरि**नो समय विक्रमनी १२मी सदीनो उत्तरार्द्ध सुनिश्चित छे. कारण के, खूद टीकाकारे प्रशस्तिमां ''वि० सं० ११८५मां **अणहिल**पुर पाटणनी अंदर महाराजा **जयसिंह**देवना राजकालमां आ टीका रची छे.'' एवुं स्पष्ट उल्लेख्युं छे (प्रशस्ति-श्लोक-४). आ टीका सिवाय प्रस्तुत वृत्तिकारना समये एक बृहद्वृत्ति हती एटलुं चोक्कस मालूम पडे छे. ए बृहद्वृत्तिने अनुसरीने ज आ वृत्ति रचायानुं प्रशस्तिमां स्पष्ट उल्लेखेलुं छे (प्रशस्तिश्लोक-३). ए बृहद्वृत्ति अद्यापि उपलब्ध थई शकी नथी.

टीकाकार १४४४ बौद्ध साधुओने समळीरूपे आकर्षणार अने तेना प्रायश्चित्त-निमित्त (?) १४४४ ग्रन्थोना प्रणेता, दरेक ग्रन्थांते 'विरह' शब्द योजनारा 'याकिनीमहत्तरासूनु'ना उपनामथी प्रसिद्ध '**श्रीमद् हरिभद्रसूरि**' नहीं, पण बृहद्गच्छीय '**श्रीमान् देवसूरि**'ना सन्तानीय **श्रीहरिभद्रसूरि** छे (प्रशस्तिश्लोक-१).

ग्रन्थसंशोधनकार्य माटे आगमाद्धोरक आगमव्याख्याप्रज्ञ साक्षरशिरोमणि आचार्यवर श्रीमद् **आनन्दसागरजी** सूरीश्वर - के जेनी कृपाछाया नीचे ८८ अंको प्रसिद्ध करवा शक्तिमान थया छीए तेमना - हुं तथा श्रीमान् ट्रस्टीवर्यो अहर्निश ऋणी छीए.

पूर्वे मूल अवचूरी अने टीकासहित आ ग्रन्थ वि० सं० १९६६मां **श्रीजैनधर्मप्रसारक** सभा, भावनगर तरफथी तेम ज टीका अवचूरीसहितनुं भाषान्तर पण ए ज संस्था तरफथी वि० सं० १९८८मां प्रसिद्ध थयुं हतुं. भावनगर संस्थाए छपावेल टीका श्रीहरिभद्रजीवाली टीका छे,

---

तत्त्वार्थसूत्र-सिद्धसेनीयटीका अंक ७६ शेठ दे० ला०नी, पत्रांक ३२६-२७. माताना 'उमा' अने पिताना 'स्वाति' उपरथी तेओश्रीनुं नाम 'उमास्वाति'. विशेष इच्छावालाए दे० ला० जैन पुस्तकोद्धार फंडना छपावेला अंक ७६, तत्त्वार्थसूत्रना बीजा भागनो अंग्रेजी प्रवेशक (इंट्रोडक्शन) वगेरे जोवुं.

१. ''थेरे अज्जसंतिसेणिए माढरसगुत्ते''.... ''**थेरेहिंतो णं अज्जसंतिसेणिएहिंतो माढरसगुत्तेहिंतो एत्थ णं 'उच्चानागरी साहा' निग्गया**'' । कल्पसूत्रस्थविरावलि, शेठ दे० ला० जैन पुस्तकोद्धार फंड, अंक ८२, कल्पसूत्र-बारसा सचित्र, पत्राङ्क ६७.

२. ''तत्त्वार्थाधिगमाख्यं शास्त्रं भव्यसत्त्वानुकम्पया विरचितं स्फुटार्थमुमास्वातिनेति'' । दे० ला०नो अंक ७६ तत्त्वार्थसूत्र बीजो भाग, पत्राङ्क ३२७.

एवुं तेओए अनुमान कर्युं छे, पण ते टीका श्रीहरिभद्रजीवाली नथी ज. अमारी आ छपावेल टीका श्रीहरिभद्रजीवाली छे, ज्यारे भावनगर संस्थाए छपावेल टीका क्यां तो आना प्रशस्ति श्लोक ३मां सूचवेल ''**परिभाव्य वृद्धटीकाः सुखबोधार्थं समासेन**'' वाली वृद्धटीका होवी जोईए, अथवा तो कोई अन्य टीका होवी जोईए. तेमां कर्त्तानुं नाम न होवाथी ते श्रीहरिभद्रजीकृत छे एवुं अनुमान करवामां आव्युं हशे तेम मारुं मानवुं थाय छे. अमे बहार पाडीए छीए ते आ टीका भावनगर संस्थाए बहार पाडी छे, ते करतां तद्दन जुदी ज वस्तु छे. अमने विशेष हर्ष थाय छे के एक अप्रसिद्ध कृति ज प्रसिद्ध करवा अमे भाग्यशाली थया छीये. आ बे तद्दन जूदी ज वस्तुओ छे ए जाणवानुं सौभाग्य अमने नीचे प्रमाणे अचानक प्राप्त थयुं छे :

**परम श्रुत प्रभावक मंडल,** मुंबईने प्रशमरतिनुं भाषांतर भावनगरथी छपायेला उपरथी छपावानी इच्छा होवाथी तेना जैन-दिगंबर पंडित पर भावनगर संस्थानी छपावेल प्रशमरति मोकलवामां आवी. अमे पण फरीथी प्रशमरति छपावीए छीए अने एना संशोधक परमश्रुतज्ञानी अधुना अप्रतीम, अजोड आगम-निगम-तत्त्वज्ञाता श्वेताम्बर-जैन आचार्य **आनन्दसागर सूरीश्वरजी** छे तेथी ए मुद्रण विशेषे शुद्ध हशे तेम ते विद्वानने भासतां अमारी पासेथी छपायेल आखो ग्रंथ या तो अधूरो होय तो तेटला पण छपायेला फारमो अमारी पासेथी मांगतां अमे जेटला छपाया हता तेटला तेमने पूरा पाड्या. दिगंबर-जैन पंडितने बन्नेनुं अवलोकन करतां जणायुं के बन्नेमां कर्त्तानुं नाम श्रीहरिभद्रसूरि सूचवेल छे, ज्यारे बन्ने वस्तु तद्दन निराली ज छे, अने तेमां पण श्वेतांबर-जैन आचार्य आनन्दसागर सूरिवाळुं मुद्रण तद्दन ओछूं छे, या तो त्रूटक छे, ज्यारे भावनगरवाळुं मुद्रण सम्पूर्ण अने विस्तारवाळुं छे. आ उपरथी मुंबईना तेना काम करनार मारफते अमारा उपर सूचन आव्युं, जेथी अमोने अमारुं तथा भावनगर संस्थानुं एम बन्ने मुद्रणो साद्यंत जोई-जोवडावी जवानी फरज पडी. ए मुद्रणो जोई जतां मालूम पड्युं के अमारावाळी श्रीहरिभद्रजीनी ''सरल-सुबोध-टीका'' छे, ज्यारे भावनगर संस्थावाळी ''वृद्ध-टीका'' अथवा कोई अन्य टीका ज होई बन्ने ग्रन्थो तद्दन निराला ज छे.

श्रीहरिभद्रजीनी वृत्तिमां 'सुगमत्वलघुत्वाभ्यां' एम कहीने संक्षिप्त करवानो ग्रन्थकारनो उद्देश छे, ए तेओने नथी समजायुं तेथी तेमने आ विवरण ओछुं के त्रुटक जणायुं छे. आ निवेदनमां उल्लेखित टीकाओ उपरांत बीजी कोई टीकाओ आ ग्रंथ पर रचाई छे के नहीं ते जाणी शकातुं नथी. अमारा तरफथी तद्दन नवीन ज प्रकाशन अन्तभागे अवचूरीसहित मुद्रित करावी पाठकोने अर्पण कराय छे, तो मनन-निदिध्यासन वडे प्रकाशक अने संशोधकना परिश्रमने पाठको सफल करशे एवी आशा साथे विरमुं छुं.

वि० सं० १९९६ आषाढशुक्ल चतुर्दशी, गुरुवार
मुंबई, तारीख १८ जुलाई १९४०
(पूर्वमुद्रित आवृत्तिमांथी)

**जीवणचंद साकरचंद झवेरी**
मन्त्री
(दे.ला.पुस्तकोद्धार फंड)

# Preface

**The Author and the Commentator of the Work:-**

It would prove useful to devote an paragraph or two to the author and the commentator of this work. The author of ***Praśama-Rati*** *is Pūrvadhara ācārya* Śrī *Umāsvāti* Vācaka. It is almost certain that this Umāsvāti is the same who composed ***Tattvārtha-Sūtra*** with *bhāṣya.* From the following extract from his *kārikā* of *Tattvārtha-Bhāṣya,* we can glean many facts about the author :

The teacher who initiated him to monkhood was *Ghoṣanandi śramana,* the holder of eleven *aṅgas,* and his teacher's teacher was *Śīvaśrī,* the best among vācakas. The teacher who bestowed knowledge to him *(vidyāguru)* was a pupil of *Muṇḍapāda.* His native place was the town of *Nyagrodhikā,* and his gotra *Kaubhīṣaṇī.* His father's name was *Svāti* and mother's *Umā* of Vātsi *gotra.* He was initiated into monkhood in *Uccanāgara śākhā* which originated from *Śānti-Śreṇika.* This Umāsvāti *vācakaśrī,* bearing into his heart the teaching-handed down through the heredity of teachers—of Arhat and finding the people deluded and made miserable by petty scripturess, being provoked by compassion towards all beings, composed, while on sacred travel, at the city of *Kusumapura,* [Pā-aliputra[1] i.e. modern Pa-na in Bihar,] a clear *śastra* called *Tattvārthādhigama.*

Although we cannot get any definite idea about his date from *this,* we can at least know this, that he is having flourished in the time of the *daśapūrvadhara,* a very ancient *ācārya* who hailed in the fifth or sixth century of Vikrama.

That the commentator Śrī **Haridibhadra Sūri** flourished in the latter half of the twelth century V.S. is certain; for the commentator himself in *praśasti śloka* no. 4 tells us: ("This commentary is writen during Mahārāja *Jayasiṁhadeva's* rule at *Aṇahilapura Pā-aṇa* in V.S. 1185.") Although one cannot

1. Cf. 'तच्च पाटलानाम्ना पाटलिपुत्रं पत्तनमासीत् । असमकुसुमबहुलतया च **कुसुमपुर**मित्यपि रूढम् ।' — *Vividha-Tirtha-Kalpa,* Singhi Jaina Granthamala Series, No.10, p. 68.

say definitely whether any other commentaries on this work were written, yet it is certain that there was at least on *bṛhad-vṛtti* in this commentator's time. That the present *vṛtti* is based on that one is clearly stated in *praśasti śloka* no. 3. A. *Praśama-Rati* with commentary was formerly published by some other Public institution. The editor of the work, it seems, believes his commentary to be the one written by Śrī Haribhadra Sūri. But it is not the same. It is a *vṛtti* by some unknown author. I think that it is not the *bṛhad-vṛtti,* for it is neither longer than this *laghu-vṛtti,* nor tougher. Hence it is clear that the commentator is not the well-known Śrī Haribhadra Sūri, who attracted one thousand four hundred and forty four Buddha monks with a desire of hurling them into seething flames, but who, becoming aware of his fault through an indirect hint of a nun Mahattarā gave up the idea, and instead comoposed an equal number of works by way of repentence. He has expressed his reverence towards that benign nun by calling himself "the son of Yākinī Mahattarā", and has shown his deep berevement resulting from the tragic and trecherous death of his two pupils at the hand of Baudhas by addeing a single word "viraha"–a word most intensely suggestive of his deep-seated feeling—at the end of each of his work. The fact that these two distinguishing marks are absent in the above-mentioned commentary, makes it clear that it's author Haribhadra Sūri is the same as the pupil of **Śrī Devasūri** of the ***Bṛhad-gaccha,*** and not the other.

A very useful bilioigaphy on the author is the following, no. *1 being quite exhaustive and entirely indispensible :*

1. Gujarātī Introduction (in Devanāgarī script) to *Tattvārtha-Sūtra,* edited by Pt. Sukhlāl, 1940, Ahmedabad.
2. English and Sanskrit Introduction to Part I and II, *Śrī-Tattvārthādhigama-sūtram,* edited by Prof. Hīrālāl Kāpadīā, 1926-1930, Surat.
3. English Introduction to *Tattvārthādhigamasūtram* in the Sacred Books of the Jainas Series, edited by J. L. Jaini, 1920.
4. The Section "Umāsvāti" in *Svāmi-Samantabhadra* in Hindī by Pt. Jugalkishor Mukhatār 1925, Bombay.

Pt. Sukhalal has made a few comments on the present work in the above-mentioned work.

A list of the *Praśamarati*-publications may prove useful. It is as follows:

1. Bibliotheca Indica, Appendix, Calcutta.
2. Ahmedabad, V.S. 1960,
3. With *tika-avacuri,* Bhavnagar, V.S. 1966,
4. With Gujarāti translation and comments, Mehsāṇa. V.S. 1966.
6. With Italian commentary and translation (by A. Ballini), Gironale della societa Asiatica Italiana 25, 1912.

**Acknowledgement** etc.:-For the critical editing of this work the trustees and myself are indebted to Pūjyapād **Śrī Ānandsāgar Sūri**, a monk well-known among the Jaina community for his deep-rooted knowledge of the Jaina dogmas, and a scholar whose interpretation of some of the tersest passages of the *āgamas* has always remained irrefutable. The fund is lucky that this most revered and most learned *ācārya* of the community is always ready to guide and help it in any and all maters.

May the readers take the fullest benefit of this labour of love of the editor and publishers by studying the work due reverence, zest and persevearance.[1]

Topiwala Chawl,
Sandhurst Road,
Bombay, 4
Thursday, 19th July, 1940

**Jivanchand Sakarchand Javeri**
Hon. Secreary

●●●

1. Revised and traslated from Gujarati by Bipin J. Jhaveree, B.A. (Hons.).

## श्रीप्रशमरतिप्रकरणस्योपाद्घातः

विदाङ्कुर्वन्तु विपश्चिद्वरा यदुतैतत् प्रकरणं वाचकवरैः श्रीमद्भिरुमास्वातिवरैर्विहितम् । श्रीमन्त उमास्वातिवाचका एके एवैतादृशा यत् श्रीश्वेताम्बरवद् नग्नाटैरपि येषां वचनं स्वीक्रियते । न हि नग्नाटानामागमनिर्युक्त्यादिके श्रीजिनोक्त्यनुवादतत्परश्रीगणभृद्भद्रबाहुस्वामिश्रुतकेवलि-प्रभृतिविहिते यथा विप्रतिपत्तिस्तथा श्रीउमास्वातिवाचकपुङ्गववचसि, अन्यथा न ते श्रीउमास्वातीयं श्रीतत्त्वार्थसूत्रमभिमन्येरन् । यद्यपि नग्नाः श्रीउमास्वातीयं श्रीतत्त्वार्थसूत्रमभिमन्यन्ते परं तैरेव विरचितानि शेषप्रकरणानि न हि नाग्नाटानामभिमतानि, दुराग्रहमग्नैर्नग्नैः श्रीतत्त्वार्थसूत्रीयं भाष्यमपि तदीयं न तैरभिमतम् । यद्यपि अनेकानि विवरणानि श्रीमतस्तत्त्वार्थस्योपर्येतदेव भाष्यमनुसृत्य विहितानि तैः श्रुतनयनारकदेवनिर्ग्रन्थसिद्धविकल्पानां सूत्रेषु, एवं सत्यप्यनुकरणे स्वोपज्ञभाष्यस्यानङ्गीकारस्त्वेतेषां स्वमतकदाग्रहमूल एव, यतो निम्नोल्लिखितानि भाष्यस्थानानि तेषां मतस्य तिरस्कारकराणि, साधूनां धर्मोपकरणानां प्रतिपादकत्वात्, श्रावकाणां च सामायिकपौषधातिथिसंविभागेषु श्वेताम्बरीयविधेः प्रतिपादनात्, भगवतां जिनानां देशनाया निरूपकत्वाच्च । इमानि च तानि-

यस्तु कृतार्थोऽप्युत्तममवाप्य धर्मं परेभ्य उपदिशति ।
नित्यं च उत्तमेभ्योऽप्युत्तम इति पूज्यतम एव ॥६॥ भा.का.

केवलमधिगम्य विभुः स्वयमेव ज्ञानदर्शनमनन्तम् ।
लोकहिताय कृतार्थोऽपि देशयामास तीर्थमिदम् ॥१८॥

महतोऽतिमहाविषयस्य दुर्गमग्रन्थभाष्यपारस्य ।
कः शक्तः प्रत्यासं जिनवचनमहोदधेः कर्तुम् ? ॥२३॥

तत्त्वार्थभाष्यं अ. १ सू. ५ आगमतश्च प्राभृतज्ञो द्रव्यमिति भव्यमाह ।

सू. २० अध्ययनानि उद्देशाश्च व्याख्याताः ।

सू. २६ मनुष्यसंयतस्यैव ।

अ. २ सू. ४९ नवभ्यो विशेषेभ्यः शरीराणां नानात्वम् ।

अ. ४ सू. ३ द्वादशविकल्पा वैमानिकाः ।

अ. ६ सू. २३ सङ्घस्य साधूनां च समाधिवैयावृत्त्यकरणं बालवृद्धतपस्विशैक्षग्लानादीनां च सङ्ग्रहोपग्रहानुग्रहकारित्वम् ।

अ.७ सू. २ आलोकितपानभोजनं अनुज्ञापितपानभोजनम् ।

अ. ७ सू. १६ अभिगृह्य कालं सर्वसावद्ययोगनिक्षेपः चतुर्थाद्युपवासिना ×× न्यस्तसर्वसावद्ययोगेन ।

अ. ७ सू. ३३ अन्नपानवस्त्रादेः पात्रेऽतिसर्गो दानम् ।

अ. ९ सू. ५ अन्नपानरजोहरणपात्रचीवरादीनां धर्मसाधनानाम् ।

अ. ९ सू. ५ अन्नपानरजोहरणपात्रचीवरादीनां पीठफलकादीनां च ।

अ. ९ सू. ६ धर्मसाधनमात्रास्वप्यनभिष्वङ्गः बाह्याभ्यन्तरोपधिशरीरान्नपानाद्याश्रयः—शरीरधर्मोपकरणादिषु निर्ममत्वम् ।

अ. ९ सू. २२ संसक्तपानोपकरणादिषु आसनप्रदान० ।

अ. ९ सू. २४ त्रिसङ्ग्रहा निर्ग्रन्थी, एषामन्नपानवस्त्रपात्रप्रतिश्रयपीठफलकसंस्तारादिभि-र्धर्मसाधनैः ।

अ. ९ सू. २६ द्वादशरूपकस्योपधेः ।

अ० ९ सू. ४८ शरीरोपकरणविभूषा ।

अ. ९ सू. ४९ उपकरणबकुशः—विविधविचित्रमहाधनोपकरण० ।

अ. १० सू. ७ श्रमण्यपगतवेदः, तीर्थकरीतीर्थे, अनन्तरपश्चात्कृतिकस्य-त्रिभ्यो लिङ्गेभ्यः, स्त्रीलिङ्गसिद्धाः स्त्रियः सङ्ख्येयगुणाः ।

भाष्यस्य तस्य स्वोपज्ञतासाधनं तु निम्नोल्लिखितहेतुभिः—

१ न हि सूत्रे मङ्गलसम्बन्धादिनिर्देशः, भाष्य एव च सः ।

२ तत्त्वार्थेत्यभिधाननिर्देशोऽपि तत्रैव भाष्ये ।

३ सङ्ग्रहकरणप्रतिज्ञाऽपि भाष्य एव ।

४ न कुत्रापि भाष्ये सूत्रकृते बहुमानः, स च स्वोपज्ञत्वादेव भाष्यस्य ।

५ न च कुत्रापि विकल्पः सूत्रार्थस्य ।

६ अग्रे दर्श्यमानानि च सूत्राधिकारेषु भाष्यकाराणां भवदस्मद्वाच्यवचनानि ।

सू. ९ ज्ञानं वक्ष्यामः ।

सू. ३४ चारित्रं नवमेऽध्याये वक्ष्यामः ।

अ. २ सू. १ उक्तं भवता जीवादीनि तत्त्वानि ।

अ. २ सू. ११ परस्ताद् वक्ष्यामः ।

अ. २ सू. १९ उक्तं भवता पञ्चेन्द्रियाणीति ।

अ. २ सू. २२ उक्तं भवता पृथिव्येत्यादि ।

अ. २ सू. २४ उक्तं भवता द्विविधाः जीवाः ।

अ. २ सू. ३१ योगविशेषादिति वक्ष्यामः ।

अ. ३ सू. १ उक्तं भवता ।

अ. ३ सू. ६ उक्तं भवता लोकाकाशे—तदनन्तरं० ।

अ. ३ सू. १३ उक्तं भवता—स्वभाव० ।

अ. ४ सू. १ उक्तं भवता भवप्र० केवलि० सराग० न देवाः ।

अ. ४ सू. ११ उक्तं भवता देवाश्च० दशाष्ट० ।

अ. ४ सू. २३ उक्तं भवता द्विविधाः कल्पोप० ।

अ. ४ सू. २७ उक्तं भवता तिर्यग्यो० माया० ।

अ. ५ सू. ३३ उक्तं भवता जघन्यगुण० ।

अ. ५ सू. ३६ उक्तं भवता द्रव्याणि ।

अ. ५ सू. ४० उक्तं भवता बन्धे ।

अ. ६ सू. १० उक्तं भवता सकषाया० ।

अ. ७ सू. ७ उक्तं भवता हिंसा० ।

अ. ७ सू. १९ यथाक्रममिति ऊर्ध्वं यद् वक्ष्यामः ।

अ. २ सू. २ यथाक्रममिति येन सूत्रक्रमेणात ऊर्ध्वं वक्ष्यामः ।

अ. ७ सू. ३१ सचित्तनिक्षेप० ।

अ. ८ सू. ६ इत उत्तरं यद् वक्ष्यामः ।

अ. ९ सू. १ संवरं वक्ष्यामः ।

अ. ९ सू. १८ तत्पुलाकादिषु विस्तरेण वक्ष्यामः ।

अ. ९ सू. २१ इत उत्तरं यद् वक्ष्यामः ।

अ. ९ सू. ४० उक्तं भवता पूर्वे शुक्ले ।

अ. ९ सू. ४७ उक्तं भवता परीषहजयात् ।

अनर्थान्तरनिर्देशोऽत्र प्रकरणे तथा तत्त्वार्थे इत्येककर्तृकतोहः । २२९ आर्या– नैकैरनुयोगनयप्रमाणमार्गैः—प्रमाणबोधैरधिगमः । नामादिभिश्चतुर्भिरनुयोगद्वारैः—निर्देशादिभिः षड्भिरनुयोगद्वारैः, सद्भूतप्ररूपणादिभिरष्टभिरनु० । १७–१८–१९ आर्यासु वैराग्यरागद्वेषपर्यायाः २२३ अधिगमनिसर्गपर्यायाः ।

सभाष्यतत्त्वार्थे-१-३ निसर्ग-अभिगम, १-१३ मतिः, १-१५ अवग्रह-ईहा-अपायो-धारणा, १-२० श्रुत०, १-३५ नयाः, ७-८ हिंसा, ७-१२ इच्छा, ८-१० क्रोधः-मानः-माया-लोभो, ९-६ क्षमा, ९-२२ आलोचनं-विवेको-व्युत्सर्ग-छेदः उपस्थापनं, ९-२५ अथोपदेशो स्वोपज्ञतत्त्वार्थसूत्रभाष्यकर्तृभिः (श्रीउमास्वातिवाचकैः) एव कृतमेतत्प्रकरणमित्येतत् निम्नोल्लिखितसमानपदार्थवाक्यात् सुकरमूहितुं—

| तत्त्वार्थसूत्रम् | प्रशमरतिः |
|---|---|
| सू. २ तत्त्वार्थश्रद्धानं सम्यग्दर्शनं<br>सू. ३ तन्निसर्गादधिगमाद् वा | एतेष्वध्यवसायो योऽर्थेषु विनिश्चयेन तत्त्वमिति<br>सम्यग्दर्शमेतत्तु तन्निसर्गादधिगमाद्वा ॥२२२॥ |
| निसर्गः-अधिगमः- | शिक्षाऽऽगमोपदेशश्रवणान्येकार्थिकान्यधिगमस्य ।<br>एकार्थः (र्थे) परिणामो भवति निसर्गः स्वभावश्च ॥२२३॥ |
| सू. १ एकतराभावेऽपि | तास्वेकतराभावेऽपि मोक्षमार्गोऽप्यसिद्धिकरः ॥२३०॥<br>पूर्वद्वयसम्पद्यपि तेषां भजनीयमुत्तरं भवति ।<br>पूर्वद्वयलाभः पुनरुत्तरलाभे भवति सिद्धः ॥२३१॥ |
| सू. ११ आद्ये प्रत्यक्ष० १२ | ज्ञानमथ पञ्चभेदं तत् प्रत्यक्षं परोक्षं च ॥२२४॥<br>तत्र परोक्षं द्विविधं श्रुतमाभिनिबोधिकं च विज्ञेयम् ।<br>प्रत्यक्षं त्ववधिमनःपर्यायौ केवलं चेति ॥२२५॥ |
| ८-६ विस्तराधिगमः<br>७ विस्तरेणाधिगमः | <br>एषामुत्तरभेदविषयादिभिर्भवति विस्तराधिगमः । ॥२२६॥ |
| सू. ३१ एकादीनि | ० एकादीन्येकस्मिन् भाज्यानि त्वाचतुर्भ्य इति ॥२२६॥ |
| भा० सम्यग्दृष्टेर्ज्ञानं० | सम्यग्दृष्टेर्ज्ञानं सम्यग्ज्ञानमिति नियमतः सिद्धम् ।<br>आद्यत्रयमज्ञानमपि भवति मिथ्यात्वसंयुक्तम् ॥२२७॥ |
| २-८ उपयोगो०<br>९ अष्टचतुर्भेदः | सामान्यं खलु लक्षणमुपयोगो भवति सर्वजीवानाम् ।<br>साकारोऽनाकारश्च सोऽष्टभेदश्चतुर्धा च ॥१९४॥ |
| <br>३-६ सुप्रतिष्ठकवज्रा०<br>(वृत्तौ-अमुनैव सूरिणा<br>प्रकरणान्तरेऽभिहितः तत्रा०) | तत्राधोमुखमल्लकसंस्थानं वर्णयन्त्यधोलोकम् ।<br>स्थालमिव च तिर्यग्लोकमूर्ध्वमथ मल्लकसमुद्गम् ॥२११॥<br>सप्तविधोऽधोलोकस्तिर्यग्लोको भवत्यनेकविधः ।<br>पञ्चदशविधानः पुनरूर्ध्वलोकः समासेन ॥२१२॥ |
| १-५-१९-२४ | उत्पादविगमनित्यत्वलक्षणं यत्तदस्ति सर्वमपि ।<br>सदसद् वा भवतीत्यन्यथाऽर्पितानर्पितविशेषात् ॥२०४॥ |

| | |
|---|---|
| ५२-६-२०-२९ | योऽर्थो यस्मिन्नाभूत् साम्प्रतकाले च दृश्यते तत्र ।<br>तेनोत्पादस्तस्य विगमस्तु तस्माद्विपर्यासः ॥२०५॥ |
| ३-१७-२२-३१ | साम्प्रतकाले चानागते च यो यस्य भवति सम्बन्धी ।<br>तेनाविगमस्तस्येति स नित्यस्तेन भावेन ॥२०६॥ |
| ४-१८-२३-३० सूत्राणि | धर्माधर्माकाशानि पुद्गलाः काल एव चाजीवाः ।<br>पुद्गलवर्जमरूपं तु रूपिणः पुद्गलाः प्रोक्ताः ॥२०७॥<br>व्यादिप्रदेशवन्तो यावदनन्तप्रदेशिकाः स्कन्धाः ।<br>परमाणुरप्रदेशो वर्णादिगुणेषु भजनीयः ॥२०८॥<br>भावे धर्माधर्माम्बरकालाः पारिणामिके ज्ञेयाः ।<br>उदयपरिणामि रूपं तु सर्वभावानुगा जीवाः ॥२०९॥<br>जीवाजीवा द्रव्यमिति षड्विधं भवति लोकपुरुषोऽयम् ।<br>वैशाखस्थानस्थः पुरुष इव कटिस्थकरयुग्मः ॥२१०॥<br>लोकालोकव्यापकमाकाशं मर्त्यलौकिकः कालः ।<br>लोकव्यापि चतुष्टयमवशेषं त्वेकजीवो वा ॥२१३॥<br>धर्माधर्माकाशान्येकैकमतः परं त्रिकमनन्तम् ।<br>कालं विनाऽस्तिकाया जीवमृते चाप्यकर्तॄणि ॥२१४॥<br>धर्मो गतिस्थितिमतां द्रव्याणां गत्युपग्रहविधाता ।<br>स्थित्युपकर्त्ताऽधर्मोऽवकाशदानोपकृद् गगनम् ॥२१५॥<br>स्पर्शरसवर्णगन्धाः शब्दो बन्धोऽथ सूक्ष्मता स्थौल्यम् ।<br>संस्थानं भेदतमश्छायोद्योताऽऽतपश्चेति ॥२१६॥<br>कर्मशरीरवाग्विचेष्टितोच्छ्वासदुःखसुखदाः स्युः ।<br>जीवितमरणोपग्रहकराश्च संसारिणः स्कन्धाः ॥२१७॥<br>परिणामवर्त्तनाविधिपरापरत्वगुणलक्षणः कालः ।<br>सम्यक्त्वज्ञानचारित्रवीर्यशिक्षागुणा जीवाः ॥२१८॥ |
| ८-१<br>८-५ | मिथ्यादृष्ट्यविरमणप्रमादयोगास्तयोर्बलं दृष्टम् ।<br>तदुपगृहीतावष्टविधकर्मबन्धस्य हेतू तौ ॥३३॥<br>पञ्चनवव्यष्टाविंशतिकद्विश्चतुःषट्कसप्तगुणभेदः ।<br>द्विपञ्चभेद इति सप्तनवतिभेदास्तथोत्तरतः ॥३५॥<br>एवं रागो द्वेषो मोहो मिथ्यात्वमविरतिश्चैव ।<br>एभिः प्रमादयोगानुगैः समादीयते कर्म ॥५६॥ |

| | |
|---|---|
| ६-३ योग.<br>४-५-६ पुण्य-पाप | योगः शुद्धः पुण्यास्रवस्तु पापस्य तद्विपर्यासः ।<br>वाक्कायमनोगुप्तिर्निराश्रवः संवरस्तूक्तः ॥ २२०॥ |
| ९-७ माता हि भूत्वा भगिनी माता भूत्वा दुहिता आद्युत्तरकारणाशुचित्वा० | अशुचिकरणसामर्थ्यादाद्युत्तरकारणाशुचितत्वाच्च ।<br>देहस्याशुचिभावः स्थाने स्थाने भवति चिन्त्यः ॥१५५॥<br>माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे ।<br>व्रजति सुतः पितृतां भ्रातृतां पुनः शत्रुतां चैव ॥१५६॥ |
| ९-११ जिनवेदनीयाश्रयाः तद्यथा क्षुत्पिपासा० | |

अव्याहतश्रीमन्महावीरस्वामिशासनाः श्वेताम्बरास्तु अनेकग्रन्थेषु तत्त्वार्थसूत्रतद्भाष्यैतत्प्रकरणानामेककर्तृकतामुद्घाटमस्तकं ब्रुवत एव ।

प्रकरणमेतत् न श्रीतत्त्वार्थवत् केवल-दर्शनशास्त्रतया दृब्धं, किन्तु श्रीचतुर्विध-श्रमणादिसङ्घस्याराधनाहेतुकप्रशमस्थैर्यार्थं, तत एव च प्रान्त्यभागे अकृतार्थसाधूना-श्रित्यानुषङ्गिकपारमार्थिकफलदर्शनवत् (२९६ तः ३०१ यावत्) गृहाश्रम्यपरपर्यायश्रावकाणां तद्व्रतसम्यक्त्वाचारनिदर्शनपूर्वकं तथाफलदर्शनम् । शास्त्रं चेदं प्रशमरत्याख्यमन्वयर्थसञ्ज्ञाधारकं, तत एव **'प्रशमेष्टतयाऽनुसृताः' इति 'प्रशमजननशास्त्रपद्धतयः'** इति चोदाजह्रुः पूज्याः । न चेदं तत्त्वार्थादिवत् पदार्थस्वरसनिरूपणामात्रप्राधान्यभृत् सार्वपार्षत्कं वा, किन्त्वाचरणप्राधान्यभृत्, तत एव च प्रान्ते यतिदेशविरतानां साक्षात् पारम्परिकं च यत् प्रशमाचरणस्य फलं तदुपादर्शयन्, प्रशमश्च जैनानां नेतरदर्शनभावितानामिव केवलात्ममननादिलभ्यः, किन्तु कषायशान्ति-युग्वैराग्यादिसमाचरणद्वारा, अत एव तत्रभवन्तोऽत्र प्रशमप्राधान्येन प्रावीवर्त्तन्, सम्यक्त्वादीनां चाराधनापरतया व्याख्यानं चक्रुः ।

विषयाश्चेहत्या विषयानुक्रमतो यथावद् ग्रन्थपरिभावनतश्च गम्याः । शास्त्रं चेदं वाचकचक्रवर्त्तिविरचित्वेनातीव प्रयत्नं, तत एव चाचाराङ्गादिचूर्णिकाराद्या अपि **'नैवास्ति राजराजस्ये'**त्याद्याः कारिकाः साक्षित्वेनोपष्टम्भकत्वेन चोदाहृतवन्तः । **न च वाच्यं** वाचकचक्रवर्त्तिन इमे दिगम्बरमतोत्पत्तेरर्वाक्कालीनाः, न तु ततः प्राचीनाः, कथमन्यथा ***'सचित्ताचित्तमीसेसु'*** इत्यादिवीतरागागमवत् 'सचित्तादिसङ्ग्रहः परिग्रहः' इति परिग्रहस्य लक्षणमकृत्वा ***'मूर्च्छा परिग्रहः'*** इति परिग्रहस्य लक्षणं नग्नाटनाटकनिकन्दनिपुणं न्यवेदयन् ? कथं च परिषहावतारे ***'क्षीणकषाये क्षीणमोहे क्षीणे वा एकादशे'***त्येवमप्रणीय सूत्रं ***'जिने एकादशे'***ति प्रणीतवन्तः ? दिग्वसनकल्पितकेवल्याहारनिषेधप्रतिषेधपरमेव तत्, कथं च **'यद्वत्तुरग'** इत्यादिना सत्स्वप्युपकरणेषु निर्ग्रन्थतानिरूपणपटुं चक्रुः कारिकामत्र ? **सत्यमेत**त्, परं न ह्येतद् वक्तुमपि शक्यं यदुत नान्ये दिगम्बरेभ्यः सचित्तादिसङ्गमात्रविरोधिनो नाभूवन्,

अन्यगृहिलिङ्गसिद्धिविचारेऽपि तद्वाच आवश्यकता दुर्वारा, गोशालकस्य चाचेलक्यावस्थश्रीमन्महावीरस्वामिभ्यः पृथग्भावात् अचेलतयैवावस्थानात्, ऐतिहासिका अपि आजीवकमतमचेलकमित्यास्थिताः, **जिने एकादशेति** वचनं तु उपशान्तमोहादेरुक्तत्वात् सरलमेव, नग्नाटनाटकनिकन्दननिपुणं तु अवश्यमेव तत् ।

वाचकवरा ग्रन्थेऽस्मिन्नधिकाराणां द्वाविंशतिमुपबबन्धुरिति प्रतिभानं तु प्रकृतवृत्तिविलोकनपराणां प्रान्त्यभागे तदुल्लेखान्न दुष्करमिति । वृत्तिकाराश्चात्र श्रीहरिभद्रसूरीन्द्राः, परं नैते याकिनीमहत्तरासूनुत्वेन ख्याता विरहाङ्काः, किन्तु श्रीमानदेवसूरिसन्तानीयाः, प्रशस्तेश्चास्या वृत्तेः स्पष्टमेतत् । निर्माणकालश्च वृत्तेः पञ्चाशीत्यधिकैकादशशताब्दीरूप इति स्वयमेव वृत्तिकारा दर्शितवन्तः । यद्यपि सवृत्तिकमेतद् ग्रन्थरत्नं मुद्रितपूर्वं तथाऽपि तत्प्रतीनां दुर्लभतमत्वात् सकलश्रमणसङ्घस्यातीवोपयोगित्वाच्च भूय उन्मुद्रणमस्य । कृतेऽपि शोधनयत्ने स्खलनबाहुल्यान्मन्दमेधसां क्षन्तव्यं क्षुण्णमत्र विपश्चिद्भिरिति प्रार्थयित्वोपरमते

**आनन्दसागरोऽयमिति**

वीरसं० २४६६ वि० सं० १९९६ श्रीसिद्धक्षेत्रे
चैत्रकृष्णषष्ठ्यां

• • •

## प्रशमरतिबृहद्विषयानुक्रमः


| | आर्याङ्कः | पृष्ठाङ्कः |
|---|---|---|
| मङ्गलं विवरणप्रतिज्ञा सुगमत्वादेः साफल्यं च | | |
| चतुर्विंशतिजिनपरमेष्ठिपञ्चनमस्कारः प्रतिज्ञा च | १-२ | १ |
| आगमस्य महत्त्वेन दुष्प्रवेषता | ३-४ | ४ |
| शमशास्त्रपद्धतेरुद्धारः | ५-६-७ | ६ |
| सज्जनानुग्राह्यत्वम् | ८ | ८ |
| सतां गुणग्राह्यत्वम् | ९ | ८ |
| सत्परिग्रहमहिमा | १० | ९ |
| प्रलापस्यापि सिद्धिः | ११ | १० |
| अनुकीर्त्तनफलम् | १२ | १० |
| पुनःपुनश्चिन्त्यता | १३-१४-१५ | ११ |
| वैराग्यदृढता अभ्यासात् | १६ | १२ |
| वैराग्यरागद्वेषपर्यायाः | १७-१८-१९ | १२ |
| कषायवक्तव्यताईलक्षणम् | २० यावत् २३ | १४ |
| इति पीठबन्धः | | |
| कषायानर्थोक्त्यशक्तिः | २४ | १६ |
| क्रोधमानमायालोभानां दोषाः भवहेतुता च | २५-३० | १७ |
| इति कषायाधिकारः | | |
| कषायाणां रागद्वेषान्तर्भावः | ३१-३२ | २० |
| मिथ्यात्वादिना तयोर्बन्धहेतुत्वम् | ३३ | २१ |
| इति रागाद्यधिकारः | | |
| मूलप्रकृतयः (८) उत्तरप्रकृतयः (९७) प्रकृत्यादयः (४) | | |
| प्रदेशबन्धादिहेतवः, लेश्याषट्कम् | ३४-३८ | २७ |
| इति कर्माधिकारः | | |
| कर्मभवशरीरेन्द्रियविषयवेद्यानि | ३९ | २६ |
| सर्वचेष्टाऽनर्थता | ४० | २७ |

| | | |
|---|---|---|
| शब्दाद्यासक्तिफलम् | ४१-४५ | २७ |
| अदान्तेन्द्रियाणां बाधा: | ४६ | ३० |
| पञ्चेन्द्रियवशार्त्तानर्थ: | ४७ | ३० |
| इन्द्रियातृप्तत्वम् | ४८ | ३१ |
| शुभाशुभविपर्यास: | ४९ | ३१ |
| शुभाशुभसङ्कल्प: | ५० | ३२ |
| विकल्पजौ रागद्वेषौ | ५१ | ३२ |
| परमार्थेन नेष्टा अनिष्टा वा विषया: | ५२ | ३३ |
| विषयाद् गुणाभाव: बन्धश्च स्नेहाभ्यक्तवत्, प्रमादयोगानुगत्वम् | ५३-५६ | ३३ |
| कर्मसंसारदु:खरागादिभवसन्ततय: | ५७ | ३५ |
| प्रशमाद् दोषविलय: | ५८ | ३५ |
| शुभचिन्ताहेतव: | ५९-६३ | ३६ |
| मानुष्यदुर्लभत्वादिचिन्ता | ६४-६५ | ३९ |
| विनीत: शास्त्रलिप्सु: | ६६ | ४० |
| विनयप्रशमहीनस्य कुलाद्यश्लाघ्यता | ६७ | ४१ |
| विनयशोभा, गुर्वाराधनाधीनं शास्त्रं | ६८-६९ | ४२ |
| गुरुवचोमहिमा | ७० | ४३ |
| गुरोर्दुष्प्रतिकारता | ७१ | ४३ |
| विनयशुश्रूषाज्ञानविरत्याश्रवनिरोधतपोनिर्जराक्रियानिवृत्त्ययोगित्वभव-क्षयमोक्षा: | ७२-७४ | ४४ |
| अविनीतस्य स्वरूपं फलं च, शास्त्रानादर: कटुकमानिता हितानपेक्षता च | ७५-८० | ४५ |
| इति करणार्थाधिकारौ | | |
| जातिमदस्य त्याग: | ८१-८२ | ४९ |
| कुलमदस्य त्याग: | ८३-८४ | ५० |
| रूपमदस्य त्याग: | ८५-८६ | ५७ |
| बलमदस्य त्याग: | ८७-८८ | ५३ |
| लाभमदस्य त्याग: | ८९-९० | ५४ |
| बुद्धिमदस्य त्याग: | ९१-९२ | ५५ |
| वाल्लभ्यकमदस्य त्याग: | ९३-९४ | ५७ |
| श्रुतमदस्य त्याग: | ९५-९६ | ५८ |
| उन्मादसंसारयोर्हेतुता दु:खिता जात्यादिहीनता च फलं तस्य | ९७-९८ | ५९ |
| उत्कर्षपरिवादत्यागाभ्यां मदनाश:, नीचगोत्रहेतुता च तयो: | ९९-१०० | ६१ |
| मनुष्यतिरश्चां हीनत्वादि | १०१ | ६२ |

| | | |
|---|---|---|
| रागद्वेषत्यागः इन्द्रियशमनं आगमकार्यता च | १०२-१०५ | ६२ |
| विषयाणां स्वरूपं दुरन्तता विषान्नवद् विपाको दुःखकृत्त्वञ्च | १०६-१०९ | ६५ |
| मरणदर्शनेऽपि विषयरतिर्न योग्या | ११० | ६७ |
| मुक्त्यनुग्रहचिन्ता | १११ | ६८ |

इति मदस्थानाधिकारः

| | | |
|---|---|---|
| आचारस्य रक्ष्यता, भेदाः (५), षड्जीवकाययतनाद्याः, विधिभैक्ष्यादि | ११२-११९ | ६९ |
| संयमयोगस्य निरन्तरकर्त्तव्यता | १२० | ७४ |
| अनित्याः शोकहेतवः विप्रयोगान्ताश्च ऋद्ध्यादयः | १२१ | ७५ |
| अभय आत्मस्थश्च प्रशमः | १२२ | ७६ |
| इन्द्रियजययत्नप्रशंसा | १२३ | ७७ |
| विरागात् मुधा सुखं, दुःखाभावः सुखाद्वैतता च | १२४-१२६ | ७७ |
| शमाद् गुणिता सुखिता निर्ज्वरता च | १२७-१२९ | ७९ |
| लोकशरीरचिन्ता | १३० | ८१ |
| लोकधर्मविरुद्धत्यागः | १३१ | ८१ |
| लोकाभिगमनीयता | १३२ | ८२ |
| अनुपकारिवर्जनं | १३३ | ८३ |
| ग्रहणोपभोगनियतता | १३४ | ८३ |
| लेपादिवदाहारः | १३५ | ८४ |
| कल्प्यास्वाद्यता | १३६ | ८५ |
| यथाकालाद्याहारता | १३७ | ८६ |
| पिण्डादिः धर्मदेहरक्षाहेतुः | १३८ | ८७ |
| निरुपलेपताकारणं | १३९ | ८८ |
| उपकरणैरलेपः (पङ्कजतुरगवत्) | १४०-१४१ | ८८ |
| मिथ्यात्वादिजयात् निर्ग्रन्थता | १४२ | ८९ |
| कल्प्यताहेतवः | १४३ | ९० |
| अकल्प्यताहेतवः | १४४-१४५ | ९० |
| कल्प्याकल्प्यस्याद्वादः | १४६ | ९१ |
| बाधकचिन्तादित्यागः | १४७ | ९२ |
| विषयपरिसङ्ख्यानं | १४८ | ९३ |

इति आचाराधिकारः

| | | |
|---|---|---|
| भावनाद्वादशकं | १४९-१५० | ९३ |
| इष्टजनयोगाद्यनित्यता | १५१ | ९५ |
| जन्माद्यविभवः | १५२ | ९५ |

| | | |
|---|---|---|
| एकस्य जन्मादि | १५३ | ९६ |
| स्वजनादिभ्यो भिन्नता | १५४ | ९६ |
| अशुचिता कायस्य | १५५ | ९७ |
| मात्रादिताया अनैयत्यं | १५६ | ९८ |
| मिथ्यात्वादीनामाश्रवता | १५७ | ९८ |
| वागादिसमाधि: | १५८ | ९९ |
| संवरतपोभ्यां निर्जरा | १५९ | १०० |
| लोकप्रमाणं जन्मादिचिन्ता च | १६० | १०० |
| जिनधर्मात् संसारतरणम् | १६१ | १०१ |
| बोधेर्दुर्लभत्वम् | १६२ | १०१ |
| मोहादेर्विरतिदौर्लभ्यं, वैराग्यदुष्प्रापताहेतवः, क्षान्त्यादीनां साधनता त्रिकरणशुद्धता च | १६३-१६६ | १०२ |
| इति भावनाधिकार: | | |
| श्रमणधर्मभेदा: | १६७ | १०५ |
| दयाद्वारा क्षान्तिसाधनं | १६८ | १०५ |
| विनयगुणद्वारा मार्गफलं, विशुद्धिधर्ममोक्षसुखानि आर्जवात् | १६९-१७० | १०६ |
| अनुपरोधेन शौचता | १७१ | १०७ |
| संयमभेदा: (१७) | १७२ | १०८ |
| बान्धवधनादित्याग: | १७३ | १०८ |
| अविसंवादनादि | १७४ | १०९ |
| अनशनादि प्रायश्चित्तादि च तप: | १७५-१७६ | ११० |
| अष्टादशधा ब्रह्म | १७७ | १११ |
| निर्मूर्च्छता | १७८ | ११२ |
| रागादिशम: ममत्वादित्याग: परिषहादिहननं च फलं धर्मस्य | १७९-१८० | ११२ |
| प्रवचनभक्त्यादीनां वैराग्यादिजनकत्वं | १८१ | ११३ |
| इति धर्माधिकार: | | |
| आक्षेपण्यादिकथाऽनुज्ञा स्त्र्यादिकथात्यागश्च | १८२-१८३ | ११४ |
| परचिन्तानिवृत्ति: | १८४ | ११६ |
| शास्त्राध्ययनादियत्न: | १८५ | ११६ |
| शास्त्रशब्दव्युत्पत्ति: उद्धतशासनत्राणे, सर्वविद्वचनस्य शास्त्रता | १८६-१८८ | ११७ |
| इति कथाधिकार: | | |
| पदार्थनवकम् | १८९ | ११८ |
| जीवभेदा: | १९०-१९३ | ११९ |
| इति जीवाधिकार: | | |

| | | |
|---|---|---|
| उपयोगस्य लक्षणता अष्टचतुर्भेदता च | १९४-१९५ | १२७ |
| इति उपयोगाधिकारः | | |
| भावभेदाः | १९६-१९७ | १२२ |
| भावैर्गत्यादिः, द्रव्याद्यात्माष्टकम् | १९८-२०१ | १२३ |
| आत्मानात्मत्वं उत्पादादि अर्पिताऽनर्पितत्वे च | २०२-२०४ | १२७ |
| इति भावाधिकारः | | |
| उत्पादादित्रिकलक्षणम् | २०५-२०६ | १३२ |
| अजीवभेदाः रूप्यरूप्यविभागः सप्रदेशादित्वं भावविभाज्यता च | २०७-२०८ | १३३ |
| भावे द्रव्यविचारः | २०९ | १३४ |
| द्रव्यभेदाः, लोकः, अधस्तिर्यगूर्ध्वलोकाकारः, सप्तविधादिभेदा व्याप्यत्वादि च | २१०-२१३ | १३५ |
| सधर्मादिषु एकैकता अस्तिकायता कर्तृतादि च | २१४ | १३७ |
| धर्माधर्माऽऽकाशपुद्गलकालजीवानां गुणाः | २१५-२१८ | १३८ |
| पुण्यपापाश्रवसंवरबन्धमोक्षाः | २१९-२२१ | १४१ |
| सम्यग्दर्शनलक्षणं हेतू च | २२२ | १४२ |
| अधिगमनिसर्गपर्यायाः | २२३ | १४३ |
| अनधिगमादेर्मिथ्यात्वता, ज्ञानस्य भेदाः प्रमाणत्वं परोक्षप्रत्यक्षभेदाः, विस्तराधिगमहेतुता भाज्यत्वञ्च | २२४-२२६ | १४३ |
| इति षड्विधद्रव्याधिकारः | | |
| सम्यङ्मिथ्याज्ञानलक्षणम् | २२७ | १४५ |
| चारित्रभेदाः अनुयोगैरनुगम्यता च | २२८-२२९ | १४६ |
| सम्यक्त्वादित्रयं साधनं, नैकतराभावे, पूर्वोत्तरलाभभजनानियमौ | २३०-२३१ | १४७ |
| आराधकलक्षणं, आराधनात्रिकफलं तत्परतादिहेतवश्च | २३२-२३४ | १४८ |
| धर्मस्थितस्यानुपमेयता | २३५-२३६ | १५० |
| प्रशमस्य प्रत्यक्षतादि, सुविहितप्रशंसा, रागद्वेषबाधावर्जनात् सुखिता, धर्मध्यानादियुतसाधुप्रशंसा | २३७-२४२ | १५७ |
| इति चरणाधिकारः | | |
| शीलाङ्गसाधकलक्षणं, शीलाङ्गानि शीलाङ्गफलं च | २४३-२४५ | १५३ |
| इति शीलाङ्गाधिकारः | | |
| धर्मध्यानस्य भेदाः भेदस्वरूपञ्च | २४६-२४९ | १५६ |
| नित्योद्विग्नतादेरपूर्वकरणप्राप्तिः | २५०-२५४ | १५८ |
| इति ध्यानाधिकारः | | |
| साताद्यसङ्गता, यथाख्यातप्राप्तिः मोहोन्मूलनञ्च | २५५-२५८ | १६० |
| क्षपकश्रेणिक्रमः | २५९-२६२ | १६२ |

| | | |
|---|---|---|
| क्षपकसामर्थ्यं | २६३-२६५ | १६४ |
| आवरणादिनाशध्रौव्यं | २६६-२६७ | १६६ |
| केवलज्ञानमहिमा | २६८ | १६७ |
| केवलिस्वरूपं | २६९-२७० | १६७ |
| आयुष्कादिस्थितिः | २७१ | १६८ |
| समुद्घातहेतुः | २७२ | १६९ |
| इति श्रेण्यधिकारः | | |
| समुद्घातः | २७३-२७६ | १६९ |
| इति समुद्घाताधिकारः | | |
| योगनिरोधः, तत्त्वध्यानं, त्रिभागहीनतादि | २७७-२८२ | १७१ |
| इति योगनिरोधाधिकारः | | |
| शैलेशी | २८३-२८४ | १७४ |
| वेद्यादिक्षयः | २८५ | १७५ |
| गतिशरीरत्यागः | २८६-२८९ | १७६ |
| सिध्यत्स्वरूपम् | २९० | १७८ |
| मुक्तस्य सत्त्वम् | २९१-२९३ | १७८ |
| ऊर्ध्वगतिसिद्धिः | २९४ | १८० |
| ऊर्ध्वगतिहेतवः | २९५ | १८१ |
| सिद्धिसुखहेतवः | २९६-३०१ | १८२ |
| अकृतार्थयतेः स्थितिः | ३०२-३०८ | १८५ |
| गृहाश्रमस्थितिः | ३०९-३१० | १८९ |
| गुणलवफलं गृहिप्रशमयत्नाशंसा च | ३११ | १९० |
| इति फलाधिकारः | | |
| अपराधक्षामणा शासन आशीर्वादश्च | ३१२-३१३ | १९१ |
| इति विषयाधिकारः | | |
| परिशिष्ट-१ प्रशमरतिमूलम् । | | १९७ |
| परिशिष्ट-२ प्रशमरतिगतार्यार्धाणामकारादिक्रमेण सूची । | | २१५ |
| परिशिष्ट-३ प्रशमरत्यधिकारानुक्रमः । | | २२७ |
| परिशिष्ट-४ उद्धरणस्थलसङ्केतः । | | २२९ |
| परिशिष्ट-५ पाठान्तराणि । | | २३० |
| परिशिष्ट-६ पारिभाषिकशब्दाः । | | २९२ |
| परिशिष्ट-७ पुस्तकसूची । | | ३०३ |
| परिशिष्ट-८ संपादनोपयुक्तग्रन्थसूची सङ्केतविवरणं च । | | ३०४ |

# ॥ प्रशमरतिप्रकरणम् ॥

**नाभेयाद्याः सिद्धार्थराजसूनुचरमाश्चरमदेहाः ।**
**पञ्चनवदश च दशविधधर्मविधिविदो जयन्ति जिनाः ॥१॥**

---

**॥ अज्ञातकर्तृका प्राचीनटीका ॥**

**( १ ) टीका–प्रशमस्थितेन[१] येनेयं कृता वैराग्यपद्धतिः ।**
**तस्मै वाचकमुख्याय नमो भूतार्थदर्शिने[२] ॥१॥**

प्रशमरतिप्रकरणारम्भे मङ्गलाभिधानं विवक्षितप्रकरणार्थस्याप्रत्यूहेन परिसमाप्त्यर्थ-मित्याह[३]**–नाभेयाद्याः सिद्धार्थेत्यादि** । नाभिः कुलकरः । नाभेरपत्यं नाभेयः ऋषभनामा

---

**॥ श्रीबृहद्गच्छीयश्रीहरिभद्रसूरिविरचितविवरणम् ॥**

**उदयस्थितमरुणकरं दिनकरमिव केवलालोकम् ।**
**विनिहतजडतादोषं सद्वृत्तं वीरमानम्य ॥१॥**

**वक्ष्यामि प्रशमरतेर्विवरणमिह वृद्धवृत्तितः किञ्चित् ।**
**जडमतिरप्यकठोरं स्वस्मृत्यर्थं यथाबोधम् ॥२॥** (उपगीतिः)

**यद्यपि मदीयवृतेः साफल्यं नास्ति तादृशं किमपि ।**
**सुगमत्वलघुत्वाभ्यां तथापि तत् सम्भवत्येव ॥३॥**

**( १ ) ( वि० )** इहाचार्यः श्रीमानुमास्वातिपुत्रस्त्रासितकुतर्कजनितवितर्कसम्पर्कप्रपञ्चः पञ्चशतप्रकरणप्रबन्धप्रणेता वाचकमुख्यः समस्तश्वेताम्बरकुलतिलकः प्रशमरतिप्रकरणकरणे प्रवर्तमानः प्रथमत एव मङ्गलादिप्रतिपादकमिदमार्याद्वितयमुपन्यस्तवान्–**नाभेयाद्या इति** ।

नाभेरपत्यं नाभेयः–ऋषभनामा युगादिदेवः स आद्यो येषां तीर्थकृतां ते नाभेयाद्याः । सिद्धार्थो राजा तस्य सूनुः–तनयः स चरमः–पश्चिमो वर्धमानाभिधानो येषां ते सिद्धार्थराजसूनुचरमाः । चरमः–पर्यन्तवर्ती देहः–शरीरं येषां ते तथा । कियन्तः ?–पञ्चनवदश च कृतद्वन्द्वसमासाः,

---

**( १ ) ( अव. )–ॐ नमः । [१]शास्त्रस्य पीठबन्धः[१] कषाय[२]रागादि[३]कर्म[४]करणार्थाः[५] [६]।**
**अष्टौ च मदस्थाना[७]न्याचारो[८] भावना[९] धर्मः[१०] ॥१॥**

आदिदेवः स आद्यो येषां तीर्थकृतां ते नाभेयाद्याः । सिद्धार्थो राजा तस्य सूनुर्वर्धमानाख्यः स चरमः पश्चिमाख्यो येषां ते सिद्धार्थराजसूनुचरमाः । चरमः पश्चिमो देहो येषां ते चरमदेहाः । ततः परं संसृतेरभावादन्यशरीरग्रहणासम्भवः । कर्माभावात्पञ्चेन्द्रियादिप्राणदशकाभावः । तदभावाच्च शरीराभावः । ततः सांसारिकसुखातीता ऐकान्तिकात्यन्तिकानतिशया निराबाधस्वाधीनमुक्तिसुखभाजः संवृत्ता इत्यर्थः । कियन्तस्ते पुनरिति सङ्ख्यां निरूपयति– **पञ्चनवदश चे**ति, कृतद्वन्द्वसमासाः, चतुर्विंशतिरित्यर्थः । अन्ये तु पञ्चादिषु त्रिष्वपि पदेषु प्रथमाबहुवचनं विदधति । चः समुच्चये । सर्वे च ते शास्तारो भव्यसत्त्वानामुपदेष्टारो धर्मस्य दशविधस्य क्षमादेर्ब्रह्मचर्यावसानस्येत्याह—**दशविधधर्मविधिविद** इति । विधिः प्रकारः क्षमादिस्तं विदन्तीति । स चोपरिष्टाद्वक्ष्यते **सेव्यः क्षान्तिमार्दवे**त्यादिना । विदित्वा केवलज्ञानेनोपदिशन्ति मुमुक्षुभ्यः सत्त्वेभ्यः । त एवंविधा सर्वानन्यतीर्थकृतोऽभिभूय त एव जयन्ति नान्ये उपायाभावात् । यथाहाचार्यसिद्धसेनः—

**अन्येऽपि मोहविजयाय निपीड्य कक्षामभ्युत्थितास्त्वयि विरूढसमानमानाः ।**
**अप्राप्य ते तव गतिं कृपणावसानास्त्वामेव वीर ! शरणं ययुरुद्वहन्तः ॥१॥** (द्वा० २-१०)

के पुनस्ते नाभेयाद्याः सिद्धार्थराजसूनुचरमा इत्याह—**जिना** इति रागद्वेषजेतारो जिनाः । रागद्वेषौ वक्ष्यमाणौ मोहनीयकर्मप्रकृतेर्भेदौ । तद्ग्रहणाच्च सकलमोहप्रकृतिभेदग्रहणं, तज्जये च ज्ञानदर्शनावरणान्तरायाणि क्षयमुपयान्ती[४]त्यतो घातिकर्मचतुष्टयक्षयात् केवलज्ञानभास्करा-विर्भावोऽतो रागद्वेषजयग्रहणं सूचनमात्रकमिति ॥१॥

---

चतुर्विंशतिरित्यर्थः, अन्ये तु पञ्चादिषु त्रिष्वपि पदेषु प्रथमाबहुवचनं ददति इति। चः समुच्चये । दशविधधर्मविधिं–क्षान्त्यादिदशप्रकारसदाचरणविधानं वक्ष्यमाणं विदन्ति–जानन्ति ये ते तथा । एवं विशेषणपञ्चकयुताः किम् ?–जयन्ति–अतिशेरते । के ?–जिना–रागादिजेतार इति ॥१॥

---

**तदनुकथा[११] जीवाद्या[१२] उपयोगो[१३] [३]भावः[१४] षड्विधद्रव्यम्[१५] ।**
**चरणं[१६] शीलाङ्गानि[१७] च ध्यान[१८]श्रेणी[१९] [४]समुद्घातः[२०] ॥२॥**

**योगनिरोधः[२१] क्रमशः शिवगमनविधानमन्तफलम[५]स्याः[२२] ।**
**द्वाविंशत्यधिकारा मुख्या इह धर्मकथिकायाम् ॥३॥**

**श्रीउमास्वातिवाचकः पञ्चशतप्रकरणप्रणेता प्रशमरतिप्रकरणं प्ररूपयन्नादौ मङ्गलमाह– नाभेयाद्या इति । चरमो देहः=कायश्चरमदा वा चरमभवदायिनी ईहा [६]येषाम् ॥१॥**

**जिनसिद्धाचार्योपाध्यायान् प्रणिपत्य सर्वसाधूंश्च ।**
**प्रशमरतिस्थैर्यार्थं वक्ष्ये जिनशासनात् किञ्चित् ॥२॥**

---

**( २ ) टीका—**भरतक्षेत्रसम्भूततीर्थकृच्चतुर्विंशतेः प्रकरणकारो नमस्यां विधाय साम्प्रतं समस्तकर्मभूमिवर्तिनो जिनादीन् प्रणिधित्सुराह—**जिनसिद्धे**ति । पूर्वोक्तलक्षणा जिनास्तीर्थकृतः सामान्यकेवलिनो वा । सिद्धास्तु निष्ठितसकलप्रयोजनाः सर्वकर्म-विनिर्मोक्षाल्लोकशिखराध्यासिनः स्वाधीनसुखाः[१] साद्यपर्यवसानाः । पञ्चविधाचारस्थास्त-दुपदेशदाना[२]द्वा आचार्याः पारमार्थप्रवचनार्थप्ररूप[३]णानिपुणाः । उपेत्य उपगम्य यतोऽधीयन्ते शिष्या इत्युपाध्यायाः सकलदोषरहितसूत्रप्रदाः[४] । अत्र द्वन्द्वसमासस्तान्[५] । ज्ञानदर्शन-चारित्रलक्षणाभिः पौरुषेयीभिः शक्तिभिर्मोक्षं साधयन्तीति साधवः । सर्वग्रहणाद्येऽपि प्रतिपन्नाः[६] समस्तसावद्ययोगविरतिलक्षणं सामायिकं तेऽपि प्रणिपातार्हा इति दर्शयति। अथवा सर्वशब्दः [७]सर्वानेवापेक्षते मध्यवर्तित्वात्। सर्वान् जिनान् सर्वान् सिद्धान् सर्वानाचार्यान् सर्वोपाध्यायान् सर्वसाधूंश्च प्रणिपत्येति प्रत्येकमभिसम्बन्धः । एवमिष्ट-देवतोद्देशेनाभिहितः प्रणिपातः । तदनन्तरं मना[८]गुपकारित्वादाचार्यादीनपि प्रणम्यान्वर्थ-सङ्ज्ञायुक्तप्रकरणक्रियां प्रतिजानीते प्रतिविशिष्टप्रयोजनं च दर्शयति कारिकार्धेन—**'प्रशमरतिस्थैर्यार्थमिति'** । अरक्तद्विष्टता [९]प्रशमो वैराग्यमिति वक्ष्यति उपरि **माध्यस्थ्यं वैराग्यमि**त्यत्र । तत्र वैराग्यलक्षणे प्रशमे रतिः [१०]सक्तिः प्रीतिस्तस्यां निश्चलता प्रशमरति-स्थैर्यम्। अर्थशब्दः प्रयोजनवचनः। प्रशमरतौ कथं नाम स्थिरो मुमुक्षुर्भव्यः स्यादित्यतो वक्ष्ये प्रकरणम्। तच्च जिनशासनादेव वक्ष्यामि, अन्यत्र प्रशमाभावात्। यतः सर्वाश्रवनिरोधैकरसं हि जैनं शासनम्। न चान्यदेवंविधमस्ति प्रशमकारि। प्रवचनं शासनं द्वादशाङ्गमाचारादि-दृष्टिवादपर्यन्तम् । तच्च रत्नाकरवदनेकाश्चर्यनिधानम् । तस्मात् किञ्चित् मनाग् वक्ष्ये । समस्ताभिधाने यद्यपि शक्तिर्नास्ति, तथापि ग्रहणस्मरणार्थावधारणार्थं[११]परिदुर्बलानां भव्यानां

---

**( २ ) ( वि० )** एवमिह भरतजिनान्नमस्कृत्य सम्प्रति सामान्येन पञ्चपरमेष्ठिस्तुतिमाह-**जिनेत्यादि**। जिनाः पूर्वोक्तस्वरूपाः, [१]सिद्धाः-सिद्धिं प्राप्ताः आचार्याः-पञ्चविधाचारनिरताः, उपाध्यायाः-सूत्रप्रदाः, अत्र द्वन्द्वसमासः, तान् प्रणिपत्य-नत्वा, सर्वसाधून्-भरतादिक्षेत्र-वर्त्यशेषयतीन् । चः समुच्चये । किञ्चिद्वक्ष्ये इति सम्बन्धः । किमर्थम् ?-प्रशमरतिस्थैर्यार्थम्-उपशमप्रीतिनिश्चलतायै । वक्ष्ये-अभिधास्ये । कुत इत्याह-जिनशासनात्-सर्वज्ञागमात् । किञ्चिद्-अल्पं, प्रशमरतिप्रकरणमिति तात्पर्यम्। तत्र सार्धाऽऽर्यया मङ्गलमभिहितम्, आर्याऽर्धेन तु सप्रतिज्ञं प्रयोजनादित्रयम् । तत्र प्रशमरतिस्थैर्यार्थमित्यनेन गुरुशिष्ययोरैहिकामुष्मिकं प्रयोजनं प्रतिपादितम्,

**यद्यप्यनन्तगमपर्ययार्थहेतुनयशब्दरत्नाढ्यम् ।**
**सर्वज्ञशासनपुरं प्रवेष्टुमबहुश्रुतैर्दुःखम् ॥३॥**

[१२]स्वल्पोऽपि प्रशमामृतबिन्दुर्हृदयेषु पातितो महान्तमुपकारं प्रसूते। उपकर्तुश्च भव्योपकारः स्वपरहितप्रतिविशिष्टफलदायी जायत इति तदाह—[१३]वक्ष्ये जिनशासनात् **किञ्चित्** ॥२॥

**( ३ ) टीका—**वक्ष्ये इत्युक्तम्, अबहुश्रुतानां तु सकष्टस्तत्र प्रवेश इति आर्याद्वयेनाह—**यद्यपीति**। **श्रुतेति** । समस्ताभिधानमशक्यं यद्यप्यबहुश्रुतेनास्मद्विधेन सर्वज्ञशासनपुरप्रवेशाभावादेव । तद्धि परमदुर्गदुरवगाहमनन्तगमपर्यायार्थत्वात् । [१]तथा चोक्तम्—''[२]**अनन्तगमपर्यायं सूत्रमिति**'' । अर्थो ह्यनन्तैर्गमैः पर्ययैश्च यस्य सर्वज्ञशासनपुरस्य तदनन्तगमपर्ययार्थम् । गमाः स्यादस्ति स्यान्नास्तीति सप्तविकल्पाः । पर्ययास्तु प्रकृतवस्त्वपेक्षाः । सूत्रपदस्यैकस्यार्था बहवः। हेतुः कारणमात्रमन्वयव्यतिरेकवान् वा । अनेकरूपज्ञेयालम्बना अध्यवसायविशेषा नैगमसङ्ग्रहादयो नयाः[३], हस्तिदर्शनेऽन्धानामध्यवसायवशाद्[४] उत्तरोत्तरसूक्ष्मदर्शिनः[५] । शब्दप्राभृताभिहितलक्षणाः साधुशब्दाः प्राकृताः संस्कृताश्च । शब्दप्राभृतं च पूर्वान्तःपाति यत इदं प्राकृतव्याकरणं संस्कृतव्याकरणं चाकृष्टम् । अनन्तगमपर्यायार्थहेतुनयशब्दा एव रत्नानि व्याख्यातुर्गिरां मण्डनानि भूषणानि, एभिराढ्यम् ऋद्धिमत् । आढ्यशब्दः प्रभूतवचनोऽनन्तशब्दो वा सर्वत्राभिसम्बध्यते, अर्थस्यानन्त्याद्धेतवो नयाः शब्दाश्चानन्ताः । अथवा[६] चाढ्यशब्द

वक्ष्ये इति प्रतिज्ञा, जिनशासनादिति पदेन गुरुपर्वक्रमलक्षणः सम्बन्धः, यद्वा आधाराधेयरूपः सम्बन्धः, तत्र जिनशासनमाधारः, प्रशमरतिराधेया । अभिधेयं तु किञ्चिदितिपदसूचितम् । इत्यार्याद्वयार्थः ॥२॥

**( ३ ) ( वि० )** 'जिनशासनात् किञ्चिद्वक्ष्य' इत्युक्तम्, अबहुश्रुतानां तु सकष्टस्तत्र प्रवेश इति सदृष्टान्तमार्याद्वयेनाह—**यद्यप्येति** । **श्रुतेति** । **यद्यपी**त्यादिना सकष्टस्तत्र प्रवेश इति प्रतिपादितम् । अनन्ता–अपर्यवसानास्ते च ते गमपर्ययार्थहेतुनयशब्दाश्च तथाविधाः एव रत्नानि–मणयस्तैराढ्यं समृद्धं तत्तथा, तत्र गमाः–सदृशपाठाः, पर्याया–घटादिशब्दानां कुटादिरूपाणि नामान्तराणि, अर्थाः–

**( २ ) ( अव० )—महाविदेहादिभवान् । 'चः' समुच्चये ।**
**जिनागमात् किञ्चिदल्पं [१]प्रशमरतिप्रकरणमित्यर्थः ॥२॥**

**( ३ ) ( अव० )—अनन्तानि=बहूनि अक्षयाणि वा गमा मार्गाः सदृशपाठाश्च । पर्यायाः= क्रियाध्यवसायरूपा भेदाः क्रमपरिवर्तिनश्च घटादिशब्दानां कुटादिनामान्तराणि वा । अर्थाः= शब्दानामभिधेयानि द्रव्यगणितादयश्च धर्मास्तिकायादयो वा । हेतवोऽपूर्वार्थोपार्जनोपायाः**

**श्रुतबुद्धिविभवपरिहीणकस्तथाऽप्यहमशक्तिमविचिन्त्य ।**
**द्रमक इवावयवोञ्छकमन्वेष्टुं तत्प्रवेशेप्सुः ॥४॥**

---

आकुलवचनस्तैराढ्यमाकुलं गहनमिति । तदेवंविधं सर्वज्ञशासनपुरं प्रवेष्टुमन्तर्निपत्य ज्ञातुमबहुश्रुतैरनधिगतसकलपूर्वार्थैर्दुःखमशक्यमेव प्रवेष्टुमित्यर्थः[७] ॥३॥

**( ४ ) टीका**–यद्यपीत्यपेक्ष्यमाण इदमाह–**श्रुतबुद्धिविभवपरिहीणेत्या**दि । [१]यद्यप्यशक्यप्रवेशं सर्वज्ञशासनपुरमस्मद्विधेन तथापि श्रुतबुद्धिविभवपरिहीणोऽपि अधिगत-सकलपूर्वार्थताविभवस्तेन परिहीणः परित्यक्तः । तथा बुद्धिविभवपरिहीणकश्च [३]बुद्धिविभवः कोष्ठबुद्धित्वं बीजबुद्धित्वं पदानुसारित्वमित्यादि । अहमित्यात्मानं निर्दिशति प्रकरणकारः । अहमशक्तिमात्मगतामविचिन्त्यानपेक्ष्यानादृत्यात्मनोऽसामर्थ्यम् । सोऽहं समुद्यतः कर्तुं द्रमक इव द्रमको निःस्वो रङ्कः, स हि देवताबलिसिक्थान्यप्युच्चित्य विप्रकीर्णानि पोषमात्मनः करोति । लूनकेदारिक इव व्रीहिकणान् भुवि निपतितानुच्चित्य शरीरस्थितिं विधत्ते । तेषां विप्रकीर्णानां सञ्चयनमुञ्छः उञ्छ एवोञ्छकस्तम्[४], एवमहमपि पूर्वपुरुषसिंहैर्[५]महामतिभिराकृष्यमाणे प्रवचनार्थेऽनेकशो यदवयव[६]जातमाकर्षतां शटितं किञ्चित्तदन्वेष्टुं गवेषयितुं [७]सर्वज्ञशासनपुरप्रवेशमिच्छामि । परिशटितावयवोच्चयनमात्रकेण सर्वज्ञशासनपुरप्रवेशमाप्तुमिच्छामीत्यर्थः[८] ॥४॥

---

शब्दानामभिधेयानि, हेतवः–अन्यथाऽनुपपत्तिलक्षणाः, नया–नैगमादयः, शब्दा–घटादयः । इत्येतत् किमित्याह–सर्वज्ञशासनं–जिनागमस्तदेव पुरं–नगरम्, तत् प्रवेष्टुम्–अन्तर्गन्तुम्, अबहुश्रुतैः–अल्पागमैर्दुःखं–सकष्टं, वर्तत इति शेषः ॥३॥

**( ४ ) ( वि० )** श्रुतम्–आगमः, बुद्धिः–औत्पत्त्यादिका मतिः, ते एव सर्वकार्यसाधकत्वात् विभवो–धनं तेन परिहीणको–रहितः स तथाविधः सन् । तथापि–एवमपि, अहमिति[१] कर्तृभूतात्मनिर्देशः । अशक्तिम्–असामर्थ्यम्, अविचिन्त्य–अविगणय्य, द्रमक इव–रङ्क इव, अवयवानाम्–अर्धधान्यानामुञ्छको–मीलनमवयवोञ्छकस्तम्, अन्वेष्टुं–गवेषयितुम्, तस्मिन्–सर्वज्ञशासनपुरे, प्रवेशः–अन्तर्भवनम् तत्रेप्सुः–अभिलाषुकस्तत्प्रवेशेप्सुः, वर्त इति शेषः । आर्याद्वयस्योपनयो यथा–यद्वद्रत्नाढ्यपुरमन्तः प्रवेष्टुमविभवैः सकष्टं तद्वत्सर्वज्ञशासनमवबोद्धुं [२]सकष्टं

---

**[१]अन्यथाऽनुपपत्तिलक्षणाश्च । नयाः=प्राप्तार्थरक्षणोपाया नैगमादयः । शब्दाश्चित्रभाषादयः संस्कृत-प्राकृतादयश्च । रत्नानि । आमर्षौषध्यादयश्च ॥३॥**

**( ४ ) ( अव० )–श्रुतमागमो बुद्धिरौत्पातिक्यादिका मतिस्त एव विभवो धनं तेन परिहीणकः । अवयवाना[१]मर्धधान्यानामुञ्छको मीलनं गवेषयितुं सर्वज्ञपुरप्रवेशमिच्छुः ॥४॥**

**बहुभिर्जिनवचनार्णवपारगतैः कविवृषैर्महामतिभिः ।**
**पूर्वमनेकाः प्रथिताः प्रशमजननशास्त्रपद्धतयः ॥५॥**
**ताभ्यो विसृताः श्रुतवाक्पुलाकिकाः प्रवचनाश्रिताः काश्चित् ।**
**पारम्पर्यादुच्छेषिकाः कृपणकेन संहृत्य ॥६॥**

---

**( ५ ) टीका—**तामेवो[१]ञ्छकवृत्तिमात्मनो दर्शयति कारिकाद्वयेन-**बहुभिर्जिनवचनार्ण वेत्यादि । ताभ्यो विसृता इत्यादि ।** जिनवचनं महार्णव[२] इव पारगमनाशक्यत्वा-[३]दल्पमेधाभिः । महामतिभिस्तु बुद्धिविभवप्राप्तैः सुगमपार इति तद्दर्शयति । जिनवचनार्णव-पारगतैर्बहुभिर्महामतिभिश्चतुर्दशपूर्वविद्भिः शास्त्रप्रतिबद्धकाव्यकरणनिपुणैः सत्कविभिः शब्दार्थदोषरहितकाव्यकारिभिः कविवृषैः कविप्रधानैः मत्तः पूर्वं प्रथमतरमेवानेका बह्व्यः प्रशमजननशास्त्रपद्धतयः प्रथिताः प्रकाशिताः । प्रशमो वैराग्यं स जन्यते येन शास्त्रेण तत्प्रशमजननशास्त्रं तस्य पद्धतयो रचनाः वैराग्यवीथय इत्यर्थः । तैर्महामतिभिर्या विरचिताः शास्त्रपद्धतयः ॥५॥

**( ६ ) टीका—**[१]श्रुतग्रन्थानुसारिण्यो वाचः प्रधानार्थप्रतिबद्धा या विप्रुष[२] इव पुलाकिकाः पलञ्जीभूता[३] निःसारा याः शटिताः प्रधानार्थाः । प्रवचनानुसारिण्यो द्वादशाङ्गार्थानुगताः तत्रापि काश्चिदेव न सर्वाः सम्भाविताः। पारम्पर्यादुच्छेषिका इति गणधरशिष्यैश्चतुर्दशादिपूर्वधरैरेकादशाङ्गविद्भिश्च प्रवचनाभ्यवहारं कुर्वद्भिरुच्छेषिकाः

---

वर्तत इत्यार्याद्वयार्थः ॥४॥

**( ५ ) ( वि० )** तामेवोञ्छकवृत्तिमार्यात्रये[१]णाऽऽह—**बहुभिरिति** । बहुभिः-अनेकै-र्जिनवचनार्णवपारगतैः-सर्वज्ञागमसमुद्रपर्यन्तप्राप्तैः कविवृषैः-विशिष्टकविभिः महामतिभिः-विपुलबुद्धिभिः, पूर्वं-प्राक्तनकाले, अनेका-बह्व्यः, याः प्रथिता-अभिहिताः, कास्ता ? इत्याह-प्रशमजननशास्त्रपद्धतयः-उपशमोत्पादकग्रन्थपङ्क्तय इति ॥५॥

**( ६ ) ( वि० )** किञ्चात इत्याह—**ताभ्य** इति । **तद्भवतीति** । ताभ्यः-पूर्वोक्तशास्त्रपद्धतिभ्यो विसृता-गलिताः । का इत्याह-ताभ्यो विसृताः श्रुतवाक्पुलाकिका-आगमवचनधान्यावयवभूताः, ताश्च मिथ्यादृष्ट्यागमसम्बन्धिन्योऽपि भवन्तीत्याह-प्रवचनाश्रिताः-जिनशासनानुसारिण्यः, काश्चिदेव

---

**( ५ ) ( अव० )—चतुर्दशपूर्वविद्भिः या इति सम्बन्धो योज्यः । प्रथिताः=प्रकाशिताः ॥५॥**

**( ६ ) ( अव० )—विनिर्गताः श्रुतग्रन्थानुसारिण्यो वाचो विप्रुष इव परिशाटिप्रायाः**

**तद्भक्तिबलार्पितया मयाऽप्यविमलाल्पया स्वमतिशक्त्या ।**
**प्रशमेष्टतयाऽनुसृता विरागमार्गैकपदिकेयम् ॥७॥**

---

परिशाटीप्रायाः कृताः । कृपणकेण रङ्केण इव संहृत्य सम्पिण्ड्य ॥६॥

**( ७ ) टीका—**किं कृतमित्याह—**तद्भक्तिबलेत्यादि** । यैस्ताः श्रुतवाक्पुलाकिकाः-त्यक्ता[१] विसृता मुक्तास्तेषु भक्तिः प्रीतिः सेवा । तासु वा श्रुतवाक्पुलाकिकासु भक्तिस्तावन्मात्रेणैव परितोषात्तद्भक्तेर्बलं सामर्थ्यम् । तेन तद्भक्तिबलेनार्पिता उपनीता स्वमतिशक्तिः विशेष्यात्तद्भक्तिरेव बलात्प्रोत्साहयति [२]मम स्वमतिशक्तिं जनयति[३] । तया तद्भक्तिबलार्पितया स्वमतिशक्त्या । मयापि तदुक्त्यनुसारेण [४]प्रथिता । पुनस्तस्या एव विशेषणं **अविमलाल्पयेति** । ज्ञानावरणकर्मकलुषितत्वादविमला अल्पा स्तोका। यतश्चतुर्दशपूर्वधरा अपि षट्स्थानपतिता भवन्ति किं पुनरस्मद्विधाः[५] । कः पुनरयं नियोगोऽवश्यंतया प्रकरणं कर्तव्यमित्याह—**प्रशमेष्टतया** । इष्टस्य भाव इष्टता, प्रशमस्येष्टता प्रशमेष्टता[६] प्रशमवल्लभता, तया हेतुभूतया विरागमार्ग एव [७]एकं पदं यस्या, विरागपथ[८]स्थानमाश्रयो यस्याः सेयं विराग-मार्गैकपदिका, कृतेति ॥७॥

---

न सर्वाः, पारम्पर्यात्–गुरुपरम्परया, उच्छेषिका–उद्धृतशेषाः, स्तोकीभूता इत्यर्थः । ततस्तां कृपणकेन–कुत्सितरङ्केणेव, मयेत्युत्तरेण सम्बन्धः । संहृत्य–मीलयित्वेति ॥६॥

**( ७ ) ( वि० )** ततः किं [१]कृतमित्याह–‘**तद्भक्ति**’इत्यादि । तद्भक्तिबलार्पितया–श्रुतवाक्पु-लाकिका–बहुमानसामर्थ्यढौकितया[२] । मयेति कर्तृभूतात्मनिर्देशो[३] । अपिशब्दोऽसूयाख्यापकः । किल मयापि अनुसृता विरागमार्गैकपदिकेति । अविमला–कलुषा, सा चासावल्पा च–स्तोका सा तथा तया । कया एवंविधया ?–अत आह–स्वमतिशक्त्या कारणभूतया, निजबुद्धिसामर्थ्येन, प्रशमेष्टतया–उपशमवल्लभतया हेतुभूतया, अनुसृता–तद्भक्त्यनुसारेण विहिता, कैवं[४]विधेत्याह–विरागमार्गैकपदिका–विरागमार्गस्यैकोत्पादिका, जनिकेत्यर्थः । इयं प्रशमरतिरित्यर्थः । इति आर्यात्रयार्थः[५] ॥७॥

---

**आगमवचन-प्राधान्यावयवभूताः कृपणेनेव सम्पिण्ड्य उच्छेषिकाः परिशाटिताः ॥६॥**

**( ७ ) ( अव० )—श्रुतवाक्पुलाकि[१]काबहुमानसामर्थ्यढौकितया कलुषतुच्छया प्रशमस्पृह-कत्वेनानुसृता कृता विरागमार्गोत्पादिका, विरागपथः पदं स्थानं यस्या वा ॥७॥**

**यद्यप्यवगीतार्था न वा कठोरप्रकृष्टभावार्था ।**
**सद्भिस्तथापि मय्यनुकम्पैकरसैरनुग्राह्या ॥८॥**

**कोऽत्र निमित्तं वक्ष्यति निसर्गमतिसुनिपुणोऽपि +वा ह्यन्यत् ।**
**दोषमलिनेऽपि सन्तो यद् गुणसारग्रहणदक्षाः ॥९॥**

---

**( ८ ) टीका—**ननु [१]चोच्छिष्टाः श्रुतवाक्पुलाकिकाः परिगृह्य या रचिता कथं सा सतां सम्मता भविष्यतीत्याह—**यद्यप्यवगीतार्था न वेत्यादि** । अवगीतोऽनादृतः परिभूतोऽर्थो यस्याः सावगीतार्था यद्यपि । कथं पुनरवगीतार्थत्वमाशङ्क्यते ? । यतो न वा कठोरप्रकृष्टभावार्था । वाशब्दोऽवधारणार्थः । न च कठोर आक्षेपपरिहारपरिशुद्धः प्रकृष्टो वाचकैः शब्दैः प्रतिपाद्यो नातः परमन्योऽर्थोऽस्तीति सकलकारककलापसाध्यः प्रकर्षभावापन्नोऽर्थो नैव यस्या[२] । सद्भिस्तथापि सुजनैर्गुणदोषविद्भिः । मय्यनुकम्पैकरसैरनुग्राह्या मयीत्युच्छेषिकामात्र-सङ्घट्टन[३]शीले कृपणके द्रमकभूतेऽनुकम्पार्हे । अनुकम्पैवैको रसः स्वभावो येषां सज्जनानां तैः अनुकम्पैकरसैः । इयमनुग्रहीतव्या अनुग्रहार्हेत्यर्थः । सन्तो हि करुणापात्रमवलोक्या-वश्यन्तयानुग्रहं कुर्वन्तीति ॥८॥

**( ९ ) टीका—**अयमेव स्वभावः सज्जनानामिति दर्शयन्नाह—**कोऽत्रेति** । निसर्गः

---

**( ८ ) ( वि० )** [१]नन्वसारत्वात् श्रुतवाक्पुलाकिकानां तत्संहरणरचिता सती सतामनादरणीयैव स्यादियमित्याह—**यद्यप्येति** । यद्यपि वक्ष्यमाणदोषयुक्ता तथापि सद्भिरनुग्राह्येति सम्बन्धः । दोषानेवाह-अवगीतार्था-अनादरणीयाभिधेया, वर्तत इति शेषः । तथा न वा कठोरप्रकृष्टभावार्था-न वेति निषेधे कठोरो विबुधजनयोग्यो गम्भीर इत्यर्थः, प्रकृष्टः-प्रधानो भावार्थः-पदाभिधेयो यस्यां सा तथा, अगम्भीरप्रधानभावार्थेत्यर्थः । यद्वा न वा-नूतना आधुनिककविकृतत्वात् तथा अकारप्रश्लेषात् न विद्यते कठोरप्रकृष्टभावार्थो यस्यां सा तथा । सद्भिः-सज्जनैः । तथापि-एवमपि । मयीति विषयभूतात्मनिर्देशः, अनुकम्पैकरसैः-दयाप्रधानमानसैरनुग्राह्या-अङ्गीकर्तव्या । इत्यार्यार्थः ॥८॥

**( ९ ) ( वि० )** इत्यभ्यर्थना कृता, यद्वा स्वभावत एव सन्तो दोषत्यागेन गुणानेव ग्रहीष्यन्तीत्यावेदयन्नाह—**कोऽत्रेति** । को ?-न कश्चिदित्यर्थः । अत्र-सौजन्यविचारे निमित्तं-कारणमन्यद्-

---

**( ८ ) ( अव० )—अवगीतोऽनादरणीयोऽर्थो यस्याः सा ।**
**[१]न वा निषेधे, गम्भीरप्रधानभावार्था, अङ्गीकर्तव्या ॥८॥**

**( ९ ) ( अव० )-अत्र सतां सौजन्यविषये कारणं सत्स्वभावादन्यत् कोऽपि किं वक्ष्यति ?**

---

\+ वाद्यन्यदिति विवरणकृतसम्मतः पाठः ।

**सद्भिः सुपरिगृहीतं यत् किञ्चिदपि प्रकाशतां याति ।**
**मलिनोऽपि यथा हरिणः प्रकाशते पूर्णचन्द्रस्थः ॥१०॥**

---

स्वभावः । स्वाभाविकी मतिः सहजा निःकृत्रिमा सा किलामोघा भवति । तया मत्या सुष्ठु निपुणोऽपि कुशलोऽपि कः खल्वत्र सतां सौजन्ये निमित्तं कारणमन्यद्वक्ष्यति । स्वभावादृते न खलु मालतीपुष्पाणामाधेयः सुरभिगन्धः[१] केनापि, स्वभावजत्वात् । हिशब्दो यस्मादर्थे । वाशब्दस्तस्मादर्थे । यस्मात् सुनिपुणोऽपि स्वभावमन्तरेण नान्यन्निमित्तं वर्णयितुं समर्थः तस्मात् स्वभाव एवायं सतां परगुणोत्कीर्तनं दोषाभिधाने च मूकत्वमिति पश्चार्द्धेन दर्शयति- **दोषमलिनेऽपि** । दोषयुक्तेऽपि परकीयवचने[२] गुणान् सारभूतान् गृह्णन्ति[३] सन्तः परगुणग्रहण-निपुणाः । जानाम्येवाहं पूर्वपुरुषोच्छेषिकाः पुलाकिकाः समुच्चित्य रचितेयं विरागमार्ग-पदिका, अतो न सम्मता विदुषाम् तथापि ॥९॥

**( १० ) टीका—सद्भिः सुपरिगृहीतमित्यादि** । सन्तः सुजनास्तैः सुपरिगृहीतमादरेण प्रतिपन्नं यत्किञ्चिदपि दोषवदपि निःसारमपि वा । प्रकाशतां याति लोके प्रथते । विदुषां सुजनानां सम्मतमेतदिति परिगृहितृ[१]गुणेन प्रख्यातिमेति विद्वत्समाजेष्विति तद्दर्शयति-**मलिनो-ऽपीत्यादि**ना। चन्द्रमण्डलमध्यवर्ती कुरङ्गः कृष्णिमानमपि [२]बिभ्रत् प्रकाशते शोभते पूर्णचन्द्रस्थः । आश्रयगुणो ह्ययं यन्मलिनोऽपि हरिणो भ्राजते । एवं यदेव[३] सद्भिः परिगृह्यते निस्सारमपि तत्सदाश्रयादेव भ्राजत इति ॥१०॥

---

इतरद्, वक्ष्यति-भणिष्यति, वादी-जल्पाक इति योगः । कीदृशः ?-निसर्गमत्या-स्वभावबुद्ध्या, सुनिपुणो [१]निसर्गमतिसुनिपुणोऽपि[२], आस्तां अनीदृशः । यद्-यस्मात्, सन्तः-सज्जनाः, गुणसारग्रहणदक्षाः-गुणस्वीकारकुशलाः, भवन्तीति शेषः । क्व ?-दोषमलिनेऽपि-सदोषेऽपि, वस्तुनीत्यध्याहारः । स्वभावादेव दोषपरित्यागेन गुणग्राहिणः सत्पुरुषा भवन्तीति भावार्थः ॥९॥

**( १० ) ( वि० )** अथैवंविधायाः सद्भिर्गृहीतायाः को गुणः स्यादित्याह**—सद्भिरिति** । सद्भिः सुपरिगृहीतम्-[१]अतिशयाङ्गीकृतम् यत्किमपि-[२]असारमपि, आस्तां सारम्, प्रकाशतां-प्रकटताम्, याति-गच्छति इति दार्ष्टान्तिकः, दृष्टान्तमाह-मलिनोऽपि-कृष्णोऽपि, आस्ताममलिनः, यथा-येन प्रकारेण, हरिणो-मृगः, प्रकाशते-शोभते, कीदृशः ? पूर्णचन्द्रस्थः-पौर्णमासीशशि-मध्यस्थित इति आर्यार्थः ॥१०॥

---

**अपि तु नेति । वा तस्मादर्थे । हिः यस्मादर्थे । [१]स्वभावतया सुष्ठु कुशलोऽपि इति । भणितेना-मत्सरिणा स्वभावेन कृता ॥९॥**

**( १० ) ( अव० )—प्रकाशतां=प्रकटताम् । कृष्णिमानमपि बिभ्रत् शोभते निःसारं यत्किञ्चित् ॥१०॥**

**बालस्य यथा वचनं काहलमपि शोभते पितृसकाशे ।**
**तद्वत् सज्जनमध्ये प्रलपितमपि सिद्धिमुपयाति ॥११॥**
**ये तीर्थकृत्प्रणीता भावास्तदनन्तरैश्च परिकथिताः ।**
**तेषां बहुशोऽप्यनुकीर्तनं भवति पुष्टिकरमेव ॥१२॥**

---

**( ११ ) टीका—**तथान्यदप्यस्मिन्नेव[१] सुजनव्यतिकरे प्रकरणकार[२] उदाहरति—**बालस्य यथा वचनमित्यादि** । बालः शिशुरनभिव्यक्तवर्णवचनः । तद्वचनं काहलमृजु स्खलदक्षरं गद्‌गदमपि,[३] पितुः समीपे विराजते, परितोषजनकत्वात् कौतुकमाधत्ते । पुनः [४]पुनस्तदेवोप-बध्नाति पिता । तद्वदिति बालकाहलवचनवत् । सज्जनानां मध्ये प्रलपितमसम्बद्धमपि प्रसिद्धिं प्रख्यातिमुपयातीति ॥११॥

**( १२ ) टीका—**अत्राह[१]—यदि पूर्वमनेकाः प्रथिताः प्रशमजननशास्त्रपद्धतयो महा-मतिभिस्तत्कोऽयं प्रशमरतिप्रकरणकरणे पुनरादरः ? ता एवाभ्यस्यनीयाः प्रशमकाङ्क्षिणा । उच्यते—**ये तीर्थकृत्प्रणीता भावा इ**[३]**त्यादि** । प्रागर्थतस्तीर्थकरैः प्रणीताः । तदनन्तरं[२] गणधराः साक्षाच्छिष्या भगवतां तैश्च सूत्रप्रबन्धेन परिकथिताः । भूयस्तदनन्तरैर्गणधरशिष्यैः[४] पारम्पर्येणाख्याता भावा इति जीवादयः पदार्था लक्षणविधानानुयोगद्वारप्रक्रमेण प्ररूपितास्तेषां भावानां बहुशोऽनेकशः पश्चात् कीर्तनमनुकीर्तनं मनोवाक्कायैर्बन्धमोक्षप्रक्रियानुग्र[५]हण-(ग्राहक)तया पुष्टिकरमेव भवति । पुष्टिरुपचयो ज्ञानदर्शनचारित्राणाम् । तदुपचयाच्च कर्मनिर्जरणम् । ततो मोक्ष इति नास्ति कश्चिद्दोषः ॥१२॥

---

**( ११ ) ( वि० )** अन्यदपि सज्जनचेष्टितं दृष्टान्तान्तरयुतमाह—**बालस्येति** । बालस्य-शिशोर्यथा[१] वचनं-जल्पितम्, काहलमपि-अव्यक्ताक्षरमपि शोभते-राजते पितृसकाशे-मातापित्रोरग्रत इति दृष्टान्तः, दार्ष्टान्तिकमाह-तद्वत्-तथा सज्जनमध्ये प्रलपितमपि-अनर्थकं वचनमपि सिद्धिमुपयाति-ख्यातिमुपैतीत्यार्यार्थः[२] ॥११॥

**( १२ ) ( वि० )** ननु पूर्वकविकृता अपि शमजननशास्त्रपद्धतयः सन्ति तत् पुनः किमनयेत्याशङ्क्याह—**य इति** । ये तीर्थकृत्प्रणीता भावा-जीवादयस्तदनन्तरैश्च-गणधरादिभिः परिकथिताः-प्रकीर्तिताः तेषां बहुशोऽप्यनुकीर्तनम्[१] अनेकधाऽपि संशब्दनं भवति-जायते पुष्टिकर-मेवेत्यार्यार्थः ॥१२॥

---

**( ११ ) अव०—काहलमपि अव्यक्ताक्षरम् असम्बद्धं, प्रलपितमपि अनर्थकवचनमपि, प्रख्यातिम् ॥११॥**

**( १२ ) अव०—गणधरादिभिस्तेषां ज्ञानादीनां भावानां[१] पश्चात्कीर्तनमनुकीर्तनम् ॥१२॥**

**यद्वदुपयुक्तपूर्वमपि भैषजं सेव्यतेऽर्त्तिनाशाय ।**
**तद्वद्रागार्तिहरं बहुशोऽप्यनुयोज्यमर्थपदम् ॥१३॥**

**यद्वद्विषघातार्थं मन्त्रपदे न पुनरुक्तदोषोऽस्ति ।**
**तद्वद्रागविषघ्नं पुनरुक्तमदुष्टमर्थपदम् ॥१४॥**

---

**( १३ ) टीका—**पुनरुक्तदोषोऽपि न ढौकते प्रकारान्तरेण वैराग्याभ्[1]यासादारोग्यार्थिनो भैषजोपयोगवदित्याह—**यद्वदिति** । लब्धप्रत्ययमुपयुक्तमौषधं प्रथमं पुनः पुनस्तदेवोपयुञ्जते । तदुपयोगाच्चाभ्यासतः प्रतिदिनं व्याधेरुपशमप्रकर्षविशेषसमासादनं दृष्टम् । व्याधिकृतं दुःखम् अर्तिर्वेदना । उपयुक्तपूर्वमपीत्यनेन लब्धप्रत्ययत्वमाचष्टे । तद्वत्तथा रागार्तिहरम् । रागग्रहणं द्वेषादीन् [2]सूचयति। रागद्वेषोपात्तकर्मोदयप्रसूतायास्ती[3]व्रवेदनार्तेरपहारकारि पुनः पुन[4]रुच्य-मानमप्यदुष्टमेवार्थप्रधानं पदमदोषमनुयोज्यमनुयोजनीयं वाक्प्र[5]बन्धेनानेकश इति ॥१३॥

**( १४ ) टीका—**तथा च—**यद्वद्विषघातार्थं मन्त्रेत्यादि** । वृश्चिकादिदष्टानामपमार्जनं कुर्वन्तो मन्त्रवादिनस्तद्विषजनितवेदनाविघातं विधित्सन्तः पुनः पुनस्तान्येव मन्त्रपदान्यावर्तयन्ति । दृष्टश्च प्रतिक्षणं [1]विषविघातः । तद्वद्रागविषघ्नं वैराग्याग्निसन्धुक्षणप्रवणमनेकशोऽभ्यस्यमानं रागद्वेषविघातित्वात् न पुनरुक्तदोषमासजतीति ॥१४॥

---

**( १३ ) •( वि० )** अमुमेवार्थम् आर्यात्रयेण भावयन्नाह—**यद्वदिति । यद्वदिति । वृत्त्यर्थमिति ।** यद्वद्-यथा विषघातार्थं-गरोत्तारणाय मन्त्रपदे-ॐकारादिके वचने, समुच्चार्यमाणे इति शेषः । न पुनरुक्तदोषोऽस्ति-नैव भूयोभणनदूषणं विद्यते तद्वत्-तथा रागविषघ्नं-[1]सङ्गगरविनाशकम् पुनरुक्तं-भूयोभणितम् अदुष्टम्-अदूषणवद् अर्थपदं-सूचकत्वाद् सूत्रस्यार्थवाचकं पदमिति आर्यार्थः ॥१३॥

**( १४ ) ( वि० )** यद्वत्-यथा उपयुक्तपूर्वमपि-प्रथमप्रयुक्तमपि भेषजम्-औषधम्, सेव्यते-पुनः क्रियते-ऽर्तिनाशाय-पीडाविनाशार्थम् तद्वत्-तथा रागार्तिहरं-प्रतिबन्धपीडानाशनम्[1] बहुशोऽपि-अनेकधाऽप्यनुयोज्यम्-उच्चारणीयम् अर्थपदम्-अभिधेयवत्पदमित्यार्यार्थः ॥१४॥

---

**( १३ ) ( अव० )—[1]पूर्वं सेवितमपि पुनः पुनः सेव्यते अनुयोजनीयं वाक्प्रबन्धेन ॥१३॥**

**( १४ ) ( अव० )—अर्थाभिधायि पदं शास्त्रम् ॥१४॥**

---

● विवरणेऽवचूरौ च १३-१४ कारिकाव्याख्यानस्य व्युत्क्रमो दृश्यते ।

**वृत्त्यर्थं कर्म यथा तदेव लोकः पुनः पुनः कुरुते ।**
**एवं विरागवार्ताहेतुरपि पुनः पुनश्चिन्त्यः ॥१५॥**

**दृढतामुपैति वैराग्यभावना येन येन भावेन ।**
**तस्मिंस्तस्मिन् कार्यः कायमनोवाग्भिरभ्यासः ॥१६॥**

**माध्यस्थ्यं वैराग्यं विरागता शान्तिरुपशमः प्रशमः ।**
**दोषक्षयः कषायविजयश्च वैराग्यपर्यायाः ॥१७॥**

---

**( १५ ) टीका—**तथापरमप्युदाहरणमस्मिन्नेवार्थे[१]—**वृत्त्यर्थं कर्म यथेत्यादि** । वर्तनं वृत्तिरात्मनः कुटुम्बस्य वा पोषणं तदर्थम् । कृष्यादिकं कर्म करोति लोकः समुचित-धनधान्योऽपि प्रतिवर्षं महतीं सम्पदमिच्छन् प्रकर्षवतीम् । एवं विरागवार्ता । वृत्तिरस्या[२] विद्यत इति वार्ता । वैराग्यवृत्तिर्वैराग्ये वर्तनम् । तस्यां विरागवार्तायां यो हेतुः कारणं स पुनः पुनश्चिन्त्योऽभ्यसनीयः । स च हेतुः वैराग्यप्रख्यापकानि शास्त्राणि यान्यालोच्यालोच्य प्रतिक्षणं परित्यज्य रागादीन् वैराग्यमेवालम्बत इति ॥१५॥

**( १६ ) टीका—**तच्च वैराग्यमविच्छेदेन यथा न त्रुट्यत्यन्तराल एव तथानुष्ठेय-मित्याह—**दृढतामित्यादि** । वैराग्यवासना प्रतिदिनं येन येन भावेन जन्मजरामरणशरीराद्युत्तर-कारणालोचनादिना न विच्छिद्यते दृढतामेवोपैति । तत्र तत्राभ्यासः कार्यः कायमनोवाग्भिः । अथवा येन येन भावेनेति मनःपरिणामेनात्यर्थं निर्वेदसंवेगरूपेण भाव्यमानेन दृढीभवति वैराग्यं, तत्र विधेयोऽभ्यास इति ॥१६॥

**( १७ ) टीका—**सुखावबोधग्रन्थरचनार्थं वैराग्यार्थवाचिनः पर्यायशब्दानाचष्टे—

---

**( १५ ) ( वि० )** वृत्त्यर्थम्-जीवनार्थं, कर्म-कृष्यादिकम्, स यथा-यद्वत् तदेव कृष्यादिकं लोको-जनः, पुनः पुनरित्यादि सुगमम् ॥१५॥

**( १६ ) ( वि० )** इतो वैराग्यानयनोपायमाह—**दृढतामिति** । दृढतां-स्थैर्यमुपैति-गच्छति वैराग्यभावना-विरागतावासना येन येन भावेन-विशिष्टान्तःकरणाभिप्रायेण तस्मिंस्तस्मिन् कार्यो[१]-विधातव्यः । काभिः क इत्याह-कायमनोवाग्भिरभ्यास इति व्यक्तम् इत्यार्यार्थः ॥१६॥

**( १७ ) ( वि० )** अथ वैराग्यपर्यायानाह—**माध्यस्थ्यमिति** । सुगमम्, नवरम् अष्टौ वैराग्यपर्यायाः ॥१७॥

---

**( १५ ) ( अव० )—आजीवनाकृते कर्म-कृष्यादि, हेतुः-कारणम्, अभ्यसनीयः ॥१५॥**

**इच्छा मूर्च्छा कामः स्नेहो गार्ध्यं ममत्वमभिनन्दः ।**
**अभिलाष इत्यनेकानि रागपर्यायवचनानि ॥१८॥**

**ईर्ष्या रोषो दोषो द्वेषः परिवादमत्सरासूयाः ।**
**वैरप्रचण्डनाद्या नैके द्वेषस्य पर्यायाः ॥१९॥**

---

**माध्यस्थ्यमित्यादि** । अरागद्वेषवृत्तिर्मध्यस्थस्तस्य भावः कर्म वा माध्यस्थ्यम् । विगतरागद्वेषता वैराग्यम् । विगतो[१] रागो विरागस्तद्भावो विरागता । शमः शान्तिस्तेषामेव रागादीनामनु-दयाद्यवस्था । वैराग्यस्य सामीप्येन शम उपशमः । प्रकृष्टः शमो रागादीनामेव प्रशमः । दूषयन्तीति दोषाः अपूर्वकर्मोपादानेन जीवं कलुषयन्ति त एव रागादयस्तेषां [२]क्षय आत्यन्तिक उच्छेदः । कष्यन्तेऽस्मिन् जीवा इति कषः संसारस्तस्य आया उपादानकारणानीति कषायास्तेषां विजयोऽभिभवो निराकरणमेव एते सर्व एव वैराग्यपर्यायाः कथिताः ॥१७॥

**( १८ ) टीका—**विगतरागश्च[१] विरागः । कः पुनरयं रागो नाम ? । तमपि पर्यायद्वारेणाचष्टे—**इच्छेति** । इच्छा प्रीतिः रमणीयेषु योषिदादिष्वात्मपरिणामः । मूर्च्छा बाह्यवस्तुभिः सहैकीभवनाध्यवसायलक्षणः[२] परिणामः । कामः प्रार्थनाविशेषः इष्टस्य वस्तुनः । स्नेहः प्रतिविशिष्टप्रेमादिलक्षणः । गृद्धता गार्ध्यमभिकाङ्क्षाऽप्राप्त[३]वस्तुविषया । 'ममेदं वस्तु, अहमस्य स्वामी' इति चित्तपरिणामो ममत्वम् । इष्टवस्तुप्राप्तौ परितोषोऽभिनन्दः । अभिलषणमभिलाष इष्टप्राप्त्यर्थं मनोरथः । एवमेभिः पर्यायशब्दैर्योऽर्थोऽभिधीयते स रागः ॥१८॥

**( १९ ) टीका—**दोषक्षयो वैराग्यमित्युक्तम् । तत्र पर्यायकथनेन दोषं निरूपयति—**ईर्ष्येति** । परविभवादिदर्शनाच्चित्तपरिणामो जायते 'वियुज्यतामेष एतेन विभवेन ममैवास्तु विभवोऽन्यस्य मा भूद्'इतीर्ष्या । तथा सौभाग्यरूपलोकप्रियत्वादिविषया वाच्याः[१] । रोषः क्रोधः । दूषयतीति दोषः । [२]अप्रीतिलक्षणो द्वेषः । परदोषोत्कीर्तनं परिवादः । मां [३]सारयति छद्मयति सद्धर्मादिति मत्सरः । असूया त्वक्षमा । परस्परवधादिजनितकोपसमुत्थं वैरम् । प्रकृष्टं चण्डनं [४]प्रचण्डनं प्रकोपः शान्तस्यापि कोपाग्नेः सन्धुक्षणम् । एवमाद्या बहवोऽन्येऽपि द्वेषपर्यायाः ॥१९॥

---

**( १८ ) ( वि० )** वैराग्यं तु रागद्वेषाभावे स्याद्, अतस्तयोः पर्यायानार्याद्वयेनाह—**इच्छेति । ईर्ष्येति ।** व्यक्तम् । किन्तु रागस्याष्टौ पर्यायाः ॥१८॥

**( १९ ) ( वि० )** स्पष्टमेव, किन्तु द्वेषस्य नव नामानि-ईर्ष्या १ रोषः २ दोषः ३ द्वेषः ४ परिवादः ५ मत्सरः ६ असूया ७ वैरं ८ प्रचण्डनम् ९ इत्यादि । आदिशब्दादन्येऽपि ज्ञेया इति । आर्यात्रयेणा(येऽ)पि पदानां किञ्चिदर्थभेदोऽप्यस्ति स स्वधियाऽभ्यूह्य इति ॥१९॥

---

**( १८ ) ( अव० )—बाह्यवस्तुभिः सहैकीभावेनाध्यवसायः, इष्टप्राप्तौ तोषः ॥१८॥**

**रागद्वेषपरिगतो मिथ्यात्वोपहतकलुषया दृष्ट्या ।**
**पञ्चाश्रवमलबहुलार्त्तरौद्रतीव्राभिसन्धानः ॥२०॥**

---

**( २० ) टीका—**काः पुनः क्रियाः कुर्वन्नयमात्मा रागद्वेषवशगो भवतीति कारिकात्रयेण कुलकमाह—[१]**रागेति । कार्येति । क्लिष्टेति** । पर्यायद्वारेणोक्तौ रागद्वेषौ ताभ्यां परिगत-स्तादृशपरिणामयुक्तः । मिथ्यात्वं तत्त्वार्थाश्रद्धानमभिगृहीतानभिगृहीतसन्देहभेदात्त्रिविधम् । अभिगृहीतं त्रयाणां त्रिषष्ट्यधिकानां [२]परवादिशतानाम् । अनभिगृहीतमप्रतिपन्नदेवतापाखण्डरूपम् । सन्दिग्धमेकस्याप्यक्षरस्य पदस्य वाप्यरोचनान्मिथ्यादर्शनम् । तेनोपहतत्वात् कलुषा दृष्टिर्बुद्धि-र्मलिनेत्यर्थः । तयेत्थंभूतया दृशा बुद्ध्या करणभूतया । पञ्चाश्रवाः पञ्चेन्द्रियाणि प्राणातिपातादीनि वा । आश्रवन्त्याददते कर्मेत्याश्रवाः । पञ्चाश्रवोपात्तकर्मणैव मलबहुल उपचितकर्मराशिः । आर्तं चतुर्धा । अमनोज्ञविषयसम्प्रयोगे सति तद्वियोगैकतानो मनोनिरोधो ध्यानं, तथासद्वेदनायाः, तथामनोज्ञविषयसम्प्रयोगे तदविप्रयोगैकतानश्चित्तनिरोधः तृतीयमार्तं, चक्रवर्त्यादीना-मृद्धिदर्शनान्ममाप्यमुष्य तपसः फलमेवंविधमेव स्यादन्यजन्मनीति चित्तनिरोधः चतुर्थमार्तं निदानकरण[३]मिति । ऋतमिति दुःखं सङ्क्लेशस्तत्र भवमार्तमिति । [४]रौद्रः क्रूरो नृशंसस्तस्येदं रौद्रं । तदपि चतुर्धा । तत्र प्रथमं हिंसानुबन्धि । 'अनेनानेनोपा[५]येन परा[६] गलकूटपाशबन्धादिना प्राणिनो व्यापाद्या' इति तत्रैकतानता मनोनिरोधो रौद्रं ध्यानम् । द्वितीयमनृतानुबन्धि येन येनोपायेन वञ्च्यते कूटसाक्षिदानादिना तत्रैकतानं मनो [७]रौद्रम् । तृतीयं स्तेयानुबन्धि येन येन प्रकारेण परस्वमादीयते घुर्घुरुक-कर्तरिकाच्छेद-[८]क्षात्रखननादिना तत्रैकतानं मनो रौद्रम् । धनधान्यादि-विषयसंरक्षणैकतानं मनो दिवानिशि तुरीयं रौद्रम् । अभिसन्धानमभिसन्धिरभिप्रायः । स चार्तरौद्रध्यानयो[९]स्तीव्रः प्रकृष्टोऽभिसन्धिः पञ्चाश्रवमलबहुलश्चासावार्तरौद्रतीव्राभिसन्धानश्चेति ॥२०॥

---

**( २० ) ( वि० )** अथ यादृश आत्माऽनयोरुदये भवति तादृशमार्याचतुष्टयेनाह—**रागेति । कार्येति । क्लिष्टेति । दुःखेति** । रागद्वेषाभ्यां परिगतो व्याप्त इति समासः । मिथ्यात्वेनोपहता मिथ्यात्वोपहता सा चासौ कलुषा च-मलिना सा तथा तया । कया एवंविधया ?-दृष्ट्या बोधरूपया करणभूतया । किमित्याह-पञ्चास्रवाः-प्राणातिपातादयः, तैः करणभूतैर्मलः-कर्मबन्धस्तेन बहुलो-व्याप्तः स तथा तया स चासावार्तरौद्रयोस्तीव्राभिसन्धानश्च गाढचिन्तनः स तथेति समास इति ॥२०॥

---

**( २० )( अव० )—मिथ्यात्वोपहतकलुषया दृष्ट्या विपरीतया युक्तः । मल-उपचितकर्मराशिः पञ्चाश्रवमलबहुलश्चा[१]सावार्तरौद्रतीव्राभिसन्धानश्च । अभिसन्धानं तीव्राध्यवसायः ॥२०॥**

**कार्याकार्यविनिश्चयसङ्क्लेशविशुद्धिलक्षणैर्मूढः ।**
**आहारभयपरिग्रहमैथुनसञ्ज्ञाकलिग्रस्तः ॥२१॥**

**क्लिष्टाष्टकर्मबन्धनबद्धनिकाचितगुरुर्गतिशतेषु ।**
**जन्ममरणैरजस्त्रं बहुविधपरिवर्तनाभ्रान्तः ॥२२॥**

---

**( २१ ) टीका—**[१]कार्यं जीवरक्षादिकम्, अकार्यं जीवववधादिकम्। तयोर्विनिश्चयो[२] निर्णयः स तथा। सङ्क्लेशः कालुष्यम्। विशुद्धिर्नैर्मल्यम्। तयोः क्लिष्टचित्ततानिर्मलचित्ततारूपयो-र्लक्षणानि परिज्ञानानि। तथा तानि चेति समासः। तैः करणभूतैर्मूढो मुग्धः। तथा आहारभयपरिग्रह-मैथुनसञ्ज्ञाः प्रसिद्धरूपास्ता एव कलयः कलहाः, कलिहेतुत्वात्। तैर्ग्रस्त आघ्रात इति ॥२१॥

**( २२ ) टीका—**गतिशतेषु बह्वीषु [१]गतिषु। पुनः पुनरावृत्त्या [२]भ्रमन्। क्लिष्टः। अष्टभिः कर्मभिर्बन्धनं तेन बद्धः। बद्धनिकाचितत्वाद् गुरुः। [३]जन्मजरामरणानि तैः। अजस्त्रं पुनः पुनः। बहुविधपरिवर्तनमनेकाकारमतो भ्रान्तः परिवर्तनेन ॥२२॥

---

**( २१ )( वि० )** कार्यं जीवरक्षादिकम् अकार्यं-जीववधादिकम् तयोर्विनिश्चयो-निर्णयः स तथा, स च सङ्क्लेशः-कालुष्यम्, विशुद्धिः-नैर्मल्यम्, तयोः क्लिष्टचित्ततानिर्मलचित्ततारूपयोर्लक्षणानिपरिज्ञानानि [१]तानि च तथा तानि चेति समासः, तैः करणभूतैर्मूढो-मुग्धः, तथा आहारभयपरिग्रहमैथुनसञ्ज्ञाः- प्रसिद्धरूपास्ता एव कलयः-कलहाः कलिहेतुत्वात् तैर्ग्रस्तः-आघ्रात इति समास इति ॥२१॥

**( २२ ) ( वि० )** क्लिष्टानि च तानि क्रूराण्यष्टकर्मा[२]णि च [१]बद्धानि प्रसिद्धानि तानि तथा, तान्येव बन्धनं-नियन्त्रणम्, तेन बद्धो-नियन्त्रितः, स चासौ निकाचितश्चेति नियन्त्रितः स तथा, अत एव गुरुः-भाराक्रान्तः, ततः कर्मधारयः। यद्वा क्लिष्टाष्टकर्मणाम् उपलक्षणत्वेन बन्धनबद्धनिधत्तनिकाचितानि कृतद्वन्द्वानीति चत्वारि पदानि दृश्यानि तैर्गुरुः स तथा। अत्र लोहमयः सूचीकलापो दृष्टान्तः, यथा बन्धनं-स्पृष्टं दवरकबद्धसूचीनां मीलनमात्रमिव गुरुकर्मणाम् जीवप्रदेशैः सह योगमात्रमल्पप्रयाससाध्यम् १ तथा बद्धं-सूचीकलापस्य [३]खपरिकयाऽन्योन्यबन्धनमिव तेषां तैः सह २ तथा धत्तं-[४]ध्मातं सूचीनां परस्परसम[५]लुलितत्वमिव, शेषं तथैव ३ तथा निकाचितं-वह्नितप्तकुट्टितसूचीनां निर्नष्टविभागत्वमिव, शेषं तथैव ४। केष्वेवं बन्धो ?-गतिशतेषु, कैः करणभूतैः ?-जन्ममरणैरजस्त्रम्-अनवरतम् बहुविधपरिवर्तनाभ्रान्तः-अनेकप्रकारघोलनापर्यटित इति ॥२२॥

---

**( २१ ) ( अव० ) विनि०( श्चयः )-निर्णयः,[१] सङ्क्लेशः-कालुष्यं विशुद्धिर्नैर्मल्यं तयोर्लक्षणं परिज्ञानम्। सञ्ज्ञा एव कलयः ॥२१॥**

**( २२ ) ( अव० ) बन्धनं-स्पृष्टं बन्धमात्रं दवरकबद्धसूचीकलापवत्, [१]ध्मातं-सूचीनां परस्परसंलुलितमिव, निकाचितं वह्नितप्त[२]कुट्टितसूचीकलापवत्, निरन्तरं बहुविध[३]घोलनाद् भ्रान्तः ॥२२॥**

**दुःखसहस्त्रनिरन्तरगुरुभाराक्रान्तकर्षितः करुणः ।**
**विषयसुखानुगततृषः कषायवक्तव्यतामेति ॥२३॥**

**स क्रोधमानमायालोभैरतिदुर्जयैः परामृष्टः ।**
**प्राप्नोति याननर्थान् कस्तानुद्देष्टुमपि शक्तः ? ॥२४॥**

---

**( २३ ) टीका—दुःखसहस्त्रमित्यादि** । बाहुल्यप्रतिपादनार्थं सहस्त्रग्रहणम् । दुःखसहस्राण्येव निरन्तराण्यविच्छिन्नानि[१] [२]नरकतिर्यङ्मनुष्यामरभवेषु गुरुर्भारस्तेनाक्रान्तत्वादवष्टब्धत्वात् कर्षितः कृशतां नीतो [३]दुर्बलतां नीतो दुर्बलतां गत इति यावत् । करुणास्पदत्वात् करुणः । तृष्यतीति तृषः [४]पिपासितः । विषयाः शब्दादयः । तज्जनितं सुखं विषयसुखम् । तदनुगतस्तत्रासक्तो विषयसुखानुगतश्चासौ तृषश्चेति विषयसुखानुगततृषः । उपजातविषयसुखोऽपि पुनस्तृष्यति विशिष्ट-तरमभिलषतीत्यर्थः । एवंविधो जीवः कषायाणां क्रोधादीनां वक्तव्यतामेति । क्रोधी मानी मायावी लोभवांश्चेति । उक्तलक्षणः कषायशब्दः कषायैर्वक्तव्यः क्रोधादिभिरित्यर्थः ॥२३॥

**( २४ ) टीका—**स पुनः कषायवक्तव्यतां गतः[१] किमवाप्नोतीत्याह**—स क्रोध-मानमायेत्यादि** । स खल्वेवंविधः समुपजातकषायपरिणामः । क्रोधादिभिः परामृष्टः । अतीव दुर्जयैरिति नाल्पसत्त्वैर्जेतुं शक्याः कषाया इति दुर्जयास्तैः[२] परामृष्टः परिभूतः कषायवशंगत इत्यर्थः । प्राप्नोति याननर्थानापद्विशेषान् वधबन्धादीन् । कस्तान[३]नर्थान् वचनमात्रेणापि

---

**( २३ ) ( वि० )** दुःखसहस्राण्येव निरन्तरो-विश्रामरहितो गुरुः-महान् भारस्तेन आक्रान्तः-पीडितः स तथा, तथा कर्षितो-विलिखितः, क्वापि कर्शित इति दृश्यते, तत्र कर्शितो-दुर्बलीभूतः, ततः पदद्वयस्य कर्मधारयः । तथा करुणः-दीनः । तथा अनुगतः, ईषदासक्तस्तृष्यतीति तृषः-प्राचुर्येण पिपासितः, ततः पदद्वयस्य कर्मधारयः । ततो विषयसुखेष्वनुगततृष इति समासः । अन्ये त्वनुगततृषः कृताभिलाष इत्याहुः । स किमित्याह-कषायवक्तव्यतामेति -क्रोधादिवा(मा)नेष इति भणनीयतां याति । इत्यार्याचतुष्टयस्यार्थः, ॥२३॥ **इति शास्त्रस्य पीठबन्धः ॥१॥**

**( २४ ) ( वि० )** स कषायवक्तव्यतानुगतः प्राणी यानपायान् प्राप्नोति तद्गणनेऽशक्तिमाह**— स इति** । स जीवः क्रोधादिभिरतिदुर्जयैः-कष्टेनाभिभवनीयैः परामृष्टो-वशीकृतः । किमित्याह-प्राप्नोति-लभते, यान् कांश्चिद् अनर्थान्-अपायान्, कः ?, न कश्चिदित्यर्थः । ताननर्थानुद्देष्टुमपि-

---

**( २३ ) ( अव० )—कर्षितो विलक्षितः,[१] कृशो दीनः, अनुगत आसक्तनवनवाभिलाषः, क्रोधी मानीत्यादिकथनीयताम् ॥२३॥**

**( २४ ) ( अव० )—वक्तुमपि शक्तः आस्तां परिहर्तुम् ॥२४॥**

**क्रोधात् प्रीतिविनाशं मानाद् विनयोपघातमाप्नोति ।**
**शाठ्यात् प्रत्ययहानिं सर्वगुणविनाशनं लोभात् ॥२५॥**
**क्रोधः परितापकरः सर्वस्योद्वेगकारकः क्रोधः ।**
**वैरानुषङ्गजनकः क्रोधः क्रोधः सुगतिहन्ता ॥२६॥**

---

नाममात्रेणापि व्याख्यातुं समर्थः । अनर्थभूयसि संसारे [४]कियन्तोऽनर्था नामग्राहं प्रतिपादयितुं [५]शक्येरन् ? ॥२४॥

**( २५ ) टीका—**यद्यपि सकलानर्थानाख्यातुं[१] न शक्यन्ते तथापि स्थूलतरकतिपयानर्थाख्यानमपायेभ्यो भव्यांश्छोटयत्येवेत्याह—**क्रोधादिति** । क्रोधनं क्रोधः आत्मनः परिणामो मोहकर्मोदयजनितस्तस्मादेवंविधात्परिणामादिहलोके एव प्रीतिव्यवच्छेदो भवतीति प्रियतमैरपि साकम् । व्यवच्छिन्नायां च प्रीतावनिर्वृतिरात्मनः । मानो गर्वस्तम्भोऽहमेव ज्ञानी दाता शूर इत्यादिक आत्मपरिणामस्तस्माद्विनयोपघातमवाप्नोति[२] । विनयमूलश्च धर्मः । देवगुरुसाधुवृद्धेषु यथायोग्यं विनयः कार्यः । स चोपजातगर्वपरिणामस्य विहन्यते विच्छिद्यत इति दोषः । शाठ्यपरिणामो माया तस्मात्प्रत्ययहानिं । प्रत्ययो लोकव्यवहारप्रसिद्ध्या क्वचित्पुरुषे सत्यवादित्वं न्यासकप्रत्यर्पणं चेत्यादि । तद्धानिः असत्यभाषणं[३] शाठ्यपरिणामात् न्यासकापह्नवश्चेति । तृष्णा लोभपरिणाम आत्मनस्तस्माच्च सर्वगुणविनाशभाग्भवति । सर्वे च ते गुणाश्च [४]क्षमार्जवादयस्तान् लोभाभिभूतः समूलकाषं कषति । आप्नोतीति मध्यवर्तिना क्रियापदेन सर्वत्राभिसम्बन्धः ॥२५॥

**( २६ ) टीका—**सम्प्रत्येकैकस्य क्रोधादेः कषायस्य [१]व्यासेनापायानाह—**क्रोध इति** । परितापो हि दाहज्वराभिभूतस्येव क्रोधिनः [२]परिदहनमस्वस्थतोद्वेगो भयम् । सर्वस्येति नारकतिर्यङ्मनुष्यदेवाख्यस्यात्मनो भयमुत्पादयति । कुतश्चिन्निमित्तादुत्पन्नो वधबन्धनाभिघातादिसन्तानो वैरं तस्यानुषङ्गोऽनुबन्धोऽन्वयस्तं जनयत्युत्पादयति । क्रोधः सुगतिर्मोक्षस्तां हन्ति । मुक्त्यप्रापणसामर्थ्याद्धन्तीत्युच्यते । क्रोधाविष्टाश्च सुभौ[३]मपरशुरामादयः श्रूयन्ते दुर्गतिगामिनः पारमर्षे प्रवचने । तस्मादिहपरलोकयोरपायकारी क्रोध इति युक्तः परिहर्तुम् ॥२६॥

---

भणितुमपि, आस्तां परिहर्तुम्, शक्तः-समर्थो, भवतीति शेषः इत्यार्यार्थः ॥२४॥

**( २५ ) ( वि० )** तानेव लेशत आह—**क्रोधादिति** । आप्नोतीति क्रियापदं चतुर्ष्वपि पदेषु योज्यम् । शेषं सुगममिति ॥२५॥

---

**( २५ ) ( अव० )—[१]आप्नोतीति [२]चतुःष्वपि पदेषु योज्यम् ॥२५॥**

**श्रुतशीलविनयसन्दूषणस्य धर्मार्थकामविघ्नस्य ।**
**मानस्य कोऽवकाशं मुहूर्तमपि पण्डितो दद्यात् ॥२७॥**

**मायाशीलः पुरुषो यद्यपि न करोति किञ्चिदपराधम् ।**
**सर्प इवाविश्वास्यो भवति तथाप्यात्मदोषहतः ॥२८॥**

---

**( २७ ) टीका—श्रुतेति** । श्रुतमागमः शील[१] सर्वज्ञप्रणीतागमानुसारि क्रियानुष्ठानम् । उभयमप्येतद् गर्वो भृशं दूषयति । श्रुतवानप्ययमेवं गर्वितः । श्रुतेन तु मानत्यागः कार्य इति श्रूयते, अयं तु तेनैव मत्तो-मानी जातः । नन्वेवं श्रुतवतो दूषणं कृतं भवति न श्रुतस्य, उच्यते—श्रुतमपि दूषितं भवति, श्रुतकार्याकरणात् । ज्ञानेन हि मदो निर्मथ्यते, न चासौ निर्मथित इति श्रुतमेव दूषितं भवति । अभेदो वा ज्ञानज्ञानिनोरिति न दोषः । एवं शीलमपि वाच्यं विनयरहितत्वाद्दुःशील एवायमिति । धर्मार्थकामानां विघ्नकारी मानः । धर्मस्य विनयमूलत्वाद्धर्मविघ्नकारी मानः । तदनुष्ठानशून्यत्वादर्थो[२]त्पादनस्यापि प्रत्यूहकारी । यतो राजादयः सेवकस्य [३]विनयवत एवार्थेन सह योजनं कुर्वन्ति नेतरस्य । कामस्यापि सम्प्राप्तिर्विनयसम्पन्नस्यैव भवति । कुलयोषितां वेश्यानां च चित्तानुरोधलक्षणया चेष्टया कामी सुखभाग्भ[४]वति । एवंविधस्य गर्वस्यावकाशं ढौकनमात्मनि क्षणमात्रमपि मतिमान् को दद्यात् ? इति, नैव कश्चिद् गुणदोषज्ञो दद्यादित्यर्थः ॥२७॥

**( २८ ) टीका—मायाशीलः पुरुषो यद्यपि न केत्यादि** । माया शाठ्यमनार्जवं तच्छीलस्तत्स्वभाव आत्मा । यद्यपि न [१]क्व(किं)चिदप्यपराधं करोति मायाजनितं । [२]सम्भावितश्च मायावित्वेन पूर्वे दृष्टदोषः । सम्प्रति तु विरतस्तद्दोषात् । तथाप्यात्मीयेनैव दोषेणोपहतो भवति । भुजङ्गव[३]दविश्वसनीयोऽविश्वास्यः । उद्धृतदंष्ट्रोऽपि भुजङ्गो दूरात् परिह्रियते लोकेनेति । शुका[४]दयो मायाफलभाजः श्रूयन्त एवेति ॥२८॥

---

**( २६-२७ ) ( वि० )** अथ प्रत्येकमार्याचतुष्टयेन कषायदोषानाह—**क्रोध इत्यादि** । आर्याद्वयमपि सुगमम् ॥२६॥२७॥

**( २८ ) ( वि० )** मायाशीलः-शाठ्यस्वभावः पुरुषो यद्यपि न करोति किञ्चिदपराधमिति व्यक्तम् तथाप्यात्मदोषहतः-स्वदूषणतिरस्कृत [१]इत्यविश्वास्यो भवति । [२]किंवत् ? सर्पवत्-सर्प इव । यथा सर्प उत्खातदशनोऽप्यविश्वसनीयो भवति एवं मायाव्यपि नर इत्यार्यार्थः ॥२८॥

---

**( २८ ) ( अव० )—आत्मीयेनैव दोषेणोपहतो भवति ॥२८॥**

**सर्वविनाशाश्रयिणः सर्वव्यसनैकराजमार्गस्य ।**
**लोभस्य को मुखगतः क्षणमपि दुःखान्तरमुपेयात् ? ॥२९॥**
**एवं क्रोधो मानो माया लोभश्च दुःखहेतुत्वात् ।**
**सत्त्वानां भवसंसारदुर्गमार्गप्रणेतारः ॥३०॥**

---

**( २९ ) टीका—सर्वविनाशाश्रेत्यादि ।** सर्वेषां विनाशानामपायानामाश्रयो लोभः-स्थानमुपघ्नः[१] । चौरपारदारिकवैरसन्तानादयः [२]सर्वे विनाशाश्चौर्यादिनिमित्ताः । सर्वविनाशा-[३]श्रयणशीलः सर्वविनाशाश्रयी । सर्वाणि व्यसनानि स्त्रीद्यूतमद्यपानाखेटकवचनदण्ड-पारुष्यार्थदूषणाख्यानि । हिताद् व्यंसयन्ति पुरुषमिति व्यसनानि । तेषामेष लोभकषाय एको राजमार्गः । सर्वाणि व्यसनानि लोभाभिभूतं योग्यमाश्रयमासाद्य विश्राम्यन्ति । राजमार्गो हि द्विजादिभिश्चाण्डालादिभिश्च सर्वैः क्षुद्यते यथा, तथा लोभ एव [४]राजमार्ग इव राजमार्गः सर्वव्यसनैः क्षुद्यते । एवंविधस्य लोभस्य मुखगतो गोचरीभूतो लोभपरिणामभाक् । कः खलु दुःखान्तरं-सुखं, दुःखादन्यत्सुखमुपेयादुपगच्छेदिति प्रतीतिन्यायाद् ग्राह्यं सुखमेवेति । नैव कदाचित्सुखं प्राप्नुयादित्यर्थः ॥२९॥

**( ३० ) टीका—**सम्प्रति बहुदोषं [१]कषायार्थमुपसंहरन्नाह—**एवं क्रोधो मानो मायेत्यादि ।** सर्व एते [२]कषायास्तीव्रस्य प्रकर्षप्राप्तस्य नरकगत्यादिदुःखस्य हेतवो जनकाः कारणभूता इति । केषां दुःखहेतवः ? सत्त्वानां प्राणिनाम् । दुःखहेतुत्वाच्च भवसंसारदुर्गमार्गप्रणेतारो भवन्ति । भवो नरकादिजन्म तदेव संसारः पुनः पुनर्गमनाद्दुर्गो विषमो भयानकस्तस्य यो मार्गः पन्थास्तस्य प्रणेतारः प्रवर्तका नायका देशकाः । कः पुनरसौ मार्गः ? हिंसानृताद्याचरणलक्षणः ॥३०॥

---

**( २९ ) ( वि० )** सर्वविनाशाश्रयिणः-निखिलापायभागिनः[१] सर्वव्यसनानां-द्यूतादीना-मेकः-अद्वितीयो राजमार्गः-सर्वसञ्चरणपथः, तस्य लोभस्य को मुखगतो-ग्रासीभूतः, क्षणमपि-स्तोककालमपि, आस्तां प्रभूतकालम्, दुःखान्तरम्-असातव्यवधानमुपेयात्-गच्छेत् ? । इत्यार्याचतुष्टयार्थः ॥२९॥

**( ३० ) ( वि० )** अथ सामान्येनैषां भवमार्गनायकत्वमाह—**एवमिति** । एते क्रोधादयो दुःखहेतुत्वात् सत्त्वानां-जीवानाम्, कथम्भूता भवन्तीत्याह-भवे-नरकादौ, संसारः संसरणं तत्र दुर्गमार्गो-विषमाध्वा तस्य प्रणेतारो-नायका इत्यार्यार्थः ॥३०॥ **इति कषायाधिकारः ॥२॥**

---

**( २९ ) ( अव० ) सर्वेषामपायानां स्थानस्य, [१]निखिलापायभागिनः द्यूतादिसर्व-व्यसनराजमार्गस्य सर्वसञ्चरणपथस्य ग्रासीभूतः क्षणमपि स्तोककालमपि आस्तां प्रभूतकालं दुःखादन्यत् सुखमुपगच्छेदिति प्रतीतिः ॥२९॥**

**( ३० ) ( अव० ) भवे नरकादौ संसरणं, तत्र दुर्गमार्गो विषमाध्वा तस्य प्रणेतारो [१]प्ररूपका नायका[२] कारणभूतत्वात् ॥३०॥**

**ममकाराहङ्कारावेषां मूलं पदद्वयं भवति ।**
**रागद्वेषावित्यपि तस्यैवान्यस्तु पर्यायः ॥३१॥**

**मायालोभकषायश्चेत्येतद्रागसञ्ज्ञितं द्वन्द्वम् ।**
**क्रोधो मानश्च पुनर्द्वेष इति समासनिर्दिष्टः ॥३२॥**

---

**( ३१ ) टीका—**एषामेव कषायाणामाद्यविकल्पद्वयप्रदर्शनार्थमाह—**ममकाराहङ्कारेत्यादिति** । ममकारो ममत्वं ममेदमिति[1] मायालोभकषाययोर्ग्रहणम् । अहंकारो गर्वः स चाभिमानक्रोधलक्षणः । मायामपि द्रव्योत्पादनाय वणिजः कुर्वन्ति क्रयविक्रयादिष्वतो ममकारान्तःपातिन्येव । क्रोधो ह्यभिमानादेव क्रियते । किमित्ययं मामाक्रोशतीत्याहन्ति वा जघन्यः सन्नित्यतोऽहङ्कार एवैषामिति क्रोधादीनां मूलं बीजमेतदेव पदद्वयं ममकारोऽहङ्कार इति च । तथा[2] रागद्वेषावपि बीजभूतौ [3]क्रोधादीनां द्रष्टव्यौ । तस्यैव पदद्वयस्यापरः पर्यायो ममकारो रागोऽहङ्कारो द्वेषः ॥३१॥

**( ३२ ) टीका—**अथैषां क्रोधादीनां चतुर्णां कषायाणां को रागः को वा द्वेष[1] इत्याह—**मायालोभकषायेत्यादि** । उक्तलक्षणौ मायालोभौ । तावेव द्वन्द्वं मिथुनं रागसञ्ज्ञितं रागनामकम् । क्रोधमानौ चोक्तलक्षणावेव । एतदपि द्वन्द्वं द्वयं द्वेष इति निर्दिश्यते सङ्क्षेपतः ॥३२॥

---

**( ३१ ) ( वि० )** अथ मूलभणनपूर्वं पृथक्पदद्वयेनैषाम् अन्तर्भावमार्याद्वयेनाह—**ममकारेति** । **मायेति** । ममकारो-ममेदम् अहमस्य स्वामीत्याद्य[1]ध्यवसायः । अहङ्कारस्त्वहमेव प्रधानोऽन्यो ममाधम इत्यादिपरिणामस्तौ । तथा किमित्याह-एषां कषायाणां मूलं-बीजम् उत्थानमित्यर्थः । पदद्वयमुक्तस्वरूपं भवति-जायते । तत्र ममकारे मायालोभौ, अहङ्कारे क्रोधमानौ स्तः, इत्याभ्यां चत्वारोऽपि कषाया गृहीताः । तथा रागद्वेषौ-प्रीत्यप्रीती क्रोधादीनामुत्थानभूताविति प्रक्रम इति, अपिशब्द उपप्रदर्शनार्थः । तस्यैव-ममकाराहङ्कार[2]पदद्वयस्यैव, अन्यः-अपरः, तुः समुच्चयार्थः, पर्यायो-नामान्तरम्, भावार्थः प्राग्वदिति ॥३१॥

**( ३२ ) ( वि० )** सुगमम् । किन्तु द्वन्द्वं युग्मं समासः-सङ्क्षेपार्थो, भावार्थस्तु पूर्वार्याभावनातोऽवसेय इति ॥३२॥

---

**( ३१ ) ( अव० )—ममकाराहङ्कारयो रागद्वेषावपरपर्यायः पदद्वयस्य [1]पर्यायो नामान्तरम् ॥३१॥**

**( ३२ ) ( अव० )—द्वन्द्वं युगलं, समासः सङ्क्षेपः ॥३२॥**

**मिथ्यादृष्ट्यविरमणप्रमादयोगास्तयोर्बलं दृष्टम् ।**
**तदुपगृहीतावष्टविधकर्मबन्धस्य हेतू तौ ॥३३॥**

**स ज्ञान-दर्शनावरण-वेद्य-मोहायुषां तथा नाम्नः ।**
**गोत्रान्तराययोश्चेति कर्मबन्धोऽष्टधा मौलः ॥३४॥**

---

**( ३३ ) टीका—**तौ पुनर्ममकाराहङ्कारौ रागद्वेषौ वा किं केवलावेव ज्ञानावरणीयादिकर्मबन्धे पर्याप्तौ [१]अन्यथान्यमपि कञ्चित्सहायमपेक्षेते इत्याह—**मिथ्यादृष्ट्यविरमणेत्यादि ।** [२]मिथ्यादर्शनं [३]तत्पूर्वमुक्तं तत्त्वार्थाश्रद्धानलक्षणम् । अविरमणमविरतिरनिवृत्तिः । पापाशयाद्विषयेन्द्रिय-निद्राविकथाख्यश्चतुर्विधः प्रमादः । मनोवाक्कायाख्या योगाः । एतांश्चतुरः सहायानपेक्षेते ममकाराहङ्कारौ रागद्वेषौ वा कर्मणि बन्धितव्ये । तयोरित्ये[४]तावदेव [५]सम्बध्यते । बलमित्युपकारकत्वम् । उपकारका मिथ्यादर्शनादयः । तयो रागद्वेषयोः । तैश्चोपगृहीतावेतौ । मिथ्यादर्शनादिभी रागद्वेषावष्टप्रकारस्य कर्मबन्धस्य हेतुत्वं प्रतिपद्येते इति ॥३३॥

**( ३४ ) टीका—**[१]अष्टविधबन्धमादर्शयन्नाह—**स ज्ञानदर्शनावरणेत्यादि** । स खलु तद्धेतुकः कर्मबन्धो ज्ञानावरणीयादिभेदेनाष्टधा भवति । ज्ञानावरणं दर्शनावरणं वेद्यं मोहनीयमायुर्नाम गोत्रमन्तरायमित्यष्टौ मूलभेदाः । क्षयोपशमजं क्षायिकं [२]वा ज्ञानमाव्रियते येन कर्मणा तज्ज्ञानावरणम् । चक्षुर्दर्शनाद्याव्रियते येन[३] तद्दर्शनावरणं, निद्रादिपञ्चकं च, तदपि हि दर्शनमावृणोत्येव । वेद्यं सुखानुभवलक्षणं दुःखानुभवलक्षणं च। मुह्यत्यनेन जीव इति

---

**( ३३ ) ( वि० )** अनन्तरं रागद्वेषा[१](वुक्ता)वथ तयोरेव [२]सैन्यसामर्थ्यमाह—**मिथ्यादृष्ट्येति** । मिथ्यादृष्टिः मिथ्यात्वम्-आभिग्रहिकादि पञ्चधा । [३]अविरमणम्-अविरतिः पृथिव्यादिषु द्वादशविधम्, प्रमादो-मद्यादिः पञ्चप्रकारः, योगाः-सत्यादयः पञ्चदशविधाः, ततो द्वन्द्वः ते । तयोः-अनयो रागद्वेषयोर्बलम्-आदेशकारि सैन्यम्, दृष्टं-जिनैः कथितम्, तैरुपगृहीतौ-मिथ्यात्वादिभिः कृतसामर्थ्यौ सन्तावष्टविधकर्मबन्धस्य हेतू-कारणे भवतः ॥३३॥ **इति रागाद्यधिकारः ॥३॥**

**( ३४ ) ( वि० )** तं कर्मबन्धं मूलत आह—**स इति** । कर्मणां बन्धः कर्मबन्धः स पूर्वोद्दिष्टोऽष्टधा भवतीति सम्बन्धः । कीदृशः ?-मौलो-मूलप्रकृतिसम्बन्धी । किंनाम्नां कर्मणामत

---

**( ३३ ) ( अव० ) मिथ्यादर्शनं तत्त्वार्था[१]श्रद्धानलक्षणम्, [२]अविरतिः, प्रमादो मद्यादिः, योगाः सत्यादयः, तन्मिथ्यात्वाविरतिप्रमादादियुतौ रागद्वेषौ ॥३३॥**

**( ३४ ) ( अव० ) मूलप्रकृतिसम्बन्धी[१] ॥३४॥**

**पञ्चनवद्व्यष्टाविंशतिकश्चतु:षट्कसप्तगुणभेदः ।**
**द्विपञ्चभेद इति सप्तनवतिभेदस्तथोत्तरतः ॥३५॥**

---

मोहोऽनन्तानुबन्ध्यादिः । यस्य कर्मणः प्रसादाज्जीवतीत्युच्यते प्राणान् धारयते[४] तदायुः । नाम्यन्ते प्राप्यन्ते येन गतिजात्यादिस्थानानि तन्नाम । विशिष्टकुलजात्यैश्वर्यादिप्रापण-समर्थमुच्चैर्गोत्रं, तद्विपरीतं नीचैर्गोत्रम् । दानलाभादिविघ्नकारि चान्तरायमिति। मूले भवो मौलः कर्मबन्धः ॥३४॥

**( ३५ ) टीका—**यद्येष मौलोऽष्टविधोऽथोत्तरः कतिविध इत्याह—**पञ्च नवेत्यादि** । ज्ञानावरणस्योत्तरभेदाः[२][१] पञ्च मतिज्ञानावरणादयः । दर्शनावरणस्योत्तरप्रकृतयो नव चक्षुर्दर्शनावरणादिचतुष्टयं निद्रापञ्चकं च । वेदनीयं द्विविधं सद्वेद्यमसद्वेद्यं च । मोहोत्तरप्रकृतयोऽष्टाविंशतिः[२] सम्यक्त्वं मिथ्यात्वं सम्यङ्मिथ्यात्वम्, अनन्तानुबन्धिनश्चत्वारः क्रोधादयः, अप्रत्याख्यानाश्चत्वारः, प्रत्याख्यानावरणाश्चत्वारः, सञ्ज्वलनाश्चत्वारः, हास्यं रतिः अरतिः भयं शोको जुगुप्सा च, [३]स्त्रीवेदः पुंवेदः नपुंसकवेदश्चेति । आयुषश्चतस्र उत्तरप्रकृतयो नारकायुस्तिर्यगायुर्मनुष्यायुर्देवायुरिति । षट् सप्तगुणा द्विचत्वारिंशद्भवति[४] । अतो नामकर्मण उत्तरप्रकृतयो द्विचत्वारिंशद् भवन्ति । प्रतिपदपाठात्तु श्रूयन्ते तद्यथा—गतिनाम जातिनाम शरीरनाम अङ्गोपाङ्गनाम निर्माणनाम [५]बन्धननाम संस्थाननाम सङ्घातनाम संहनननाम स्पर्शनाम रसनाम वर्णनाम गन्धनाम आनुपूर्वीनाम अगुरुलघुनाम उपघातनाम पराघातनाम

---

आह-ज्ञानदर्शनयोरावरणशब्दस्य प्रत्येकमभिसम्बन्धात् ज्ञानावरणदर्शनावरणवेद्यमोहायुषां कृतद्वन्द्वानां तथा नाम्नो गोत्रान्तराययोश्चेति ॥३४॥

**( ३५ ) ( वि० )** अथोत्तरः स कतिविध इत्याह—**पञ्चेति** । सप्त गुणा यस्य स सप्तगुणः, षट्कश्चासौ सप्तगुणश्च षट्कसप्तगुणो-द्विचत्वारिंशत्, पञ्च च नव च द्वौ [१]चाष्टाविंशतिका चत्वारश्च षट्कसप्तगुणश्च ते तथाविधाः, ते भेदाः-प्रकारा यस्य स तथा, कर्मबन्ध इति योगः । **'याकारा'विति (   )** सूत्रेण ह्रस्वत्वं विंशतिकाशब्दे । तथा द्विश्च पञ्च च द्विःपञ्च ते भेदा यस्य स तथा, इत्येवमेकत्र[२] मिलने सप्तनवतिभेदा भवन्तीति शेषः। तथा समुच्चयार्थः, उत्तरतः-उत्तरभेदानाश्रित्य । अयमर्थः-ज्ञानावरणीयमुत्तरभेदापेक्षया मतिज्ञानावरणीयादि पञ्चधा । एवं दर्शनावरणीयं चक्षुर्दर्शनावरणादिचतुष्कं निद्रापञ्चकं चेति नवविधम् । वेदनीयं तु सातासातरूपं द्वेधा। मोहनीयं पुनर्द्विधा दर्शनमोहनीयं चारित्रमोहनीयं च, तत्र मिथ्यात्वमिश्रसम्यक्त्वभेदात् दर्शनमोहनीयं त्रिधा, अनन्तानुबन्धिप्रभृतिकषायषोडशक-हास्यादिषट्कवेदत्रिकभेदाच्चारित्रमोहनीयं पञ्च-

आतपनाम उद्योतनाम उच्छ्वासनाम विहायोगतिनाम प्रत्येकशरीरनाम साधारणशरीरनाम त्रसनाम स्थावरनाम शुभनाम अशुभनाम सुभगनाम दुर्भगनाम सुस्वरनाम दुःस्वरनाम सूक्ष्मनाम बादरनाम पर्याप्तनाम अपर्याप्तनाम स्थिरनाम अस्थिरनाम आदेयनाम अनादेयनाम यशोनाम अयशोनाम तीर्थकरनाम चेति । गोत्रस्योत्तरप्रकृतिद्वयम् उच्चैर्गोत्रं नीचैर्गोत्रं च । अन्तरायोत्तरप्रकृतयः पञ्च दानान्तरायं लाभान्तरायं भोगान्तरायम् उपभोगान्तरायं वीर्यान्तरायं चेति । एवमेषामष्टानामपि कर्मणामुत्तरप्रकृतयः सप्तनवतिर्भवन्तीति । नामकर्मणः पुनरपि[६] चतुर्विधा गतिरित्यादिनामभेदेन सप्तषष्टिरुत्तरप्रकृतयो भवन्ति । शेषाणां [७]पञ्चपञ्चाशत् । एतदुभयमेकीकृतं द्वाविंशत्युत्तरं प्रकृतिशतं भवति । तत्रापि विंशत्युत्तरप्रकृतिशतस्य बन्धः । [८]सम्यक्त्वसम्यङ्मिथ्यात्वयोर्नास्ति बन्धः । [९]यतो मिथ्यात्वदलिकमेव विशुद्धं[१०] सम्यक्त्वमुच्यते । सम्यङ्मिथ्यात्वमपि [११]दरविशुद्धं मिथ्यात्वमेवोच्यत इति ॥३५॥

---

विंशतिविधमित्युभयमीलनेऽष्टाविंशतिभेदम् । आयुर्नरकादिभेदाच्चतुर्धा । नामकर्म[३] द्विचत्वारिंशद्भेदं, तत्र गतिजात्यादिपिण्डप्रकृतयश्चतुर्दश, प्रत्येकप्रकृतयोऽष्टौ, त्रसादिविंशतिरिति मीलिता द्विचत्वारिंशत् । तथा गोत्रमुच्चैर्नीचैर्भेदाद् द्वेधा । दानादिभेदादन्तरायं[४] पञ्चविधमिति । [५]अत्र यद्यपि केनापि अभिप्रायेण सप्तनवतिः प्रतिपादिता तथापि बन्धप्रस्तावाद्विंशत्यधिकं शतं ग्राह्यम् । तच्च नाम्नः कथञ्चित्पिण्ड[६]प्रकृतिविस्तारे [७]षट्षष्टिर्भवति, तस्याः सप्तकर्मप्रकृतिमध्यप्रक्षेपे सम्यक्त्वमिश्रद्वयापनये च विंशत्यधिकं शतं भवति । तदुक्तम्–

**चउ गइ ४ जाई ५ तणु पण ५ अंगोवंगाइं ३ छच्च संघयणा ६ ।**
**छागिइ ६ चउ वन्नाई ४ चउ अणुपुव्वि ४ दुह विहगगई २ । ॥१॥**
**इय गुणचत्ता ३९ सेसऽट्ठवीस २८ मिय सत्तसट्ठि ६७ नामस्स ।**
**सेससगकम्म ५५ जोगे सम्मामीस विणु वीससयं ॥२॥**
**( चतुर्गति-जातितनुपञ्चकाङ्गोपाङ्गानि षट् च संहननानि ।**
**षडाकृतयः चतुर्वर्णादयश्चतस्त्रानुपूर्व्यः द्विधा विहायोगतिः ॥**
**इत्येकोनचत्वारिंशत् शेषाष्टाविंशतिरिति सप्तषष्टिर्नाम्नः ।**
**शेषशतकर्मयोगे सम्यङ्मिश्रं विना विंशतिशतम् ॥ )**

विस्तरतः प्रकृतिवर्णनाद्यन्यतोऽवसेयमिति । अन्ये त्वेवमाहुः–पञ्च नव द्व्यष्टाविंशतिश्चतुरित्यादिपाठान्तरमाश्रित्य यथा पञ्च नवेति पदद्वयं प्रथमाबहुवचनान्तम्, ततश्चाग्रेतनभेदशब्दोऽन्यशब्दसम्बद्धोऽपि इत्थं योज्यते–पञ्च भेदा ज्ञानावरणस्य नव भेदा दर्शनावरणस्य । द्वाभ्यां [८]युक्ता अष्टाविंशतिः[९] सा तथा । ततो द्वौ भेदौ वेद्यस्य अष्टाविंशतिर्भेदा मोहनीयस्य । तथा चत्वारश्च षट्कसप्तगुणश्च[१०] ते भेदा यस्य बन्धस्य स तथा । ततश्च चत्वारो भेदा आयुषः, षट्कसप्तगुणोद्विचत्वारिंशद्भेदा नाम्नः, द्वौ वारौ द्विः, द्विश्च पञ्च च[११] ते तथा भेदा यस्य स तथा । तत्र भेदद्वयं गोत्रस्य पञ्च भेदा अन्तरायस्येति ॥३५॥

**प्रकृतिरियमनेकविधा स्थित्यनुभावप्रदेशतस्तस्याः ।**
**तीव्रो मन्दो मध्य इति भवति बन्धोदयविशेषः ॥३६॥**

---

**( ३६ ) टीका—प्रकृतिरियमनेकेत्यादि** । एवमियं प्रकृतिरनेकविधा द्वाविंशत्युत्तर-शतभेदेत्यर्थः । तस्याश्च प्रकृतेः स्थित्यनुभागप्रदेशबन्धेभ्यः [१]स्थितिबन्धोऽनुभागबन्धः प्रदेश-बन्धस्तेभ्यः प्रकृतिबन्धविशेषो भवति, तीव्रो मन्दो मध्य इति वा । उदयविशेषोऽपि तीव्रादिभेदः प्रकृतीनां भवति। तीव्राशयस्तदाश्रयेषु वर्तमानस्तीव्रं प्रकृतिबन्धं करोति, मन्दाशयो मन्दं, मध्याशयो मध्यमिति। बन्धविशेषाच्चोदय इति । तत्र स्थितिबन्धो ज्ञानदर्शनावरणवेद्यान्तरायाणां त्रिंशत्सागरोपमकोटीकोट्य उत्कृष्टः । मोहस्य स्थितिबन्ध उत्कृष्टः सप्ततिसागरोपमकोटीकोट्यः। नामगोत्रयोः स्थितिबन्धो विंशतिसागरोपम-कोटीकोट्यः । प्रकृष्टः स्थितिबन्ध आयुषस्त्रयस्त्रिंशत्सागरोपमानि । वेदनीयस्य जघन्या

---

**( ३६ ) ( वि० )** अथ [१]प्रकृतिबन्धपुरःसरमेतासामेवानन्तरोक्तमूलोत्तरप्रकृतीनां स्थिति-बन्धादीनाश्रित्य तीव्रादिबन्धोदयानाह**—प्रकृतिरिति** । [२]प्रकृतिरिति जातावेकवचनम् । इयं पूर्वोक्तस्वरूपा अनेकविधा-बहुप्रकारा, मूलोत्तरभेदतो वर्तत इति शेषः । अनेन प्रकृतिबन्ध इति प्रतिपादितं भवति । तस्याः प्रकृतेः स्थित्यादीनाश्रित्य[३] तीव्रादिभेदो बन्धोदयविशेषो भवतीति सण्टङ्कः। तत्र स्थितिः प्रकृतेर्बद्धायाः सत्या अविनाशेनावस्थानम् । अनुभावस्तु तस्या एव कटुककटुकतरादिभावेन वेदनम् । प्रदेशस्तु कर्मपुद्गलानामात्मप्रदेशैः सह संश्लेषः । ततो द्वन्द्वः, ते तथा तेभ्यः-ततः सकाशात्, तानाश्रित्येत्यर्थः। तस्या इति योजितमेव । किम् ?-तीव्रो-गाढस्तथा मन्दः-स्तोकः तथा मध्यो-मध्यवर्तीत्येवं भवति-जायते बन्धः-सङ्ग्रह उदयः-अनुभवनम्, तयोर्विशेषो भेदो यः स तथा, बन्धविशेषः उदयविशेषश्चेत्यर्थ इति। किमुक्तं भवति ?-यदा प्रकृतेः स्थितिरुत्कृष्टा भवति तदा अनुभावप्रदेशावप्युत्कृष्टौ भवतः, ततस्तस्यामुत्कृष्टस्थितौ तीव्रौ बन्धोदयौ स्याताम्, एतदनुसारेण मन्दमध्यौ तौ भावनीयाविति ॥ उत्कृष्टा स्थितिर्यथा-

**आइल्लाणं तिण्हं चरिमस्स य तीस कोडिकोडीओ ।**
**अयराण मोहणिज्जस्स सत्तरी होइ विन्नेया ॥१॥**
**नामस्स य गोत्तस्स य वीसं उक्कोसिया ठिई भणिया ।**
**तेत्तीस सागराइं परमा आउस्स बोद्धव्वा ॥२॥**
जघन्या तु-**वेयणियस्स उ बारस नामगोयाण अट्ठ उ मुहुत्ता ।**
**सेसाण जहन्नठिई भिन्नमुहुत्तं विणिद्दिट्ठा ॥३॥**

---

**( ३६ ) ( अव० ) तस्याः प्रकृतेर्बन्धोदययोर्विशेषोऽविनाशेनावस्थितिः स्थितिः, अनुभागो रसः, प्रदेशो दलसञ्चयः ॥३६॥**

**तत्र प्रदेशबन्धो योगात् तदनुभवनं कषायवशात् ।**
**स्थितिपाकविशेषस्तस्य भवति लेश्याविशेषेण ॥३७॥**

---

बन्धस्थितिर्द्वादशमुहूर्ता । नामगोत्रयोरष्टौ मुहूर्ताः । शेषकर्मणामन्तर्मुहूर्ता[२] स्थितिः । अनुभागबन्धो विपाकाख्यः कर्मणः शुभस्याशुभस्य वा बन्धकाल एव रसविशेषं निर्वर्तयति। तस्यानुभवनं विपाकः । स यथा नामकर्मणि गत्यादिषु स्थानेषु विपच्यमानोऽनुभूयते । प्रदेशबन्धस्तु एकस्मिन्नात्मप्रदेशे ज्ञानावरणपुद्गला अनन्तास्तथा शेषकर्मणामपीति ॥३६॥

**( ३७ ) टीका—तत्रेति** । तत्र तेषु चतुर्षु बन्धभेदेषु प्रदेशबन्धस्तावद् योगात् मनोवाक्कायलक्षणाद्भवति। आत्मप्रदेशेषु ज्ञानावरणादिपुद्गलोपचयो जायते इत्यर्थः । तस्य प्रदेश[१]स्थस्य कर्मणोऽनुभवनं कषायवशाद्विपाक इत्यर्थः । स्थितिविशेषः पाकविशेषश्च तस्य [२]कर्मणो लेश्याविशेषजनितो भवति उत्कृष्टो मध्यमो जघन्य इत्यर्थः ॥३७॥

---

**[ आद्यानां त्रयाणां चरमस्य च तिस्रः कोटीकोट्यः ।**
**आकराणां मोहनीयस्य सप्ततिर्भवति विज्ञेया ॥**

**नाम्नश्च गोत्रस्य च विंशतिरुत्कृष्टा स्थितिर्भणिता ।**
**त्रयस्त्रिंशत्सागराणां परमायुषो बोद्धव्या ॥**

**वेदनीयस्य तु द्वादश नामगोत्रयोरष्टौ तु मुहूर्तानि ।**
**शेषाणां जघन्यस्थितिर्भिन्नमुहूर्तं विनिर्दिष्टम् ॥ ]**

तदनयाऽऽर्यया प्रकृतिबन्धः स्थितिबन्धोऽनुभागबन्धः प्रदेशबन्धश्च प्रकृत्युदयः स्थित्युदयोऽनुभावोदयः प्रदेशोदयश्चोक्तो ज्ञेय इत्यार्यार्थः ॥३६॥

**( ३७ ) ( वि० )** साम्प्रतमस्य चतुर्विधबन्धस्य यथासम्भवं हेतूनाह—**तत्रेति** । तत्र-तेषु प्रकृतिबन्धादिषु मध्ये प्रदेशबन्ध उपलक्षणत्वात् प्रकृतिबन्धश्च योगात्-मनोवाक्कायरूपात् शुभात् शुभ इतरस्मादितरो भवतीति[१] । तथा तस्य प्रदेशबन्धप्रकृतिबन्धोपात्तस्य कर्मणोऽनुभवनम्-अनुभावो-वेदनं कषायवशात् । तथा स्थितेः पाकविशेषो-जघन्यमध्यमोत्कृष्टस्थितिनिवर्तनं तस्य कर्मणो भवति-जायते लेश्याविशेषेण '**कषायपरिणामो लेश्या**' इति वचनात् परमार्थतः कषायत[२] इत्यार्यार्थः ॥३७॥

---

**( ३७ ) ( अव० )—तेषु बन्धभेदेषु चतुर्षु प्रदेशबन्धो योगान्मनोवाक्कायव्यापारात् तस्य प्रदेशस्य कर्मणः ॥३७॥**

**ताः कृष्णनीलकापोततैजसीपद्मशुक्लनामानः ।**
**श्लेष इव वर्णबन्धस्य कर्मबन्धस्थितिविधात्र्यः ॥३८॥**
**कर्मोदयाद् भवगतिर्भवगतिमूला शरीरनिर्वृत्तिः ।**
**देहादिन्द्रियविषया विषयनिमित्ते च सुखदुःखे ॥३९॥**

---

**( ३८ ) टीका—**तत्र लेश्या इति कः पदार्थः ? कति वा भवन्ति लेश्या इत्याह—**ताः कृष्णनीलेत्यादि**। षट् [१]लेश्या मनसः परिणामभेदाः। स च [२]परिणामस्तीव्राद्यध्वसायोऽशुभो जम्बूफलबुभुक्षुषट्पुरुषी[३]दृष्टान्तादिसाध्यः । अपरे त्वाहुर्योगपरिणामो लेश्या । यस्मात्काय-वाग्व्यापारोऽपि मनःपरिणामापेक्षस्तीव्र एवाशुभो भवति। अशुभशुभकर्मद्रव्यसदृशाः स्वान्तः-परिणामा जायन्ते प्राणिनाम्[४]। वर्णकाश्चेतिकाहरितालहि[५]ङ्गुलकादयः, तेषां कुड्यादौ चित्रकर्मणि स्थैर्यमापादयति श्लेषो वर्णानां बन्धे दृढीकरणम् । एवमेता लेश्याः कर्मबन्धस्थिति-विधात्र्यस्तीव्रपरिणामाः स्थितिं कर्मणामतिदीर्घां विदधति दुःखबहु[८]लां कृष्णनीलकापोताख्या निकाचनावस्थास्थापनेन। तैजसी[६]पद्मशुक्लनामानः [७]शुभकर्मबन्धस्यानुफलदाः(?) शुभबहुलामेव कर्मस्थितिं विदधति [९]महतीं, विशुद्धा [१०]विशुद्धतरा विशुद्धतमाश्चोत्तरोत्तरा भवन्तीति ॥३८॥

**( ३९ ) टीका—**तस्मिन् पुनः कर्मणि बद्धे आत्मसात्कृते किं भवतीत्याह—**कर्मोदयाद्भवगतीत्यादि**। उदिते विपाकप्राप्ते तस्मिन् कर्मणि। भवो [१]नरकादिगतिस्तत्रोत्पत्तिः-भवति, भवगतौ[२] सत्यां नरकादिशरीरनिर्वृत्तिः । भवगतिर्मूलं बीजं यस्याः सा भवगतिमूला शरीरनिर्वृत्तिर्देहनिर्वृत्तेश्च स्पर्शा[३]दीन्द्रियनिर्वृत्तिः । ततः स्पर्शनादिविषयग्रहणशक्तिः । ततश्चेष्ट-विषयनिमित्तः सुखानुभवोऽनिष्टविषयनिमित्तश्च दुःखानुभवः ॥३९॥

---

**( ३८ )( वि० )** एतासां नामानि सदृष्टान्तं कर्मबन्धस्थितिविधातृत्वं चाह—**ता इति**। प्रथमार्धे षट् नामानि कृतद्वन्द्वसमासानि, पञ्चानां ह्रस्वत्वं '**याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित्**' इति सूत्रे क्वचिद् ग्रहणाद्, इत एव तैजस्या न ह्रस्वत्वमिति, तथा नामानोऽत्र विकल्पेनेकार इति । आसां स्वरूप-मन्यतोऽवधारणीयम् । श्लेष इव-वज्रलेपादिवद्वर्णबन्धस्य चित्र[१]हरितालादिवर्णकदार्ढ्यस्य कर्मबन्धस्थितिविधात्र्यो-ज्ञानावरणादिबन्धनस्थानकारिका इत्यार्यार्थः ॥३८॥ **इति कर्माधिकारः ॥४॥**

**( ३९ ) ( वि० )** तदुदयाद्धेतुहेतुमद्भावेन यद्भवति तदार्याद्वयेनाह—**कर्मोदयादिति** । कर्मोदयाद्-उदिते कर्मणि भवगतिः, तन्मूला शरीरनिर्वृत्तिः, देहादिन्द्रियनिर्वृत्तिः, तस्यां विषय[१]शक्तिः, विषयनिमित्ते च सुखदुःखे जीवस्य भवतः ॥३९॥

---

**( ३८ ) ( अव० ) वर्णकानां बन्धो दृढीकरणं[१] श्लेष इव ॥३८॥**
**( ३९ ) ( अव० ) [१]नरकादिगतिर्भवगतिर्मूलं बीजं यस्याः, इन्द्रियं विषयनिर्वृत्तिः ॥३९॥**

**दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः ।**
**यां यां करोति चेष्टां तया तया दुःखमादत्ते ॥४०॥**

**कलरिभितमधुरगान्धर्वतूर्ययोषिद्विभूषणरवाद्यैः ।**
**श्रोत्रावबद्धहृदयो हरिण इव विनाशमुपयाति ॥४१॥**

---

**( ४० ) टीका—**अत्र च स्वभावादेव सर्वः प्राणी सुखमभिलषति दुःखाच्चोद्विजते । मोहान्धो गुणदोषानविचार्य सुखसाधनाय यतमानो यां यां क्रियामारभते सा सास्य दुःखहेतुर्भवतीति दर्शयति—**दुःखद्विट् सुखलिप्सुर्मोहान्धत्वादित्यादि** । दुःखं द्वेष्टीति दुःखद्विट् । सुखं लिप्सते तच्छीलश्च सुखलिप्सुः । मोहोऽष्टाविंशतिभेदः । तेनान्धो न गुणं दोषं वा पश्यति । चेष्टा कायिकी वाचिकी मानसी वा क्रिया । तेन तादृशा या क्रियते क्रिया, [१]तया तया दुःखमादत्ते दुःखमनुभवति । कर्मैव वा दुःखं, कारणे कार्योपचारात्तदादत्ते, दुःखकारणं कर्म बध्नातीत्यर्थः ॥४०॥

**( ४१ ) टीका—**तत्र पञ्चस्विन्द्रियार्थेषु एकैकविषयप्रवृत्तावपि प्रत्यपायान् [१]पञ्चभिर्दर्शयति—**कलरिभितमधुरगान्धर्वेत्यादि** । कला अस्मिन् विद्यन्त इति कलं मात्रायुक्तं ग्रामरागरीत्या युक्तम् । रिभितं मधुरं श्रोत्रसुखम् । गान्धर्वविशेषणान्येतानि । तूर्यं वादित्रविशेषस्तस्य ध्वनिः । योषितां विभूषणानि नूपुररसनाकिङ्किणिकादिध्वनितानि । तेषां रवः शब्दः । एवमादिभिर्मनोहारिभिः शब्दैः श्रोत्रेन्द्रिये[२]यावबद्धं हृदयं येन हरिणेन, प्रणिहितं मनो येन श्रोत्रेन्द्रियविषये स श्रोत्रावबद्धहृदयः कुरङ्गो विनाशमाप्नोति [२]गोचर्याखेटके । तद्वदपरोऽपि प्रमादीति ॥४१॥

---

**( ४० ) ( वि० )** ततः किमित्याह[१]—**दुःखद्विडिति** । दुःखद्विट्–अशर्मद्वेषी सुखलिप्सुः–शर्माभिलाषी जीवो मोहेनान्धो–विवेकलोचनविकलः स तथा तस्य भावस्तत्त्वं तस्मात्, किमित्याह–अदृष्टगुणदोषो–अज्ञातगुणदोषो यां यां करोति–विधत्ते चेष्टाम्–अशुभक्रियां तया तया दुःखमादत्ते–गृह्णातीत्यार्याद्वयार्थः ॥४०॥

**( ४१ ) ( वि० )** कलं–मनोज्ञं श्रूयमाणम्, रिभितं–घोलनासारम्, मधुरं–श्रोत्रसुखदायकम् । ततः पदत्रयस्य कर्मधारयः । तच्च तद् गान्धर्वं गीतं तत्तथा । तूर्याणि–वादित्राणि, योषिद्विभूषणानि–नूपुरादीनि तेषां कृतद्वन्द्वानां रवो–हृदयाह्लादको घोषः स आद्यो येषां वीणादीनां ते तथा । तैः किमित्याह–श्रोत्रावबद्धहृदयः–श्रवणासक्तचित्तो हरिण इव विनाशमुपयातीति व्यक्तम् ॥४१॥

---

**( ४० ) ( अव० )—दुःखकारणं[१] कर्म[२] आदत्ते ॥४०॥**

**( ४१ ) ( अव० )—कलास्[१]त्यस्मिन्निति कलं ग्रामरागरीत्या युक्तं, रिभितं घोलनासारं, योषिद्विभूषणं नूपुरादि, श्रोत्रेन्द्रिया[२]ऽवबद्धं हृदयं येन ॥४१॥**

**गतिविभ्रमेङ्गिताकारहास्यलीलाकटाक्षविक्षिप्तः ।**
**रूपावेशितचक्षुः शलभ इव विपद्यते विवशः ॥४२॥**
**स्नानाङ्गरागवर्तिकवर्णकरूपाधिवासपटवासैः ।**
**गन्धभ्रमितमनस्को मधुकर इव नाशमुपयाति ॥४३॥**

---

**( ४२ ) टीका—गतीति** । गतेर्विभ्रमो मह्लणप्रकारः सविकारा गतिरित्यर्थः । इङ्गितं निरीक्षितं स्निग्धया दृष्ट्यावलोकनम् । आकारः[१] स्तनमुखोरुसन्निवेशविशेषः । [२]हास्यं सविलासं[३] सलीलं हसितमित्यर्थः । कटाक्षो[४]ऽपाङ्गनिवेशितदृष्टिः सामर्षा । एभिर्विशेषणैर्विक्षिप्तः प्रेरितो वनितारूपादौ निवेशितचक्षुः शलभ इव विपद्यते विनश्यति । शलभो हि दीपशिखावलोकनाक्षिप्तोऽभिमुखः पतितस्तत्रैव भस्मसाद्भवतीति ॥४२॥

**( ४३ ) टीका—स्नानाङ्गरागेत्यादि** । कतिपयसुरभिद्रव्यसमाहारः स्नानम् । अङ्गरागश्चन्दनकुङ्कुमादिविलेपनम् । धूपद्रव्यकृता वर्तिरेव वर्तिका सैव धूपो वर्तिकधूप एवासौ सञ्जायते सैव दह्यमाना धूपायते । वर्णकाः कृष्णादयः । अधिवासो मालतीकुसुमादिभिः । पटवासो गन्धद्रव्यचूर्णः । एभिः स्नानादिभिर्गन्धैर्भ्रमितमाक्षिप्तं मनो यस्यासौ गन्धभ्रमितमनस्कः । मधुकरः शिलीमुख इव विनाशं प्राप्नोति । सुरभिणा पद्मगन्धेनाकृष्टश्चञ्चरीकस्तन्मध्यवर्तिगन्धमाजिघ्रन्नस्तमिते सवितरि सङ्कुचत्यपि नलिने [१]नाशमुपयातीति । निरुद्धत्वाच्च तत्रैव परासुतां लभत इति ॥४३॥

---

**( ४२ ) ( वि० )** गतिविभ्रमः–सविकारगमनम्, यद्वा पृथग्द्वे पदे, ततो गतिः–[१]मह्लणतारूपा, विभ्रमो[२]–मनोहराभरणानामङ्गेषु रचनात्मकः । यद्वा विभ्रमः–चिरकालात् प्रियदर्शने प्रीत्या सौत्सुक्यमुत्थानम्, इङ्गितं तु–स्निग्धावलोकनम्, यद्वा महामतिज्ञेयं गूढं मनश्चेष्टितम्, आकारस्तु–स्तनमुखोरुसन्निवेशो, यद्वा सर्वशरीरस्य हृद्यं संस्थानम् । हास्यं तु–सविलासं सलीलं ह[४]सनम् । [३]लीला–मन्दं सर्वक्रियासु प्रवर्तनम् । कटाक्षः–सरागं तिर्यङ्निरीक्षणम् । यद्वा चित्रो दृष्टिसञ्चरः । एतैर्गत्यादिभिर्विक्षिप्तो–विह्वलीकृतः स तथा, रूपावेशितचक्षुः–वनितारूपादौ निवेशितदृष्टिः शलभ इव विपद्यते, विवशः–पतङ्गवद्विनश्यत्यशरण[१] इति ॥४२॥

**( ४३[२] ) ( वि० )** स्नानं–सुगन्धिजलधावनम्, अङ्गरागस्तु कुङ्कुमादिः, सुरभिद्रव्यनिष्पन्ना दीपवर्त्याकारा वर्तिः सैव वर्तिका, वर्णकः–चन्दनम्, धूपस्तु प्रतीतः, अधिवासस्तु कस्तूरिकादि, पटवासस्तु वस्त्रसौरभ्यकारी गन्धविशेषः, एषां सप्तानां द्वन्द्वः तैः, '**याकारा**'विति क्वचिद् ग्रहणाद् ह्रस्वत्वं वर्तिकायाः । गन्धभ्रमितमनस्को–गन्धविह्वलचित्तो मधुकर इव नाशमुपयाति–भ्रमरवद्विनश्यतीति ॥४३॥

---

**( ४२ ) ( अव० )—सविकारा गतिः, नयनोत्थं निरीक्षितं, देहसन्निवेशः, प्रेरितः, [१]चक्षुः शलभः पतङ्गः, विवश इन्द्रियपरवशो, मृत्युमाप्नोति ॥४२॥**

**( ४३ ) ( अव० )—स्नानमङ्गप्रक्षालनं, चूर्णं वर्तिर्गात्रानुलेपिनी, वर्तीनां समूहो वार्तिकं, चन्दनादिभिः [१]कस्तूरिकादिभिः, पटवासः सौरभ्यकारी गन्धविशेषः एभिः स्नानादिभिर्गन्धैर्भ्रमितमाक्षिप्तं मनोऽस्येति सः ॥४३॥**

[१]मिष्टान्नपानमांसौदनादिमधुररसविषयगृद्धात्मा ।
गलयन्त्रपाशबद्धो मीन इव विनाशमुपयाति ॥४४॥

शयनासनसम्बाधनसुरतस्नानानुलेपनासक्तः ।
स्पर्शव्याकुलितमतिर्गजेन्द्र इव बध्यते मूढः ॥४५॥

---

**( ४४ ) टीका—मिष्टान्नपानमांसौदनादीत्यादि**। मिष्टमत्यन्तस्वादु सर्वदोषरहितं भक्षभोज्यं [१]विविधम्। पानकादि च मद्यं प्रसन्नादि वा पानम्। मांसं [२]हतहरिणशूकरशशलावकादीनाम्। शाल्योदनादि च। मधुरो रसः खण्डशर्करादिः[३]। स एव विषयो रसनायास्तस्मिन् गृद्धः सक्त आत्मा यस्य। [४]लोहोऽङ्कुशको गलो, यन्त्राणि [५]नामादिगर्भाणि सिंहव्याघ्रद्वीपिमूषिकादिव्यापादनहेतोः क्रियन्ते, [६]तन्तुमयाः पाशास्तित्तिरलावकमयूरादिव्यापत्तये निक्षिप्यन्ते। अथवा यन्त्रम्=आनायः स एव पाशस्तेन बद्धो वशीकृतः। [७]पृथुरोमा मृत्युमुखमाविशति ॥४४॥

**( ४५ ) टीका—शयनासनेत्यादि**। शयनं सप्रमाणा शय्या [१]तुल्योपधानं वा प्रच्छदपटसनाथा। आसनमप्यासन्दकादि व्यपगतोपद्रवं [२]मृदुवध्रपट्टादिव्यूतम्। संवाहन-मङ्गमर्दनम्। सुरतं कोमलगात्रयष्टेः प्रियायाः चुम्बनालिङ्गनादि। स्नानानुलेपने पूर्वोक्ते। तेषु सक्तो व्यसनी। शय्यादिसंस्पर्शेन प्रियाङ्गस्पर्शेन [३]च व्याकुलितमतिर्मोहितबुद्धिर्गजेन्द्र इव [४]गणिकाकरिणीभिः कराग्रैः [५]संस्पृश्यमानो वीज्यमानश्च सत्कुसुमैः पल्लवैः काञ्चित्च्छुपन् काञ्चिद्दन्तकाण्डेन प्रेरयन् काञ्चिदग्रे कृत्वा काञ्चित्पृष्ठतो विधाय पार्श्वतश्चान्यां स्वच्छन्दचारी क्रीडन्ननेकवि[७]धवारिपञ्जरमध्यमानीतः। ततश्चाधोरणेनाधिरूढस्तीक्ष्णाङ्कुशाग्रग्राहग्रस्तमस्तकः परवशोऽनेकप्रकारं दुःखमनुभवतीति ॥४५॥

---

**( ४४ ) ( वि० )** मृष्टाश्च तेऽन्नपानमांसौदनादयश्च प्रसिद्धास्ते तथा, ते च मधुररसाश्च-[१]लौल्यास्वादा द्राक्षाखण्डादयस्त एव विषयो रसनायाः गोचरस्तत्र गृद्ध आत्मा यस्य स तथा। गलो-लोहमयोऽङ्कुशः यन्त्रं-जालं पाशो-वालादिमयस्तित्तिरादिग्रहणहेतुस्तेषां द्वन्द्वस्तैर्बद्धो-वशीकृतो मीन इव-मत्स्यवद्विनाशमुपयातीति ॥४४॥

**( ४५ ) ( वि० )** शयनं-शय्या, आसनं-मसूरकादि, सम्बाधनं[१]-विश्रामणा, सुरतं-मैथुनसेवा, स्नानम्-अङ्गप्रक्षालनम्, अनुलेपनं-कुङ्कुमादिसमालम्भनम्, तेषां द्वन्द्वस्तेष्वासक्तः। स्पर्शेत्यादि व्यक्तमिति ॥४५॥

---

**( ४४ ) ( अव० )—खण्डशर्करादिः स एव विषयो रसनायास्तस्मिन्नासक्त आत्मा यस्य। गलो लोहमयोऽङ्कुशो, यन्त्रं[१] जालं, पाशो वालादिमयः तित्तिरादिग्रहणहेतुस्तैर्बद्धो वशीकृतः ॥४४॥**

**( ४५ ) ( अव० )—आसनं मसूरकादि, सम्बाधनं [१]विश्रामणादि, सुरतं मैथुनासेवा, [२]अनुलेपनं कङ्कुमादि, स्पर्शः प्रियायाश्चुम्बनादिः, मोहितमतिः ॥४५॥**

**एवमनेके दोषाः प्रणष्टशिष्टेष्टदृष्टिचेष्टानाम् ।**
**दुर्नियमितेन्द्रियाणां भवन्ति बाधाकरा बहुशः ॥४६॥**

**एकैकविषयसङ्गाद् रागद्वेषातुरा विनष्टास्ते ।**
**किं पुनरनियमितात्मा जीवः पञ्चेन्द्रियवशार्तः ? ॥४७॥**

---

**( ४६ ) टीका—**[१]इत्थमिन्द्रियगृद्धानामपाय[२]द्वारमात्रमुक्तमित्युपसंहरति—**एवमनेके दोषा इत्यादि** । एवमुक्तप्रकारेण प्रत्यक्षप्रमाणमधिगम्य एकैको दोषः प्रदर्शितः । तद्द्वारेण च परलोकेऽप्यनिवृत्तविषयसङ्गानां बहवो दोषा नारकतिर्यग्योनिभवादिषु भवन्ति । केषामेते दोषाः ? प्रणष्टशिष्टेष्टदृष्टिचेष्टानाम् । शिष्टा विवेकिनः परलोकपथप्ररूपणानुष्ठाननिपुणास्तेषामिष्टा दृष्टिचेष्टा। दृष्टिः सन्मार्गोपदेशि ज्ञानम् । चेष्टा क्रियानुष्ठानम् । उभयावेते शिष्टेष्टदृष्टिचेष्टे प्रणष्टे येषां ते प्रणष्टशिष्टेष्टदृष्टिचेष्टास्तेषाम् । दुर्नियमितेन्द्रियाणां दोषेषु न नियमं ग्राहितानि इन्द्रियाणि यैः । श्रोत्रादिविषयव्यसनानि दोषास्तेषां दुर्नियमितेन्द्रियाणाम् । बाधाकराः पीडाकराः शारीरमानसाशर्मकारिणोऽनेकशः संसारोदधौ परिवर्तनमाचरतामिति ॥४६॥

**( ४७ ) टीका—**अपि चैते कुरङ्गादयो विनाशभाजः [१]संवृत्ता एकैकविषयासक्ताः । यः पुनः पञ्चस्वपीन्द्रियार्थेषु [२]सक्तः स किल यज्जीवति तदेव चित्रमित्युपसंहरन्नाह—**एकैक**

---

**( ४६ ) ( वि० )** एतदासक्तानां वा दोषा बाधाकरा भवन्तीत्यावेदयन्नाह—**एवमिति** । एवम्-[१]उक्तेन प्रकारेण दुर्नियमितेन्द्रियाणां जीवानामनेके दोषा बाधाकरा भवन्तीति योगः । कीदृशानाम् ?-दृष्टिश्च-ज्ञानम्, चेष्टा च-क्रिया ते तथा । शिष्टानां-विवेकिनामिष्टे-प्रिये ते च दृष्टिचेष्टे च प्रिये ते च दृष्टिचेष्टे ते तथा । ततः प्रणष्टे-अपगते शिष्टेष्टदृष्टिचेष्टे येषां ते तथा । पाठान्तरं तु दृष्टचेष्टानां, तत्रेष्टा चासौ दृष्टा च-अवलोकिता इष्टदृष्टा सा चासौ चेष्टा चेष्टदृष्टचेष्टा शिष्टानामिष्टदृष्टचेष्टा शिष्टेदृष्टचेष्टा सा तथा, ततः प्रणष्टा शिष्टेष्टदृष्टचेष्टा येषां ते तथा, तेषाम्। पुनः कीदृशानाम् ?-दुर्नियमितानि-दोषं ग्राहितानीन्द्रियाणि-हृषीकाणि यैस्ते तथा । तेषां बाधाकराः-पीडाविधायकाः । कथम् ?-बहुशः-अनेकधेति ॥४६॥

**( ४७ ) ( वि० )** एवमेकैकासक्ता विनाशभाजो जाताः, यः पुनः पञ्चस्वासक्तः स सुतरां विनश्यतीति प्रकटयन्नाह—**एकैकेति** । एकैकविषयसङ्गात्-शब्दाद्येकैकाभिष्वङ्गाद् रागद्वेषातुरा

---

**( ४६ ) ( अव० )—[१]शिष्टा=विवेकिनः परलोकपथनिपुणास्तेषामिष्टा दृष्टिचेष्टाः । दृष्टिः=सन्मार्गोपदेशनं चेष्टाः=क्रिया, दोषेष्वनियमं ग्राहितानीन्द्रियाणि यैः ॥४६॥**

**न हि सोऽस्तीन्द्रियविषयो येनाभ्यस्तेन नित्यतृषितानि ।**
**तृप्तिं प्राप्नुयुरक्षाण्यनेकमार्गप्रलीनानि ॥४८॥**
**कश्चिच्छुभोऽपि विषयः परिणामवशात्पुनर्भवत्यशुभः ।**
**कश्चिदशुभोऽपि भूत्वा कालेन पुनः शुभीभवति ॥४९॥**

---

**विषयसङ्गेत्यादि** । शब्दाद्येकैकविषयसङ्गाद्रागद्वेषवशगत्वादातुरास्ते[3] कुरङ्गादयो विनाशङ्गताः । मान्द्याभिभूतापथ्याश्यातुरवत् । किं पुनरनियमितात्मेति नात्मा नियमं ग्राहितो न निवारितः शब्दादिविषयेषु प्रीतिमनुबध्नन् पञ्चानामिन्द्रियाणां वशवर्ती, अत एवार्तोऽप्राप्तान् विषयानभिलषन् प्राप्तांश्चावियोगतश्चिन्तयन्निति ॥४७॥

**( ४८ ) टीका—**न च कश्चिच्छब्दादिर्विषयः [1]सोऽस्ति योऽभ्यस्यमानः सर्वथा तृप्तिं करिष्यतीति एतत्प्रदर्शयन्नाह**—न हीति** । नैवास्तीन्द्रियविषयः स शब्दादिर्येनाभ्यस्तेन पुनः पुनरासेव्यमानेन । नित्यतृषितानि नित्यमेव साभिलाषाणि सपिपासानि तृप्तिं प्राप्नुयुः अक्षाणीन्द्रियाणि । [2]अनेकमार्गे शब्दादावनेकभेदेन[3] प्रकर्षेण लीनानि तन्मयतां गतानि तदासक्तानि । पुनः पुनराकाङ्क्षन्त्येव स्वविषयानिति[4], अपि चैतानीन्द्रियाणि स्वविषयेषु नैकरसानि ॥४८॥

**( ४९ ) टीका—**यस्मादिष्टमप्यनिष्टमनिष्टमपीष्टं मन्यन्त[1] [2]इत्येतद् दर्शयन्नाह— **कश्चिदिति** । इष्टोऽपि कश्चिद्विषयो वेणुवीणागायनादीनां यथा ध्वनिर्बुभुक्षार्तस्य पिपासितस्य

---

विनष्टाः सन्तस्ते हरिणादयः । किमिति प्रश्ने । पुनरिति वितर्के । अनियमितात्मा जीवः । पञ्च च तानीन्द्रियाणि च पञ्चेन्द्रियाणि तेषां वशोऽत एवार्तः-पीडितः स पञ्चेन्द्रियवशार्तो न विनश्यति ?, अपि तु विनश्यतीति ॥४७॥

**( ४८ ) ( वि० )** किञ्च-न स कश्चिद्विषयोऽस्ति येन जीवस्तृप्तो भवतीत्यावेदयन्नाह**—न हीति** । नैवास्ति स इन्द्रियविषयो येनाभ्यस्तेन-पुनःपुनरासेवितेन नित्यतृषितानि-सर्वदा पिपासितानि, किम् ?-तुष्टिं प्राप्नुयुः-तुष्टिमागच्छेयुः । कानि ?-अक्षाणि-इन्द्रियाणि । कीदृशानि ?- अनेकमार्गप्रलीनानि-बहुविषयासक्तानि, पुनःपुनः स्वविषयानाकाङ्क्षन्तीत्यर्थ इति ॥४८॥

**( ४९ ) ( वि० )** अपि च एतानि स्वविषयेष्वपि नैकस्वरूपाणीत्यावेदयन्नाह**—कश्चिदिति** । कश्चिद्विषयः शुभोऽपि-इष्टोऽपि परिणामवशात्-विरूपादिपरिणतिवशात् अनिष्टो भवति ।

---

**( ४८ ) ( अव० )—इन्द्रिययोग्यो विषयो भावः । येनाक्षाणीन्द्रियाणि तृप्तिं प्राप्नुवन्ति अनेकस्मिन्मार्गे प्रकर्षेण लीनानि ॥४८॥**

**( ४९ ) ( अव० )—विषयो रूपादिः परिणामवशात् मृतकलेवरादिवशादशुभः स्यात् कचवरादिः अशुभोऽपि वर्यः स्याद् धूपनादिना ॥४९॥**

**कारणवशेन यद्यत् प्रयोजनं जायते यथा यत्र ।**
**तेन तथा तं विषयं शुभमशुभं वा प्रकल्पयति ॥५०॥**
**अन्येषां यो विषयः स्वाभिप्रायेण भवति तुष्टिकरः ।**
**स्वमतिविकल्पाभिरतास्तमेव भूयो द्विषन्त्यन्ये ॥५१॥**

---

वा [३]रागवशात् प्रागिष्टः पश्चाद् विषयपरिणामादनिष्ट आपद्यते । स एव पुनरशुभः कालान्तरेण [४]रागपरिणामादिष्टो जायत इति अनवस्थितप्रेमाणीन्द्रियाणीत्यतस्तज्जनितं सुखमनित्यमिति ॥४९॥

**( ५० ) टीका—**तस्मात्प्रयोजनापेक्षाणि व्यापार्यन्ते जीवेनेत्याह—**कारणवशेनेति** । [१]रागाध्मातमानसो गीतध्वनिमाचि[२]कर्णयिषुः श्रोत्रं व्यापारयति । एवमभीष्टरूपालुलोकयिषया चक्षुर्व्यापारयति । एवं शेषेन्द्रियविषयेष्वपि प्रयोजनवशाद् व्यापारयति घ्राणादीनि । तेन प्रयोजनेन तथातथोत्पन्नेन तं विषयं शब्दादिकमिष्टतयानिष्टतया वा रागद्वेषवशात् परिकल्पयति[३] ॥५०॥

**( ५१ ) टीका—अन्येषामिति** । विवक्षितपुरुषाद्येऽन्ये । तेषां यो विषयः शब्दादिः ।

---

कश्चित्पुनरशुभोऽपि-अनिष्टोऽपि भूत्वा-सम्पद्य कालेन पुनः शुभीभवति-प्रियः सम्पद्यते इत्यनवस्थितानि प्रेमाणि, अतस्तज्जन्यं सुखमनित्यमिति ॥४९॥

**( ५० ) ( वि० )** ईदृशश्च भावः परिणामवशात्, स च न निर्नि[१]बन्धन इत्यावेदयन्नाह—**कारणवशेनेति**। कारणवशेन रागाद्यायत्ततया यद्यत् प्रयोजनं मधुरशब्दाकर्णनादि जायते-भवति यथा-येन प्रकारेण यत्र वस्तुनि तेनैव कारणेन हेतुना तथा-तेनैव प्रकारेण तं विषयं-शब्दादिकमिष्टानिष्टतया प्रकल्पयति-पर्यालोचयतीति । अत्र भावना-यथा विषम् अशुभमपि शत्रुविनाशकत्वेनेष्टं तथा [२]स्निग्धान्नमपि पित्तघ्नमिति मत्वा द्वेष्टीति ॥५०॥

**( ५१ ) ( वि० )** अस्यैवार्थस्य [१]भावनार्थमाह—**अन्येषामिति**। अन्येषां-विवक्षितपुरुषापेक्षया अपरेषां यो विषयः-शब्दादिः स्वाभिप्रायेण-रागान्निजाकूतेन भवति पुष्टिकरः तुष्टिकरो वा-पोषोत्पादकस्तोषोत्पादको वा स्वमतेः स्वमत्या वा विकल्पो-विकल्पनं तत्राभिरता-आसक्ताः

---

**( ५० ) ( अव० )—कारणवशेन निमित्तसामर्थ्येन यत् यत् प्रयोजनमर्थो जायते, यथा येन प्रकारेण स्यात्तथा तेनैव प्रकारेण तमर्थं शुभमशुभं चिन्तयति, यथा शत्रुघ्नं विषं [१]पित्तघ्नं च ॥५०॥**

**( ५१ ) ( अव० )—शब्दादिः स्वरोचनेन परितोषमाधत्ते, स्वमत्या विकल्पो [१]द्वेषप्रभृति-परिणामजनितविकल्पनं तत्राभिरता=आसक्ताः ॥५१॥**

**तानेवार्थान् द्विषतस्तानेवार्थान् प्रलीयमानस्य ।**
**निश्चयतोऽस्यानिष्टं न विद्यते किञ्चिदिष्टं वा ॥५२॥**

**रागद्वेषोपहतस्य केवलं कर्मबन्ध एवास्य ।**
**नान्यः स्वल्पोऽपि गुणोऽस्ति यः परत्रेह च श्रेयान् ॥५३॥**

---

स्वाभिप्रायेणोल्बणरागाणां स्वमनःपरिणामवशात् परितोषमाधत्ते । अपरे तु स्वमतिविकल्पाभिरताः प्रबलद्वेषवशात् स्वमनोविकल्पशिल्पघटनया तमेव विषयं पुनरनिष्टतया द्विषन्ति ॥५१॥

**( ५२ ) टीका—**एवमनवस्थितप्रेमाणो विषयाः परमार्थतो न प्रिया न [1]चाप्रिया इति दर्शयन्नाह—**तानिति** । तानेवेष्टान् शब्दादीन् द्विषतो विषयभुज[2]स्तानेव च द्वेष्याननुप्रलीयमानस्य तन्मयतां गच्छतः समुपजातरागस्य । निश्चयतः परमार्थतः । नैकान्तेनैवास्य सम्भवति किञ्चिदिष्टमनिष्टं वा ॥५२॥

**( ५३ ) टीका—**इहपरलोकयोश्च कर्मबन्धादृते न कश्चिदपि गुणः सम्भाव्यते रागिणो द्वेषिणो वेति दर्शयन्नाह—**रागेति** । रागद्वेषाभ्यामुपहतमानसस्य [1]केवलं यदि परं कर्मबन्ध एवास्य विभाव्यते नापरः श्रेयान् गुणः परलोके। कश्चिदिहलोके वा विद्यत इति ॥५३॥

---

स्वमतिविकल्पाभिरताः द्वेषवशात् तमेव विषयं पुनरनिष्टतया द्विषन्त्यन्य इति ॥५१॥

**( ५२ ) ( वि० )** एवं च सति अस्य जीवस्य नैकान्तेन किञ्चिदिष्टमनिष्टं वाऽस्तीति दर्शयन्नाह—**तानेवेति** । तानेवार्थान्–शब्दादीन् द्विषतः–अप्रीयमाणस्यास्य जीवस्येति योगः । तानेवार्थान् प्रलीयमानस्य–आश्रयतो निश्चयतो–निश्चयमाश्रित्यास्येति योजितमेवानिष्टम्–असुन्दरं नैव विद्यते किञ्चित्–किमपि वस्त्विष्टं वा–[1]प्रतीमिति (प्रीतमिति) ॥५२॥

**( ५३ ) ( वि० )** तत एवंविधजीवस्य यत्स्यात्तदाह—**रागेति** । स्पष्टमेवेति ॥५३॥

---

**( ५२ ) ( अव० )—कदाचिद् द्वेषवशतः समुपजातरागस्य कदाचिद्रागवशात् निश्चयतः परमार्थतस्तद्राग-द्वेषकारणमेव ॥५२॥**

**( ५३ ) ( अव० )—रागद्वेषकृतप्रतिघातस्य ॥५३॥**

**यस्मिन्निन्द्रियविषये शुभमशुभं वा निवेशयति भावम् ।**
**रक्तो वा द्विष्टो वा स बन्धहेतुर्भवति तस्य ॥५४॥**

**स्नेहाभ्यक्तशरीरस्य रेणुना श्लिष्यते यथा गात्रम् ।**
**रागद्वेषाक्लिन्नस्य कर्मबन्धो भवत्येवम् ॥५५॥**

**एवं रागो द्वेषो मोहो मिथ्यात्वमविरतिश्चैव ।**
**एभिः प्रमादयोगानुगैः समादीयते कर्म ॥५६॥**

---

**( ५४ ) टीका—**कथं पुनः कर्मबन्धादृतेऽन्यो[१] गुणो नास्तीति विभावयन्नाह—**यस्मिन्निति** । [२]शब्दादिविषये भावं चित्तपरिणामं शुभमिष्टं रागयुक्तो [३]निवेशयति, अशुभं वानिष्टं भावं द्वेषयुक्तः[४] स्थापयति । स स भावस्तस्यात्मनो ज्ञानावरणादिकर्मणोऽष्टविधस्य बन्धहेतुर्भवति । '**सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते [५]'स बन्ध'** इति वचनात् (तत्त्वार्थ ७-२,३) ॥५४॥

**( ५५ ) टीका—**कथं पुनरात्मप्रदेशेषु कर्मपुद्गला लगन्तीत्याह—**स्नेहाभ्यक्तेति** । तैलादिना स्नेहेनाभ्यक्तवपुषो यथा रजःकणाः श्लिष्यन्ति नातिसूक्ष्मस्थूलास्तथा रागद्वेषपरिणामस्नेहार्द्रस्य ज्ञानावरणादिवर्गणायोग्याः कर्मपुद्गलाः प्रदेशेष्वात्मनो लगन्तीत्यर्थः ॥५५॥

**( ५६ ) टीका—**सम्प्रति रागद्वेषप्रधानान् कर्मबन्धहेतून् समस्तानेवोपसंहरन्नाह—**एवमिति** ।

---

**( ५४ ) ( वि० )** इदमेव भावयन्नाह—**यस्मिन्निति** । यस्मिन्निन्द्रियविषये-शब्दादिके, शुभं-भव्यम्, अशुभम्-अभव्यम्, निवेशयति-स्थापयति, भावं-परिणामम्, रक्तो वा-प्रीतः, द्विष्टो वा-अप्रीतः, स भावो बन्धहेतुर्भवति-ज्ञानावरणाद्यष्टविधकर्मबन्धनकारणं स्यात्तस्य जीवस्येति ॥५४॥

**( ५५ ) ( वि० )** अथ कथं पुनरात्मप्रदेशस्य कर्मपुद्गला लगन्तीत्याह—**स्नेहेति** । स्नेहेन-तैलादिना अभ्यक्तं-म्रक्षितं शरीरं-वपुर्यस्य जीवस्य स तथा तस्य रेणुना-धूल्या श्लिष्यते-आश्लिष्यते यथा-येन प्रकारेण गात्रं-वपुरिति दृष्टान्तः, रागद्वेषक्लिन्नस्य-आर्द्रस्य कर्मबन्धो भवत्येवमिति व्यक्तमिति ॥५५॥

**( ५६ ) ( वि० )** सम्प्रति रागद्वेषप्रधानान् कर्मबन्धहेतून् समस्तानेवोपसंहरन्नाह—**एवमिति** ।

---

**( ५४ ) ( अव० )—इन्द्रियव्यापारे शब्दादिप्रवर्तने भव्यमभव्यं वा करोति परिणामं, रागयुतः[१] स=आत्मनो भावः, कर्मबन्धस्य [२]तस्य निमित्तम् आत्मनो जीवस्य भवति ॥५४॥**

**( ५६ ) ( अव० )—मोहोऽज्ञानं, [१]तत्त्वाश्रद्धानं मिथ्यात्वम्, आश्रवेभ्योऽनिवृत्तिरविरतिः,**

**कर्ममयः संसारः संसारनिमित्तकं पुनर्दुःखम् ।**
**तस्माद्रागद्वेषादयस्तु भवसन्ततेर्मूलम् ॥५७॥**

**एतद्दोषमहासञ्चयजालं शक्यमप्रमत्तेन ।**
**प्रशमस्थितेन घनमप्युद्वेष्टयितुं निरवशेषम् ॥५८॥**

---

उक्तलक्षणौ रागद्वेषौ । [१]मोहो मोहनीयम् । मिथ्यात्वं तत्त्वार्थाश्रद्धानलक्षणम् अविरतिरनिवृत्तिः कर्माश्रवेभ्यः । एभी रागादिभिर्विकथादिप्रमादपञ्चकसहितैर्मनोवाक्काययोगानुगतैः कर्मादीयते गृह्यते स्वप्रदेशेष्वात्मना निधीयत इत्यर्थः । ततश्च घटीयन्त्रन्यायेन रागादीनां कर्मबन्धहेतुत्वं । कर्मणोऽपि रागादिपरिणामः ॥५६॥

**( ५७ ) टीका—**ततश्च—**कर्ममय इति** । कर्मविकारो नारकत्वं तिर्यक्त्वं मनुष्यत्वं देवत्वं [१]च । नारकादिरूपसंसारकारणं दुःखं शारीरं मानसं वा । न ह्यनारको नरके दुःखमनुभवति[२] । एवमितरत्रापि । तस्माद्रागद्वेषादयः पञ्च कर्मबन्धहेतवो नारकादिभव-सन्ततेर्भवपरंपराया मूलं बीजं प्रतिष्ठेति ॥५७॥

**( ५८ ) टीका—**कः पुनरस्य रागद्वेषादिजनितस्य संसारचक्रस्य भङ्गोपाय इत्याह—**एतदिति** । दोषाणां रागद्वेषादीनां तज्जनितकर्मणां च महासञ्चय उपचयः । दोषमहासञ्चय एव जालम् । जालमिव जालम् । यथा मीनमकरादीनामादायकं जालं जीवनापहारि तद्वदेतदपि

---

एवं रागादिभिः पञ्चभिः प्रतीतैः, कीदृशैः ?-प्रमादो-मद्यादिः पञ्चधा, योगो-[१]मनोयोगादयस्त्रयः ते तथाताननुगच्छन्ति-अनुसहायीभवन्ति ये[२] तैः प्रमादयोगानुगैः समादीयते-गृह्यते, किम् ?-कर्मेति ॥५६॥

**( ५७ ) ( वि० )** ततश्च—**कर्ममय इति** । कर्ममयः-अदृष्टनिष्पन्नः । कः ?-संसारः, ततः किम् ?-तन्निमित्तकं-तत्कारणं पुनर्दुःखम्, तस्माद्रागद्वेषादयो भवसन्ततेर्मूलमिति ॥५७॥

**( ५८ ) ( वि० )** ननु कथमेतन्निर्जेतुं शक्यमत आह—**एतदिति** । एतद् रागादि-दोषसञ्चयजालं जालमिव जालं यथा मत्स्यादीनामादायकं जालं[१] तद्वदेतदपि, दुःखहेतुत्वात्, शक्यमुद्वेष्टयितुम्-अपनेतुं विनाशयितुमिति सम्बन्धः । केन ?-जीवेन । कीदृशेन ?-अप्रमत्तेन-

---

**रागादिभिर्विकथादिप्रमादमनःप्रभृतियोगयुतैः ॥५६॥**

**( ५८ ) ( अव० )—एतेषां दोषाणां सञ्चयस्य जालमिव जालं दुःखहेतुत्वात्, आमूला-दुद्धर्तुमप्रमत्तेन शक्यम् ॥५८॥**

**अस्य तु मूलनिबन्धं ज्ञात्वा तच्छेदनोद्यमपरस्य ।**
**दर्शनचारित्रतपःस्वाध्यायध्यानयुक्तस्य ॥५९॥**

**प्राणवधानृतभाषणपरधनमैथुनममत्वविरतस्य ।**
**नवकोट्युद्गमशुद्धोञ्छमात्रयात्राधिकारस्य ॥६०॥**

---

जन्मान्तरेषु सत्त्वानामनेकदुःखसङ्कटावतारणे [१]अलं जीवितापहारि चेति । तदेतच्छक्य-मप्रमत्तेन। उद्वेष्टयितुं विनाशयितुम् । प्रमादः कषायनिद्रादिस्तद्रहितेन प्रशमस्थितेनेति प्रशमार्पितमनसा प्रशमैकरसेन। घनं गहनमेतज्जालम् । निरवशेषमामूलादुद्धर्तुमिति ॥५८॥

**( ५९ ) टीका**—पञ्चभिः कारिकाभिः कुलकम्। **अस्येति**। अस्य महादोषसञ्चयजालस्य। मूलनिबन्धं मौलं कारणं विज्ञाय । तच्छेदने उद्यम उत्साहः परो यस्य[१] ''मयैतन्महाजालं छेत्तव्यम्''। दर्शनं तत्त्वार्थश्रद्धानलक्षणम्। चारित्रं सामायिकादि। तपो द्वादशभेदमनशनादि। स्वाध्यायः पञ्चप्रकारो वाचनाप्रच्छनादिः। ध्यानमेकाग्रचित्तनिरोधलक्षणं धर्म्यं शुक्लं च। धर्मादनपेतं धर्म्यमाज्ञापायविपाकसंस्थानविचयभेदाच्चतुर्विधं, शुक्लमप्यत्यन्तविशुद्धाशयस्यापृथक्त्वैकत्व-वितर्कमविचारं[२] (पृथक्त्ववितर्कसविचारमेकत्ववितर्काविचारं) सूक्ष्मक्रियाप्रतिपाति व्युपरत-क्रियालक्षणं चतुर्धा। एभिः सम्यग्दर्शनादिपरिणामैर्युक्तस्य ॥५९॥

**( ६० ) टीका—**तथा—**प्राणेति** । प्रमत्तयोगात्प्राणव्यपरोपणं प्राणवधः । अनृतभाषणं

---

उद्यतेन। तथा प्रशमस्थितेन—उपशमपरेण। जालं तु कीदृशम् ?—घनमपि—गहनमपि, तथा निरवशेषं-समस्तमिति ॥५८॥

**( ५९ ) ( वि० )** तदुद्वेष्टने चास्य जीवस्य एवंविधा चिन्ता उपजायते इत्याद्यार्यापञ्चकेनाह—**अस्येति । प्राणेति । जिनेति । परिणाममिति । वैराग्येति ।** अस्य रागादिदोषजालस्य मूलनिबन्धं प्रमादयोगरूपं ज्ञात्वा—बुद्ध्वा जीवस्येति शेषः । शुभा—प्रशस्येयमेषो[१]पपद्यते—जायते चिन्ता-चित्तवृत्तिरिति पञ्चमार्यापर्यन्ते, इति सण्टङ्कः । ततो जीवस्य विशेषणत्रयोदशकमाह—तस्य-दोषजालस्य छेदने—घाते [२]उद्यम उत्साहस्तत्र परः—प्रकृष्टः तस्य, तथा दर्शनं—तत्त्वश्रद्धानम्, चारित्रं-सामायिकादि पञ्चधा, [३]तपोऽनशनाद्यनेकविधं, स्वाध्यायो वाचनादि पञ्चधा, ध्यानं—धर्म्यादि द्विधा, ततो द्वन्द्वस्तैर्युक्तस्येति ॥५९॥

**( ६० ) ( वि० )** प्राणवधेत्यादिप्रथमार्धेन सुखबोधेन मूलगुणयुक्तस्येति कथितम् ।

---

**( ५९ ) ( अव० )—रागद्वेषादिजालस्य मूलकारणं । जीवस्येति शेषः ॥५९॥**

**( ६० ) ( अव० )—नवकोटयो हनन ३ पचन ३ क्रयणानां ३ स्वयं करणकारणानुमतिभिः**

सद्भूतनिह्नवो नास्त्यात्मेति, असद्भूतोद्भावनं सर्वगत आत्मेति, विपरीतं कटुकसावद्यादिवचनं च, गामश्वं भाषमाणस्य विपरीतं, कटुकं परुषमाक्रोशादि, सावद्यवचनम् अनेन मार्गेण मृगपशुयूथं गतमिति लुब्धकायाचष्टे। चौरबुद्ध्या परस्वम् आत्मसात्करोति परधनहरणं। मैथुनं द्वयोर्योगः सचित्तयोः सचित्ताचित्तयोर्वा । मिथुनस्य भावो मैथुनं स्त्रीपुंनपुंसकवेदोदयादासेवनम्। ममत्वलक्षणः परिग्रहो ममेदं स्वम् अहमस्य स्वामीति **'मूर्च्छा परिग्रह'** इति वचनात् (तत्त्वार्थ ७-१३)। एभ्यः प्राणिवधादिभ्यो विरतस्य । निशि भोजनं तु परिग्रहलक्षणेन अदत्तादानलक्षणेन [१]चान्तर्भावितम् । एवं मूलगुणानभिधायोत्तरगुणानभिधित्सुराह**—नवेति** । कोटिरंशं यथा षट्कोटिस्तम्भः षडश्रिः[२] षडंश इत्यर्थः। न स्वयं हन्ति, नान्येन घ्नन्ति, घ्नन्तमन्यं नानुमोदते, एतास्तिस्त्रः कोटयः। तथा न स्वयं पचति, न पाचयति, पचमानं नानुमोदते, इत्येता अपि तिस्त्रः कोटयः। तथा न स्वयं क्रीणाति, न क्रापयति, क्रीणानमन्यमपि नानुमोदते, इत्येताश्चान्यास्तिस्त्रः। एकत्र समाहृता नव कोटयः। पुनरिमा द्विधा भिद्यन्ते अविशुद्धकोटिर्विशुद्धकोटिश्च। आद्याः षडविशुद्धकोटयः[३] पाश्चात्यास्तिस्त्रो भवन्ति विशुद्धकोटिः[४] । उद्गमोऽन्वेषणं यथा-**उग्गमं से अ पुच्छिज्जेत्यादि** (दशवै. ५-१-५६) । तेन शुद्धमुद्गमशुद्धम् । उञ्छमिवोञ्छं लूनकेदारपतितव्रीहिकणानामु[५]च्चयनमुञ्छं न कस्यचित्कृषीवलादेः पीडाकारि । तथाऽकृता[६]ऽकारितासंकल्पितानुमतम् [७]निसृष्टं कल्पनीय-मादीयमानं न कञ्चन सत्त्वमुपहन्ति। उञ्छमेवोञ्छमात्रम् । तेन तादृशा यात्रायामधिकारो यस्य स उञ्छमात्रयात्राधिकारः । यात्रा त्वहोरात्राभ्यन्तरे विहितक्रियानुष्ठानं तत्राधिकृतस्य नियुक्तस्येत्यर्थः ॥६०॥

---

अथोत्तरगुणयुक्ततामाह-नव च ताः कोटयश्च-अग्रभागा अंशा अश्रयो नवकोटयः, ताश्चैवम्-न स्वयं हन्ति १ नान्येन घातयति २ घ्नन्तमन्यं नानुमोदयते ३, एवं न पचति १ न पाचयति २ पचन्तं नानुमोदयते ३, एवं न क्रीणाति १ न क्रापयति २ क्रीणन्तं नानुमोदयते ३, एता मीलिता नव कोटयः। पुनरिमा द्विधा-आद्याः षट् अविशुद्धकोटयोऽन्त्यास्तिस्त्रो विशुद्धकोटयः। तथोद्गमः-उत्पत्तिः, यथा **'उग्गमं से य पुच्छेज्जा'** इत्यादि, ततो नवकोटीभिरुद्गमस्तेन शुद्धो-निर्दोषस्तथोञ्छ इवोञ्छः-शुद्धाहारः स एवोञ्छमात्रम् । ततश्च नवकोट्युद्गमशुद्धं च तदुञ्छमात्रं च तत्तथाभूतं-निर्दोष आहारस्तेन यात्रायां-संयमे अधिकारो-नियोगो यस्य स तथा तस्येति ॥६०॥

---

**त्रिरूपास्ताभिरुद्गमादिभिश्च शुद्धं[१] यदुञ्छमात्रं भैक्ष्यं तेन यात्राधिकारात् संयमयात्रा तया निर्वाहो यस्य शुद्धतमाहारोपधिपात्रग्रहणतत्परस्येति भावार्थः ॥६०॥**

**जिनभाषितार्थसद्भावभाविनो विदितलोकतत्त्वस्य ।**
**अष्टादशशीलाङ्गसहस्रधारण[1] कृतप्रतिज्ञस्य ॥६१॥**

**परिणाममपूर्वमुपागतस्य शुभभावनाऽध्यवसितस्य ।**
**अन्योन्यमुत्तरोत्तरविशेषमभिपश्यतः समये ॥६२॥**

---

**( ६१ ) टीका—जिनेति** । जिनैर्भाषितोऽर्थ उत्पादव्ययध्रौव्ययुक्तो जीवादिः सप्तविधः । स गणधरैः सूत्रेण सूचितस्तस्यार्थस्य सद्भावं भावयति यः[1] स यतिस्तच्छीलश्च । 'एवमेतत् तद्यथा भगवद्भिरुक्तं गणधरैर्दृष्टं[2] तथैवायं नान्यथा'इति सद्भावभाविनः । विदितमवगतं लोकतत्त्वं येनासौ विदितलोकतत्त्वः जीवाजीवाधारक्षेत्रं लोकस्तस्य तत्त्वं परमार्थः । नास्त्यत्र वालाग्रप्रमाणोऽपि प्रदेशो यत्र त्रसत्वेन स्थावरत्वेन वा नोत्पन्नो मृतो वा यथासम्भवम् । अथवाऽधोमु[3]खमल्लकाकृतिर्मध्ये स्थालाकार उपरि मल्लकसमुद्गकाकारः[4] नारकतिर्यङ्मानुषदेवाधिवासो जन्मजरा[5]मरणोपद्रवबहुलः । अष्टादशशीलाङ्गसहस्रेषु कृतप्रतिज्ञस्य अष्टादशशीलाङ्गसहस्राण्युपरि वक्ष्यमाणानि **धर्माद्भूम्या-दीन्द्रिये**त्यस्यां कारिकायां(२४५) । अष्टादशशीलाङ्गसहस्राणि धारयितव्यानि यावज्जीवं मयेति आरूढप्रतिज्ञस्य ॥६१॥

**( ६२ ) टीका—परिणाममिति ।** [1]शुद्धिप्रकर्षयोगादपूर्वः परिणाम उच्यते [2]मनसस्त-मनुप्राप्तस्य । शुभभावनाध्यवसितस्य । अध्यवसितमध्यवसायः । शुभभावनाः पञ्चानां महाव्रतानां पञ्चविंशतिर्भावनाः[3] परिपठिता, अनित्यत्वादिका वक्ष्यमाणा (वा[4]) द्वादश भावनाः तदध्यव-

---

**( ६१ ) ( वि० )** जिनभाषितार्थानां-जीवादिवस्तूनां सद्भावान्-परमार्थान् भावयति स तथा तस्येति। विदितलोकतत्त्वस्य-ज्ञातलोकस्वरूपस्य, लोकश्च-जीवाजीवाधारक्षेत्रम् । अष्टादशानां शीलानाम्-अवयवे समुदायोपचारात् शीलाङ्गानां-चारित्रांशानां वक्ष्यमाणानां सहस्राणि तेषां धारणं-परिपालनं तस्मिन् कृता-विहिता प्रतिज्ञा-अङ्गीकारो येन स तथा तस्येति ॥६१॥

**( ६२ ) ( वि० )** उपागतस्य-प्राप्तस्य । कम् ?-परिणामं-धर्माध्यवसायम् । कीदृशम् ?-अपूर्वं शुद्धिप्रकर्षयोगात्, शुभभावनासु-द्वादशविधासु महाव्रतसत्कपञ्चविंशतिप्रमाणासु वाऽध्यवसि-तस्य कृताध्यवसितस्येति समासः। अभिपश्यतः-पर्यालोचयतो जाना[1]नस्येत्यर्थः । किम् ?-

---

**( ६१ ) ( अव० )—सर्वज्ञभाषितजीवादिप[1]दार्थपरमार्थस्वरूपभावनाशीलस्य जीवाजीवाधार-भूतलोकोऽवगतस्वरूपस्य वक्ष्यमाणाष्टादश[2]सहस्रशीलाङ्गधारणकृतप्रतिज्ञस्य ॥६१॥**

**( ६२ ) ( अव० )—दर्शनमोहनीयकर्मक्षयोपशमेन दर्शनशुद्धिरूपमनुप्राप्तस्य, धर्माध्यवसा[1]यमध्यवसायस्य, अन्योन्यं स्वदर्शनपरदर्शनापेक्षयोत्तरोत्तरविशेषं पश्यतो जिनागमे ॥६२॥**

**वैराग्यमार्गसम्प्रस्थितस्य संसारवासचकितस्य ।**
**स्वहितार्थाभिरतमतेः शुभेयमुत्पद्यते चिन्ता ॥६३॥**
**भवकोटीभिरसुलभं मानुष्यं प्राप्य कः प्रमादो मे ।**
**न च गतमायुर्भूयः प्रत्येत्यपि देवराजस्य ॥६४॥**

---

सायस्य । समये सिद्धान्ते । अन्योन्यं परस्परं द्वयोर्विशेषयोरयमुत्तरः प्रधानम्, [५]अमुष्मादप्ययं विशेषः प्रधानतर इत्यादि विशेषमभिप्रायं[६] पश्यतो भावनामयेन[७] ज्ञानेनेति ॥६२॥

**( ६३ ) टीका–वैराग्येति** । वैराग्यपथप्रस्थितस्य सम्यग्दर्शनादित्रयं वैराग्यमार्गः । संसारवासाच्चकितस्य त्रस्तस्येत्यर्थः । स्वहितमैकान्तिकादिगुणयुक्तं मुक्तिसुखं तदेवार्थः स्वहितार्थे आभिमुख्येन रता बद्धा प्रीतिर्मतिर्यस्य तस्यैवंप्रकारस्य । शुभेयमुत्पद्यते चिन्ता । इयमिति वक्ष्यमाणा । निर्जराहेतुत्वाच्छुभा जायते चिन्ता । अत्र कुलकपरिसमाप्तिः ॥६३॥

**( ६४ ) टीका–**तामेव चिन्तां स्पष्टयन्नाह–**भवकोटीभिरिति** । कोटीशब्दः सङ्ख्यावाची। स चानन्तसङ्ख्यायाः सूचकः । भवा नरकतिर्यग्देवाख्यास्तेषां बह्वीभिः कोटीभिरनन्ताभिरतीताभिरपि न सुलभं दुर्लभमेव। मनुष्यस्य भावो मानुष्यं [१]मानुषजन्मेत्यर्थः । तदेवंविधमतिदुष्प्रापं प्राप्य । कोऽयं मम प्रमादोऽवबुध्यमानस्यै[२]वाननुष्ठानं प्रमादो ज्ञानादिषु मुक्तिसाधनेषु । कदाचिदिदमाशङ्के[३]तात्मा मनुष्यत्वमेवास्तु सदा सुन्दरमक्षीणमिति, तच्च न, यतः–**न च गतमायुरित्यादि** । प्रतिक्षणमुदयप्राप्तं वेद्यमानम्[४]अनुभूयते अनुभवाच्च परिगलति । न च क्षीणं पुनरावर्तते सौधर्माधिपतेरपि शक्रस्य न प्रत्यागच्छति किं पुनर्नरस्येति ॥६४॥

---

उत्तरोत्तरविशेषं, कथम् ?–अन्योन्यं, यथा सामायिकचारित्रं तावन्मूलं विशुद्धिमत्, ततोऽपि छेदोपस्थापनीयचारित्रं विशुद्ध्या विशेषवदित्यादि । मूलवस्त्वपेक्षयाऽग्रेतनाग्रेतनानि वस्तूनि प्रधानानीति तात्पर्यम् । क्व ?–समये–जिनशासनस्य विषये इति ॥६२॥

**( ६३ ) ( वि० )** वैराग्यमार्गसंप्रस्थितस्य–विरागतापथाश्रितस्य संसारवासचकितस्य–भववसनत्रस्तस्य स्वहित–आत्मपथ्यो[१] मोक्षः स एवार्थः–प्रयोजनं तत्राभिमुख्येन रता–प्रीता मतिः–बुद्धिर्यस्य स तथा, तस्यैवंविधस्य शुभेयमुपपद्यते चिन्तेति व्याख्यातमेवेति सूत्रपञ्चकार्थः ॥६३॥

**( ६४ ) ( वि० )** तामेव चिन्तां स्पष्टयन्नाह–**भवेति** । भवा–नारकाद्यास्तेषां कोटीभिः सङ्ख्याविशेषैः असुलभं–दुर्लभमेव मानुष्यं–मनुजजन्म तदेवंविधमतिदुष्प्रापं प्राप्य कोऽयं मम प्रमादः ?, न च–नैव गतं–क्षीणमायुः–जीवितं भूयः–पुनरपि प्रत्येति–समागच्छति देवराजस्यापि–शक्रस्यापि, किं पुनरन्यस्येति ॥६४॥

---

**( ६३ )( अव० )त्रस्तस्य स्वहितार्थे आत्मपथ्यमोक्षप्रयोजने आभिमुख्येन रता बद्धा प्रीतिर्मतिर्यस्य ६३**
**( ६४ ) ( अव० )–अनन्तसङ्ख्यायाः सूचका भवकोटयः ॥६४॥**

**आरोग्यायुर्बलसमुदयाश्चला वीर्यमनियतं धर्मे ।**
**तल्लब्ध्वा हितकार्ये मयोद्यमः सर्वथा कार्यः ॥६५॥**

**शास्त्रागमादृते न हितमस्ति न च शास्त्रमस्ति विनयमृते ।**
**तस्माच्छास्त्रागमलिप्सुना विनीतेन भवितव्यम् ॥६६॥**

---

**( ६५ ) टीका—**न च निर्द्वन्द्वं मनुष्यजन्म, यस्मात्**—आरोग्येति** । नीरुजत्वमारोग्यं तच्चलमनित्यमित्यर्थः । नीरुजोऽपि रोगान् [१]लभते सनत्कुमारादिवत् । आयुरपि [२]बिन्दोराधानात् प्रभृति गर्भकौमारयौवनस्थविरावस्थासु प्रतिक्षणं [३]क्षययुक्तमध्यवसानादिभिश्च प्रकारैः सप्तभिर्भेदमुपैति । बलं प्राण उत्साहो वीर्यान्तरायक्षयोपशमजः सामर्थ्यविशेषः । स च बलवतो दृष्टः । पुनस्तस्यैव दुर्बलावस्थायां न सम्भवतीत्यनित्य एव । [४]समुदया धनधान्यादिनिचयाः क्षणभङ्गुराः । वीर्यं चोत्साहः परिषहजयादौ तदनियतं विनश्वरम् । धर्मे क्षान्त्यादिके । [५]तत्प्राप्य । हितकार्ये हितं ज्ञानादि तदेव कार्यम् । मयोत्साहः सर्वथा सर्वप्रकारमविश्रान्त्या कार्य[६] इति ॥६५॥

**( ६६ ) टीका—**किं पुनस्तद्धितमित्याह**—शास्त्रागमादिति** । शास्त्रलक्षण-मुपरिष्टाद्वक्ष्यते [१]**शास्वीती**त्यादौ । शासनमुपदेशः । शासनादुपदेशदानात्त्राणाच्च शास्त्रं भगवतो मुखपङ्कजादर्थनिर्गमः, गणधरास्यकमलेभ्यः सूत्रनिर्गमः, उभयं चैतच्छास्त्रशब्दवाच्यं शास्त्रमेवागमः शास्त्रागमः । गणधरप्रभृत्याचार्यपरंपरया आगत इत्यागमः । शास्त्रागमादृते

---

**( ६५ ) ( वि० )** किञ्च**—आरोग्येति** । आरोग्यं-नीरोगता, आयुः-जीवितम्, बलं-सामर्थ्यम्, [१]समुदयो-लक्ष्मीस्ततो द्वन्द्वस्ते चलाः-चञ्चलाः, वीर्यम्-उत्साहस्तदनियतं-विनश्वरं धर्मे-क्षान्त्यादिके, तत्-प्राक्तनम् आरोग्यादि लब्ध्वा-प्राप्य हितकार्ये-शास्त्राध्ययनादौ मयोद्यम-उत्साहः सर्वथा-सर्वप्रकारैः कार्यो-विधातव्य इति ॥६५॥

**( ६६ ) ( वि० )** हितकार्ये शास्त्राध्ययनादावित्युक्तं, तच्च विनयमृते न भवत्यतो विनीतेन भाव्यमित्यावेदयन्नाह**—**[१]**शास्त्रागमादिति** । शास्त्रम्-आचारादि गुरुपरम्परागतं तदेवागमः-

---

**( ६५ ) ( अव० )—समुदया=धनधान्यादिनिचयाः । धर्मे=[१]क्षान्तिप्रभृतिके, तदारोग्यादि [२]सर्वं लब्ध्वा=प्राप्य हितकार्ये=शास्त्राध्ययनादौ ॥६५॥**

**( ६६ ) अव०—शास्त्रमिहलौकिकं, [१]आगमः परलौकिकः । अथवा शास्त्राणा[२]मागम आगमनं तल्लाभमिच्छता ॥६६॥**

**कुलरूपवचनयौवनधनमित्रैश्वर्यसम्पदपि पुंसाम् ।**
**विनयप्रशमविहीना न शोभते निर्जलेव नदी ॥६७॥**

---

शास्त्रागमाद्विना नापरं हितमस्ति। न च शास्त्रलाभो भवत्यविनयस्य। आचार्यादिशुश्रूषया विनीतेन शास्त्रं प्राप्यते । तस्माच्छास्त्रागमलाभमिच्छता शास्त्रागमलिप्सुना विनीतेन भवितव्यमिति ॥६६॥

**( ६७ ) टीका—**सत्स्वप्यनेकेषु गुणेषु पुंसां विनय एव भूषणं परं, नान्वयरूप-सौभाग्यादीति दर्शयन्नाह—**कुलेति** । [१]विशिष्टोऽन्वयः कुलं क्षत्रियादि । रूपं शरीरावयवानां लक्षणान्वितः सन्निवेशविशेषः । वचनं मधुरं प्रियभाषित्ववाग्मित्वादि । यौवनं यूनो भावः । [२]युवा मन्दरूपोऽपि शोभते प्रायो यौवनगुणादेव । धनं हिरण्यसुवर्णमणिमुक्ताप्रवालादि [३]गोमहिष्यजाऽविकादि वा । मित्रं स्नेहवान् पुरुषो विश्रम्भस्थानम् । ऐश्वर्यमीश्वरभावः प्रभुत्वम् । सम्पच्छब्दः प्रत्येकमभिसम्बन्धनीयः । कुलसम्पद्रूपसम्पदैश्वर्यसम्पदित्यादि । सम्पत् प्रकर्षविशेषः । एषापि कुलादिसम्पन्न भ्राजते पुरुषाणां, विनयप्रशमविहीनत्वात् । विनयोऽभ्युत्थानासनप्रदानाञ्जलिप्रग्रहादिरुप[४]चाराख्यः । प्रशमो माध्यस्थ्यमौदासीन्यम् । आभ्यां विनयप्रशमाभ्यां रहिता न शोभते । निर्जलेव नदी। यथा सरिज्जलशून्या हंससारसक्रौञ्चचक्रवाककुलैरासेव्यमाना न भ्राजते[५]ऽतिदीर्घगर्तामात्रमरमणीयमुद्वेजकमेव भवतीत्येवं विनयरहितः पुमानिति ॥६७॥

---

[१]शास्त्रागमस्तस्माद्दते-विना न हितमस्ति। न च शास्त्रमस्ति विनयमृते । तस्माच्छास्त्रागमलिप्सुना-शास्त्रागमलाभमिच्छता विनीतेन भवितव्यमिति ॥६६॥

**( ६७ ) ( वि० )** सत्स्वपि कुलादिषु अविनीतो न शोभत इत्याह—**कुलेति** । कुलम्-उग्रादि, रूपं-शरीरावयवसमताजनितं सौन्दर्यं, वचनं-मधुरत्वादिगुणभाक्, यौवनं-[१]युवावस्थानं, धनं-हिरण्यादि गणिमादि चतुष्पदादि वा, मित्रं-सखा, ऐश्वर्यम्-ईश्वरभावः, प्रभुत्वमित्यर्थः, ततो द्वन्द्वसमासस्तेषां सम्पत्-प्रकर्षविशेषः । सम्पच्छब्दः प्रत्येकं योज्यते । साऽपि पुंसां-नृणां कीदृशी ?-विनयप्रशमविहीना न शोभते-न भाति । केवेत्याह-निर्जला-जलहीना नदीव-सरिदिवेति ॥६७॥

---

**( ६७ ) ( अव० )—[१]कुलमुग्रादि, वचनं माधुर्यादिगुणमत्, शेषाणि प्रतीतानि, सम्पच्छब्दः प्रत्येकं योज्यते** ॥६७॥

**न तथा सुमहार्घ्यैरपि वस्त्राभरणैरलङ्कृतो भाति ।**
**श्रुतशीलमूलनिकषो विनीतविनयो यथा भाति ॥६८॥**

**गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि ।**
**तस्माद् गुर्वाराधनपरेण हितकाङ्क्षिणा भाव्यम् ॥६९॥**

---

**( ६८ ) टीका—न तथेति** । अतिमहामूल्यैरपि वस्त्रादिभिर्विभूषितो [१]यथा शोभते । (न[२] तथा शोभते सुमहार्घ्यवस्त्राभरणभूषितः पुरुषः यथा शीलश्रुतभूषितः)। श्रुतमागमः । शीलं मूलोत्तरगुणभेदं चरणम् । तयोर्निकषः[३] परीक्षास्थानम् । यदि विनीतस्ततस्तस्य तच्छ्रुतं, यदि च विनीतस्ततः शीलम्, अन्यथा मूर्खो दुःशील एव च स्यात्। सुवर्णपरीक्षापाषाणको निकष इति प्रतीतम् । तद्वच्छ्रुतशीलपरीक्षा विनयनिकषे कर्तव्ये विशेषेण नीतः प्रापितो विनयो येनासौ विनीतविनय इति ॥६८॥

**( ६९ ) टीका—**अपि च—**गुर्वायत्ता इति** । गृणन्ति प्रतिपादयन्ति शास्त्रार्थमिति गुरवः । तदायत्ताः शास्त्रारम्भाः सूत्रपाठप्रवृत्तिरर्थश्रवणप्रवृत्तिश्च । गुर्वायत्ताः कालग्रहण-स्वाध्यायप्रेषणोद्देशसमुद्देशानुज्ञापरिकराः शास्त्रारम्भाः सर्वेऽपीत्युच्यन्ते । **तस्मात् गुर्वाराधनपरेणे**ति गुरोराराधनमहर्निशं पादसेवा । सम्यक्क्रियानुष्ठानं [१]निष्ठ्यूतमल्लकढौकनं[२] दण्डकग्रहणं, [३]तत्पृष्ठतो गमनं, निर्विचारं तदभिहितानुष्ठानमित्याद्याराधनमभिमुखीकरणं तत्परेणेति तदुपयुक्तेन भवितव्यमिति ॥६९॥

---

**( ६८ ) ( वि० )** अस्यैवार्थस्योपचयार्थमाह—**नेति** । न च-नैव तथा भाति-शोभते इति सम्बन्धः । कैः ?-वस्त्राभरणैः । कीदृशैः ?-सुमहार्घैरपि अलङ्कृतो-विभूषितो यथा भाति । कीदृशः पुमान् ?-श्रुतम्-आगमः, शीलं-मूलोत्तरगुणभेदं चरणं तयोर्मूलनिकषो-निकष इव, [१]निकषपट्टकः-परीक्षास्थानं, विनीतो-विशेषेण प्राप्तो विनयो येन स तथेति ॥६८॥

**( ६९ ) ( वि० )** अपि च—**गुर्वायत्तेति** । गुर्वायत्ता-धर्माचार्याद्यधीना, यस्माद्-यतः, के ? -शास्त्रारम्भाः, आचार्यादिसूत्रार्थग्रहणलक्षणाः, भवन्ति-जायन्ते, सर्वेऽपि-समस्ता अपि, तस्मात्-तेन गुर्वाराधनपरेण-आचार्याद्यासेवापरेण हितकाङ्क्षिणा-मोक्षाभिलाषिणा शिष्येण भाव्यं-भवित-व्यमित्यर्थः ॥६९॥

---

**( ६८ ) ( अव० )—आगमव्रतमूलनिर्णयं प्रति निकषः कषपट्टसमानः परीक्षास्थान-मित्यर्थः । [१]विशेषेनी( ने )तः=प्राप्तो विनयो येन स तथा ॥६८॥**

**( ६९ ) ( अव० )—हितकाङ्क्षिणा=मोक्षाभिलाषिणा शिष्येण ॥६९॥**

**धन्यस्योपरि निपतत्यहितसमाचरणघर्मनिर्वापी ।**
**गुरुवदनमलयनिसृतो वचनसरस[१]चन्दनस्पर्शः ॥७०॥**

**दुष्प्रतिकारौ मातापितरौ स्वामी गुरुश्च लोकेऽस्मिन् ।**
**तत्र गुरुरिहामुत्र च सुदुष्करतरप्रतीकारः ॥७१॥**

---

**( ७० ) टीका—**गुरौ चोपदिशति 'पुण्यवानहमिति य एवमनुग्राह्यो गुरूणां, [१]बहुमन्तव्यमेव, नोद्वेगः कार्यः' इति दर्शयति[२]—**धन्यस्येति** । धनं ज्ञानादि तल्लब्धा धन्यः पुण्यवान् । तस्योपरि निपतति । वचनसरसचन्दनस्पर्श इति वक्ष्यति । कीदृगसौ वचनसरसचन्दनस्पर्शः ? अहितसमाचरणघर्मनिर्वापी अहितमुत्सूत्रं समाचरणं क्रियानुष्ठानम् । अहितसमाचरणमेव घर्मस्तापविशेषस्तं निर्वापयत्यपनयति निरस्यति तच्छीलश्चेति । **गुरुवदनमलयनिसृत इति** । गुरोराचार्यादेर्वदनं मुखं तदेव मलयपर्वतस्तस्मान्निसृतो निर्गतः । वचनमेव सरसचन्दनं स्नेहोपबृंहितहितोपदेशगर्भं सरसं तदेव [३]चन्दनं तस्य स्पर्शः । शीतो घर्मापनयनसमर्थः । मलये तु सरसचन्दनमार्द्रमभिनवच्छिन्नं तस्य स्पर्शः घर्मापहारी भवति सुतराम् । अथवा [४]सरसश्चन्दनस्पर्शः । रसो द्रवता चन्दनपङ्कः सपानीय इत्यर्थः ॥७०॥

**( ७१ ) टीका—**एवं[१] हितोपदेशेनानुगृह्णतः शिष्यानाचार्यस्य कः प्रत्युपकारः शिष्येण विधेय इत्याह—**दुष्प्रतिकाराविति** । दुःखप्राप्यः[२] प्रतीकारो दुष्कर इति वा दुष्प्रतिकारः । मातापितरौ तावद्दुष्प्रतिकारौ। माता तु जातमात्रस्यैवाभ्यङ्गस्नानस्तनक्षीरदानमूत्राशुचिक्षाल-नादिनोपकारेण वृद्धिमुपनयति [३]•कल्यवर्ताद्याहारप्रदानेनोपकारवती अदृष्टपूर्वस्याकृतोप-

---

**( ७० ) ( वि० )** गुरौ [१]चोपदिशति सति एतत् परिभावयतो बहु मन्तव्यमेव, नोद्वेगः कार्य इति दर्शयन्नाह—**धन्यस्येति** । धन्यस्य-पुण्यवत उपरि निपतति च [२]वचनसरसचन्दनस्पर्शः इति सम्बन्धः । कीदृशः ?-अहितसमाचरणघर्मनिर्वापी-अपथ्यासेवनतापापनोदनकर्ता गुरूणां वदनं-वक्त्रं तदेव मलयः पर्वतस्तस्मान्निसृतो-विनिर्गतो गुरुवदनमलयनिसृतो वचनं-वाक्यं तदेव सरसचन्दनस्पर्शः-सार्द्रश्रीखण्डस्पर्शनमिति ॥७०॥

**( ७१ ) ( वि० )** किमित्येवं गुरुवचनमभिमन्यत इत्याह—**दुष्प्रतिकाराविति** । दुष्प्रतिकारौ-अशक्यप्रत्युपकारौ मातापितरौ भवत इति शेषः । तथा स्वामी-राजादिकः पोषकश्च गुरुः-धर्माचार्यः

---

**( ७० ) ( अव० )—अपथ्यसमाचरणं[१]तापापनोदकर्ता गुरुमुखमलयाचलोद्भूतः[२] ॥७०॥**

---

● कल्यवर्तः-प्रातरशनम् (अभि.चिं.४२५) ।

**विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् ।**
**ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ॥७२॥**
**संवरफलं तपोबलमथ तपसो निर्जरा फलं दृष्टम् ।**
**तस्मात् क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ॥७३॥**

---

कारस्य [४]चापत्यस्य [५]अतो दुष्प्रतिकारा [६]माता । न हि तस्याः प्रत्युपकारः शक्यते कर्तुम्। पितापि हितोपदेशदानेन शिक्षाग्राहणेन भक्तपरिधानप्रावरणादिनोपग्रहेणानुगृह्णानो दुष्प्रतिकारः । स्वामी राजादिर्भृत्यानां [७]ग्रामनगरविषयताम्बूलपानदानादिना भवत्युपकारकः । भृत्यास्तु न तथा प्रत्युपकारसमर्थाः । प्राणव्ययेन[८] महार्घां यद्यपि श्रियमानयन्ति स्वामिनो भृत्यास्तथापि पूर्वमकृतोपकाराणामेव भृत्यानामुपकारकः[९] स्वामी, भृत्यास्तु कृतोपकाराः प्रत्युपकुर्वन्ति[१०] । गुरुराचार्यादिः, स च दुष्प्रतिकारः, सन्मार्गोपदेशदायित्वात् शास्त्रार्थप्रदानात् संसारसागरो-त्तारणहेतुत्वाच्च[११] । [१२]इहामुत्र च परलोके सुदुर्लभतरः प्रतीकारो यस्य गुरोरिति सुष्ठु दुर्लभतरः प्रतीकार इति ॥७१॥

**( ७२ ) टीका—**सम्प्रति विनयस्य पारम्पर्येण पर्यन्तवर्ति मोक्षाख्यं फलं दर्शयन्नाह—**विनयफलमिति** । विनयस्य फलं शुश्रूषा [१]श्रोतुमिच्छा यदाचार्य उपदिशति तत् सम्यक् शुश्रूषते श्रुत्वा चानुतिष्ठति । गुरोः सकाशादाकर्ण्य किं फलमिहावाप्यतेऽत आह—गुरुशुश्रूषायाः फलं श्रुतज्ञानमागमज्ञानलाभ इत्यर्थः । ज्ञानस्य किं फलम् ? विरतिरास्रवद्वारेभ्यो निवृत्तिः । विरतेः फलमाश्रवद्वारस्थगनम् । विरतौ सत्यामाश्रवद्वाराणि स्थगितानि भवन्ति । ततश्चाश्रवद्वारस्थगनात् संवरो जायते फलभूतः संवरात्मा भवति अपूर्वकर्मप्रवेशनिरोधात्[२] ॥७२॥

**टीका—संवरफलमिति ।** [१]संवरफलं तपोऽनुष्ठानं प्राक्तनकर्मक्षपणार्थम् । तपसि बलं

---

चः समुच्चये । लोके-मर्त्यनिवहेऽस्मिन्-अत्र, तत्रापि विशेषमाह-तत्र-तेषु चतुर्षु मध्ये गुरुरिह-अत्र जन्मन्यमुत्र च-परस्मिन् भवे सुदुष्करतरो-महाकष्टेनाप्यशक्यः प्रत्युपकारो यस्य स तथेति ॥७१॥

**( ७२ ) ( वि० )** अथ विनयादेवोत्तरोत्तरफलमार्यात्रयेणाह-**विनयेति** । दृष्टमिति पदं वक्ष्यमाणं सर्वत्र योज्यम् । विनयफलं दृष्टम् । किम् ?-शुश्रूषा-श्रोतुमिच्छा, यदाचार्य उपदिशति तत् सम्यक् शुश्रूषते, श्रुत्वा चानुतिष्ठति । गुरुशुश्रूषाफलं श्रुतज्ञानम्-आगमलाभो, ज्ञानस्य फलं विरतिः-नियमो, विरतिफलम् आस्रवनिरोध-आस्रवद्वारस्थगनं, संवर इत्यर्थ इति ॥७२॥

**( ७३ ) ( वि० ) संवरेति** । संवरफलं तपोबलं-तपःसामर्थ्यम्, अथ तपसो निर्जरा फलं दृष्टं,

---

**( ७२ )( अव० )—शुश्रूषा श्रोतुमिच्छा यदाचार्य उपदिशति तत्सम्यक् श्रौति क्रिययोपयोगं च नयति ७२**
**( ७३ ) ( अव० )—तपसोऽनशनादेर्बलं=सामर्थ्यं संवरफलं निर्जरा कर्मपरिशाटिः ॥७३॥**

**योगनिरोधाद् भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः ।**
**तस्मात्कल्याणानां सर्वेषां भाजनं विनयः ॥७४॥**

**विनयव्यपेतमनसो गुरुविद्वत्साधुपरिभवनशीलाः ।**
**त्रुटिमात्रविषयसङ्गादजरामरवन्निरुद्विग्नाः ॥७५॥**

---

तपोबलं तपसि कर्तव्ये शक्तिविशेषः । तपसस्तु निर्जरा फलं [२]कर्मपरिशाटनम् । तस्मात् कर्मापगमात् क्रिया निवर्तते सैव फलं निर्जरायाः । क्रियानिवृत्तेर्निरुद्धयोग[३]स्यायोगित्वम् ॥७३॥

**( ७४ ) टीका—योगेति** । योगनिरोधस्य फलं जन्मजरामरणप्रबन्धलक्षणाया [१]नारकादिभवसन्ततेरात्यन्तिकः क्षयः । जन्मादिसन्ततिक्षयाच्च मोक्षावाप्तिः । ऐकान्तिकात्यन्तिकादिगुणयुक्तं स्वात्मन्यवस्थानं मोक्षः । तस्मात्पारम्पर्यद्वारेण सर्वकल्याणानाम् [२]आश्रयो भाजनं विनयः [३]सर्वकल्याणरूपो मोक्षः । अथवा गुरुशुश्रूषादि[४]कल्याणाद् यावदयोगित्वं, भवसन्ततिक्षयश्च[५], सर्वाण्येतानि कल्याणानि, एषां फलं मोक्ष इति ॥७४॥

**( ७५ ) टीका—**ये पुनरविनीतास्तेषां कः फलविपाक इत्याह—**विनयेति** । उक्तलक्षणो विनयः तस्माद् व्यपेतं विगतं मनो येषां विनयव्यपेतमनसः । गुरूणामाचार्यादीनां विद्वांसोऽन्येऽपि चतुर्दशपूर्वाद्यर्थज्ञाः ज्ञानादिसाधनत्रयेण मोक्षमभिलषन्तः साधयन्तः साधवः । [१]एषां परिभवोऽनादरो वन्दनाभ्युत्थानादि [२]प्रतिपत्तेरकरणं तदेव च शीलं स्वभावो येषां **[३]त्रुटिमात्रविषयसङ्गात्** त्रुटिरनन्तपरमाणुसंहतिलक्षणोऽल्पकः सवितृकिरणप्रकाशितवातायनादिषु भ्रमन् [४]लक्ष्यते । तन्मात्रो विषयसङ्गः स्वल्पको निःसारः शब्दादिविषयेषु यः सङ्गस्तस्मादासक्तेः प्रत्यवायमागामिनमचेतयन्तः, अजरामरवन्निरुद्विग्नाः । जरा च मरश्च जरामरौ । अविद्यमानौ जरामरौ

---

कर्मपरिशाटनं, तस्मात् क्रियानिवृत्तिः-अक्रियत्वं, क्रियानिवृत्तेरयोगित्वं-योगनिरोध इति ॥७३॥

**( ७४ ) ( वि० ) योगेति** । सुगममिति ॥७४॥

**( ७५ ) ( वि० )** ये पुनरविनीतास्तेषां स्वरूपमाह—**विनयेति** । विनयाद् व्यपेतं-नष्टं मनः-अन्तःकरणं येषां ते तथा । तथा गुरुविद्वत्साधुपरिभवनशीलाः-आचार्यपण्डितयतिपराभवस्वभावाः । त्रुटिः-अल्पशब्दवाच्यः पदार्थः कालविशेषो वा, स एव त्रुटिमात्रं, त्रुटिमात्राश्च ते विषयाश्च-

---

**( ७४ ) ( अव० )—योगनिरोधः=शैलेशीप्राप्तिरूपः, अतो विनय एव कार्यः ॥७४॥**

**( ७५ ) ( अव० )—विनयाद् व्यपेतं विगतं मनो येषां ते । [१]त्रुटिमात्रमणुमात्रप्रायं, विषयः= शब्दादिस्तत्सङ्गादजरामरवत् सिद्धवन्निरुद्विग्ना=निर्भयाः ॥७५॥**

**केचित्सातर्द्धिरसातिगौरवात् साम्प्रतेक्षिणः पुरुषाः ।**
**मोहात्समुद्रवायसवदामिषपरा विनश्यन्ति ॥७६॥**

---

यस्यासावजरामरस्तद्वन्निरुद्विग्नाः निर्भया मुक्ता एव अजरामराः सर्वसङ्गनिर्मुक्तास्तद्वदात्मानं मन्यन्ते, 'नाहं जरां प्राप्स्यामि न च मरणं,' स्वल्पकविषयसुखासक्तत्वादिति ॥७५॥

**( ७६ ) टीका—**एतदेव [१]प्रत्यवायादि दिदर्शयिषया स्पष्टतरमभिधत्ते—**केचिदिति** । केचिदेवाविदितपरमार्थाः । सातं सुखं सद्वेदनीयम् । ऋद्धिर्विभवः कनकरजतपद्मरागेन्द्रनील-मरकतादिमणिसम्पद्, गोमहिष्यजाविककरितुरगरथादिसम्पच्च । रसास्तिक्तकटुकषायाम्ल-मधुरलवणाख्याः । एतेषु सातादिषु गौरवमादरः । सुखार्थः [२]सम्पदर्थः इष्टरसाभ्य-वहारार्थश्चादरः । अतीव सुष्ठु गौरवम् । अतिगौरवाद्धेतोः । साम्प्रतमेव वर्तमानकालमेवेक्षन्ते नागामिनम् । त एवंविधाः पुरुषा मोहादज्ञानात् [३]मोहनीयकर्मोदयाद्वा । समुद्रवायसवदा-मिषपरा विनश्यन्ति । मृतकरिकलेवरा[४]पानप्रविष्टमांसास्वादगृद्धकाकवत् । जलधिमध्य-मध्यास्यमाने कलेवरे विनिर्गत्य तेनैवापानमार्गेण सकलं दिङ्मण्डलमवलोक्य विश्रान्ति-स्थानमपश्यन् निलीयमानश्च पयसि निधनमुपगतः । आमिषपरा इति रसगौरवस्यैव[५] प्रत्यवायबहुलतां दर्शयामास प्रकरणकारः । न तथा सातर्द्धिगौरवे बहुप्रत्यपाये यथा रसगौरवम्[६] । मद्यमांसकुणपादिषु प्रवृत्तिः प्राणवधमन्तरेण दुस्सम्पाद्या ॥७६॥

---

शब्दादयस्तेषु सङ्गः-सम्बन्धः तस्माद्धेतोः, किमित्याह-अजरामरवत्-जरामरणरहिता वयमिति विकल्पपरा लौकिकसिद्धा इव निरुद्विग्नाः-निर्भया वर्तन्ते। न कदाचिदस्माकं जरामरणादि भविष्यतीति मन्यन्त इति ॥७५॥

**( ७६ ) ( वि० )** एतदेव सदृष्टान्तं स्पष्टयन्नाह—**केचिदिति** । केचिदेवाविदितपरमार्थाः सातं-सुखम् ऋद्धिः-विभवः रसा-मधुरादयः, तेषु अतिगौरवम्-अत्यादरस्तस्माद्धेतोः साम्प्रतेक्षिणो-वर्तमानकालदर्शिनः, त एवंविधाः पुरुषाः किम् ?-मोहाद्-अज्ञानात् समुद्रवायसवदामिषपरा विनश्यन्ति, मृतकरिकलेवरापानप्रविष्टमांसास्वादगृद्धकाकवत् वृष्टिजलपूरेण जलधिमध्यमागते कलेवरे निर्गत्य तेनैवापानमार्गेण सकलदिङ्मण्डलमवलोक्य विश्रामस्थानमपश्यन् निलीयमानश्च पयसि निधनमु[१]पागत इति ॥७६॥

---

**( ७६ ) ( अव० )—ऐहिकसुखमानिनः रसलाम्पट्यं सातं=सुखम्, ऋद्धिर्विभवो, रसा=[१]मधुरादयः, एतेषु गौरवं रसलाम्पट्यं तस्माद्धेतोर्वर्तमानकालदर्शिनः अविदिततत्त्वा, मोहाद्-अज्ञानात्, आमिषपरा [२]इन्द्रियानुकूलविषयोपभोगपराः ॥७६॥**

**ते जात्यहेतुदृष्टान्तसिद्धमविरुद्धमजरमभयकरम् ।**
**सर्वज्ञवाग्रसायनमुपनीतं नाभिनन्दन्ति ॥७७॥**

**( ७७ ) टीका—ते जात्येति** । ते एवं सुखर्द्धिरसगौरवेषु सक्ता, जात्या हेतवः= स्वाभाविकाः तथ्याः । उत्पत्तिः स्थितिर्व्ययश्च । यदस्ति तदुत्पद्यतेऽवतिष्ठते [१]व्येति च । तस्मादुत्पत्तिमत्त्वात्स्थितिमत्त्वाद्विनष्ट[२]त्वाच्च सर्वे पदार्था नित्याश्चानित्याश्चेति सप्तभङ्गीमन्तो भवन्ति । दृष्टान्ताश्चाङ्गुल्यादयः । यथैकस्मिन्नेव कालेऽङ्गुली मूर्तत्वेनावस्थिता वक्रत्वेन विनष्टा ऋजुत्वेनोत्पन्ना उत्पादस्थितिव्ययवती । तथात्मादयः सर्वे पदार्था जात्यहेतुर्भिर्दृष्टान्तैश्च सिद्धं प्रतिष्ठितमव्याहतम् अविरुद्धमिति । न खलु नित्यानित्ययोर्विरोधोऽस्ति । द्रव्यार्थतया नित्यत्वमन्व[३]यांशमङ्गीकृत्य [४]घटकपालशकलादिषु सर्वत्राविशिष्टो[५] मृन्मृदिति प्रत्ययः । पर्यायास्तु घटकपालादयः पर्यायनयाङ्गीकरणात् तैरनित्यत्वम् । भिन्ननिमित्तत्वाच्च न सहावस्थानलक्षणो विरोधोऽस्ति । तस्मादविरुद्धम् । सर्वज्ञवाग्रसायनं सर्वज्ञवाग् द्वादशाङ्गं प्रवचनं तदेव रसायनं, यथा रसायनमुप[६]युज्यमानं निरुजं वपुः करोति वलीपलितवर्जितं, तथा भगवद्वचनमप्युपयुज्यमानं विधिना सकलरुजापहारि भवति जन्ममरणप्रपञ्चनिरासि [७]चेति । अविद्यमाना जरा यत्र तदजरं विगतशरीरत्वाद्भयमपि मरणादिकमत एव तत्र नास्ति । जरामरणाभावस्य[८] कारणत्वादजरमभयकरमित्युक्तम् । उपनीतं ढौकितमर्थितं[९] वा नाभिनन्दन्ति न परितुष्टास्तदुपयोगं कुर्वन्तीति ॥७७॥

**( ७७ ) ( वि० )** ते[१] च यत् कुर्वन्ति तदाह—**त इति** । त एवं सातादिगुरुका जात्यहेतुदृष्टान्तसिद्धादिगुणोपेतमपि सर्वज्ञवाग्रसायनमुपनीतं नाभिनन्दन्तीति सम्बन्धः । तत्र हेतवश्च—साध्याविनाभाविन उत्पत्तिमत्त्वादयः, दृष्टान्ताश्च—अङ्गुल्यादयः साध्यस्य उपमाभूताः, जात्याश्च—ते निष्कृत्रिमत्वात्[२] प्रधाना हेतुदृष्टान्ताश्च जात्यहेतुदृष्टान्ताः तैः सिद्धं—निष्पन्नं प्रतिष्ठितमव्याहत-मित्यर्थः । यथा सन्ति जीवादयः पदार्था उत्पत्तिमत्त्वाद्विनाशवत्त्वात्स्थितिमत्त्वाच्च, यथाऽङ्गुल्यादयो, यथाऽङ्गुलिरेकस्मिन्नेव काले मूर्तत्वेनावस्थिता वक्रत्वेन विनष्टा ऋजुत्वेन तूत्पन्नेत्युत्पादस्थिति-व्ययवती वर्तते तथाऽऽत्मादयोऽपि सर्वे पदार्था इति । तथा अविरुद्धं—सङ्गतं विरोधाभावात्, तथा न विद्यते जरा यत्र तदजरं, तथा अभयं करोतीत्यभयकरमित्येवं विशेषणचतुष्कोपेतं, किमत आह—सर्वज्ञवागेव—जिनवचनमेव रसायनं—परमौषधं तत्तथा । अत्र भावना—यथा रसायनं हेतुदृष्टान्तसिद्धं तथाऽविरुद्धं सम्यग् विधिनोपयुज्यमानं वपुरजरं करोति, वलीपलितविवर्जितमित्यर्थः तथा अभयकरं—क्षुद्रोपद्रवादिभीतिरहितम् । सर्वज्ञवागपि हेतुदृष्टान्तसिद्धाऽविरुद्धा सती सम्यगासेविता जरामरणभयापहन्त्री भवति [३]इति ॥७७॥

**( ७७ ) ( अव० )—जात्या=अवितथा हेतवो [१]दृष्टान्ता द्विविधचरितकल्पितोदाहरणानि तैः प्रसिद्धम्, अजरमपरापरप्रदानेऽप्यक्षीणम्, उपनीतं=दीयमानं, न बहु मन्यते रसायनमपि, अविरुद्धं[२]**

**यद्वत् कश्चित् क्षीरं मधुशर्करया सुसंस्कृतं हृद्यम् ।**
**पित्तार्दितेन्द्रियत्वाद्वितथमतिर्मन्यते कटुकम् ॥७८॥**
**तद्वन्निश्चयमधुरमनुकम्पया सद्भिरभिहितं पथ्यम् ।**
**तथ्यमवमन्यमाना रागद्वेषोदयोद्वृत्ताः ॥७९॥**

---

**( ७८ ) टीका**—[१]एनमेवार्थं दृष्टान्तेन समर्थयते[२]—**यद्वदिति** । कश्चिदिति पित्तबहुलः प्रकुपितपित्तधातुः । क्षीरं गोमहिष्यादीनां स्वभावेनैव स्वादु, किं पुनर्मधु[३]शर्करया युतम् । सुसंस्कृतमिति सुक्वथितं निरुपहतभाजनस्थम् । हृद्यं हृदयेष्टम् । पित्तार्दितत्वादिति पित्तेनार्दितो व्याप्तः पित्तोदयेनाकुलीकृतान्तःकरणः । वितथमतिर्विपरीतबुद्धिर्मन्यतेऽवगच्छति । कटुकमिति मधुरमपि सदिति ॥७८॥

**( ७९ ) टीका**—सम्प्रति दृष्टान्तेन दार्ष्टान्तिकमर्थं समीकुर्वन्नाह—**तद्वदिति** । यद्यपि [१]दुःसहपरिषहेन्द्रि[२]यनिरोधसम्पातादादौ कटुकं तथापि निश्चये[३] पर्यन्तकाले मधुरमनेक-कल्याणयोगाद्रमणीयम् । अनुकम्पया सद्भिरतिशयप्राप्तैर्गणधरादिभिरभिहितं भव्यसत्त्वा-नामनुग्रहाय । [४]तथ्यं पथ्यं च स्फुटमविसंवादि । तदवमन्यमाना अनाद्रियमाणा निराकरण-बुद्ध्या । रागद्वेषोदयेन उद्वृत्ताः स्वच्छन्दचारिणो न हितोपदेशश्राविण इति ॥७९॥

---

**( ७८ ) ( वि० )** अथैनमेवार्थं दृष्टान्तेन समर्थयते—**यद्वदिति** । यद्वत्-यथा कश्चित्-कोऽपि क्षीरं-दुग्धं मन्यते कटुकमिति सण्टङ्कः । कीदृशम् ?-मधुना-क्षौद्रेण युक्ता शर्करा-मत्स्यण्डी तया सुसंस्कृतमिति-क्वथितं कृतानेकसुगन्धिसंस्कारं वा । तथा हृद्यं-हृदयेष्टम् । कुत इत्याह-पित्तार्दितेन्द्रियत्वात्-पित्तव्याप्तकरणत्वात्, वितथमतिः-विपरीतबुद्धिः मन्यते-जानाति कटुकम्-अमृष्टं मधुरमपि सदिति ॥७८॥

**( ७९ ) ( वि० )** अथ दृष्टान्तेन दार्ष्टान्तिकमर्थं समीकुर्वन्नार्याद्वितयमाह—**तद्वदिति । जातीति** । तद्वत्-तथा हितमप्यर्थं न पश्यन्तीति सम्बन्धः । कीदृशमर्थम् ?-निश्चयमधुरं-परिणामसुन्दरं, तथा अभिहितं-प्रतिपादितं ढौकितमित्यर्थः । कैः ?-सद्भिः सत्पुरुषैः । कया ?-अनुकम्पया-[१]कृपया । तथा पथ्यं-योग्यं, तथा तथ्यं-सत्यम् । किं कुर्वाणास्ते ?-अवमन्यमाना-अनाद्रियमाणाः । कीदृशाः ?-रागद्वेषोदयेनोद्वृत्ताः स्वच्छन्दचारिण इति ॥७९॥

---

**विधिनोपयुज्यमानं वपुरप्यजरं करोति, अभयकरं क्षुद्रोपद्रवस्य समस्तस्य नाशविधायकम् ॥७७॥**

**( ७८ ) ( अव० )—[१]सितोपलादिभिः सातिशायि माधुर्यमुपनीतं प्रकुपितपित्तधातुत्वाद्वि-परीतबुद्धि[२] कटुकमिव जानाति ॥७८॥**

**( ७९ ) ( अव० )—[१]यद्यपि परिणामसुन्दरमनाद्रियमाणाः, रागद्वेषोदेयोद्वृत्ताः दृप्ताः ॥७९॥**

**जातिकुलरूपबललाभबुद्धिवाल्लभ्यकश्रुतमदान्धाः ।**
**क्लीबाः परत्र चेह च हितमप्यर्थं न पश्यन्ति ॥८०॥**
**ज्ञात्वा भवपरिवर्ते जातीनां कोटिशतसहस्रेषु ।**
**हीनोत्तममध्यत्वं को जातिमदं बुधः कुर्यात् ? ॥८१॥**

---

**( ८० ) टीका—**एवमुद्वृत्ताः किमाचरन्तीत्याह—**जातीति** । जातिर्मात्रन्वयः । कुलं पित्रन्वयः । रूपं शरीरावयवसन्निवेशविशेषः । बलं शारीरं स्वजनबलं द्रव्यबलं चेति । लाभो [१]यथाप्रार्थितप्राप्तिः । बुद्धिश्चतुर्विधा औत्पत्तिक्यादिः । वाल्लभ्यकं लोकस्य प्रियपिण्डकत्वम् । [२]श्रुतमागमशास्त्रपरिज्ञानम् । एतदेव जात्यादिश्रुतान्तं मदहेतुत्वात् मदो गर्वः तेनान्धाः । यथान्धाश्[३]चक्षुषा विकला न किञ्चित् प्रेक्षणीयं पश्यन्ति, तथा जात्यादिगर्वाष्टकान्धा हिताहितविचारणारहिताः । क्लीबा विषयगृद्धा द्रमका इवातृप्ताः । तन्मात्रपरितोषादिहपरलोकहितं न पश्यन्ति न कुर्वन्ति चेति ॥८०॥

**( ८१ ) टीका—**संसारे परिभ्रमतां सत्त्वानां स्वकर्मोदयात्कदाचिद् ब्राह्मणजातिः कदाचि[१]च्चण्डालजातिः कदाचित्क्षत्रियादिजातयः, न नित्यैकैव जातिर्भवतीति दर्शयन्नाह—**ज्ञात्वा ।**

---

**( ८० ) ( वि० )** पुनः कीदृशाः ?—जात्याद्यष्टमदस्थानान्धाः तत्र जातिर्मातृसमुत्था, कुलं पितृसमुद्भवं, रूपं—सुशरीराकृतिः, बलं—शरीरप्राणः, लाभः—प्रार्थितार्थप्राप्तिः बुद्धिः—[१]औत्पत्त्यादिकी मतिः, सा चैवम्—

**उप्पत्तिया वेणइया, कम्मया परिणामिया ।**
**बुद्धी चउव्विहा वुत्ता, पंचमा नोवलब्भए ॥१॥** इति ।
**( औत्पत्तिकी वैनयिकी, कार्मिकी पारिणामिकी । बुद्धिश्चतुर्विधा प्रोक्ता, पञ्चमी नोपलभ्यते ॥ )**

वाल्लभ्यकं—प्रियत्वं, श्रुतम्—आगमस्तेषां तान्येव वा मदो—गर्वस्तेनान्धाः—हिताहितवस्तुविचारादर्शनाल्लोचनविकलास्ते तथा । तथा क्लीबा—अधृष्टाः । कस्मिन्नित्याह—परत्र च—परभवे इह च—अत्र जन्मनि हितमप्यर्थं न पश्यन्ति—उपकारकं सर्वज्ञवाग्रूपं नावलोकयन्तीति ॥८०॥ [२]**इति धारणार्थाधिकारद्वयम्** ॥५-६॥

**( ८१ ) ( वि० )** अथैनामेवानन्तरोक्तमदस्थानप्रतिपादिकामार्यां विवरीषुर्जातिमदस्थानव्युदासमार्याषोडशकेन बिभणिषुः प्रथमं जातिमदत्यागमाह—**ज्ञात्वेति** । ज्ञात्वा—विज्ञाय

---

**( ८० )( अव० )—[१]जातिर्मातृसमुत्थाः, कुलं पितृसमुद्भवं, रूपं प्रतीतं, बलं [२]शारीरं प्राणं, लाभः प्रार्थितार्थप्राप्तिः, बुद्धिरौत्पत्तिक्यादिः, वाल्लभ्यकं प्रियत्वं, श्रुतमागमः, क्लीबा असत्त्वाः ॥८०॥**

**( ८१ ) ( अव० )—भवभ्रमण[१]कोटिलक्षेषु ॥८१॥**

**नैकान् जातिविशेषानिन्द्रियनिर्वृत्तिपूर्वकान् सत्त्वाः ।**
**कर्मवशाद् गच्छन्त्यत्र कस्य का शाश्वती जातिः ॥८२॥**
**रूपबलश्रुतमतिशीलविभवपरिवर्जितांस्तथा दृष्ट्वा ।**
**विपुलकुलोत्पन्नानपि ननु कुलमानः परित्याज्यः ॥८३॥**

---

**भवपरिवर्तेत्यादि**। भवो नारकादिजन्म तस्य परिवर्तः परिभ्रमणं, नारको भूत्वा तिर्यग्योनौ मनुष्यजातौ वा जायते स्वकर्मवशात् । भूयश्चैकेन्द्रिय[२]द्वित्रिचतुःपञ्चेन्द्रियजातावुत्पद्यते । तत्रैकेन्द्रियाणां स्वस्थाने शर्करावालुकादिभेदा बहवः। एवमप्तेजोवायुवनस्पतीनामपि [३]यावन्त्यश्च योनयस्तावन्त्येव जातिशतसहस्राणि। तथा देवानामपीति। अत एव चतुरशीतियोनिलक्षः संसारः। स चोत्पद्यमानो हीनोत्तममध्यमेषु कुलेषु जन्म लभते। एवंविधं चा[४]ऽसमञ्जसं संसारमवगम्य ज्ञात्वा को नाम विद्वान् जातिमदमालम्बेत ? ॥८१॥

**( ८२ ) टीका—**एतदेव [१]स्पष्टतरमाचष्टे—**नैकानिति**। जातिविशेषाननेकसङ्ख्यानिन्द्रिय-निर्वृत्तिपूर्वकान्। इन्द्रियनिर्वृत्तिः[२] पूर्वं कारणं येषां जातिविशेषाणाम्। एकस्मिन्निन्द्रिये स्पर्शनाख्ये निर्वृत्ते एकेन्द्रियजातिः। स्पर्शनरसननिर्वृत्तौ[३] द्वीन्द्रियजातिः। स्पर्शनरसनघ्राणनिर्वृत्तौ त्रीन्द्रियजातिः। स्पर्शनरसनघ्राणचक्षुर्निर्वृत्तौ चतुरिन्द्रियजातिः। स्पर्शनरसनघ्राणचक्षुःश्रोत्रनिर्वृत्तौ पञ्चेन्द्रियजातिः। स्वकर्मवशाद् गच्छन्ति अत्र कस्य का शाश्वता जातिः ? तस्मान्न युक्तो जातिमदः ॥८२॥

**( ८३ ) टीका—**कुलमदव्युदासार्थमाह—**रूपेति** । [१]पित्रन्वयः कुलं, तच्च विस्तीर्णं

---

भवपरिवर्ते-नारको भूत्वोद्धृत्य तिर्यग् मनुष्यो वा भवतीत्यादिपरिभ्रमणरूपे जातीनाम्-एकेन्द्रियजातिप्रभृतीनां कोटिशतसहस्रेषु [१]कोटिलक्षेषु मध्ये हीनोत्तममध्यत्वं जघन्य-प्रधानमध्यवर्तिभावं ज्ञात्वेति सम्बन्धः। ततः किम् ?-को जातिमदं बुधः कुर्यादिति व्यक्तमिति ॥८१॥

**( ८२ ) ( वि० ) नैकानिति**। गच्छन्ति-यान्तीति क्रिया। के ? सत्त्वाः। कान् ? नैकान्-प्रचुरान्। जातिविशेषान्-एकेन्द्रियजात्यादीन्[१] । कीदृशान् ?-इन्द्रियनिर्वृत्तिः-करणनिष्पत्तिः पूर्वम्-आद्यं येषां ते तथा तान् । **शेषाद्वा** (कप्रत्ययः) । कुतः ?-कर्मवशात्-स्वकीयादृष्टपरतन्त्रतया गच्छन्तीति योजितमेव। अत्र-भवे कस्य-सत्त्वस्य का ?, न काचित् शाश्वती-स्थिरा जातिरिति ॥८२॥

**( ८३ ) ( वि० )** अथ कुलमदव्युदासार्थमाह—**रूपेति** । रूपादिभिः पूर्वोक्तैः

---

**( ८२ ) ( अव० )—[१]नैकान्-प्रचुरान्, एकेन्द्रियजात्यादीन्, इन्द्रियनिर्वृत्तिः पूर्वकारणं येषाम् ॥८२॥**
**( ८३ ) ( अव० )—शीलमाचारः, शेषाणि प्रतीतानि, [१]निश्चयेनैव ॥८३॥**

**यस्याशुद्धं शीलं प्रयोजनं तस्य किं कुलमदेन ? ।**
**स्वगुणाभ्यलङ्कृतस्य हि किं शीलवतः कुलमदेन ॥८४॥**
**कः शुक्रशोणितसमुद्भवस्य सततं चयापचयिकस्य ।**
**रोगजरापाश्रयिणो मदावकाशोऽस्ति रूपस्य ? ॥८५॥**

---

लोकख्यातम् । तत्र चोत्पन्नो रूपपरिहीणकः पुरुषो योषिद्वा विरूपा यस्यावयवा [२]हुण्डवामनादयः । बलं शारीरं, तेन परिहीणः सर्वस्य परिभूतः । श्रुतेन परिहीणोऽत्यन्तमूर्खः निकृष्टो मातृकामपि न जानाति । मतिर्बुद्धिः सापि हिताहितप्राप्तिपरिहारक्षमा [३]नास्तीति तया परिहीणकः । शीलं सदाचारता द्यूतपरदारानृतभाषणतस्करत्वनिष्ठुरत्वादिपरित्यागलक्षणम् । विभवो धनधान्यकनकरजतादिसम्पत् । विपुलेषु कुलेषूत्पन्नानपि जीवान् [४]विरूपकादीन-वलोक्य । ननु नियमेनैव कुलमानो गर्वः परिहर्तव्यः, गर्वावकाशाभावादेव ॥८३॥

**( ८४ ) टीका—**अपि च—**यस्याशुद्धं शीलमित्यादि** । शीलमेव यस्योपहतम-सदाचारानुष्ठानात् । [१]तस्यान्याय्य एव कुलमदः, प्रयोजनाभावात् । शुद्धे तु शीले भवतु नाम गर्वः । दुःशीलस्य हि गर्वो [२]दौःशील्यमेव संवर्द्धयति । स्वगुणा [३]रूपवत्त्वश्रुतबुद्धिविभवादयो यस्य सन्ति, स तैरेवालङ्कृतोऽतः शीलवतोऽपि न किञ्चित् कुलमदेनेति [४]फल्गु कुलमद इति [५]परिहारार्हः ॥८४॥

**( ८५ ) टीका—**रूपमदोऽपि न कार्य इति दर्शयति—**कः शुक्रशोणितेत्यादि** । शुक्रं पित्रा निसृष्टं वीर्यम् । शोणितं मातुर्योनौ स्फुटितस्फोटकस्रुतम्[१] । एतस्माद् द्वयात् [२]समुद्भवः

---

षड्भिर्विवर्जितांस्तथा-तेन प्रकारेण अत्यन्तकारुण्यस्वरूपेण दृष्ट्वा-अवलोक्य । कीदृशानपि ?-विपुलकुलोत्पन्नानपि-विस्तीर्णान्वयजातानपि ननु-निश्चयेन कुलमानः-अन्वयाहङ्कारः परित्याज्यः-परिहरणीय इति ॥८३॥

**( ८४ ) ( वि० )** अपि च-यस्य जीवस्याशुद्धम्-असच्छीलं-[१]सदनुष्ठानं, प्रयोजनं तस्य किं कुलमदेनेति व्यक्तम् । पक्षान्तरमाह-स्वगुणैः शीलपरिपालनरूपैरभ्यलङ्कृतो-भूषितस्तस्य हि-र्यस्मात्किं शीलवतः कुलमदेनेति ॥८४॥

**( ८५ ) ( वि० )** अथ रूपमदपरिहारमाह-**क इति** । को मदावकाशोऽस्ति ?, न कोऽपि, गर्वप्रसरो न विद्यते । कस्य सम्बन्धी ?-रूपस्य । कीदृशस्य ?-शुक्रशोणिताभ्यां-

---

**( ८४ ) ( अव० )—रूपबलश्रुतबुद्धिविभवादयो गुणास्तैरलङ्कृतस्य सुशीलस्य-[१]सदाचारस्य कुलमदेन[२] ॥८४॥**

**( ८५ ) ( अव० )—चयो=वृद्धिरपचयो=हानिस्तौ यस्य । रोगजरापाश्रयिणो रोग-जराधारस्य । एवं शुक्रादिसम्पर्कनिष्पन्ने देहे कः कतरो मदावकाशोऽस्ति[२] ? ॥८५॥**

**[१]नित्यपरिशीलनीये त्वङ्मांसाच्छादिते कलुषपूर्णे ।**
**निश्चयविनाशधर्मिणि रूपे मदकारणं किं स्यात् ? ॥८६॥**

---

शरीरस्य । बीजबिन्दोराधानात्प्रभृति कललार्बुदमांसपेश्याद्याकारेणोपचयं गच्छन् गर्भः शिरोग्रीवाबाहूरःस्थलोदरादिभावेन वर्धते, रसहरिण्या च जनन्यभ्यवहृताहाररसोपयोगात् सम्पूर्णाङ्गावयवो नवमे मासि दशमे वा मातुरुदरान्निर्गच्छति । ततोऽपि स्तनक्षीर-पीत[४]काभ्यवहारात् कुमारयौवनमध्यमस्थविरावस्थाभिः शरीरं चयापचययुक्तम्। पथ्येष्टा-हारपरिणतेरुपचयो वृद्धिः, अपथ्यानिष्टान्नपानोपयोगादपचयो हानिः, तौ चयापचयौ यस्य तच्चयापचयिकम् । निरुजस्य वा उपचयः, मान्द्यादिभिरपचयः । रोगा ज्वरातीसार-काशश्वासादयः । जरा पूर्वावस्थात्यागेनोत्तरावस्थावस्कन्दनं यावदत्यन्तस्थविरावस्थेति । रोगजरयोरपाश्रयि स्थानं [५]शरीरकमपाश्रयः । एवं शुक्रादिसम्पर्कनिष्पन्ने देहे को मदावकाशः किं गर्वबीजं रूपस्य ? इति ॥८५॥

**( ८६ ) टीका–नित्येति** । नित्यमिति सर्वदा । [१]परिशीलनीयं संस्कर्तव्यं यस्मान्नवभिः [२]स्रोतोद्वारैः सदैवान्तर्गतं मलं दूषिका-[३]सिङ्घान-निष्ठ्यूत-लाला-रेतो-मूत्रपुरीष-स्वेदाद्युद्वमति शरीरकम् । तदपनयनसम्मार्जनादि प्रतिक्षणमयमाचरति अनिर्विण्णो रूपवान् । त्वचा चर्मणासृजा[४]ऽवता[५] मांसेन च आच्छादिते स्थगिते । कलुषं मूत्रपुरीषरुधिरमेदोमज्जास्थिस्नायुप्रभृति तेन पूर्णे व्याप्ते । विनाशधर्मो यस्यास्ति तद्विनाशधर्मिणि । निश्चयेनावश्यंतयाऽभ्यङ्गोद्वर्तनस्नानानुलेपनप्रतिविशिष्टान्नपानलालितमपि विनश्यति पर्यन्ते कृम्यादिपुञ्जो वा भस्मादिराशिर्वा [६]शुष्कचर्मास्थिकडेवरप्रायं वा भवति । एवंविधे च रूपे किं पुनर्भवेत् मदकारणं, येन माद्यन्ति निर्विवेका रूपभाजः ? ॥८६॥

---

पितृमातृजुगुप्सनीयशरीरावयवाभ्यां सकाशात् समुद्भवस्य-प्रादुर्भूतस्य । तथा सततम्-अनवरतं चयोपचयिकस्य-चित्यपचितिधर्मकस्य । तथा रोगजरयोः पूर्वोक्तयोरपाश्रयिणः-स्थानस्येति ॥८५॥

**( ८६ ) ( वि० )** नित्यपरिशीलनीये-सदा संस्कर्तव्ये त्वङ्मांसाच्छादिते-चर्मपिशितस्थगिते कलुषपूर्णे-अशुच्यादिभृते[१] निश्चयविनाशधर्मिणि-एकान्तविनश्वरस्वरूपे [२]रूपे-शरीराकृतिलक्षणे, एवं पूर्वोक्तविशेषणे मदकारणं-दर्पहेतुः किं स्यादिति ॥८६॥

---

**( ८६ ) ( अव० )–सर्वदा संस्कर्तव्ये चर्मण्यसृजाऽवता[१] स्थगिते । कलुषं मूत्रपुरीष-रुधिरमेदोमज्जास्नायुप्रभृति तेन व्याप्ते । निश्चयेन विनाशधर्मो यस्यास्ति ॥८६॥**

**बलसमुदितोऽपि यस्मान्नरः क्षणेन विबलत्वमुपयाति ।**
**बलहीनोऽपि[1] च बलवान् संस्कारवशात् पुनर्भवति ॥८७॥**
**तस्मादनियतभावं बलस्य सम्यग् विभाव्य बुद्धिबलात् ।**
**मृत्युबले चाबलतां मदं न कुर्याद्बलेनापि ॥८८॥**

---

**(८७) टीका—बलेत्यादि** । बलेन शारीरेण समुदितः सम्पन्नो नरो[1] बलवानपि यस्मात्क्षणेन स्वल्पेनैव कालेनातितीव्रज्वरविशूचि[2]कादिवेदनार्तः सन् विगतबलो भवति । बलहीनोऽपि दुर्बलः सन्नपि धृतिमान् प्रणीतरसाभ्यव्यवहारसंस्कारवशादाश्वेव बलसम्पन्नो जायते । संस्कारो वा कर्मविपाकस्तद्वशाद्वीर्यान्तरायक्षयोपशमविशेषादित्यर्थः ॥८७॥

**(८८) टीका—तस्मादनियतेत्यादि** । अनियतो यस्य,[1] भावः-सत्ता । कदाचिद्भवति कदाचिन्न भवतीति। बलमुक्तेन न्यायेनेति । सम्यग्विभाव्य विज्ञाय यथावत्। कथं[2] भावो बलस्येत्याह—बुद्ध्यगम्यमेतदिति प्रतिपादयति । [3]मृत्युबले चोपतिष्ठमाने न शरीरबलं न स्वजनबलं न द्रव्यबलं क्रमते प्रतिक्रियायै । अतो मदं न कुर्यात् । सम्यग्विभावितत्वादसमर्थो बलेनापि ॥८८॥

---

**(८७) (वि०)** अथ बलमदत्यागमाह—**बलेति** । बलसमुदितोऽपि-प्राणसम्पन्नोऽपि[1] यस्मान्नरः क्षणेन-स्वल्पकालेन विबलत्वं-प्राणहीनतामुपयाति-व्रजति, तथा बलहीनोऽपि च बलवान् भवतीति सम्बन्धः । कुतः ?-संस्कारवशात्-प्रणीताहाराभ्यवहारसामर्थ्याद्वीर्यान्तराय-क्षयोपशमविशेषाद्वेति ॥८७॥

**(८८) (वि०)** तस्मादनियतभावं-कादाचित्कत्वं बलस्य सम्यग् विभाव्य-पर्यालोच्य । कुतः ?-बुद्धिबलात्-मतिसामर्थ्यात् । तथा मृत्युबले च-[1]मरणे प्राप्ते अबलतां विभाव्येति योगः । अतो मदं न कुर्याद्बलेनापीति ॥८८॥

---

**(८७) (अव०)—अतितीव्रज्वरशूलविसूचिकादिवेदनार्त्तः सन् [1]सबलोऽपि क्षणेन विगतबलत्वमुपैति । [2]संस्कारात्प्रणीताहाराभ्यवहाराद्रसायनदेवताराधना[3]द्वीर्यान्तरायकर्मक्षयोप-शमाद्वेति ॥८७॥**

**(८८) (अव०)—अनियतो भावः सत्ता यस्य कदाचिद्भवति कदाचिन्न भवति । विज्ञाय मरणबले प्राप्ते शरीरबलं द्रविणबलं च न क्रमते प्रतिक्रियायै ॥८८॥**

**उदयोपशमनिमित्तौ लाभालाभावनित्यकौ मत्वा ।**
**नालाभे वैक्लव्यं न च लाभे विस्मयः कार्यः ॥८९॥**
**परशक्त्यभिप्रसादात्मकेन किञ्चिदुप[१]योगयोग्येन ।**
**विपुलेनापि यतिवृषा लाभेन मदं न गच्छन्ति ॥९०॥**

---

( ८९ ) **टीका—उदयोपशमेति** । लाभान्तरायकर्मणः क्षयोपशमाल्लाभो भवति भक्त-पान-वस्त्र-प्रतिश्रय-पीठफलकादेः[१] लाभान्तरायकर्मोदयाच्च न लभते किञ्चिदपि । अतो नास्ति नित्यो लाभो नाप्यलाभः । नित्यानित्यौ च लाभालाभौ विज्ञाय नालाभे वैक्लव्यं=दीनता कार्या, नापि[२] लाभे सति विस्मयो=गर्वः कार्यः । यदि लभ्यते ततो धर्मसाधनं शरीरकमाद्यं दशविधचक्रवालसामाचारीसमर्थं भविष्यति, न चेल्लब्धं तथाप्य-दीनचेतसः साधोर्निर्जराभाक्त्वं भविष्यति। कर्मोदयक्षयोपशमजनितः खल्वयं भावो न स्वतो लाभालाभलक्षण इति ॥८९॥

( ९० ) **टीका—परेति** । परो दाता गृहस्थादिः । तस्य दानान्तरायक्षयोपशमजनिता शक्तिः स्वशक्त्यनुरूपं ददाति । अभिप्रसादात्मकेनेति दातु[१]र्यद्यप्यभिप्रसन्नं चेतो भवति साधुं प्रति मुक्तिसाधनप्रवृत्तोऽयं तपस्वी निःसङ्गः समारम्भादिषु पात्रभूतोऽस्मै दत्तं बहुफलं भवति

---

( ८९ ) ( वि० ) अथ लाभमदत्यागमाह—**उदयोपशमेति** । [१]अत्रैवं व्याख्या । उदयो-लाभान्तरायस्यानु[२]भवनम्, उपशमशब्देनावयवे समुदायोपचारात् क्षयोपशमो लभ्यते, तत्र कियतो लाभान्तरायस्य क्षयः कियतस्तूपशमः, तत उदयश्च क्षयोपशमश्च तौ निमित्तं-कारणं ययोस्तौ तथा, उदयनिमित्तक्षयोपशमनिमि[३]त्ताविति[४] तत्त्वम् । [५]कावेवंविधावित्याह—**लाभालाभाविति** पदव्यत्ययाद-लाभलाभौ, अयमर्थः-अलाभो लाभान्तरायोदयनिमित्तो लाभश्च तस्यैव क्षयोपशमनिमित्त इति पदद्वयस्य विप[६]र्ययः, तौ अनित्यकौ-कादाचित्कौ मत्वा-ज्ञात्वा, किं कार्यमित्याह-नालाभे वैक्लव्यं-दैन्यं, न च लाभे विस्मयो-हर्षः, कार्य इति उभयत्र योज्यमिति ॥८९॥

( ९० ) ( वि० ) **परेति** । शक्तिश्च अभिप्रसादश्च शक्त्यभिप्रसादौ परस्य सम्बन्धिनौ शक्त्यभिप्रसादौ तौ तथा तावेवात्मा-स्वरूपं यस्य स तथा तेन, लाभेन वक्ष्यमाणेनेति योगः । तत्र परो-दाता तस्य दानान्तरायक्षयोपशमजनिता शक्तिः, अभिप्रसादस्तु तस्यैव दातुर्यद्यभिप्रसन्नं चेतो

---

**( ८९ ) ( अव० )—क्षयोपशमाल्लाभो भवति, लाभान्तरायकर्मोदयाच्च न लभते किञ्चित्, नित्यानित्यौ, [१]दीनता, गर्वः ॥८९॥**

**( ९० )( अव० )—परो दाता गृहस्थादिस्तस्य दानान्तरायक्षयोपशमोत्था शक्तिः स्वशक्त्यनुरूपं ददाति । दातुर्यदि चेतःप्रसन्नता भवति, साधुं प्रति गुणानुरागः । उपयोगः वस्त्राहारादिना ॥९०॥**

**ग्रहणोद्ग्राहणनवकृतिविचारणार्थावधारणाद्येषु ।**
**बुद्ध्यङ्गविधिविकल्पेष्वनन्तपर्यायवृद्धेषु ॥९१॥**

---

एवं लाभः परप्रसादात्मकः । [2]लब्धमपि तदन्नादि किञ्चिदेवोपभोगान्तरं साधयति, न पुनराजीवितावधेस्तृप्तिं करोति । एवं वस्त्रादेरप्यनित्यत्वात् किञ्चिदुप[3]योगयोग्यत्वम् । एवंविधेन लाभेन यतिवृषा यतिप्रधानभूताः विपुलेन [4]विस्तीर्णेन बहुना, बहुना न मनागपि मदमुद्वहन्ति ॥९०॥

**( ९१ ) टीका—ग्रहणोद्ग्राहणेत्यादि** । अपूर्वसूत्रार्थयोर्ग्रहणसमर्था[1] बुद्धिः, गृहीतं सूत्रमर्थो वा उद्ग्राह्योऽन्यस्मै प्रतिपाद्यः [2]सुबुद्धिविशेषेण । नवकृतिरिति नवमभिनवं स्वयमेव प्रकरणाध्यायोपनिबन्धनादि करोति । विचारणा नाम सूक्ष्मेषु पदार्थेष्वात्मकर्मबन्धमोक्षादिषु

---

भवति साधून् प्रति यदुत मुक्तिसाधका एते तत एतेभ्यो दत्तं बहुफलं भवतीति । तथा किञ्चिदुपयोगयोग्येन–स्तोककालमुपयोगसाधकेन, न पुनराजीवितान्तं, विपुलेनापि–विस्तीर्णेनापि यतिवृषाः–साधुप्रधानाः लाभेन मदं न गच्छन्ति ॥९०॥

**( ९१-९२ ) ( वि० )** बुद्धिमदत्यागमाह—**ग्रहणोद्ग्राहणेति । पूर्वेति** । कथं–केन प्रकारेण यान्ति । के ?–साम्प्रतपुरुषाः । कम् ?–मदम् । कया ?–स्वबुद्ध्या । किं कृत्वा ?–श्रुत्वा । किं तत् ?–[1]विज्ञानातिशयस्य सागरानन्त्यम् । केषाम् ?–पूर्वपुरुषसिंहानाम् । केषु विषयेषु–बुद्ध्यङ्गविधिविकल्पेषु, [2]किंविधेषु ?–अनन्तपर्यायवृद्धेष्विति क्रियाकारकघटना । तत्र ग्रहणम्–उपाध्यायादिभिरुक्तस्य सूत्रादेरुपादानम् उद्ग्राहणं–प्रमाणोपन्यसनं, नवकृतिः–नूतनकाव्यकरणं, विचारणं–जीवादिपदार्थविषयम्, अर्थावधारणम्–अभिधेयनिर्णयस्ततो ग्रहणादिपञ्चपदानां [3]द्वन्द्वः । तानि आदीनि येषां विधिविकल्पानां ते तथा तेषु, बुद्धीनां पूर्वोक्तस्वरूपाणाम् चतसृणाम् अङ्गानि–शरीराणि–

> **'सुस्सूसइ पडिपुच्छइ सुणेइ गिण्हेइ ईहए वावि ।**
> **तत्तो अपोहए वा धारेइ करेइ वा सव्वं ॥'**
> **( सुश्रूषति प्रतिपृच्छति शृणोति गृह्णाति ईहते वापि ।**
> **ततोऽपोहते वा धारयति करोति वा सर्वम् ॥)**

---

**( ९१ ) ( अव० )—ग्रहणं-बहूनामपि पृथक् पृथग्वदतामपि पृथक् पृथक् शब्दोपलब्धिः, उद्ग्राहणं संस्कृतगद्यपद्यशब्दार्थाभिधानं, [1]बुद्ध्यङ्गं प्रज्ञा शरीरं तस्य विधयः तेषां विचारा विकल्पा-स्तेषु च, बुद्धेरङ्गानि शुश्रूषादीनि तेषां विधिर्विधानम् आगमेन प्रतिपादनं तस्य विधेर्विकल्पास्तेषु**

**पूर्वपुरुषसिंहानां विज्ञानातिशयसागरानन्त्यम् ।**
**श्रुत्वा साम्प्रतपुरुषाः कथं स्वबुद्ध्या मदं यान्ति ? ॥९२॥**

---

युक्त्यनुसारिणी जिज्ञासा, [३]आचार्यादिवचनविनिर्गतस्य शब्दार्थस्य सकृदेव ग्रहणं न [४]द्वाभ्यां त्रिभिर्वा । एवमाद्येष्वित्यादिशब्दाद्धारणा परिगृह्यते । बुद्धेरङ्गानि शुश्रूषाप्रतिप्रश्नग्रहणादीनि । तेषां विधिर्विधानमागमेन प्रतिपादनम् । तस्य विधेर्विकल्पाः [५]तेषु कियन्तोऽनन्तैःपर्यायैर्वृद्धास्ते क्षयोपशमजा बुद्धिविकल्पाः परस्परमनन्तैः पर्यायैर्वृद्धाः, [६]असर्वपर्यायसर्वद्रव्यविषयत्वात् मतिश्रुतयोः समस्तरूपिद्रव्यनिबन्धनत्वाच्चावधेस्तदनन्तभागवर्तिरूपिद्रव्यनिबन्धनत्वा[७]न्मनःपर्यायबुद्धेरित्येवं बुद्ध्यङ्गविधिविकल्पेष्वनन्तपर्यायवृद्धेषु सत्सु ॥९१॥

**( ९२ ) टीका—पूर्वपुरुषसिंहेत्यादीति** । पूर्वपुरुषा गणधरप्रभृतयश्चतुर्दशपूर्वधरादयो यावदेकादशाङ्गविदवसानाः । सिंहा इव सिंहाः । शौर्येणोपमानं परीषहकषायेन्द्रियकुरङ्ग[१]यूथनिहननात् पूर्वपुरुषसिंहाः । विज्ञानातिशयो विज्ञानप्रकर्षः स एव सागरः समुद्रो विस्तीर्णत्वात् । अनन्तस्य भाव आनन्त्यं बहुत्वमित्यर्थः । क्षयोपशमजज्ञानस्य प्रकर्षापकर्ष[२]वत्त्वादनन्ता विज्ञानातिशयसागरा बहव इत्यर्थः । अथवा ज्ञाते सर्वश्रुतग्रन्थे वैक्रियतेजोलेश्याकाशगमनसम्भिन्नश्रोत्रादयोऽतिशया बहुप्रकारास्त एव सागराः एकस्याप्यतिशयस्य दुरवगाहत्वात् तदेतत्पूर्वपुरुषसिंहानां श्रुत्वा साम्प्रतपुरुषा दुःषमांशवर्तिनः कथम्? केन प्रकारेण ? स्वल्पया स्वधिषणया माद्यन्तीति ॥९२॥

---

एवंरूपाणि तेषां विधयः-कारणानि तेषां विकल्पा-भेदास्तेषु । तथा किंविशिष्टेषु ?- अनन्ता-बहवः पर्यायाः-[४]स्वरूपविशेषास्ते वृद्धा-वृद्धिमुपगता येषु ते तथा तेष्विति । पूर्वपुरुषा-गौतमादयस्त एव सिंहा इव सिंहाः शौर्येणोपमानं परीषहकषायादिकुरङ्गनिहननात् पूर्वपुरुषसिंहास्तेषां विज्ञानातिशयः-अवबोधप्रकर्षः स एव सागरः-सिन्धुर्विस्तीर्णत्वात्तस्यानन्त्यं-बहुत्वम्, अथवा विज्ञाने सति वैक्रियतेजोनिसर्गाकाशगमनसम्भिन्नश्रोत्रादयोऽतिशयास्त एव सागर इति । शेषं तथैवेति ॥९१॥९२॥

---

**कियत्सु ? अनन्तैः पर्यायैर्वृद्धास्ते क्षयोमशपजनितबुद्धिविशेषाः परस्परमनन्त[२]पर्यायैर्वृद्धाः[३] [४]एवं सत्सु स्वकीया कृतिः आदिशब्दाद्धारणा ॥९१॥**

**( ९२ ) ( अव० )—[१]अनन्तस्य भाव आनन्त्यं विज्ञानातिशयस्य[२] ॥९२॥**

**द्रमकैरिव चटुकर्मकमुपकारनिमित्तकं परजनस्य ।**
**कृत्वा यद्वाल्लभ्यकमवाप्यते को मदस्तेन ? ॥९३॥**
**गर्वं परप्रसादात्मकेन वाल्लभ्यकेन यः कुर्यात् ।**
**तद्वाल्लभ्यकविगमे शोकसमुदयः परामृशति ॥९४॥**

---

**( ९३ ) टीका—द्रमकैरिव चटुकेत्यादि** । रङ्कैरिव । चाटुशब्देन समानार्थश्चटुशब्दोऽपि विद्यते । बहुलवचनाद्वा उकारः प्रत्ययो भवति । चटुकमैव चटुकर्मकम् । अनुवृत्तिस्तत्प्रयोजनानुष्ठानं तद्गुणप्रशंसा-विष्टरासनदानमित्येवं कुर्वाणो लोकस्य वल्लभो भवति । आचार्यादीनामागमाच्चोदितमभ्युत्थानादि क्रियमाणं चटुकर्म न दोषमावहति । उपकारो निमित्तं यस्य चटुकर्मणः तदुपकारनिमित्तकम्-उपकारोऽनेन प्राङ् मम कृतः करिष्यते वाऽतश्चटुकर्म करोति । परजनस्येति गृहस्थादिसूचनम् । तच्चटुकर्म कृत्वा यदवाप्यते वाल्लभ्यकम् । को मदस्तेनेति श्वेवावलेहनादिदायिनः पुरः स्थित्वा श्रवणपुच्छचालनादि । कृतोपकारस्य यद्वाल्लभ्यकमवाप्नोति किं तत्र चित्रमिति ? ॥९३॥

**( ९४ ) टीका—गर्वमिति** । गर्वोऽभिमानो बहुजनवल्लभोऽहमिति परप्रसादेन जनितः। परो हि चटुकर्मकारिणः परितुष्टः कश्चित्प्रसादं करोति वस्त्रान्नपानादिकम् । तावन्मात्रेण च गर्वितो भवति तं चटुकर्मकारिणम् । वाल्लभ्यकविगमे विगते वल्लभत्वे द्वेष्यत्वे जाते । शोकसमुदय परामृशति छुपति । [१]तथाप्यनुवर्तितोऽयमेकपद एव निःस्नेहो जातः ।

---

**( ९३ ) ( वि० )** वाल्लभ्यकमदत्याग उच्यते—**द्रमकैरिति** । को मदस्तेन, यत्किम् ?-अवाप्यते-लभ्यते । किं तत् ?-वाल्लभ्यकं-वल्लभता। किं कृत्वा ? कृत्वा-विधाय । किं तत् ?-चटुकर्मकं-कुत्सितं चटुकर्म चटुकर्मकं-कुत्सितं प्रियभाषणं **'चटु चाटु प्रियं वाक्यम्'**[१] इति वचनात्। कीदृशम् ?-उपकारो निमित्तं यस्य तत्तथा तदेवोपकारनिमित्तकम् । [२]कस्यात आह-परजनस्य-गृहस्थादिलोकस्य । कैरिव ?-द्रमकैरिव-रङ्कवदिति ॥९३॥

**( ९४ ) ( वि० )** गर्वं-दर्पं यः कोऽपि विदध्यात्-कुर्यात् । केन ?-वाल्लभ्यकेन । कीदृशेन ?-परेषां-गृहस्थादीनां प्रसादः-तुष्टिः स आत्मा यस्य स तथा तेन। तं पुरुषं वाल्लभ्यकगर्वितं

---

**( ९३ ) ( अव० )—कुत्सितं प्रियं भाषणं चटुकर्म, उपकारो निमित्तं यस्य चटुकर्मणः, निमित्तं मातापितृसम्बन्धादिकं कृत्वा ॥९३॥**

**( ९४ ) ( अव० )—परजनप्रसन्नताजनितेन[१] स्पृश्यते ॥९४॥**

**माषतुषोपाख्यानं श्रुतपर्यायप्ररूपणां चैव ।**
**श्रुत्वातिविस्मयकरं च विकरणं स्थूलभद्रमुनेः ॥९५॥**

---

यावन्ति चटुकर्माणि कृतानि तावन्त एव शोकाः शोकसमुदयस्तेन स्पृश्यते । शोकश्चित्तपीडाविशेषः ॥९४॥

**( ९५ ) टीका–माषतुषोपाख्यानमिति** । स्वल्पेनापि श्रुतेन भावतो गृहीतेन जडमतिनापि निर्वाणं साध्यते । स ह्यसमर्थो बहुमागममध्येतुं करणजडत्वात् मेधाधारणा-विरहाच्च । तस्यैवंविधस्य गुरुभिरनुकम्पया पदद्वयमर्पितं "[१]मा रूष्य मा तुष्येति" रागद्वेषनिग्रहगर्भम् । तस्य तद् [२]कुट्टयतः करणवैकल्यादन्यथा स्थिरीभूतं माषतुषेति । श्रूयते च तस्य निर्वाणावाप्तिः । तस्माद्बह्वधीतं मयाऽर्थश्च [३]परिज्ञात इति निष्कारणो गर्वः । श्रुतपर्यायप्ररूपणा चैवं श्रुतमागमस्तस्य पर्याया भेदाः । कश्चिदेकार्थव्याख्याकारी, कश्चिदर्थद्वयभाषी, तथाऽपरो बह्वर्थाख्यायी एकस्यैव सूत्रस्येति । श्रुतपर्यायं चाकर्ण्य । अतिविस्मयकरं च विकरणं वैक्रियसिंहरूपनिर्माणं [४]स्थूलभद्रमहर्षे[५]र्भगिन्यार्यिकाणां दर्शनाय आगमाभियोगजनितलब्धिविकरणं श्रुतसम्प्रदायविच्छेदं च तस्य श्रुत्वा को नामैहिकोपाय-[६]भीत्यापि श्रुतमदं कुर्यादिति ॥९५॥

---

कर्मताऽऽपन्नं वाल्लभ्यकविगमे शोकसमुदयो–दैन्यसमूहः परामृशति–आश्लिष्यति, शोकेनासौ गृह्यत इत्यर्थ इति ॥९४॥

**( ९५ ) ( वि० )** श्रुतमदव्युदासमार्याद्वयेनाह**–माषतुषोपाख्यानमिति** । मदः कथं कार्य इति द्वितीयार्यायां[१] सम्बन्धः । किं कृत्वा ?–माषतुष इतिपदेन समयप्रसिद्धेनोपलक्षितः साधुस्तस्योपाख्यानं–कथानकं तत्तथा । तस्य हि माषतुषसाधोः श्रुतरहितस्यापि निर्वृत्तिर्जातेति श्रुत्वेति योगः । तथा श्रुतस्य–आगमस्य पर्याया–भेदा यथा–कश्चिदेकार्थवादी कश्चिद्बह्वर्थवादी एकस्यैव सूत्रस्य, तेषां प्ररूपणा–वर्तना तां, चैवेति समुच्चये । श्रुत्वा–आकर्ण्य तथाऽतिविस्मयकरं–स्वाश्चर्यविधायकं । किं तत् ?–विकरणं च । चस्यात्र सम्बन्धः । विक्रियाकृतशेषश्रुतदाननिषेधमिति शेषः । श्रुत्वा । कस्य ?–स्थूलभद्रमुनेः, यथा तेन निजभगिन्या आत्मा सिंहकरणगर्वेण दर्शित इति ॥९५॥

---

**( ९५ ) ( अव० )–श्रुतपर्याया भेदा अनन्तगुणादयोऽसङ्ख्यभवपरिच्छेदाः उपर्युपरि पश्यतः सर्वं दरिद्रमिति विदित्वा, विकरणं=विक्रियां कृतशेषश्रुतदाननिषेधमिति शेषः वैक्रिय-सिंहरूपनिर्माणम् ॥९५॥**

**सम्पर्कोद्यमसुलभं चरणकरणसाधकं[1] श्रुतज्ञानम् ।**
**लब्ध्वा सर्वमदहरं तेनैव मदः कथं कार्यः ? ॥९६॥**
**एतेषु मदस्थानेषु निश्चये न च गुणोऽस्ति कश्चिदपि ।**
**केवलमुन्मादः स्वहृदयस्य संसारवृद्धिश्च ॥९७॥**

---

**( ९६ ) टीका—सम्पर्कोद्यमसुलभमित्यादि** । आगमज्ञैर्बहुश्रुतैराचार्यादिभिः सह सम्पर्कः संसर्गः। उद्यम [1]उत्साहोऽध्ययनेऽर्थश्रवणे च । सम्पर्कोद्यमाभ्यां सुलभमनायासेन प्राप्यं, चरणं मूलगुणाः, करणमुत्तरगुणास्तेषां साधकं निष्पादकम् । श्रुतज्ञानं लब्ध्वा समासाद्य। सर्वेषां जात्यादिमदानामपनयनकारि भूयः तेनैव कथं मदमादधीतात्मनि ? । न हि विषापहारिप्रयुज्यमानमगदं [2]विषवृद्धिं करोतीति ॥९६॥

**( ९७ ) टीका—एतेषु मदस्थानेष्वित्यादिति** । जात्यादिष्वष्टसु[1] मदस्थानेष्वेतेषु। निश्चये परमार्थविचारणायां पर्यवसाने वा, न खलु कश्चिद् गुणो दृश्यते ऐहिक आमुष्मिको वा । यदि नाम जातिर्विशिष्टा ततः किं स्यात् हीना चेत्ततोऽपि किम् ? केवलमुन्मादः स्वहृदयस्य यदि [2]परमुन्माद उन्मत्तता ग्रहाविष्टस्येव यत्किञ्चनप्रलापित्वं स्वहृदयस्येति। स्वचित्तपरिणामादेस्तानि[3] मदस्थानानि भवन्तीति । स च स्वहृदयपरिणामो[4] बहिर्वर्तिन्या वाक्कायचेष्टयाऽवगम्यते । ततश्च संसारवृद्धि-र्जन्मजरामरणप्रबन्धः संसारस्तस्य वृद्धिः [5]तद्दीर्घीकरणमिति ॥९७॥

---

**( ९६ ) ( वि० ) सम्पर्केति** । सम्पर्कश्च-पण्डितसंसर्गः उद्यमश्च-प्रोत्साहस्तौ तथा ताभ्यां सुलभं-सुप्रापम् । तथा चरणकरणयोः प्रसिद्धयोः साधकं-निर्वर्तकम् । किमेवंविधम् ?-श्रुतज्ञानम् । ततस्तल्लब्ध्वा सर्वमदहरं तेनैव मदः कथं कार्यः ? सर्वथा गर्वो न विधेयः । यत उक्तम्-

**ज्ञानं मददर्पहरं माद्यति यस्तेन तस्य को वैद्यः ? ।**
**अमृतं यस्य विषायति तस्य चिकित्सा कथं क्रियते ? ॥** इति ॥९६॥

**( वि० )** तदेवं प्रत्येकमार्याद्वयेनाष्टमदस्थानानां व्युदासमभिधाय साम्प्रतं संहत्य तामार्याद्वयेन[1] [2]तमाह**—एतेष्विति । जात्यादीति ।** एतेषु मदस्थानेषु निश्चये-परमार्थचिन्तायां न च गुणोऽस्ति कश्चिदपि ऐहिकादिः, केवलमुन्मादो भवति । कस्य ?-स्वहृदयस्य । तथा संसारवृद्धिश्चेति सुगममिति ॥९७॥

---

**( ९६ ) अव०—सम्पर्कश्च संसर्ग आचार्यादिभिः सह, उद्यमश्च प्रोत्साहः, मूलगुणा उत्तरगुणा-स्तेषां निष्पादकं[1] [2]प्राप्य श्रीजिनागमं सर्वेषां जात्यादिमदानां विनाशकं, श्रुतेनैव दर्पः किं क्रियते ? यतः-**

**[3]ज्ञानं मददर्पहरं, माद्यति यस्तेन तस्य को वैद्यः ।**
**अमृतं यस्य विषायति तस्य चिकित्सा कथं क्रियते ॥९६॥**

**जात्यादिमदोन्मत्तः पिशाचवद्भवति दुःखितश्चेह ।**
**जात्यादिहीनतां परभवे च निःसंशयं लभते ॥९८॥**

---

**( ९८ ) टीका–जात्यादिमदेत्यादीति** । जात्यादिनाऽष्टप्रकारेण मदेनोन्मत्तो [१]हृत्पूर-भक्षणपित्तोदयाद् व्याकुलीकृतकरणपुरुषवत् पिशाचवद्वा भवति दुःखितश्चेह । कश्चिच्छुचिपिशाचको द्व्यर्दको[२] जनाकीर्णं [३]प्रदेशमुत्सृज्य समुद्रमध्यवर्तिनं द्वीपमनुप्रविष्टः । तत्र चैको वणिग्विभिन्नपोतः प्रथमतरं[४] गतः । तत्र चेक्षुवाटाः प्रभूतास्तद्रसपानात् केवलाद् गुडशकलानीव गुदमुखेन विसृष्टानि । पुरीषपरिणामान्तराणि तानि तथाऽवलोक्य स [५]चोक्षकपिशाचश्चखाद स्वादूनि, [६]तृप्तश्चास्ते प्रतिदिवसम् । दृष्टश्च कालान्तरेण हिण्डमानो वणिक् । ततश्चोद्विग्नस्तस्मादपि [७]स्थानाद् विनिर्गतोऽन्यं [८]द्वीपमगमत् । तत्रापि वल्गुल्यादि[९]चूषितानि फलानि भुक्तवानेवं यत्र यत्र [१०]प्रयाति तत्र तत्र दुःखभाक् । एवंविधश्च परभवेऽपि हीनजात्यादिष्वेवोत्पद्यते[११] इति न युक्तो जात्यादिमदः[१२] ॥९८॥

---

**( ९८ ) ( वि० )** तथा–जात्याद्यष्टप्रकारेण मदेनोन्मत्तः–परवशः स तथा । पिशाचवत् सूचकत्वात्सूत्रस्य शुचिपिशाचाभिधानद्विजवद् भवति–जायते दुःखितो–दुःखभाक् । [१]क्व ? इह–अत्रैव जन्मनि । कथानकं चैवं यथा–क्वापि स्थाने शुचिपिशाचाभिधो द्विजः, अत्र वसतामशुचिरेवेति मत्वा जनाकीर्णदेशमुत्सृज्य समुद्रवर्तिद्वीपमनुप्रविष्टः । तत्र चैको वणिक् भिन्नपोतः प्रथमतरं गत आस्ते । तत्र चेक्षुवाटाः प्रचुराः सन्ति । तद्रसपानात् केवलाद् गुडशकलानीव गुदमुखेन तेन निसृष्टानि पुरीषरूपाणि । तानि चालोक्य स चोक्षकः शुचिपिशाचश्चखाद । तृप्तश्चास्ते प्रत्यहम् । दृष्टश्च कालान्तरेण हिण्डमानो वणिक्, पृष्टश्च किमत्रागमनप्रयोजनम् ? । वणिजाऽभ्यधायि पोतभङ्गादत्रायातः । पुनः पृष्टः–कथं तव भुक्तियुक्तिः ?, वणिजोक्तं–इक्षुरसास्वादनेन । पुनरुक्तं भवान् कथमायातः ? । तेनाप्युक्तं–जनाकीर्णेऽशुचिरिति कृत्वाऽत्रायातः । अपर उवाच–कथमाहारमन्तरेणात्र स्थीयते ? । ततस्तेनाभाणि–प्रत्यहमिक्षुफलानि भक्षयंस्तिष्ठामि । ततश्चाश्चर्यसम्पन्नेन तेनोक्तं–ममापि तानि दर्शयेति । ततो वणिङ्निसृष्टानि पुरीषाणि दर्शितवान् । ततो विहस्य वणिजोक्तं–ममेदं पुरीषं भवता प्रत्यहं भक्ष्यते । अहो ! शोभनः शुचिवादस्तव । ततश्चोद्विग्नमानसस्तस्मादपि स्थानाद्विनिर्गतो द्वीपान्तरं गतः । तत्रापि वल्गुल्यादिचूषितानि फलानि भक्षितवान् । एवं यत्र यत्र [२]प्रयाति तत्र तत्र दुःखभाक् जात इति । तथा परभवे च निःसंशयं जात्यादिहीनतां लभते–प्राप्नोतीति ॥९८॥

---

**( ९८ ) ( अव० )–जात्यादिमदमत्तः शुचिपिशाचाभिधानद्विज इव दुःखभाग्भवति ॥९८॥**[१]

**सर्वमदस्थानानां मूलोद्घातार्थिना सदा यतिना ।**
**आत्मगुणैरुत्कर्षः परपरिवादश्च सन्त्याज्यः ॥९९॥**
**परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म ।**
**नीचैर्गोत्रं [१]प्रतिभवमनेकभवकोटिदुर्मोचम् ॥१००॥**

---

**( ९९ ) टीका—सर्वमदस्थानेत्यादि** । तस्मात्सर्वेषां जात्यादिमदस्थानानामष्टानामपि यन्मूलं बीजं गर्वाख्यं [१]तदुपघातो विनाशस्तदर्थिना मानकषायविजयार्थिना । सदा सर्वकालम् । यतिना मोक्षसाधनप्रवृत्तेन प्रयत्नवता । आत्मगुणैर्जात्यादिभिरुत्कर्षो गर्वः । परेषां च परिवादोऽवर्णभाषणं परिभवः परित्यजनीय इति ॥९९॥

**( १०० ) टीका—**कस्मात्पुनः [१]परपरिवादस्त्यज्यत इत्याह**—परपरिभवेत्यादि** । परस्य परिभवो न्यत्कारः किमनेन जात्यादिहीनेनेति । परिवादस्त्वर्णभाषणम्-'एवं [२]चैवं चायमकरणीयं करोति' । आत्मनश्चोत्कर्षाज्जात्यादिभिरुत्कृष्टताख्यापनात् । बध्यते समादीयते कर्म नीचैर्गोत्राख्यम् । यत्र यत्रोत्पद्यते तत्र तत्र हीनजातिषु म्लेच्छदासचाण्डालादिषु तदनुभवति । ततश्च कर्ममयत्वात्संसारस्य तत्कृतं संसारपरिभ्रमणं जन्मजरामरणप्रबन्धम् । प्रतिभयमिति भयाभिमुखं सर्वत्र भीतियुक्तम् । अथवा प्रतिभवं भवे भवे इत्यर्थः । भवानां जन्मनां कोटिः । अनेका चासौ भवकोटिश्चेति अनेकभवकोटिः । भवकोट्याऽनेकया दुर्मोचं दुर्मोक्षं नानुभवितुं शक्यमित्यर्थः । **'नामगोत्रयोर्विंशतिकोटिकोट्यः स्थितिः'** इति वचनात्[३] (तत्त्वार्थ-८-१७)॥१००॥

---

**( ९९ ) ( वि० )** ततश्च**—सर्वेति** । सर्वमदस्थानानां पूर्वोक्तस्वरूपाणां मूलोद्घातार्थिना-आदित एव विनाशमभिलषता सदा-सर्वदा यतिना-साधुना । किं कार्यमित्याह-आत्मगुणैरुत्कर्षः परपरिवादश्च सन्त्याज्यः इति प्रकटमिति ॥९९॥

**( १०० ) ( वि० )** किमेतौ सन्त्याज्यावित्याह**—परेति** । परिभवो-न्यक्कारः परिवादः-अवर्णवादभाषणं ततः समाहारद्वन्द्वः । परेषाम्-आत्मव्यतिरिक्तानां परिभवपरिवादं परपरिभवपरिवादं तस्मात्, तथा आत्मोत्कर्षात्-स्वबहुमानाच्च बध्यते कर्म । कीदृशम् ?-नीचैर्गोत्रं-सप्तमं कर्म, इदं च मुख्यवृत्त्योक्तम्, गौणवृत्त्या त्वन्यान्यपि यथाऽनुरूपं बध्यन्ते । किमेकस्मिन्नेव भवे ?, नेत्याह-प्रतिभवं-प्रतिजन्म यथा भवति। पुनः कीदृशम् ?-अनेकाभिः-प्रभूताभिः भवानां-जन्मनां कोटिभिः-सङ्ख्याविशेषैर्दुर्मोचं-दुस्त्यजमिति ॥१००॥

---

**( ९९ ) ( अव० )—जात्यादीनां बीज[१]विनाशाय, सततं मुनिनोद्यतेन आत्मना समुत्कर्षः, परेषां दूषणोद्घोषणं च ॥९९॥**

**( १०० ) ( अव० )—परतिरस्कारः, भवे भवे, कोटिरानन्त्यसूचकः ॥१००॥**

**कर्मोदयनिर्वृत्तं हीनोत्तममध्यमं मनुष्याणाम् ।**
**तद्विधमेव तिरश्चां योनिविशेषान्तरविभक्तम् ॥१०१॥**
**देशकुलदेहविज्ञानायुर्बलभोगभूतिवैषम्यम् ।**
**दृष्ट्वा कथमिह विदुषां भवसंसारे रतिर्भवति ? ॥१०२॥**

---

**( १०१ ) टीका—**कर्मोदयवशाच्च हीनादिजातिषु जन्म भवति नाकस्मादिति दर्शयति—**कर्मोदयनिर्वृत्तमित्यादीति** । कर्मशब्देन गोत्रमेवाभिसम्बध्यते । हीनं नीचैर्गोत्र[१]-कर्मोदयात्, उत्तममुच्चैर्गोत्रकर्मोदयात्, मध्यमं व्यतिमिश्रकर्मोदयात् । मनुष्याणां तिरश्चां च त्रिविधमपि भवति '**तद्विधमेव तिरश्चामिति**' वचनात् । जघन्योत्तममध्यममित्यर्थः । योनिविशेषान्तरविभक्तमिति तिर्यग्योनिभेदेन मनुष्ययोनिभेदेन च विभक्तं कृतविभागम् । [२]विशेषस्तु तिरश्चामेकद्वित्रिचतुःपञ्चेन्द्रियाख्यानां[३], मनुष्याणां [४]सम्मूर्च्छनजगर्भजा इति विशेषाः । [५]अन्तरशब्दोऽन्यत्वप्रतिपादनार्थ इति कारिकाशतं विवृतम्[+] ॥१०१॥

**( १०२ ) टीका—**एवमुक्तेन न्यायेन हीनादिजन्मप्रतिपत्तिः कर्मोदयजनितेति महद्वैराग्य-कारणं, तथेदमपरं वैराग्यस्य निमित्तमाख्याति—**देशकुलेत्यादि** । देशो मगधाङ्ग[१]बङ्गकलिङ्गादिरार्यः,

---

**( १०१ ) ( वि० )** ततश्च किं भवति—**कर्मोदयेति** । कर्मणः-प्रक्रमाद् गोत्रस्य उदयेन-नीचैस्तथोच्चैस्तथा मध्यमतया च विपाकेन निर्वृत्तं-निष्पन्नं यत्तत् तथेति । किं तदेवंविधमित्याह-हीनोत्तममध्यममिति समाहारद्वन्द्वः तस्य भावस्तत्त्वं, त्वप्रत्ययो लुप्तो द्रष्टव्यः । केषां ?-मनुष्याणां, भवतीत्यत्रोत्तरवाक्ये च शेषो दृश्यः । तथा तद्विधमेव-तत्प्रकारमेव । केषाम् ?-तिरश्चाम्-एकेन्द्रियादीनां च, [१]हीनत्वादीति योज्यम् । कथंभूतमित्याह-योनिः-उत्पत्तिस्थानं तस्या विशेषाः, तिरश्चामेकद्वित्रिचतुष्पञ्चेन्द्रियाख्याः मनुष्याणां तु सम्मूर्छनजगर्भजरूपाः, उपलक्षणत्वाद्देवनारकाणां च, तेषां अन्तरम्-अन्यत्वं तेन विभक्तं-कृतविभागमिति समासः ॥१०१॥

**( १०२ ) ( वि० )** तथा अपरमपि वैराग्यनिमित्तमाख्यातम्—**देशेति** । देशादीनामष्टानां पदानां कृतद्वन्द्वसमासानां सुबोधानां वैषम्यं-विसदृशतां शुभाशुभतामित्यर्थो दृष्ट्वा-अवलोक्य

---

**( १०१ ) ( अव० )—कर्मशब्देन गोत्रमेव तद्रूपमेव योनिविशेषाश्चतुरशीतिलक्षाः तदन्तरैः कृतविभागम् ॥१०१॥**

**( १०२ ) ( अव० )—देशादीनां समृद्धिपर्यन्तानां विषमतां विलोक्य, भवसंसरणे ॥१०२॥**

---

+ (पूर्वसम्पादकीया टीप्पणी) ज्ञायतेऽनेनैकस्या आर्यायाः प्रक्षिप्तत्वं का च सेति न निर्णीयते यत एता यावद्विवृता एव दृश्यन्ते सर्वा अपि, जाज्ञायते तेन विवृतिरपि प्रक्षेपकेणैव कृत्वा प्राक्षेपि । सुदृढं चेदं येन प्रान्ते पुस्तकादर्शेषु दरिदृश्यते द्वादशोत्तरमार्याशतत्रयमित्युल्लेखः ।

**अपरिगणितगुणदोषः स्वपरोभयबाधको भवति यस्मात् ।**
**पञ्चेन्द्रियबलविबलो रागद्वेषोदयनिबद्धः ॥१०३॥**

---

शकयवनकिरातादिरनार्यः । कुलमिक्ष्वाकुहरिवंशादिकम्[२] । [३]सलक्षणावयवसन्निवेशविशेषो देहः, अपरः कुब्जहुण्ड[४]वामनादिः । विज्ञानं [५]विस्पष्टो बोधो जीवादिपदार्थविषयः, अपरः प्रकृष्टाज्ञानपरिगतः किञ्चिज्ज्ञः । दीर्घेणायुषा यथाकालविभागवर्तिना युक्तः, अपरस्तु गर्भकौमारयौवनावस्थादिषु अनियतायुः । बलं शारीरादि तेन सम्पन्नो वीर्यवान्, अपरो [६]निर्बलः स्वशरीरकमपि कथञ्चिद्धारयति । भोगवान् [७]एक इष्टशब्दादिसम्पदुपभोगसमर्थः, अपरो भोगरहितः सतोऽपि [८]वा भोगानसमर्थो भोक्तुम् । हिरण्यसुवर्णधनधान्यादिविभूतियुक्तः[९] एकः, अपरो दारिद्र्याभिभूतो [१०]जरद्दण्डीखण्डनिवसनः । एषां देशादीनां समृद्धिपर्यन्तानां वैषम्यं विषमतां विलोक्य कर्मोदयजनितां । कथं केन प्रकारेण । विदुषां बुद्धिमतां नारकादिभवसंसारे रतिः प्रीतिर्भवति । कर्मोदयनिमित्तं शुभाशुभलक्षणं देशादि विज्ञायोद्वेगः [११]संसारात् कार्यः । तस्माद्धर्मानुष्ठानादर एव श्रेयानिति ॥१०२॥

**( १०३ ) टीका—**तथापरं वैराग्य[१]कारणमादर्शयन्नाह—**अपरिगणितेत्यादि** । गुणाश्च दोषाश्च गुणदोषाः । अपरिगणिता अनादृता गुणदोषा[२] येनासौ अपरिगणितगुणदोषः । प्रेक्षापूर्वकारी गुणान् दोषांश्च विचार्य गुणेषु प्रवर्तते दोषान् परिहरति । [३]यश्चानालोचितगुणदोषः स खलु स्वपरोभयबाधको[४] भवति, स्वमात्मानं बाधते [५]यथाऽयं प्रवृत्तस्तथाहमपि प्रवर्तेयेति(?)ग् [[६]यथाहं प्रवृत्तस्तथान्यमपि प्रवर्तयामीति] परमपि बाधते । [७]विबलः विगतबलः पञ्चेन्द्रियबलेन महताभिभूतत्वा-दुन्मार्गयायिनान्येन बलेन मार्गे प्रतिपादयितुमशक्य[८] इति विगतबलः । रागद्वेषोदये निबद्धो नियमितः [९]रागद्वेषपरिणत इत्यर्थः ॥१०३॥

---

कथमिह विदुषां भवसंसारे-नरकादिसंसृतौ रतिर्भवति ?, न भवत्येवेत्यर्थः ॥१०२॥

**( १०३ ) ( वि० )** तथा-**अपरिगणितेति** । अपरिगणिता-अनादृता गुणदोषा येन स तथा । ईदृशः सन् किमित्यत आह-स्वश्च-आत्मा परश्च-अन्यस्तौ तथा, तावेवोभयं तस्य बाधकः-पीडाकारी भवति यस्मात्कारणात् । तथा पञ्चेन्द्रियबलेन विबलो-विगतबलः स तथा । पञ्चेन्द्रियाणि जेतुं न शक्त इत्यर्थः । तथा रागद्वेषयोः पूर्वोक्तयोरुदयः-अनुभवनं तेन निबद्धो-नियन्त्रितः स तथा । सदोत्कृष्टरागद्वेष इत्यर्थः ॥१०३॥

---

**( १०३ ) ( अव० )—अनादृतगुणदोषः, एवंविधो जीवः पञ्चेन्द्रियाणां निजनिजविषय-गार्द्ध्यं तेन विबलो गतशुभपरिणामः रागद्वेषोदयनियन्त्रितः ॥१०३॥**

**तस्माद् रागद्वेषत्यागे पञ्चेन्द्रियप्रशमने च ।**
**शुभपरिणामावस्थितिहेतोर्यत्नेन घटितव्यम् ॥१०४॥**

**तत्कथमनिष्टविषयाभिकाङ्क्षिणा भोगिना वियोगो वै ।**
**सुव्याकुलहृदयेनापि निश्चयेनागमः कार्यः ॥१०५॥**

---

**(१०४) टीका—**यस्मादनालोचितगुणदोष एवंविधो भवति—**तस्मादिति** । यस्मादेवं तस्माद्यथा रागद्वेषयोरात्यन्तिक[1]स्त्यागो भवति तथानुष्ठेयम् । पञ्चेन्द्रियबलं [2]च यथा प्रशाम्यति नोद्वृत्तशक्तिर्भवति तथा शुभपरिणामावस्थितिहेतोर्यत्नेन घटितव्यम् । शुभ एव परिणामो यथा [3]कुलदेशविज्ञानादिरवाप्यते शुभपरिणामावस्थानस्य[4] यो हेतुस्तस्य हेतोः प्रयत्नेनावाप्तिर्यथा स्यात् [5]तथा चेष्टितव्यमिति ॥१०४॥

**(१०५) टीका—**[1]तत्कथं चेष्टितव्यमित्याह-**तत्कथमित्यादि** । अनिष्टा विषया वक्ष्यमाणेन न्यायेन तानाकाङ्क्षत्यभिलषति तेनानिष्टविषयाभिकाङ्क्षिणा भोगिना [2]भोगा-सक्तेन कथमात्यन्तिको वियोगः स्यादेभिः सहेति । वैशब्दः पादपूरणः । सुष्ठु व्याकुल-

---

**(१०४) (वि०)** यस्मादित्युक्तं **तस्मादिति** । तस्मात्-ततः कारणात् घटितव्यं-घटना कार्या । क्व ?-रागद्वेषत्यागे तथा पञ्चेन्द्रियप्रशमने च । किमर्थम् ?-शुभपरिणामावस्थितिहेतोः-शुभपरिणत्यवस्थाननिमित्तमिति ॥१०४॥

**(१०५) (वि०)** तत्कथं घटितव्यमिति पूर्वोक्तार्यया सम्बन्धः केन ?-भोगिना-भोगासक्तेन । कीदृशेन ?-अनिष्टाश्च ते वक्ष्यमाणन्यायेन विषयाश्च प्रसिद्धस्वरूपास्ते तथा [1]तानभिकाङ्क्षति-अभिलषति तेनेत्येका पृच्छा । कथमात्यन्तिको वियोगो-विरहः स्यादेभिः सहेति शेषो वै[2] पूरणे इति द्वितीया पृच्छा । [3]अत्रोत्तरमाह-तेन भोगिना कीदृशेन ?-सुष्ठु व्याकुलितहृदयेनापि-बाढं व्यग्रचित्तेनापि सता निश्चयेन-एकान्तेन, किम् ?-आगमः-सिद्धान्तः कार्यः-अभ्यसितव्यः, ततस्तेषामात्यन्तिकः प्रलयः स्यादिति । यद्वा तत् कथं वियोगः स्यादिति शेषः । कयोः ? -रागद्वेषयोः प्रक्रमगम्ययोर्वै पूर्ववदिति प्रश्ने निर्वचनमाह-आगमः कार्य इति पूर्ववत् । केन कार्यः ?-भोगिना । कीदृशेन ?-अनिष्टविषयाभिकाङ्क्षिणा । तथा सुव्याकुलहृदयेनापि निश्चयेनेति पदानां

---

**(१०४) (अव०)—घटितव्यं=चेष्टितव्यम् ॥१०४॥**

**(१०५) (अव०)—तत्कथं चेष्टितव्यमित्याह-अनिष्टविषयाभिकाङ्क्षिणा, भोगिना= भोगासक्तेन सह वियोगो विषयाणां कथं [1]स्याद् इति प्रश्ने । आगमोऽभ्यसनीयः । अतिबाढं व्यग्रहृदयेनापि यथावद्विज्ञायैतानपायबहुलानागमोऽभ्यसनीयः ॥१०५॥**

**आदावत्यभ्युदया मध्ये शृङ्गारहास्यदीप्तरसाः ।**
**निकषे विषया बीभत्सकरुणलज्जाभयप्रायाः ॥१०६॥**

---

हृदयेनापि बाढं व्यग्रहृदयेनापि सता । निश्चयेन यथावद्विज्ञायैतानिह परत्र चापायबहुलान् शब्दादिविषयान् । आगमः कार्यः । आगमो भगवदर्हत्सर्वज्ञप्रणीतोऽभ्यसितव्यः कार्यस्त-तश्चैषामात्यन्तिकः स्वात्मनि प्रलयो भवत्यनेनाभ्युपायेनेति ॥१०५॥

**( १०६ ) टीका—**कथं पुनरनिष्टा विषया इत्याह-**आदावत्यभ्युदयेत्यादि**। आदौ प्रथमं [१]कुतूहलोत्सुकतया अत्यभ्युदयानुत्सवभूतान् मन्यते, उत्सव आगमिष्यतीति भवत्यानन्दश्चित्तस्य[२] प्रथमम्। मध्ये विषयप्राप्तौ सत्यां शृङ्गार-वेषाभरण-कुच[३]कण्ठाश्लेष-मुखचुम्बन-कर[४]रुहक्षत-प्रहार-परिहास-प्रणय-कोपादिम[५]त्त्वाद्दीप्तरसाः । निकषे इति विशिष्टसंयोगोत्तरकालं विषयाः स्पर्शादयः प्रतिभान्ति बीभत्सा निर्वसनत्वात् प्रकटगुदवराङ्गविकृत[६]दर्शनात्। करुणास्तु बहुविलाप-[७]विस्वरक्वणनश्रवणात् करुणाश्रयत्वादनुकम्पापात्रत्वात् परिसमाप्तप्रयोजना[८] च त्वरिततरमादत्ते त्रपावती निवसनादि, बिभेति च गुरुजनादाशङ्कते मां मैवंविधाम[९]द्राक्षीत्कश्चिदिति । एवमेते विषया बीभत्साः[१०] करुण[११]लज्जाभयायासबहुलाः पर्यन्ते। मध्येऽप्युदिततीव्रमोहवेदनाः। आरम्भे [१२]कुतूहलौत्सुक्यभावाः। न जातुचित्स्वास्थ्यमापादयन्तीति त्याज्याः ॥१०६॥

---

व्याख्या पूर्ववदिति। अन्ये त्वेवम् अनिष्टविषयाभिकाङ्क्षिणां भोगिनामिति पाठान्तरं व्याख्यान्ति यथा इति विशेषणानां जीवानां सुव्याकुलहृदयेन सह, अपिः पूरणे, विरहस्तत्र तस्मात् कथं स्यादिति प्रश्ने प्रत्युत्तरं निश्चयेनागमः कार्यः ॥१०५॥

**( १०६ ) ( वि० )** कथं पुनरनिष्टा विषया इत्याह**—आदाविति** । आदौ-प्रथमतः कुतूहलादुत्सुकतया अत्यभ्युदया-उत्सवभूता भवन्ति इति द्वितीयार्यायां सम्बन्धः। मध्ये-विषयप्राप्तौ शृङ्गारहास्याभ्यां- वेषाभरण-समस्तशरीरावयवस्पर्शन-प्रहासाभ्यां दीप्तरसा-अत्युत्कटानुभवाः, सैव क्रिया पूर्वपदेषु योज्या । निकषे-संयोगोत्तरकालं विषयाः-स्पर्शादयो बीभत्सकरुणलज्जाभयानि कृतद्वन्द्वानि तानि तथा तै रसैः प्राया-बहुलास्ते तथा, तत्र बीभत्सो-विरूपता तथाविधाङ्गदर्शनात्, करुणो निर्दयदन्तनखक्षतावलोकनात्, लज्जा झगिति वस्त्रग्रहणात्, भयं तु मा केनचिद् दृष्टः स्यादिति ॥१०६॥

---

**( १०६ ) ( अव० )—औत्सुक्यकारकाः प्रकटोल्बणस्नेहरागाः, निकषे=प्रान्ते, बीभ-त्सादिभिर्बहुलाः ॥१०६॥**

**यद्यपि निषेव्यमाणा मनसः परितुष्टिकारका विषयाः ।**
**किम्पाकफलादनवद् भवन्ति पश्चाददतिदुरन्ताः ॥१०७॥**
**यद्वच्छाकाष्टादशमन्नं बहुभक्ष्यपेयवत् स्वादु ।**
**विषसंयुक्तं भुक्तं विपाककाले विनाशयति ॥१०८॥**

---

**( १०७ ) टीका—**ननु चोपभुज्यमानाः [१]सुखलेशोपभोक्तारमनुगृह्णन्ते[२] विषया [३]इत्यारेकिते पठति—**यद्यपि निषेव्येत्यादि** । निषेव्यमाणा उपभुज्यमानाः क्षणमात्रं यद्यपि मनोहर्षं जनयन्ति तथापि पश्चाद्विपाककाले आपातरमणीया अपि सन्तः किम्पाकफल-भक्षणोपमाः । किम्पाकतरुफलानि हि [४]रसनाग्रेण लिह्यमानानि स्वादूनि सुरभीणि च परिणतिकाले परासुतया योजयन्ति। अतो दुरन्ता दुःखान्ता इत्यर्थः ॥१०७॥

**( १०८ ) टीका—**तथापरं [१]निदर्शनमाह—**यद्वदिति** । शाकं तीमनमष्टादशं यस्य [२]अन्नस्य तच्छाकाष्टादशमन्नम् । बहुभक्ष्यं [३]मोदकामलसारकादि, पेयं पानकविशेषः

---

**( १०७ ) ( वि० )** [१]यद्यप्यभ्युदया एते तथापि पर्यन्तेऽतिदारुणा इति [२]दृष्टान्तेनावेदयन्नाह **यद्यपीति** । यद्यपीत्यार्याद्धं स्पष्टार्थं, किम्पाकफलान्यादौ मृष्टान्यन्ते मारणात्मकानि तेषामदनं-भक्षणं तद्वद्भवन्ति। पश्चाददतिदुरन्ता इति च व्यक्तमिति ॥१०७॥

**( १०८ ) ( वि० )** अथ निदर्शनान्तरमाह-**यद्वेत्यादि** । यद्वद्-यथा शाकं-तीमनमष्टादशं यस्य तत्तथा। किं तदित्याह-अन्नम्-आहारः, अष्टादशभेदास्त्वेते-

**[१]सूयो१यणो २ जवन्नं ३ तिन्नि य मंसाणि ६ गोरसो ७ जूसो ८ ।**
**भक्खं ९ गुललावणिया १० मूलफला ११ हरियगं १२ डाओ १३ ॥**

**होइ रसालू य तहा १४ पाणं १५ पाणीय १५ पाणगं चेव १७ ।**
**अट्ठारसमं सागं १८ निरुवहओ लोइओ पिण्डो ॥**
**( सूपौदनौ यवान्नं त्रिणि च मांसानि गोरसो यूषः ।**
**भक्ष्या गुडलावणिका मूलफला हरितकाण्डानि ॥**
**भवति रसालुश्च तथा पानं पानीयं पानकं चैव ।**
**अष्टादशमं शाकं निरुपहतो लौकिकः पिण्डः ॥ )**

तथा बहूनि-अनेकानि भक्ष्याणि-मोदकादीनि पेयानि-पानकविशेषा विद्यन्ते यत्र तद्बहुभक्ष्यपेयवत्, तथा स्वादु-मधुरम्, एवंविधमपि विषसंयुक्तं-गरमिश्रं भुक्तम्-अभ्यवहृतं सत्

---

**( १०७ ) ( अव० )—दुःखान्ताः ॥१०७॥**

**( १०८ ) ( अव० )—शाकोऽष्टादशो यत्र तीमनं, मोदकाम्लकरसादि [१]स्वादु, परिणतिसमये ॥१०८॥**

**तद्वदुपचारसम्भृतरम्यकरागरससेविता विषयाः ।**
**भवशतपरम्परास्वपि दुःखविपाकानुबन्धकराः ॥१०९॥**

**अपि पश्यतां समक्षं नियतमनियतं पदे पदे मरणम् ।**
**येषां विषयेषु रतिर्भवति न तान् मानुषान् गणयेत् ॥११०॥**

---

[४]शीधुप्रसन्नादि वा तत्पेयं यत्रास्त्यन्ने तत्पेयवदन्नम् । स्वादु मधुरादि[५] रससंयुक्तम् । विषव्यतिमिश्रं भुक्तम् । विपाककाले परिणतिसमये [६]यथा विनाशयति ॥१०८॥

**( १०९ ) टीका—**दार्ष्टान्तिकमर्थं दृष्टान्तेन समीकरोति-**तद्वदुपचारेत्यादि** । उपचारश्चाटुकर्म विनयप्रतिपत्तिस्तेनोपचारेण सम्भृतं बहुकृतम् । रम्यं रमणीयत्वमतिशय-प्रीतिहेतुत्वम् । रागः स्नेहविशेषः तस्य रसोऽतिशयः । उपचारसम्भृतरम्यकाः[१] रागरसेन सेविता उपभुक्ता विषयाः शब्दादयः । सकृन्मरणकारित्वात् विषान्नदृष्टान्तं दूरीकरोति पश्चार्द्धेन। भवशतानां परम्पराः पद्धतयः [२]तास्तु दुःखेन विपाकेन अनुबन्धकरणशीला दुःखाविच्छेदकारिण इति ॥१०९॥

**( ११० ) टीका—अपि पश्यतामित्यादि** । पश्यतामपि समक्षं प्रत्यक्षेण प्रमाणेन । मरणं नियकालमनियतकालं च । देवनारकाणां नियतमेव । अनियतकालं [१]मनुष्याणां तिरश्चां च । पदे पदे स्थाने स्थाने नारकादिजन्मनि । आर्यानार्यादिभेदे गोमहिष्यजाविकादिभेदे च ।

---

विपाककाले-परिणतिप्रस्तावे, किमित्याह-विनाशयति-मारयति, भोक्तारमिति शेष इति ॥१०८॥

**( १०९ ) ( वि० )** दार्ष्टान्तिकमाह-**तद्वदिति** । तद्वत्-तथा उपचारेण-चटुकर्मविनयप्रति-पत्त्यादिना संहृतः-पिण्डीकृतः सम्भृतो वा-बह्वीकृतो रम्यको-रमणीयः स चासौ रागश्च-प्रीतिस्तस्य रसः-अतिशयानुभवनं तेन सेविता-भुक्ता, क एवंविधा ? इत्याह-विषयाः-शब्दादयः, एवम्भूताः सन्तः । कासु कीदृशा ? इत्याह-भवशतानां-जन्मशतानां अनन्तानां परम्पराः-पद्धतयस्तासु । अपिशब्दः सम्भावने । दुःखस्य-असातस्य विपाकः-अनुभवनं तस्य-अनुबन्धः सातत्यं तत्कराः-विधायकास्ते तथा, अत्रुटितदुःखार्पका भवन्तीति शेष इति ॥१०९॥

**( ११० ) ( वि० )** अथ विषयासक्तानामुपायेन शिक्षामाह**—अपीति** । अपेर्व्यत्ययेन सम्बन्धः । ततः पश्यतामपि समक्षं-प्रत्यक्षं मरणमिति सम्बन्धः । कीदृशम् ?-नियतं देवनारकाणां,

---

**( १०९ ) ( अव० )—उपचारश्चाटुकर्मविनयप्रतिपत्तिः [१]शयनासनादिः सम्भृतपिण्डित-रम्यकानि रतिकराणि, अविच्छेदकारिणः ॥१०९॥**

**( ११० ) ( अव० )—देवनारकाणां नियतकालम्, अनियतकालम् मनुष्यतिरश्चाम् ॥११०॥**

**विषयपरिणामनियमो मनोऽनुकूलविषयेष्वनुप्रेक्ष्यः ।**
**द्विगुणोऽपि च नित्यमनुग्रहोऽनवद्यश्च सञ्चिन्त्यः ॥१११॥**

---

अथवा नियतमिति सर्वकालमेव [2]अनियतं मनुष्यतिरश्चामायुः । सम्प्रतितनानामेवमवगतानित्यतानामपि येषां विषयेषु रतिः सक्तिर्भवति । न तान्मानुषान् गणयेत् कुशलः । [3]तिर्यञ्च एव हि ते, निर्बुद्धिकत्वादिति ॥११०॥

(१११) **टीका–विषयपरिणामेत्यादि** । मनोऽनुकूला ये विषया इष्टाः शब्दादयस्तेषां विषयाणां परिणामोऽनुप्रेक्ष्यः चिन्तनीय आलोचनीयः । इष्टपरिणामाः सन्तोऽनिष्टपरिणामा भवन्ति, अनिष्टपरिणामाश्चाभीष्टपरिणामा भवन्ति, नावस्थितः कश्चित्परिणामोऽस्ति । एवं चानवस्थितपरिणामविषयविरतौ सत्यामनुग्रहो द्विगुणोऽनवद्यश्च सञ्चिन्त्यः । अनुग्रहो गुणयोगः स च द्विगुणः बहुगुण एव द्विगुण एवोक्तः । द्विशब्दस्योपलक्षणत्वात् । अनवद्यश्चासौ पापबन्धाभावादित्यनुप्रेक्ष्यः ॥१११॥

---

तथा अनियतं तिर्यङ्मनुष्याणां, पदे पदे–स्थाने स्थाने, अथवा नियतं–सर्वकालमेवावीचीमरणरूपं, समये समये आयुःक्षयात्, येषां विषयेषु रतिर्भवति–स्वास्थ्यं जायते न तान् मानुषान् गणयेत् कुशलः, तिर्यञ्च एव हि ते, निर्बुद्धिकत्वादिति ॥११०॥

(१११) (वि०) तेषामेवोपदेशमाह–**विषयेति** । विषयेषु–शब्दादिषु परिणामः–अध्यवसायस्तस्य नियमो–निवृत्तिः सोऽनुप्रेक्ष्यः–पर्यालोचनीयः, कर्तव्य इति तात्पर्यम् । जीवेनेति शेषः । केषु विषयेषु ?–मनसोऽनुकूलविषयेषु, विषयाधारत्वाद्विषयाः–स्त्र्यादयस्तेष्वित्यर्थः । अर्थवशेन विभक्तिपरिणामात्, तत्र विषयपरिणामनियमे किम् ?–अनुग्रहो–गुणयोगो नित्यं सञ्चिन्त्यः–परिभावनीय इति योगः । कीदृशः ?–द्विगुणो–द्वाभ्यां लोकालोकाकाशाभ्यां गुण्यत इति द्विगुणोऽनन्तगुण इत्यर्थः । तथा अनवद्यश्च । अपि चेत्यभ्युच्चय इति । अन्ये त्वाहुः–विषयाणां परिणामः–शुभानामशुभत्वेनाशुभानां शुभत्वेन भवनं तस्मिन् सति नियमो न मयैते भोक्तव्या इत्येवंरूपोऽनुप्रेक्ष्यः–अनुप्रेक्षणीयः, कर्तव्य इत्यर्थ इति योगः । केषु केषु विषयेषु नियमः ?–मनोऽनुकूलविषयेषु । तत्र च विषयपरिणामनियमे सत्यनुग्रहश्च द्विगुणोऽनवद्यः सञ्चिन्त्यः–सञ्चिन्तनीय इति ॥१११॥ **इति मदस्थानाधिकारः ॥७॥**

---

**(१११) (अव०)–इष्टपरिणामाः सन्तोऽनिष्टपरिणामाः, अनिष्टपरिणामा[1] अभीष्टपरिणामाः । आलोचनीयः सर्वक्षेत्रावस्थाभावित्वात् । एवं चानवस्थितपरिणामविषयविरतौ अनुग्रहो गुणयोगतः, [2]उपलाक्षण्याद् बहुगुणः, चित्तप्रसन्नता ॥१११॥**

**इति गुणदोषविपर्यासदर्शनाद्विषयमूर्च्छितो ह्यात्मा ।**
**भवपरिवर्तनभीरुभिराचारमवेक्ष्य परिरक्ष्यः ॥११२॥**

**सम्यक्त्वज्ञानचारित्रतपोवीर्यात्मको जिनैः प्रोक्तः ।**
**पञ्चविधोऽयं विधिवत् साध्वाचारः समधिगम्यः ॥११३॥**

---

**( ११२ ) टीका—इति गुणदोषेत्यादि** । इति इत्थं गुणान् दोषरूपेण यः पश्यति दोषांश्च गुणरूपेण प्रेक्षते, विपर्यासदर्शनाद् वैपरीत्यं [१]तु बुध्यते । विषयेषु शब्दादिषु मूर्च्छितस्तन्मयतां [२]गतः अयम्-आत्मा, भवः संसारस्तत्र परिवर्तनं नरकादिषु जन्ममरण-प्रबन्धस्तस्माद्बिभ्यद्भिराचारमवेक्ष्य प्रथमाङ्गार्थमनुचिन्त्य । परिरक्ष्यः परिपालनीय इति ॥११२॥

**( ११३ ) टीका—**स चाचारार्थः पञ्चप्रकार इति दर्शयति समासेन—**सम्यक्त्वेति** । [१]तत्र तत्त्वार्थश्रद्धानलक्षणः सम्यक्त्वाचारस्तदुपगृहीतो मत्यादिज्ञानपञ्चकाचारः अष्टविध-कर्मचयरिक्तीकरणाच्च चारित्राचारः । तपो द्वादशभेदमनशनादि तपआचारः । वीर्यमात्म-शक्तिर्वीर्याचारः । एवमेव पञ्चप्रकाराचारः प्रथमाङ्गार्थः तीर्थकृद्भिरर्थतोऽभिहितः । तच्छिष्यैश्च सूत्रीकृतः । विधिवत्समनुगम्यो विज्ञेयः । कः पुनर्विधिः ? सूत्रग्रहणविधिः तावदष्टम-योगादिरर्थग्रहणविधिरनुयोगप्रस्थापनादिः । साधूनामाचारः साध्वाचारः अहोरात्राभ्यन्तरे-ऽनुष्ठेयः क्रियाकलाप इति ॥११३॥

---

**( ११२ ) ( वि० )** इत्थं शिक्षितोऽप्यात्मा येषां शिक्षां न गृह्णाति तैस्तस्य यद्विधेयं तदाह—**इतीति** । इति-इत्थं पूर्वोक्तन्यायेन गुणाश्च दोषाश्च गुणदोषाः तेषु ज्ञातेष्वपि विपर्यासो-गुणान् दोषरूपेण पश्यति दोषांश्च गुणरूपेणेति तस्य दर्शनं तस्मात्, विषयमूर्च्छितः-तन्मयतां गत आत्मा स्वः परिरक्ष्यः-परिपालनीय इत्यन्तपदेन सम्बन्धः । कैः ?-भवपरिवर्तनभीरुभिः-संसारमरण-बिभ्यद्भिः किं कृत्वा ?-अवेक्ष्य-ज्ञात्वा । कम् ?-आचारं-प्रथमाङ्गार्थं, हि-स्फुटमिति ॥११२॥

**( ११३ ) ( वि० )** आचारस्तु पञ्चधेति दर्शयति—**सम्यक्त्वेति** । सम्यक्त्वादि पञ्च पदानि सुबोधानि कृतद्वन्द्वसमासानि तान्यात्मा-स्वरूपं यस्य स तथा जिनैः प्रोक्तः पञ्चविधः-पञ्चप्रकारोऽयं-पूर्वोक्तो विधिवद्-यथावत् । क्रियाविशेषणम् । साध्वाचारः-अहोरात्राभ्यन्तरेऽनुष्ठेयः क्रियाकलापः समधिगम्यो-विज्ञेय इति ॥११३॥

---

**( ११२ ) ( अव० )—इत्थं गुणान् दोषरूपेण दोषांश्च गुणरूपेण यः पश्यति, गुणदोष-विपरीतोपलब्धिः, [१]प्रथममङ्गं विलोक्य परिरक्ष्यः ॥११२॥**

**( ११३ ) ( अव० )—विधिना विज्ञेयः ॥११३॥**

**षड्जीवकाययतना लौकिकसन्तानगौरवत्यागः ।**
**शीतोष्णादिपरीषहविजयः सम्यक्त्वमविकम्प्यम् ॥११४॥**

---

**( ११४ ) टीका–**विभक्तस्याप्याचारस्य पञ्चधा नवब्रह्मचर्यात्मकस्याध्ययनार्थाधिकार-द्वारेण पुनर्लेशोद्देशतोऽर्थमाचष्टे समासेन**–षड्जीवकायेत्यादि**। शस्त्रपरिज्ञायां षड् जीवनिकायाः पृथिव्यप्तेजोवायुवनस्पतित्रसाख्याः, तत्रादौ जीवास्तित्वप्रतिपादनं सामान्येन, ततः पृथिव्यादि-कायस्वरूपव्यावर्णनम्। तद्वधात्संसारहेतुः कर्मबन्धः, तद्वधविरतिश्च मनोवाक्कायैः कृतकारितानु-मतिपरिहारादिति षट्सु जीवनिकायेषु यतना प्रयत्नः तद्रक्षणे ज्ञानपूर्वको व्यापार इति। लोकविजये लौकिकसन्तानगौरवत्यागः । लौकिकसन्तानो [१]मातृपित्रन्वयः । शेषाश्च स्वजनसम्बन्धेन[२] पत्नीपुत्रादयस्तेषु गौरवमादरः स्नेहासक्तिस्तत्त्यागः[३] । तथा क्रोधमानमायालोभकषायविजयो विधेयो बलवता क्षमादिना बलेन । शीतोष्णीयाध्ययने शीतोष्णादिपरीषहविजयः क्षुत्पि-पासादिपरीषह[४]द्वाविंशतेर्विजयोऽभिभवः । तत्र स्त्रीसत्कारपरीषहौ भावतः शीतौ, विंशतिरुष्णाः शेषाः। सम्यक्त्वाध्ययने शङ्कादिशल्यशुद्धं तत्त्वार्थश्रद्धानलक्षणं सम्यग्दर्शनमविकम्प्यं दृढं निश्चितं वर्ण्यते ॥११४॥

---

**( ११४ ) ( वि० )** एवं सामान्यतः प्रथमाङ्गार्थमाश्रित्य पञ्चधाऽऽचार उक्तः, अथ तस्यैवाध्ययनान्याश्रित्य बहुविधमाचारं बिभणिषुस्तावत्तस्य प्रथमश्रुतस्कन्धे नवाध्ययनानि सन्तीति तान्याश्रित्य नवविधत्वमार्याद्वयेनाह**–षडिति । संसारादिति** । षड्जीवकाययतना कार्येति शेषः । साधुनेति सर्वत्र प्रक्रम इति । शस्त्रपरिज्ञाख्ये प्रथमेऽध्ययन उक्तम् । तथा लोके-गृहस्थजने जातो लौकिकः स चासौ सन्तानश्च पितृपितामहपरम्परा तस्य गौरवम्-अभ्युत्थानादि तस्य त्यागः-परिहारः स तथा, कार्य इति शेषः, इति लोकविजयाख्ये द्वितीयेऽध्ययने उक्तम् । तथा शीतोष्णादिपरीषहः, आदिशब्दस्य प्रकारवचनार्थत्वात् द्वाविंशतिपरीषहा ग्राह्यास्तेषां विजयः-सहनेनाभिभवनं यः सः तथा, [१]शीतोष्णीयाख्ये तृतीयेऽध्ययने भणितमिदमिति । तथा सम्यक्त्वमविकम्प्यम्-अविचलं धार्यं इति चतुर्थे सम्यक्त्वाख्येऽध्ययने उक्तम् इति ॥११४॥

---

**( ११४ ) ( अव० )–[१]शस्त्रपरिज्ञा नाम आद्याध्ययनार्थे[२] सङ्क्षेपेण[३] मातापित्रादेः[४] गौरवाणाम् ऋद्ध्यादीनां, षड्जीवकाययतना प्रथमेऽध्ययने, [५]गौरवत्यागो द्वितीये, [६]परीषहविजयस्तृतीये, दृढसम्यक्त्वं चतुर्थे ॥११४॥**

**संसारादुद्वेगः क्षपणोपायश्च कर्मणां निपुणः ।**
**वैयावृत्त्योद्योगस्तपोविधिर्योषितां त्यागः ॥११५॥**
**विधिना भैक्ष्यग्रहणं स्त्रीपशुपण्डकविवर्जिता शय्या ।**
**ईर्याभाषाऽम्बरभाजनैषणाऽवग्रहाः शुद्धाः ॥११६॥**

---

**( ११५ ) टीका—संसारादुद्वेग इत्यादि** । लोकसाराध्ययने लोकसारः इत्यन्वर्थं नाम आदिपदे[१]नावन्तिरिति। तत्र संसारादुद्वेगः हिंसादिप्रवृत्तो[२] न मुनिस्तद्विरतो मुनिरकिञ्चनः कामभोगेषूद्विग्नो[३]ऽनेकदोषदर्शनात्। धर्मज्ञानसंयमनिर्वाणाख्यम् । लोकसारमवेक्ष्यमाणः ससहायो मार्गमेव [४]अपरित्यजन् सारमासादयति लोकस्येति । धूताध्ययने स्वजनमित्र-कलत्रपुत्रादिनिरपेक्षता, तद्विधूननं तत्परित्यागः, कर्मणां च ज्ञानावरणादीनां [५]विधूननोपायः, श्रुतज्ञानानुसारि क्रियानुष्ठानं शरीरोपकरणत्यागश्चेति। महापरिज्ञायां मूलोत्तरगुणान् परिज्ञाय यथावदवेत्य मन्त्रतन्त्राकाशगतिलब्धी[६]रनुपजीवनम् । प्रत्याख्यानपरिज्ञया[७] च प्रत्याख्याय [८]कर्तव्यानि व्यापृतेन सदा ज्ञानदर्शनचरणेषूद्युक्तेन भवितव्यमित्येतदाह—**वैयावृत्त्योद्योगः** । विमोक्षयतनाध्ययने श्रावकाणां देशविमोक्षः साधूनां सर्वविमोक्षः । क्षीणकर्मणां [९]मुक्तानामात्मनोऽपि स्वजनितैरेव कर्मभिर्बद्धस्य[१०] सकलकर्मांशवियोगो मोक्षः सप्रपञ्चो भक्तप्रत्याख्यानेङ्गिनीपादपोपगमनमरणैः सह वर्ण्यते । तपोविधिः प्राधान्याद् गृहीतः । उपधानश्रुते भगवता श्रीवर्धमानस्वामिना स्वानुष्ठिततपोव्यावर्णनं । योषित्त्यागो ब्रह्मचर्यादि-लक्षणं कृतम् । एवमाचारो नवाध्ययनात्मकोऽर्थतो विभक्तः ॥११५॥

**( ११६ ) टीका—**[१]सम्प्रत्याचाराङ्गेष्वध्ययननवकाद्याकृष्टेषु विस्तररचितेष्वधिकारा

---

**( ११५ ) ( वि० )** संसारादुद्वेगः कार्य इति लोकविजयाख्ये द्वितीयनाम्ना आवन्तीनामकेऽध्ययने [१]पञ्चमेऽध्ययने प्रतिपादितम्। तथा क्षपणोपायश्च, केषां ?–कर्मणां, निपुणः–सूक्ष्मोऽभिधीयत इति धूताख्ये षष्ठेऽध्ययने उक्तम्। तथा वैयावृत्त्योद्योगः–[२]गुर्वाद्यर्थं भक्तानयनादिक्रियायामुद्यम इति महापरिज्ञाख्ये सप्तमेऽध्ययने भणितम् । तपोविधिरिति मोक्षाख्येऽष्टमे उक्तम् । योषितां त्यागः–स्त्रीपरिहार इत्युपधानश्रुताख्ये नवमेऽध्ययने उक्तम् इति । इति प्रथमश्रुतस्कन्धः ॥

**( ११६ ) ( वि० )** साम्प्रतं द्वितीये श्रुतस्कन्धे षोडशाध्ययनात्मकेऽध्ययनस्वरूप-मार्याद्वयेनाह—**विधिनेति । स्थानेति** । विधिना भैक्ष्यग्रहणं इति द्वितीयश्रुतस्कन्धे पिण्डैषणाध्ययने

---

**( ११५ ) ( अव० )—संसारोद्वेगः पञ्चमे, कर्मनिर्जरोपायः षष्ठे, वैयावृत्त्योद्यमः सप्तमे, तपोविधिरष्टमे, योषितां त्यागः स्त्रीपरिहारो नवमे ॥११५॥**

**( ११६ ) ( अव० )—अम्बरं=वस्त्रं, भाजनं=पात्रकादि तयोरेषणा, तथावग्रहो देवेन्द्रादेः । एते कीदृशाः ? शुद्धाः=शुद्धिमन्तः ॥११६॥**

**स्थाननिषद्याद्युत्सर्गशब्दरूपक्रियाः परान्योऽन्याः ।**
**पञ्चमहाव्रतदार्ढ्यं विमुक्तता सर्वसङ्गेभ्यः ॥११७॥**

---

वर्ण्यन्ते—**विधिनेति** । पिण्डैषणाध्ययने उद्गमोत्पादनैषणादोषवर्जितो भिक्षासमूहो ग्राह्यः [२]शैक्षाद्यर्थम् । शय्या प्रतिश्रयः तत्र स्त्रीपशुपण्डकविवर्जिते[३] स्थातव्यम् । मूलोत्तरगुणशुद्धा शय्या ग्राह्येति । ईर्याध्ययने भिक्षाचङ्क्रमणादिक्रियाप्रवृत्तिः[४], शनैः पुरस्तात् युगमात्र-निरुद्धदृष्टिः स्थावराणि जङ्गमानि च सत्त्वानि परिरक्षन् व्रजतीति । भाषाजाताध्ययने वाक्यमात्मपराविरोधि आलोच्य वाच्यमिति । वस्त्रैषणाध्ययने मूलोत्तरगुणविशुद्धं[५] लक्षणयुक्तं वासः समादेयमल्पपरिकर्मादि । पात्रैषणायामपि चोद्गमादिविशुद्धं पात्रग्रहणम्, [६]अलाबुकादि यथोक्तमादेयम् । अवग्रहप्रतिमाध्ययने अवग्रहो देवेन्द्रराजगृहपतिशय्यातर-साधर्मिकाणां पञ्चधा[७], सर्वतः परिमितोऽवग्रहो याच्यः । यत्र भाजनक्षालनस्रवणपुरीषोत्सर्ग-स्वाध्यायस्थानयुक्तोऽवग्रहो योग्य इति । प्रथमचूला [८]सप्ताध्ययनपरिमाणेयम् ॥११६॥

**( ११७ ) टीका—**सम्प्रति द्वितीयचूलासप्ताध्ययनानि [१]सप्तैककाभिधानानि तत्राधिकाराः—**स्थाननिषद्यात्यादि** । प्रथमाध्ययने स्थानं कायोत्सर्गाख्यं वर्ण्यते । द्वितीयाध्ययने निषद्यास्थानं [२]निवेशनाख्यमाख्यायते । तृतीयाध्ययने उच्चारप्रस्रवण-त्यागयोग्यप्रदेशप्ररूपणं व्युत्सर्गस्थानमुक्तम् । चतुर्थाध्ययने शब्दाकारपरिणतद्रव्यग्रहणे सति

---

प्रथमे उक्तम् । तथा स्त्रीपशुपण्डकविवर्जिता शय्या ग्राह्येति शय्याख्ये द्वितीयेऽध्ययने उक्तम् । द्वितीयश्रुतस्कन्धेऽध्ययने इति पदद्वयम् इत ऊर्ध्वं सर्वत्र द्रष्टव्यम् । तथा ईर्या-चङ्क्रमणं, भाषा तु जल्पनम्, अम्बरभाजनयोः-वस्त्रपात्रयोरेषणा, तथाऽवग्रहो-देवेन्द्रराजगृहपतिसागारिकसाधर्मिकेभ्यो विहारादेर्मुत्कलापनं, तत एतेषां पञ्चानां पदानां द्वन्द्वसमासस्ते तथा । कीदृशाः ?-शुद्धाः-शुद्धिमन्तः । शुद्धशब्दः पञ्चस्वपि योज्यः । सम्प्रति यथासङ्ख्यमध्ययनेषु योज्यते-तत्रेर्याशुद्धिरीर्याख्ये तृतीये ३ भाषाशुद्धिर्भाषाख्ये ४ अम्बरशुद्धिर्वस्त्रैषणाख्ये ५ पात्रशुद्धिः पात्रैषणाख्ये ६ देवेन्द्राद्यवग्रहशुद्धिरव-ग्रहाख्ये ७ सप्तमे ॥११६॥

**( ११७ ) ( वि० )** पूर्वोक्तार्यया द्वितीयश्रुतस्कन्धसप्ताध्ययनानि निजनिजनामान्युक्तानि । अत ऊर्ध्वं सप्ताध्ययनानि सप्तसप्तकनामानि भावना विमुक्तिश्चेति नवाध्ययनानि द्वितीयार्ययोच्यन्त इति सम्बन्धः । स्थानादिषु [१]पञ्चसु पदेषु कृतद्वन्द्वसमासेषु विषये क्रिया सा तथा । कार्येति सर्वत्र

---

**( ११७ ) ( अव० )—स्थानं=कायोत्सर्गरूपं, निषद्या=स्वाध्यायभूमिः, त्यागः=शब्दरूप-योर्विरागः । क्रियाशब्दः सर्वत्र परक्रियानिषेधः । प्रयत्नतस्तपस्यतो निःप्रतिकर्मणः परो यदुप-करोति=संस्करोति तदयुक्तम्, अन्योऽन्यक्रिया सापि निष्प्रतिकर्मवपुषो न युज्यते ॥११७॥**

**साध्वाचारः खल्वयमष्टादशपदसहस्रपरिपठितः ।**
**सम्यगनुपाल्यमानो रागादीन् मूलतो हन्ति ॥११८॥**

---

रागद्वेषत्यागः । पञ्चमाध्ययने नानाविधरूपदर्शने[३] रागद्वेषपरित्यागः कार्यः । सर्वत्र क्रियाशब्देनाभिसम्बन्धः-स्थानक्रिया निषद्याक्रियेत्यादि । षष्ठे परक्रियानिषेधः प्रयत्नवतस्तपसि प्रवृत्तस्य निःप्रतिकर्मशरीरस्य परो [४]यदुपकरोति संस्करोति तदयुक्तम् । सप्तमाध्ययनेऽन्योन्यक्रिया परस्परक्रिया सापि निःप्रतिकर्मवपुषो न युज्यत इति । तृतीया चूला भावना तत्राप्रशस्तभावनां विहाय प्रशस्तभावना दर्शनज्ञानचरणतपोवै[५]यावृत्यादिका भाव्याः । एकैकमहाव्रतभावनाश्च पञ्च पञ्च । पञ्चमहाव्रतदाढ्र्यार्थमिति[६] । विमुक्तता सर्वसङ्गेभ्य इति चतुर्थचूलिकायां विमुक्ताध्ययने कर्मणो विमुक्तिरशेषतो देशतो [७]वा चिन्त्यते । यावन्तः केचित्सङ्गास्तेभ्यो विमुक्तिरिति । निशीथाध्ययनं पञ्चमी चूला चतसृषु चूलासु योऽतिचारस्तद्विशुद्ध्यर्थं प्रायश्चित्तदानं तत्रेति ॥११७॥

**( ११८ ) टीका—साध्वाचार इति** । एवमेष[१] साधूनां समाचारः । खलुशब्दो[२] वाक्यालङ्कारार्थे । नवब्रह्मचर्यात्मकः सुप्तिङन्तपदगणनयाऽष्टादशपदसहस्रात्मकः परिपठितः । [३]यत्र चार्थोपलब्धिस्तत्पदमिति । सम्यग्यथोक्तेन विधिना ग्रहणधारणानुष्ठानव्याख्याभिर-

---

शेषः । परा क्रिया, अन्योऽन्या क्रिया । प्राक्तनपदात् क्रियाशब्दः समस्तोऽप्यत्रापि पदद्वये योज्यः । तत्र स्थानं कायोत्सर्गादीनामालोचनीयमिति प्रथमसप्तकेऽष्टमेऽध्ययने, ८ निषद्या-स्वाध्यायभूमिः ९ व्युत्सर्ग उच्चारादीनां १० शब्देषु श्रूयमाणेषु रागद्वेषत्यागः कार्यः ११ रूपेषु दृष्टिगोचरागतेषु रागद्वेषत्यागो विधेयः १२ तथा परा क्रिया-आत्मव्यतिरिक्तः परस्तस्य हस्तात् पादधावनादिका १३ तथा अन्योन्यक्रिया-परस्परं पादधावनादिका १४ तथा पञ्चमहाव्रतेषु दाढ्र्यं-दृढता १५ तथा विमुक्तता कार्या । केभ्यः ?-सर्वसङ्गेभ्यः ॥११७॥

**( ११८ ) ( वि० )** अस्यैव फलमाह-**साध्वाचार इति** । साध्वाचारः पूर्वोक्ताध्ययन[१]स्वरूप-कथितस्वरूपः । खलु-निश्चयेनायं-प्रत्यक्षः । कथम्भूतः ?-अष्टादशेति सङ्ख्या पदानां-सुप्तिङन्तानामर्थसमाप्तिरूपाणां वा सहस्राणि-सङ्ख्याविशेषाः, ततोऽष्टादश च तानि पदसहस्राणि च अष्टदशपदसहस्राणि तैः परिपठितः अधीतः, प्रतिपादित इत्यर्थः । तानि वा परिपठितानि यत्र स तथा । अष्टादशसहस्रप्रमाण इत्यर्थः । किं करोतीत्याह-सम्यग्-अवितथ[२]मनुपाल्यमानः-पठनादिभिरासेव्यमानो रागादीन् मूलतः[३]-सर्वथा हन्ति-[४]नाशयतीति ॥११८॥

---

**( ११८ ) ( अव० )—साध्वाचारः=पूर्वोक्ताध्ययनेऽष्टादशपदसहस्रप्रमितशीलाङ्गशीलनरूप-कथितस्वरूपः[१] । खलु=निश्चयेन । अयं=प्रत्यक्षो[२]ऽक्षिगोचरः । सम्-परीक्ष्यानुष्ठीयमानो, रागाद्यान्तर-रिपून्मूलतो निःशेषयति ॥११८॥**

**आचाराध्ययनोक्तार्थभावनाचरणगुप्तहृदयस्य ।**
**न तदस्ति कालविवरं यत्र क्वचनाभिभवनं स्यात् ॥११९॥**

**पैशाचिकमाख्यानं श्रुत्वा गोपायनं च कुलवध्वाः ।**
**संयमयोगैरात्मा निरन्तरं व्यापृतः कार्यः ॥१२०॥**

---

नुपाल्यमानोऽभ्यस्यमानो रागद्वेषमोहान् समूलकाषं कषतीति । अयं चापरो गुणः प्राप्यते ॥११८॥

**( ११९ ) टीका—आचाराध्ययनोक्तेत्यादि** । आचाराध्ययनमाचारागमस्तत्रोक्तो योऽर्थस्तत्र भावना वासनाभ्यासः षड्जीवनिकाययतनादिका [१]तदाचरणेन [२]गुप्तहृदयस्य च मूलोत्तरगुणै-र्गुप्तमनस्कस्य [३]तदनुष्ठानव्यग्रस्य । किं भवतीत्याह—न तदस्ति कालविवरं कालच्छिद्रं क्वचन-क्वचित्[४], यत्र च्छिद्रेऽभिभूयते कषायप्रमादविकथादिभिरनाचारैरिति[५] ॥११९॥

**( १२० ) टीका—**तथा चाचारार्थव्यग्रस्य न कदाचिद्विमतिर्मुक्तिपरिपन्थिनी[१] साधोर्भवती-त्याह—**पैशाचिकमाख्यानमित्यादि** । केनचिद्वणिजा मन्त्रबलेन पिशाचको वशीकृतः । पिशाचकेन चोक्तं[२], 'ममाज्ञादानमनवरतं कार्यं, यदैवादेशं न लभे तदैवाहं भवन्तं विनाशयामि' इति । प्रतिपन्नं च वणिजा। आज्ञा च दत्ता । गृहकरण-धनधान्यानयन-कनकरजतादिविभूतिरिष्टा यथेच्छं वणिजः सम्पादिता पिशाचकेन[३] । पुनश्चाज्ञा मार्गिता । वणिजाऽभिहितः,[४] 'दीर्घतमं

---

**( ११९ ) ( वि० )** अस्यैवासेव्यमानस्य फलान्तरमाह-**आचारेति** । आचारस्य-आचाराङ्गस्याध्ययनानि-तदन्तर्गता अर्थपरिच्छेदविशेषास्तेषूक्तः स चासावर्थश्च-अभिधेयं तस्य भावना-वासना तया चरणं-चारित्रं व्रतादि तेन गुप्तं-व्याप्तं वासितमिति यावद् हृदयं-चित्तं यस्य स तथा । तस्य किं भवतीत्याह-न-नैव तत्किमप्यस्ति-विद्यते कालविवरम्-अद्धाक्षण इत्यर्थः यत्र-यस्मिन् क्वचन-कस्मिंश्चित् कालविवरेऽभिभवनं-परिभवो, रागादिभिरिति शेषः, स्याद्-भवेदिति ॥११९॥

**( १२० ) ( वि० )** तथा आचारार्थव्यग्रस्य न कदाचिद्विमतिर्मुक्तिपरिपन्थिनी साधो-र्भवतीत्याह—**पैशाचिकमिति** । केनचिद्वणिजा मन्त्रबलेन पिशाचो वशीकृतः । पिशाचेनोक्तं-'ममाज्ञादानमनवरतं च कार्यं, परं यदैवाऽऽदेशं न लप्स्ये तदैवाहं भवन्तं विनाशयिष्यामि' इति । प्रतिपन्नं वणिजा । आज्ञा च दत्ता गृहकरणधनधान्यानयनकनकादिविभूतिसम्पादनविषया । सम्पादिता च पिशाचेन । पुनश्चाज्ञा मार्गिता। वणिजा चाभिहितो-'दीर्घवंशमानीय गृहाङ्गणे निखाय

---

**( ११९ ) ( अव० )—[१]आचाराध्ययनोक्तार्थानां भावना=तस्य=साधोः, किं भवतीत्याह—न तदस्ति कालविवरं छिद्रं यत्र च्छिद्रेऽभिभवनं प्रमादविकथादिकं भवति ॥११९॥**

**[१]( १२० )( अव० )—वणिग्वशीकृतपिशाचकथां कुलवध्वाश्चलितचित्ताया अपि गोपायन-**

**क्षणविपरिणामधर्मा मर्त्यानामृद्धिसमुदयाः सर्वे ।**
**सर्वे च शोकजनकाः संयोगा विप्रयोगान्ताः ॥१२१॥**

---

वंशमानीय गृहाङ्गणे निखायारोहणावरोहणं च कुर्वीथास्तावद्यावदन्यस्याज्ञादानस्यावकाशो भवति' इति । न चास्ति छिद्रं किञ्चिद्वणिजो यत्राभिभवः स्यादिति । साधोरप्यहोरात्राभ्यन्तरानुष्ठेयासु क्रियासु वर्तमानस्य नास्ति छिद्रं विस्रोतसा गमनमिति। अपरा कुलवधू रूपलावण्यवती केनचिद्विटेन दृष्टा, प्रार्थिता [५]च परिभोगं, प्रतिपन्नं च तया। श्वश्र्वा च [६]विज्ञाय तदभिप्रायं सर्वत्र गृहव्यापारे नियुक्ता। प्रातरेव गृहप्रमार्जन-गोमुखकरण-भाण्डकप्रक्षालनाधिश्रयण-रन्धन-परिवेषण-भाजन-मार्जनोपलेपन-खण्डन-छण्टन-पादप्रक्षालनाभ्यङ्गनानेककार्यव्यग्रा कृच्छ्रेण निद्रामोक्ष[८]मासादयति। तस्याः सुदूरादेव विटप्रार्थनकथा व्यपेता । एवं साधोरप्याचारव्यग्रस्य विस्मरत्येवान्या विषयादिकथेति। अतः संयमयोगैरात्मा व्यापृतः कार्यः । संयमः सप्तदशभेदस्तद्विषया [९]योगव्यापारास्तैरात्मा व्यापृतो व्यग्रः कार्य इति ॥१२०॥

**(१२१) टीका–**इत्थं विहितक्रियानुष्ठानव्यग्र ऐहिकेषु भोगकारणेषु भावयेद-

---

आरोहणमवरोहणं च कुर्वीथाः तावद्यावदन्यस्याज्ञादानस्यावकाशो भवति' इति । न चास्ति छिद्रं किञ्चिद्वणिजो यत्राभिभवः स्यादिति मन्यमानेन पिशाचेनोक्तं-'छलितोऽहं त्वया, न तु मया त्वमिति ततो मुत्कलय मां, कार्यकाले स्मरणीय' इत्यभिधाय स्वस्थानमगमत्पिशाच इति । एवं साधोरप्यहोरात्राभ्यन्तरानुष्ठेयासु क्रियासु वर्तमानस्य नास्ति छिद्रं यत्र विषयेच्छायां प्रवृत्तिरिति। तथा द्वितीयं कुलवध्वाख्यानं कथ्यते-यथा काचित् कुलवधूर्देशान्तरगतभर्तृका । तया सखी भणिता-'कञ्चन युवानमानय' । तयोक्तम्-'एवं करोमि धृत्या स्थेयम्' इत्यभिधाय परिणामसुखदं सर्वं शोभनमिति चिन्तयन्त्या श्वशुरस्य निवेदितम्। ततस्तेन द्वितीयेऽह्नि निजभार्यया सह शब्दराटी कृता यथा-'त्वं [१]स्फोटयसि गृहम्'। तयोक्तं-'न शक्नोम्यहं निर्वाहयितुं गृहमिदं, मुक्तोऽयं सम्प्रति मयाऽधिकारः । ततः श्वशुरेण सा वधूर्गृहव्यापारेषु नियुक्ता, सर्वं गृहव्यापारं करोतीति[२] । तत आकुलमनाः कष्टेन स्वप्तुं लभते। ततः श्वशुरेण प्रयुक्ता तत्सखी-'भण मम वधूं यथा आनयामि युवानम्' । तया च सा प्रोक्ता सती प्राह-'स्वप्तुमपि मे न कालोऽस्ति, किमनया दुष्टजनोचितया कथया ?' इति पैशाचिकमाख्यानं श्रुत्वा कुलवध्वा गोपायनं च श्रुत्वा अतः संयमयोगैरात्मा निरन्तरं व्यावृत्तः[३] कार्य इत्युक्तम् ॥१२०॥

**(१२१) (वि०)** इत्थं च विहितक्रियानुष्ठानव्यग्रः सन् ऐहिकभोगकारणेषु भावयेद-

---

**स्वरूपं च श्रुत्वा संयमसाधनक्रियामार्गैरात्मा=जीवः सततं व्यापृतः=व्यग्रतरः करणीयः ॥१२०॥**

**(१२१) (अव०)–[१]विपरीतस्वभावाः, सम्पदां निचयाः सकलाः, पुत्रकलत्रादीनां**

**भोगसुखैः किमनित्यैर्भयबहुलैः काङ्क्षितैः परायत्तैः ? ।**
**नित्यमभयमात्मस्थं प्रशमसुखं तत्र यतितव्यम् ॥१२२॥**

---

नित्यतामित्याह—**क्षणविपरिणामधर्मा इत्यादि** । क्षणेन विपरिणामधर्माः । विशब्दः कुत्सायाम् । कुत्सितः [१]परिणामो धर्मः स्वभावः प्रीतिकारिणः सन्तोऽप्रीतिकारिणः परिणतिविशेषाज्जायन्ते । स्वल्पेनैव कालेनान्यस्वभावा भवन्ति । मरणधर्माणो मर्त्यास्तेषां ऋद्धिसमुदया [२]विभूतिसमुदयाः । धनधान्यहिरण्यसुवर्णादयः सर्वे दक्षिणोत्तर-[३]मथुरा-वासिवणिग्द्व[४]यविभूतिसमुदयवत्[५] । अन्यथात्वं च प्रतिपन्नाः शोकहेतवो नियमेन स्युः । संयोगाः पुत्रपत्नीप्रभृतयो विप्रयोगान्ता एव भवन्ति। न खलु कश्चित् संयोगोऽस्त्यात्यन्तिक इति भावयतोऽभिलाषस्तेषु न भवतीति ॥१२१॥

**(१२२) टीका—**तस्मान्न किञ्चिद्विषयसुखाभिलाषेणेति दर्शयन्नाह—**भोगसुखैः किमनित्यैरित्यादि** । भुज्यन्त इति भोगाः शब्दादयस्तज्जनितानि सुखानि भोगसुखानि । तानि चोक्तेन न्यायेनानित्यानि । किमिति क्षेपे । न किञ्चिदेभिरित्यभिप्रायः । भावयन् चौर-दायादाग्निभूपतिभ्यो नित्यमेवाशङ्कते । भोगसुखकारणेषु वृद्धिसमुदयेषु भयबहुलेषु [१]प्रभूत-भयेषु। काङ्क्षितैरित्यभिलषितैः । परायत्तैरिति शब्दादिविषयायत्तैर्मनोहारिषु शब्दादिषु सत्सु

---

नित्यतामित्याह—**क्षणेति** । क्षणेन-स्तोककालेनापि । विशब्दः कुत्सायाम् । विपरिणामः-कुत्सितपरिणतिर्धर्मः-स्वभावो येषां ते तथा, प्रीता अप्यप्रीता जायन्ते, स्तोककालेनान्यस्वभावा भवन्तीति भावना। केषाम् ?-मर्त्यानां-मनुष्याणाम् । क एवंविधा भवन्ति ?-ऋद्धिसमुदया-विभूतिनिचयाः सर्वे-अशेषाः । सर्वे च शोकजनकाः-शोकहेतवः । तथा संयोगाः-सम्बन्धाः पुत्रपत्नीप्रभृतिभिर्विप्रयोगान्ता-विरहान्ता भवन्तीति शेष इति ॥१२१॥

**(१२२) (वि०)** यस्मादेवं तस्मान्न किञ्चिद्विषयसुखाभिलाषेणेति दर्शयन्नाह—**भोगसुखैरिति** । भोगसुखैः-विषयसातैः किं ?, न किञ्चित् । कीदृशैः ?-पूर्वोक्तन्यायेन [१]अनित्यैः भयबहुलैः-भीतिप्रचुरैः, काङ्क्षितैः[२]-अभिलषितैः परायत्तैः-स्त्र्यादिपदार्थसार्थाधीनैः,

---

**संयोगा वियोगावसानाः ॥१२१॥**

**(१२२) (अव०)—[१]किं क्षेपे, अनित्यैः=अशाश्वतैः, अभिलषितैः, स्त्र्यादिशब्दादि विषयायत्तैः, नित्यमात्यन्तिकम्, व्यपगतरोगादिभयम्, आत्मस्थं स्वायत्तम्, तस्मिन् प्रशमसुखे यतनीयम् ॥१२२॥**

**यावत् स्वविषयलिप्सोरक्षसमूहस्य चेष्ट्यते तुष्टौ ।**
**तावत् तस्यैव जये वरतरमशठं कृतो यत्नः ॥१२३॥**

**यत् सर्वविषयकाङ्क्षोद्भवं सुखं प्राप्यते सरागेण ।**
**तदनन्तकोटिगुणितं मुधैव लभते विगतरागः ॥१२४॥**

---

सुखमुपजायते भोगवतामिति । तस्मात्तेष्वभिलाषमपहाय । नित्यमात्यन्तिकम् । अभयम-विद्यमानभीतिकम् । [२]आत्मस्थम् आत्मायत्तं न परायत्तम् । प्रशमसुखं मध्यस्थस्यारक्तद्विष्ट-स्योपशान्तकषायस्य यत्तदेवंविधं तत्रैव प्रयत्नः कार्य इति ॥१२२॥

**( १२३ ) टीका—**तच्च सुलभमेवेति दर्शयति—**यावत्स्वविषयलिप्सोरित्यादि** । अक्षसमूहस्येन्द्रियग्रामस्य । स्वविषयलिप्सोः शब्दादिविषयाभिलाषिणः शब्दादीन् स्वविषयान् लब्धुमिच्छतः । तुष्टौ प्रिये कर्तव्ये । यावत् चेष्ट्यते प्रयासः क्रियते तावत्तस्यैव जयेऽक्षसमूहस्याभिभवे निग्रहे नियमने । वरतरं शोभनतरं बहुगुणम् । अशठं मायारहितमृजुना[१] चित्तेन । यत्नः कृतः । वरतरमशठमिति क्रियाविशेषणम् । [२]यत्नः क्रियते तद्वरतरमशठं चेति ॥१२३॥

**( १२४ ) टीका—यत्सर्वविषयेत्यादि** । इतश्च प्रशमसुखं सुलभम् । यत्सुखं सकल-विषयसामग्र्यामाकाङ्क्षितायामवाप्तायामुद्भूतमुपजातं । सरागेण रागवता । भूयसायासेन

---

तस्मात्तेष्वभिलाषमपहाय नित्यम्–आत्यन्तिकमभयम्–अविद्यमानभीतिकमात्मस्थं–स्वायत्तम् । किमेवंविधमित्याह–प्रशमसुखं–उपशमसातं, यत्तदेवंविधं तत् तत्र यतितव्यं–तस्मिन् यत्नः कार्य इति ॥१२२॥

**( १२३ ) ( वि० )** तद्यत्नश्चेन्द्रियजययत्नेन भवतीति दर्शयति—**यावदिति** । अक्षसमूहस्य–इन्द्रियग्रामस्य स्वविषयलिप्सोः–शब्दादिगोचराभिलाषिणस्तुष्टौ–तोषे कर्तव्ये यावत् चेष्ट्यते–प्रयासः क्रियते तावत् तस्यैव जये–अक्षसमूहस्य निग्रहे वरतरं–शोभनतरम् अशठं–मायारहितं यथा भवत्येवं कृतो–विहितो यत्नः–आदर इति ॥१२३॥

**( १२४ ) ( वि० )** तथा प्रशमसुखं सुलभमित्याह–**यदिति** । [१]यत्सुखं प्राप्यते सरागेण । कीदृशं ?–सर्वविषयकाङ्क्षोद्भवं–समस्तशब्दाद्यभिलाषावाप्त्यु[२]त्पन्नं तदेव सुखमनन्ताभिः कोटिभिः–

---

**( १२३ )( अव० )—इन्द्रियग्रामस्य शब्दादि[१] गोचराभिलाषिणः, करणगणस्य प्रीतौ ॥१२३॥**

**( १२४ ) ( अव० )—[१]समस्तशब्दाद्यभिभालाषावाप्त्युत्पन्नं, रागवता भूयसायासेन यत्प्राप्यते, आयासेन विनैव तत् ॥१२४॥**

**इष्टवियोगप्रियसम्प्रयोगकाङ्क्षासमुद्भवं दुःखम् ।**
**प्राप्नोति यत्सरागो न संस्पृशति तद्विगतरागः ॥१२५॥**

**प्रशमितवेदकषायस्य हास्यरत्यरतिशोकनिभृतस्य ।**
**भयकुत्सानिरभिभवस्य यत्सुखं तत्कुतोऽन्येषाम् ? ॥१२६॥**

---

प्राप्यते । तदेव सुखमनन्ताभिः कोटीभिर्गुणितमभ्यस्तम् । मुधैव विना मूल्येनैव[१] विनायासेन । विगतरागः प्रशमसुखमवाप्नोतीति ॥१२४॥

**( १२५ ) टीका—इष्टवियोगेत्यादि** । इष्टस्य शब्दादेः पुत्रादेर्वा हिरण्यसुवर्णादेर्वा वियोगे । अनिष्टस्य चाप्रियस्य वा संयोगे । इष्टे तावदविप्रयोगाकाङ्क्षा । अनिष्टे च विप्रयोगाकाङ्क्षा । तस्याः काङ्क्षायाः समुद्भूतमुत्पन्नं यद्दुःखं । सरागो विषयसुखाभिलाषी । यत्प्राप्नोति । तद्दुःखं[१] विगतरागो न संस्पृशति नासादयति । विगतरागेण मध्यस्थेन [२]तन्न प्राप्यत इत्यर्थः ॥१२५॥

**( १२६ ) टीका—प्रशमितवेदकषायस्येत्यादि** ।[१] प्रशमिताः प्रशमं नीता वेदकषाया येन । [२]वेदः स्त्रीपुंनपुंसकाख्यः । कषायाः क्रोधादयः । वेदोदयात्पु[३]मानभिलषति स्त्रियं, स्त्री च [४]पुमांसमुभयं नपुंसकः, [५]तदुदयाच्चाप्राप्तौ दुःखम् । [६]शमितवेदस्य तन्न भवति । क्रोधाद्यग्न्या दीपितोऽपि दुःखभागेव जायते । शमितकषायस्य तु तदभावः । हास्यं हर्षाद्भवति । रतिः प्रीतिर्विषयेषु सक्तिः । अरतिरुद्वेगः । शोको मानसं दुःखं इष्टवियोगादौ । एतेषु हास्यादिषु मोहभेदेषु । निभृतः स्वस्थः । सत्यपि हास्यकारणे नास्ति हास्यं, न रतिः, नारतिः सत्स्वपि तत्कारणेषु [७]अनित्यताभावनातश्च शोकोऽपि नास्त्येव । [८]भयमिहपरलोकादानादि सप्तविधम् । कुत्सा जुगुप्सा निन्दा । साप्यनित्यभावनात एव निर्जिता । भयमपि सावष्टम्भादेव [९]भयकारणविगमाद्वा विजयते । एवं भयकुत्साभ्या[१०]मनभिभूतस्य । यत्सुखं

---

सङ्ख्याविशेषैर्गुणितम्–अभ्यस्तं मुधैव–मूल्येन विना लभते–प्राप्नोति, को ?–विगतराग इति ॥१२४॥

**( १२५ ) ( वि० )** तथा **इष्टेति** । इष्टस्य–वल्लभवस्तुनो वियोगो–वियोजनं अप्रियसम्प्रयोगः–अनिष्टप्राप्तिस्तयोः काङ्क्षा–चिन्ता तस्यां सकाशात् समुद्भवः–उत्पत्तिर्यस्य तत्तथा । तदेवंविधं किं ?–दुःखं प्राप्नोति–लभते यत् सरागो, न संस्पृशति वीतरागस्तदिति ॥१२५॥

**( १२६ ) ( वि० )** तथा **प्रशमितेति** । प्रशमिता वेदकषायाः पूर्वोक्तस्वरूपा यस्य जीवस्य स तथा तस्य, हास्यादिषु निभृतस्य–स्वस्थस्य, हास्यादिकारणेष्वपि तदकरणादित्यर्थः, भयकुत्साभ्यां–

---

**( १२६ ) ( अव० )—अकृतविकारस्य अनुपनिभृतस्येति वा पाठः, अनभिभूतस्य** ॥१२६॥

**सम्यग्दृष्टिर्ज्ञानी ध्यानतपोबलयुतोऽप्यनुपशान्तः ।**
**तं न लभते गुणं यं प्रशमगुणमुपाश्रितो लभते ॥१२७॥**

**नैवास्ति राजराजस्य तत्सुखं नैव देवराजस्य ।**
**यत्सुखमिहैव साधोर्लोकव्यापाररहितस्य ॥१२८॥**

---

प्रशान्तचेतसः । तत्कुतोऽन्येषां रागिणाम् ? इति ॥१२६॥

**( १२७ ) टीका—**पुनः प्रशमसुखस्यैवोत्कर्षं विषयसुखान्निदर्शयन्नाह—**सम्यग्दृष्टिरित्यादि** । शङ्कादिदोषरहित[1]सम्यग्दर्शनसम्पन्नः । यथासम्भवं च मत्यादिज्ञानेन युक्तः । शुभध्यानबलेन [2]तपोबलेन च युक्तोऽपि केवलमनुपशान्तः । अशमितवेदकषायोऽनुपशान्तः । [3]तं गुणं न लभते [4]नावाप्नोति । प्रशमगुणमुपाश्रितो यं गुणं लभते ज्ञानचारित्रोपचयलक्षणं निरुत्सुक[5]त्वगुणं वा[6] । न त्वनुपशान्तः तं गुणमवाप्नोतीति । तस्मात्प्रशमसुखायैव यतितव्यमिति ॥१२७॥

**( १२८ ) टीका—**भूयोऽपि प्रशमसुखोत्कर्षख्यापनायाह—**नैवास्ति राजराजस्येत्यादि** । राजराज[1]श्चक्रवर्ती वासुदेवादिर्वा । पूर्वः सकलभरतक्षेत्राधिपतिः, उत्तरोऽर्धभरताधिपतिः । मनुष्य[2]जन्मसुखस्य प्रकर्षवर्तिनावेतौ । [3]वासुदेवचक्रवर्तिनोरपि नास्ति तादृशं सुखं यादृशं प्रशमस्थितस्येति । तद्धि चक्रवर्त्यादिसुखं शब्दादिसमृद्धिजनितं तस्य चानित्यत्वं प्राक् प्रतिपादितम् । न चैकान्तेन सुखहेतुत्वं शब्दादीनां, विपरिणतिधर्मत्वात् । देवेन्द्रस्य सुखं प्रकृष्टं स्यादिति, तदपि चोपरितनेन्द्रसुखप्रकर्षदर्शनात्तदाकाङ्क्षिणः च्युतिचिन्तनाच्च दुःखव्यतिकीर्णमेव । अथवा देवराजः सर्वदेवोत्तमत्वादनुत्तरविमानवासी । तस्यापि यत् सुखं तदपि

---

भीतिजुगुप्साभ्यां निरभिभवस्य–अनभिभूतस्य यत् सुखं प्रशान्तचेतसस्तत् कुतोऽन्येषामिति ? ॥१२६॥

**( १२७ ) ( वि० )** पुनर्विषयसुखात् प्रशमसुखस्योत्कर्षं निदर्शयन्नाह—**सम्यग्दृष्टिरिति** । सम्यग्दृष्टिर्ज्ञानीति व्यक्तं, ध्यानतपोबलयुतोऽपि सन् प्राणी अनुपशान्तस्तं न लभते गुणं यं प्रशमगुणमुपाश्रितो लभते–प्राप्नोतीत्यतः प्रशमसुखायैव यतितव्यमिति ॥१२७॥

**( १२८ ) ( वि० )** भूयोऽप्यस्यैवोत्कर्षमाह—**नैवास्तीति** । स्पष्टमेव, किन्तु राजराजः–चक्री, देवराजः–शक्र इति ॥१२८॥

---

**( १२७ ) ( अव० )—अप्रशमितवेदकषायः ॥१२७॥**

**( १२८ )( अव० )—[1]चक्रवर्त्यादिः, शक्रस्यानुत्तरदेवस्य वा, पुत्रकलत्रादिविमुक्तस्य ॥१२८॥**

**सन्त्यज्य लोकचिन्तामात्मपरिज्ञानचिन्तनेऽभिरतः ।**
**जितलोभरोषमदनः सुखमास्ते निर्ज्वरः साधुः ॥१२९॥**

---

स्थितिक्षयमनुष्ययोषिदुदरगर्तनिमज्जनं[४] च दुःखमनुचिन्तयतस्तस्यापि न [५]तत्सुखमस्ति दुःखलेशा[६]कलङ्कितं, यदिहैव सुखं साधोर्मनुष्यजन्मनि प्रशमस्थितस्य विनिवृत्तसकला-काङ्क्षस्यात्महितगवेषिणो विशिष्टज्ञानसमन्वितस्य [७]लोकव्यापारः कृष्यादिप्रवृत्तिः काम-भोगसाधनोपादित्सा, एवंविधेन व्यापारेण रहितस्य । प्रशमसुख एव व्यवस्थापितचेतो-[८]वृत्तेर्यत्सुखं न तद्राजराजस्य[९] इति ॥१२८॥

**( १२९ ) टीका—**प्रशमसुखमेव पुनः स्पष्टयति—**सन्त्यज्य लोकेत्यादि** । लोकः स्वजनः परजनश्च तद्विषया या चिन्ता दारिद्र्यदौर्भाग्यादिलक्षणा । अकृतपुण्यानां च परलोके दुर्गतिप्राप्तिलक्षणा तां परित्यज्य विहाय । आत्मनः परिज्ञानम् 'अनादौ संसारेऽयमात्मा शारीराणि मानसानि च दुःखान्यनुभवन्नतृप्तः कामभोगसुखेषु कथमपि मनुष्यजन्मासा-दितवान् बोधिं च, तदधुना यथा संसारे बहुदुःखसङ्कटे न भ्रमति, तथा प्रयत्न कार्यो मया' इति आत्मपरिज्ञानचिन्तन एवाभिरतः परकार्यविमुखः । जिताः परिभूता रोषलोभमदना[१] येन । रोषग्रहणाद् द्वेषः, लोभग्रहणाद्रागः, मदनग्रहणात्पुरुषवेदादिः । एतज्जयाच्च सुखमास्ते स्वस्थस्तिष्ठत्युपद्रवरहितः[२] । ज्वरो रोगविशेषस्तेन ग्रस्तः परितापशिशिरलक्षणेन रतिमविन्दन् दुःखमास्ते । स एवंविधो निर्गतोऽपेतो ज्वरो यस्मात्स निर्ज्वरः । ज्वर इव ज्वरः रोषलोभमदनाख्यः । मोक्षसाधनाभ्युद्यतः साधुरिति ॥१२९॥

---

**( १२९ ) ( वि० )** [१]इदमेव पुनः स्पष्टयति—**सन्त्यज्येति** । सन्त्यज्य-मुक्त्वा लोकचिन्तां-स्वजनादिजनस्मृतिं सुखमास्ते-स्वस्थस्तिष्ठति साधुरिति सम्बन्धः । कीदृशः ?-आत्म-परिज्ञानचिन्तनेऽभिरतः-परकार्यविमुखः, तथा जिताः-पराभूता रोषलोभमदना येन स तथा । अत एव निर्ज्वरः-अरोगाः, यतो रोषादयो ज्वर इव ज्वरस्तद्रहितत्वात्, यद्वा पाठान्तरे निर्गता जरा-हानिः, सा च प्रस्तावात् प्रशमामृतस्य यस्यासौ निर्जर इति ॥१२९॥

---

**[१]( १२९ ) ( अव० )—स्वजनादिस्मृतिः, आत्मपरिज्ञानं, परकार्यविमुखः, निर्गतो रोषादय एव ज्वरो यस्य स निर्ज्वरः, अथवा निर्जरः=निर्गताऽपेता जरा हानिः सा च प्रस्तावात्प्रशमामृतस्य यस्यासौ निर्जरः ॥१२९॥**

**या चेह लोकवार्ता शरीरवार्ता तपस्विनां या च ।**
**सद्धर्मचरणवार्तानिमित्तकं तद्द्वयमपीष्टम् ॥१३०॥**
**लोकः खल्वाधारः सर्वेषां [१]ब्रह्मचारिणां यस्मात् ।**
**तस्माल्लोकविरुद्धं धर्मविरुद्धं च सन्त्याज्यम् ॥१३१॥**

---

( १३० ) **टीका—सन्त्यज्य लोकचिन्ता**मित्युक्तं तत्कथं परित्यक्तलोकचिन्तस्य भरणपोषणादिवृत्तिरात्मनः स्यादित्याह—**या चेह लोकवार्तेत्यादि** । वर्तनं वृत्तिः भरण-पोषणादिका वृत्तिरेवंविधा एवंप्रकारा यस्यां विद्यते सा वार्ता कृषिपाशुपाल्यवाणिज्यादि लोकस्य वार्ता । तस्यां चिन्तनमेतावदेव लोकवार्तायामुचिते भिक्षाकाले स्वार्थमेवोप-साधिते[१]ऽशनादिषु हिण्डमानोऽकृताकारितानानुमतमशनादि यल्लभ्यते लोकवार्ता । [२]यस्तच्छरीर-वार्तायाः कारणं भवति साधूनां शरीरवृत्तेः शरीरस्थितेर्निमित्तं भवति तपस्विनाम् । तत्र येयं लोकवार्ता या च तपस्विनां शरीर[३]सन्धारणवार्ता, एतद्वार्ताद्वयमपि सद्धर्मचरणवार्तानिमित्त-कमिष्टम् । सद्धर्मो दशलक्षणकः क्षमादिः । चरणं मूलोत्तरगुणकलापः । सद्धर्मचरणवृत्तिः । सद्धर्मचरणवार्ता । सद्धर्मचरणवृत्तेरनन्तरं कारणं शरीरसन्धारणम् । शरीरसन्धारणवृत्तेश्च लोकवार्ता कारणम् । पारम्पर्येण सद्धर्मचरणवार्तायाः[४] कारणमिति ॥१३०॥

( १३१ ) **टीका—**अपि च लोकवार्तान्वेषणे प्रयोजनमिदमपरम्—**लोकः खल्वि-**

---

( १३० ) ( वि० ) अनन्तरं '**सन्त्यज्य लोकचिन्ता**'मित्युक्तं, तत् कथं परित्यक्तलोक-चिन्तस्य साधोराहारादिभिर्निर्वाहः ?, ततः कथं सद्धर्मचरणवृत्तिः स्यादित्याशङ्क्याह—**येति** । या काचित्, चकारौ परस्परं समुच्चयार्थौ, इहलोकवार्ता–कृष्यादिभिर्लोकनिर्वाहः, इह वर्तनं वृत्तिः सैव स्वार्थिकाणप्रत्ययाद्वार्ता । तथा या च शरीरवार्ता–देहसन्धारणं । केषां ?–तपस्विनां–साधूनाम्, एतद् द्वयमपि सद्धर्मचरणवार्तानिमित्तकं–शोभनक्षान्त्यादिधर्मव्रतादिनिर्वाहहेतुकम् । समासस्तु सती च ते धर्मचरणे च सद्धर्मचरणे तयोर्वार्ता सद्धर्मचरणवार्ता तस्या निमित्तं तत्तथा, तदिष्टम्–अभिमतमिति ॥१३०॥

( १३१ ) ( वि० ) अपि च–लोकवार्ताऽन्वेषणाप्रयोजनमिदमपरम्—**लोक इति** । लोकः

---

**( १३० ) ( अव० )—कृषिवाणिज्यादिचिन्तनं=लोकवार्ता, धर्मनिर्वाहपृच्छा=शरीरनिर्वाह[१] पृच्छा चिन्ता, शोभनं[२] क्षान्त्यादिसद्धर्मचरणवार्तार्थं[३] एतदद्वयमपीष्टं[४] लोकवार्ता तच्छरीरवार्तायाः कारणम् ॥१३०॥**

**( १३१ ) ( अव० )—आधार आश्रयो वर्तत इति शेषः । धर्मचारिणां=संयमिनां लोके [१]विरुद्धं जातमृतसूतकनिराकृतगृहगमनादि । मधुमांसादि[२] धर्मविरुद्धम् ॥१३१॥**

**देहो नासाधनको लोकाधीनानि साधनान्यस्य ।**
**सद्धर्मानुपरोधात्तस्माल्लोकोऽभिगमनीयः ॥१३२॥**

---

**त्यादि**। लोको जनपदः । खलुशब्दोऽवधारणे । लोक एवाधारः । सर्वेषां ब्रह्मचारिणां यस्मात्। ब्रह्मसंयमः सप्तदशभेदः । तद्योगात् संयमिनः । तेषां सर्वेषामिति गच्छवासिनां [१]गच्छविनिर्गतानां च । तस्माल्लोके यद्विरुद्धं जातमृतकसूतकसमूहनिराकृतादिगृहेषु भिक्षादि-ग्रहणमभोज्येषु च परिहार्यम् । तथा [२]चार्षम्—

**जे जहिं दुगुंछिया खलु पव्वावणवसहिभत्तपाणेसु ।**
**जिणवयणे पडिकुट्ठा [३]वज्जेयव्वा पयत्तेण ॥१॥**
**(ये यत्र जुगुप्सिताः खलु प्रव्राजन-वसति-भक्त-पानेषु ।**
**जिनवचने प्रतिकृष्टा वर्जितव्याः प्रयत्नेन)**

यच्च [४]लोकैकदेशेऽविरुद्धं मद्यमांसलशुनबीजानन्तकायादि धर्मसाधनविरुद्धमनेकं तदपि परिहार्यमिति ॥१३१॥

**(१३२) टीका—**इतश्च लोकवार्तान्वेषणं श्रेयोहेतुरिति दर्शयति—**देहो नासाधनको इत्यादि ।** इति शरीरमाद्यं खलु [१]धर्मसाधनम् । तस्य च देहस्याहारोपधिशय्या[२] साधनं । साधनरहितस्य देहस्यासम्भव एव । तानि चास्य साधनानि [३]लोकाधीनानि लोकायत्तानि भवन्ति। अतः किं ?, सद्धर्मानुपरोधात् सद्धर्मस्य क्षमादेरविरोधात्, लोकोऽभिगमनीयः, लोकवार्तान्वेषणमेवमर्थं करणीयमिति ॥१३२॥

---

खलु–जनपद एवाधारः–आश्रयो, वर्तत इति शेषः, सर्वेषां धर्मचारिणां–संयमिनां यस्मात्कारणात् तस्मात्कारणात् लोके–पृथग्जनपदे विरुद्धं–जातमृतसूतकनिराकृतगृहेषु भिक्षाग्रहणमसङ्गतं तत्तथा । तथा धर्मविरुद्धं–मधुमांसादिग्रहणम् । चः समुच्चये । सन्त्याज्यं–परिहार्यमिति ॥१३१॥

**(१३२) (वि०)** अथ लोकानुवृत्तिमेव समर्थयते—**देह इति** । देहः–शरीरं [१]नासाधनकः, किन्तु ससाधन एव । लोकाधीनानि–जनायत्तानि साधनानि–आहारोपधिप्रभृतीन्यस्य–देहस्य, तत् किं ?–धर्मानुपरोधिनः[२]–सद्धर्मस्य–क्षमादेरविरोधाल्लोकोऽभिगमनीयः, धर्मविरुद्धत्यागेनानुवर्तनीय इति ॥१३२॥

---

**(१३२) (अव०)—देहः शरीरं नैव अन्नपानवसनादिभिर्विना यापयितुं शक्यः तान्यन्न-[१]पानासनादिसाधनानि लोकवशानि सद्धर्मस्य=क्षमादेरविरोधाद्धर्मविरुद्धत्यागेनानुवर्तनीयः ॥१३२॥**

**दोषेणानुपकारी भवति परो येन येन विद्वेष्टि[१] ।**
**स्वयमपि तद्दोषपदं सदा प्रयत्नेन परिहार्यम् ॥१३३॥**

**पिण्डैषणानिरुक्तः कल्प्याकल्प्यस्य यो विधिः सूत्रे ।**
**ग्रहणोपभोगनियतस्य तेन नैवामयभयं स्यात् ॥१३४॥**

---

**( १३३ ) टीका**—पर एवोपदेष्टा भवति गुणदोषयोरित्याह-**दोषेणानुपकारीत्यादि** । येन येनाभ्यस्यमानेन कर्मणा परो[१] लोको विद्वेष्टि क्रुध्यति[२] । भवति चानुपकारी प्रत्युतापकारे वर्तते । स्वयमप्यात्मनापि तद्दोषपदं परिहार्यमप्रमत्तेन सता अन्यः कुर्वन् परस्य दृष्टः किञ्चिदप्रियकारणं[३], [४]तदवेक्ष्य स्वयमपि तद्दोषस्थानं परिहार्यं अनेनास्याप्रियं भवतीति सकलप्रमादरहितेन परित्यजनीयमिति ॥१३३॥

**( १३४ ) टीका**—यथैतत्परिहरणीयं तथेदमपीत्याह[१]—**पिण्डैषणेत्यादि** । पिण्डैषणाध्ययने निरुक्तो निश्चयेनाभिहितः । उद्गमोत्पादनैषणादोषरहितो यो विधिः । [२]सकल्पनीयाकल्पनीयो ग्राह्यत्याज्यलक्षणः । सूत्रे पारमर्षे आगमे । ग्रहणे नियतः[३] परिमितो ग्राह्यः । [४]यथैषणीयदोषो न भवति । उपभोगे च नियतः द्वात्रिंशतः कवलानां न्यूनानामेवाभ्यवहारः कार्यः । तथाप्यार्षे[५]-

**अद्धमसणस्स सव्वंजणस्स कुज्जा दवस्स दो भाए ।**
**वाउपवियारणट्ठा छब्भागं ऊणयं कुज्जा ॥१॥**
**( अर्द्धमशनस्य सव्यञ्जनस्य कुर्याद् द्रवस्य द्वौ भागौ ।**
**वायुप्रविचरणार्थं षड्भागं ऊनकं कुर्यात् ॥ )**

---

**( १३३ ) ( वि० )** लोकानुवर्तने उपायमाह—**दोषेणेति** । दोषेण-दूषणेन करणभूतेन उपकाररहितो भवति-जायते । क एवंविधो भवति ? परो-लोको येन येन दोषेणेति योगः । कीदृशः ?-विद्विष्टः-क्रुद्धः सन्, पर इति सम्बन्धः । स्वयं-आत्मनैव तद् दोषपदं-दूषणस्थानं सदैव प्रयत्नेन परिहार्यं-साधुना त्याज्यमिति ॥१३३॥

**( १३४ ) ( वि० ) 'तत्परिहार्य'**मित्युक्तं प्राक्, तद्विपक्षभूतस्य विधिविशेषमाह—**पिण्डैषणेति** । पिण्डस्यैषणा-गवेषणादिरूपा सा पिण्डैषणा, तत्प्रतिपादकत्वेनोपचारात्

---

**( १३३ ) ( अव० )—दोषेणापकर्ता[१] भवति प्रत्युतापकारेण प्रवर्तते । परो=लोकः क्रुध्यति आत्मना ॥१३३॥**

**( १३४ ) ( अव० )—पिण्डैषणाध्ययनभणितो निश्चयेन, कल्प्यो=ग्राह्योऽकल्प्यः[१]=तन्निषिद्धः परिहार्यः । [२]आदानासेवनयोर्नियतवृत्तेः । तेन=विधिगृहीताहारेण [३]रजसरोगाणां भयं न भवति ॥१३४॥**

**व्रणलेपाक्षोपाङ्गवदसङ्गयोगभरमात्रयात्रार्थम् ।**
**पन्नग इवाभ्यवहरेदाहारं पुत्रपलवच्च ॥१३५॥**

---

इत्थं च ग्रहणोपभोगनियतस्य कल्पनीयस्य तेन विधिना अभ्यवह्रियमाणस्य । न जातुचिदामयभयमजीर्णजनितव्याधिभयं भवेत् । एवं च मान्द्यादिदोषाधिकरणपरिहारः । धर्म्यासु च क्रियासु प्रवृत्तेरपरिहाणिः । तस्मादकल्प्यपरिहारेणापरिमितानियतभोगत्यागेन च भुञ्जानस्य न किञ्चिद्दुष्यतीति ॥१३४॥

**( १३५ ) टीका—**एतदेव स्पष्टयन्नाह**—व्रणलेपाक्षेत्यादि** । व्रणलेपवत् अक्षोपाङ्गवच्चेति दृष्टान्तद्वयम् । व्रणलेपस्तावानेव देयो यावता पूयादिनिर्हरण[1]संरोहणे भवतः, अतोऽतिमात्रयाऽकिञ्चित्करमेव लेपदानम् । अक्षस्योपाङ्गोऽभ्यञ्जनं तच्च नवनीतादि[2] तावन्मात्रमेव दीयते यावता शकटं भारमुद्वहत्यनायासेन । न चास्तीति कृत्वा प्रकामं नवनीतादेरभ्यञ्जनस्य दानं निष्फलत्वात् । एवं साधुनापि क्षुद्व्रणसंरोहणायाहारलेपप्रदानमसङ्गयोगभरमात्रयात्रार्थं कार्यम् । सङ्गः[3] स्नेहः । योगा मनोवाक्कायाः । योगेषु शरीरादिषु लावण्यमृ[4]जाद्याशयपरिहारोऽसङ्गः । अतोऽसङ्गयोगः योगेष्वसङ्ग इत्यर्थः । योगानां भरः क्रियानुष्ठानं यावता क्रियासमर्थं शरीरादि भवति तावन्मात्रमेवाभ्यवहरति, नातिरिक्तम् । यात्रा दशविधचक्रवालसामाचारी स्वाध्यायभिक्षाचङ्क्रमणादिका च यात्रा तदर्थम् । यथाह—

**तं पि ण रूवरसत्थं भुंजंताणं न चेव दप्पत्थं ।**
**धम्मधुरावहणत्थं अक्खोवंगो व जत्तत्थं ॥१॥**
**( तदपि न रूपरसार्थं भुञ्जानानां न चैव दर्पार्थम् ।**
**धर्मधुरावहनार्थं अक्षोपाङ्ग इव यात्रार्थम् ॥ )**

---

पिण्डैषणाध्ययनमुच्यते, तत्र निरुक्तो–निश्चयेन भणितः स तथा, को ?–विधिरिति योगः । कस्य ?–कल्प्यः–ग्राह्यः अकल्प्यः–परिहार्यः समाहारात्तस्य पिण्डस्येति सामर्थ्यगम्यम् । यः कश्चिद्विधिः–उपभोगानुपभोगात्मकः सूत्रे–सिद्धान्ते, तेन–विधिना ग्रहणोपभोगयोः–आदाना[1]सेवनयोर्नियतः–परिमितवृत्तिः स तथा तस्य, नियतग्रहणस्य नियतोपभोगस्य च सतः साधोरित्यर्थः । किमित्याह–नैवामयभयं स्यात्–न रोगभीतिर्भवेदिति ॥१३४॥

**( १३५ ) ( वि० )** अनन्तरोक्तं पिण्डाभ्यवहारं दृष्टान्तचतुष्केण स्पष्टयन्नाह**—व्रणेति** । व्रणे–गण्डे लेपः स तथा, अक्षस्य–धुरः उपाङ्गं–म्रक्षणादिखरण्टनं तत्तथा, ततो द्वन्द्वः, ते इव तद्वद्,

---

**( १३५ ) ( अव० )—व्रणे गण्डलेपः, अक्षस्य धुरः उपाङ्गं तद्वत्, अभ्यवहरेद्=आहरेदित्यत्रापि योज्यम् । असङ्गाः=मनोवाक्कायेष्वसङ्गाः साधवस्तेषां योगाः=क्रियानुष्ठानं तेषां भरः=सङ्घातः, स एव तन्मात्रं तस्य यात्रा तदर्थं=तन्निमित्तं धर्मानुष्ठाननिर्वाहार्थमिति । तथा पन्नगोऽहिः यथा चर्वणं नाचरति**

**गुणवदमूर्च्छितमनसा तद्विपरीतमपि चाप्रदुष्टेन ।**
**दारूपमधृतिना भवति कल्प्यमास्वाद्यमास्वाद्यम् ॥१३६॥**

---

भोजनैषणामधिकृत्याह–**पन्नग इवाभ्यवहरेत्** । सर्पो हि भक्ष्यं [५]ग्रसित्वा न चर्वणमाचरति ग्रसत एव गिलत्येव, तथा साधुरपि भुञ्जानो न चर्वणं करोति । तथा [६]चार्षे

**[७]नो वामाओ दाहिणं हणुअं संचारिज्जा, दाहिणाओ वामं संचारिज्जा ।**
**( न वामाद् दक्षिणं हनुकं सञ्चारयेत्, दक्षिणाद् न वामं सञ्चारेयत् ।)**

इत्यादि । [८]पुत्रपलवच्च पलं मांसं पुत्रमांसमित्यर्थः, पुत्रशब्दो[९]ऽपत्यवचनः । चिलातपुत्रव्यापादितदुहितृमांसास्वादनवदिति । अयमभिप्रायः–पितुर्भ्रातुर्वा भक्षयतस्तन्मांसं न तत्रास्ति रसगाद्धर्यं, शरीररक्षणार्थमेव केवलं ताभ्यामास्वादितं, न रसार्थं दर्पार्थं वा मांसोपभोगः[१०] कृतस्तथा साधुना रसेष्वगृद्धेन [११]दर्पादिवर्जितेन यथालब्धमेषणीयं भोक्तव्यमिति ॥१३५॥

**( १३६ ) टीका–**पुनरभ्यवहार्यमेव[१] विशिनष्टि–**गुणवदमूर्च्छितेत्यादि** । [२]गुणवदिष्टरस गन्धमूर्च्छितं रागयुक्तं च चेतो यस्य स मूर्छितमनाः । न मूर्छितमना अमूर्छितमनाः । [३]तेन अमूर्छितमनसा भक्ष्यमास्वाद्यं भोज्यमिति । तद्विपरीतमित्यमनोज्ञमनिष्टरसगन्धम् । [४]तदप्यप्रदुष्टे–

---

व्रणलेपवदक्षोपाङ्गवच्चेत्यर्थः । अभ्यवहरेद् आहारमित्यस्यात्रापि योगः । किमर्थमित्याह–असङ्गा–साधवस्तेषां योगाः–[१]संयमव्यापाराः तेषां भरः–सङ्घातः स एव तन्मात्रं तस्य यात्रा–निर्वाहस्तदर्थं तत्तथा, धर्मानुष्ठाननिर्वाहार्थमिति [२]निष्कषः, इदं निमित्तपदमग्रेतन[३]दृष्टान्तद्वयेऽपि योज्यम् । तथा पन्नग इव–सर्पवदभ्यवहरेद्–भुञ्जीताहारं–पिण्डम्, यथा हि पन्नगो भक्ष्यं तृप्त्यर्थं रसमगृह्णन् ग्रसते, न चर्वति, एवं साधुरपि । तथा पुत्रशब्दोऽपत्यपर्यायः, पुत्रस्य पलं–मांसं तदिव पुत्रिकाया वा, [४]तद्वद्, भावना पूर्ववद् । दृष्टान्तस्तु[५] चिलातिपुत्रव्यापादितदुहितृमांसं, यथा हि पितुभ्रातॄणां च भक्षयतां तन्मांसं न तत्रास्ति रसगार्ध्यं, किन्तु शरीरधारणार्थमेव, एवं साधुनाऽपि रसेष्वगृद्धेनाप्यभ्यवहार्यमन्नमिति ॥१३५॥

**( १३६ ) ( वि० )** पुनरेनमेवार्थं सविशेषमाह–**गुणवदिति** । अत्रास्वाद्यशब्दद्वयं विद्यते,

---

**एवम् । तथा चिलातिपुत्रमारितधनश्रेष्ठिसुतामांसास्वादकपितृपुत्रादिवद्वा । यथा तैः शरीरस्य धारणार्थमेव तस्या मांसमास्वादितं तथा साधुरप्यभ्यवहरेत् कटुतिक्तमधुरादिस्वादमादत्ते ॥१३५॥**

**( १३६ ) ( अव० )–विशिष्टतरास्वादं अगृद्धचित्तेन साधुनेति प्रक्रमः । [१]तद्विपरीतमप्यविद्य–मानाविशिष्टास्वादमपि=स्वादरहितमिति, मनसा । द्वेषरहितेन यथा वृको सरसं विरसं वा न विलोकयति तदवगाहमानोऽपि, तद्वत्साधुनापि दारूपमधृतिना= दारुतुल्यसमाधिना आस्वाद्यं=वस्तु आस्वाद्यं=क्रिया आस्वादनीयम् ॥१३६॥**

**कालं क्षेत्रं मात्रां स्वात्म्यं द्रव्यगुरुलाघवं स्वबलम् ।**
**ज्ञात्वा योऽभ्यवहार्यं भुङ्क्ते किं भेषजैस्तस्य ॥१३७॥**

---

नाद्विष्टेन द्वेषरहितेनेत्यर्थः । यात्रासाधनमात्रमालम्बनमधिकृत्य[५] यत्किञ्चिदेषणीयमरक्तद्विष्टेन चित्तेनाभ्यवहरेत् । दारूपमा धृतिर्यस्याविकारिणी । काष्ठं हि वास्यादिभिस्तक्ष्यमाणं न द्वेषं भजते, नापि [६]च चन्दनपुष्पादिभिः[८] पूज्यमानं रागमुद्वहति । यथा तदचेतनं रागद्वेषरहितं, तद्वत् साधुनापि[७] सत्यपि चेतनावत्त्वे इष्टानिष्टान्नपानलाभे सति भोक्तव्यम् । अरक्तद्विष्टेन कल्पनीयमास्वाद्यं भक्षणीयम् । पुनरास्वाद्यमिति भोक्तव्यमित्यर्थः । तच्च भोजनं कालाद्यपेक्षमभ्यवह्रियमाणं नाजीर्णादिदोषकारि [९]भवतीति ॥१३६॥

**( १३७ ) टीका—कालं क्षेत्रंमित्यादि** । भोक्त्रा कालोऽपेक्षणीयः ग्री[१]ष्मवर्षा-शिशिरभेदः । ग्रीष्मे बहुपानकं पातव्यमतः स्वल्पतरं भुङ्क्ते येन [२]भुक्तं च पानं वाऽक्लेशेनैव [३]जीर्यति । तथा वर्षासु साधारणं भक्तं पानं च यथोदरषड्भाग ऊनो भवति तथा भुङ्क्ते । शिशिरे [४]च बहुतरं चान्नमेव भुङ्क्ते स्वल्पतरमुदकमापिबति । तथा [५]क्षेत्रापेक्षं, रूक्षं स्निग्धं शिशिरे च त्रिधा क्षेत्रं। तत्र रूक्षे सुराष्ट्रादौ [६]बहुभक्तभोजी भवति [७]उनोदरषड्भागमात्रः । स्निग्धे जलबहुलविषये मात्रयाऽभ्यवहारं करोति यथा सुजरं भवति । तथा शिशिरक्षेत्रे शीतबहुले काश्मीरादौ अन्नपरिपाकः सुखो भवति यथा तथाऽभ्यवहर्तव्यम् । मात्रा

---

तत्रैकस्याशनादि वाच्यं अपरस्य तु अभ्यवहरणक्रिया । ततश्चैवं योज्यते-भवति-जायते, किं तद् ?-आस्वाद्यं-भोक्तव्यं, किम् ?-आस्वाद्यम्-अशनादिकं, अत्र द्वावपि कर्मसाधनावास्वाद्यशब्दा-वित्यर्थः। कीदृशम् ?-गुणवत्-स्वादुगुणोपेतं, तथा कल्प्यं-कल्पनीयम् । केनात आह-अमूर्च्छितमनसा-अमृदुचित्तेन, साधुनेति प्रक्रमः । तथा तद्विपरीतमपि च-अन्यथाभूतम्-अगुणवदपि च अविद्यमानास्वादं कल्प्यं-शुद्धं इदं चाप्रदुष्टेन-साधुना द्वेषरहितेन। पुनः कीदृशेन ?-दारुणा-काष्ठेनोपमा-उपमानं सर्वत्रैकस्वभावतातुल्यता यस्यां सा तथा, सा धृतिर्यस्य स तथा तेन, दारुकमचेतनत्वाच्चन्दनादिभिः अभ्यर्च्यमानं न रागं न तु वास्यादिभिस्तक्ष्यमाणं द्वेषं करोति, किं तर्हि ?-एकस्वरूपमेव तिष्ठति, एवं साधुरपि शुभाशुभाहारविषये रागद्वेषं न यायादिति ॥१३६॥

**( १३७ ) ( वि० )** तत्र भोजनं कालाद्यपेक्षमभ्यवह्रियमाणं नाजीर्णादिदोषकरं [१]स्यादित्येतदाह—**कालमिति** । कालं-ग्रीष्मादिकं दुर्भिक्षादिकं वा, तथा[२] क्षेत्रं-रूक्षादिकं तथा मात्रां-

---

**( १३७ ) ( अव० )—कालमुष्णकालादि स्निग्धेतरादि च क्षेत्रं सुभिक्षादिकं च । मात्रामल्पादिरूपां,[१] सात्म्यं यद्यस्योपभुक्तं परिणतिमेति । [२]तथा द्रव्याणां=घृतगुडादीनां गुरुत्वं लघुत्वं च[३] । यद्वा येन द्रव्येणोपभुक्तेन गुणानां [४]ज्ञानादीनां गौरवं [५]दोषाणां प्रमादादीनां लाघवं चात्मनः स्यात् तद् भोज्यं=वस्तु ॥१३७॥**

**पिण्डः शय्या वस्त्रैषणादि पात्रैषणादि यच्चान्यत् ।**
**कल्प्याकल्प्यं सद्धर्मदेहरक्षानिमित्तोक्तम् ॥१३८॥**

निजाग्निबलापेक्षा प्रमाणयुक्तोऽप्याहारः कस्यचिन्न क्षमते, अतस्तादृशी मात्रा कर्तव्या या सुजरा भवति । सात्म्येति स्वभावः कस्यचिदत्यन्तस्निग्ध एवाहारः सुखं परिणमते, कस्यचिद्रूक्षः कस्यचिन्मध्यः । विरुद्धद्रव्यसम्पर्कोऽपि कस्यचित्सुखावहः । सात्म्यस्यानेकप्रकारत्वात् । द्रव्यं माहिषं दधि क्षीरं वा गुरु, [८]लघु तु गव्यं दधि पयो वा [९]एवमन्येषामपि द्रव्याणां गौरवं लाघवं खण्डखाद्यदध्योदनादीनां विज्ञाय स्वबलं च वातप्रकोपादिव्याधिदूषितमदूषितं च ज्ञात्वा योऽभ्यवहारमन्नादि भुङ्क्ते, किं भेषजैस्तस्येति ?, न किञ्चिदौषधैस्तस्य प्रयोजनम् । अनवकाशानि हि तत्र भैषजानीत्यर्थः ॥१३७॥[१]

**( १३८ ) टीका—**ननु पिण्डप्रतिश्रयवस्त्रपात्रादि परिगृह्णन् कथमकिञ्चनः [२]साधुरपरिग्रहो भवेदित्याह**—पिण्डः शय्येत्यादि** । पिण्ड इत्याहारश्चतुर्विधः [३]अशनीयः । शय्या प्रतिश्रयः । वस्त्रं पात्रबन्ध-चोलपट्टक-मुखवस्त्रिकादि । आदिग्रहणाद्वस्त्रग्रहणे यो विधिरुक्तः [४]स सर्वः परिगृह्यते । [५]पात्रग्रहणात् प्रतिग्रहकमात्रकग्रहणम् । इहाप्यादिग्रहणात् पात्रैषणाविधौ यो विधिरुक्तस्तस्यापि ग्रहणम्[६] । यच्चान्यदित्यौपग्रहिकं दण्डकादि सङ्गृहीतं कल्पनीयं तावदुत्सर्गतः सद्धर्मदेहरक्षानिमित्तम् । देहः शरीरम् । सद्धर्मो दशलक्षणकः क्षमादिः । शरीररक्षणे सति सद्धर्मरक्षणं, तन्मूलत्वाद्धर्मानुष्ठानस्य । शरीरकं हि संयमानुष्ठानार्थं [७]पोष्यते, क्षमादेर्धर्मस्याधारस्तदिति । कल्पनीयस्य [८]चालाभे लघुतरदोषासेवनं प्राग्वदाधाकर्मग्रहणम् । एवं शय्यावस्त्रपात्रदण्डकादिष्वपि योज्यम् । सर्वे च विषयाः सापवादा मैथुनवर्जम् । एवं [९]सद्धर्म रक्षार्थं च सर्वमुक्तम् । न चासौ परिग्रहः तत्रामूर्च्छितत्वात्, **'मूर्च्छा परिग्रह'** इति

---

स्वकीयमाहार [गमन][३]प्रमाणं स्वात्म्यं-यद्यस्य प्रियं पथ्यं च, द्रव्यं माहिषं दधि[४] गुरु, गव्यादि दधि क्षीरं लघु । इह समासः कार्यः[५] । तत् तथा स्वबलं-निजसामर्थ्यं ज्ञात्वा-बुद्ध्वा तत् तथा योऽभ्यवहार्यम्-अन्नादि भुङ्क्ते किं भेषजैस्तस्येति ? ॥१३७॥

**( १३८ ) ( वि० )** एवं पिण्डशय्यादिग्रहणे कथं निष्परिग्रहता स्यादित्याशङ्क्याह**—पिण्ड इति** । पिण्डादि प्रसिद्धम् **'पिण्डं[१] सेज्जं च वत्थं च, चउत्थं पायमेव य' ( पिण्डः शय्या च वस्त्रं च, चतुर्थं पात्रमेव च ।)** इति (दशवैकालिकम्-६.४८) । यच्चान्यत्-औपग्रहिकं दण्डकादि उत्सर्गतः कल्प्यं-कल्पनीयं अपवादतो गाढालम्बनेनाकल्प्यमपि ग्राह्यम् । किमर्थमित्याह-सन्-शोभनो धर्मो यस्य स

---

**( १३८ ) ( अव० )—अन्यदौपग्रहिकं दण्डकादि [१]उत्सर्गतोऽग्राह्यम्, कल्प्यं=कल्पनीयं, अपवादतो गाढालम्बनेन अकल्प्यमपि ग्राह्यं, लघुतरदोषासेवनं सद्धर्मदेहरक्षानिमित्तं कारणं तेनोक्तम् ॥१३८॥**

**कल्प्याकल्प्यविधिज्ञः संविग्नसहायको विनीतात्मा ।**
**दोषमलिनेऽपि लोके प्रविहरति मुनिर्निरुपलेपः ॥१३९॥**
**यद्वत्पङ्काधारमपि पङ्कजं नोपलिप्यते तेन ।**
**धर्मोपकरणधृतवपुरपि साधुरलेपकस्तद्वत् ॥१४०॥**

---

लक्षणादिति (तत्त्वार्थसूत्रम्-७.१२) ॥१३८॥

**( १३९ ) टीका—**एवमुक्ता निष्परिग्रहता, सैव च पुनः [१]स्पष्टीक्रियते—**कल्प्याकल्प्येत्यादि** । कल्पनीयं कल्प्यमुद्गमादिशुद्धं आहारोपधिशय्यादि, उद्गमादिदुष्टं वा अकल्पनीयं तस्य विधिर्विधानं ''**कल्पनीयेन शरीरकधारणं कुर्यात् [२]असति [अ] कल्पनीयेनाप्यशठे- न सता कार्यं यत्नवता प्रावचनेन मार्गेणेत्येष विधिः**'' तं जानातीति कल्प्याकल्प-विधिज्ञः । संविग्नसहायकः संविग्नाः संसारभीरवो ज्ञानक्रियायुक्ताः, एवंविधाः सहाया यस्य स संविग्नसहायकः । [३]असहायः सुसहायो वा । विनीतात्मेति विशेषेण नीत आत्मा ज्ञानदर्शनचारित्रोपचारविनयवश्यतां विनीतात्मा । एवंविधः साधुर्दोषमलिनेऽपि लोके मूर्च्छामलिनेऽपि मनुष्यलोके । रागद्वेषौ वा [४]दोषौ ताभ्यामयं मलिनो दूषितः सर्वो लोकः । एवंविध[५]सकललोकमध्यवर्त्यपि प्रकर्षेण विविधमनेकप्रकारं रजो हरति प्रविहरति मुनिः । [६]निरुपलेपो रागद्वेषाभ्यामस्पृष्टः । सर्वधनविनाशकारिणा वा लोभेन मूर्च्छालक्षणेनाग्रस्तो निरुपलेप इति । [७]कर्माबन्धात् पूर्वबद्धमोक्षणाय प्रवर्तत इति ॥१३९॥

**( १४० ) टीका—**कथं पुनर्दोषवल्लोकान्तःपाती तत्कृतसंसर्गो दोषैर्न लिप्यते ?

---

तथा स चासौ देहश्च तस्य रक्षा तस्या निमित्तं-कारणं तेनोक्तं-भणितं, न चैतत्परिग्रहः तत्रामूर्च्छितत्वादिति ॥१३८॥

**( १३९ ) ( वि० )** एषैव निष्परिग्रहता स्पष्टीक्रियते—**कल्प्येति** । कल्प्याकल्प्यं-शुद्धाशुद्धं पिण्डादि तस्य विधिः-विधानं तं जानाति कल्प्याकल्प्यविधिज्ञः, तथा संविग्नाः-सद्धर्माणः सहाया यस्य स तथा । तथा विनीतात्मा-स्वभावविनीतः । दोषमलिनेऽपि-दूषणदूषितेऽपि लोके-जने प्रविहरति-आस्ते मुनिः-साधुर्निरुपलेपो-रागादिविरहित इति ॥१३९॥

**( १४० ) ( वि० )** कथं पुनर्दोषवल्लोकान्तःपाती दोषैर्न लिप्यत इत्याह—**यद्वदिति** । यद्वद्-

---

**( १३९ ) ( अव० )—[१]कल्प्याकल्प्यस्य शुद्ध्यशुद्धिविधिं जानातीति कल्प्याकल्प्य-विधिज्ञः । संविग्ना=ज्ञानक्रियायुक्ताः सहाया यस्य [२]स्वभावेन विनीतः । दूषणदूषितेऽपि[३] विचरति, निरुपलेपो रागादिरहितः ॥१३९॥**

**( १४० ) ( अव० )—[१]कर्दमाधारेऽपि स्थितम्, पङ्केन, तथा धर्मोपकरणं वस्त्रपात्रादि, तेन धृतं वपुरस्य । अलेपको लोभेन न स्पृश्यते मुनिः ॥१४०॥**

**यद्वत्तुरगः सत्स्वप्याभरणविभूषणेष्वनभिसक्तः ।**
**तद्वदुपग्रहवानपि न सङ्गमुपयाति निर्ग्रन्थः ॥१४१॥**
**ग्रन्थः कर्माष्टविधं मिथ्यात्वाविरतिदुष्टयोगाश्च ।**
**तज्जयहेतोरशठं संयतते यः स निर्ग्रन्थः ॥१४२॥**

---

इत्याह—**यद्वत्पङ्काधारेत्यादि**। यद्वदिति दृष्टान्तोपन्यासः[१] । यथा पङ्काधारं पङ्कमध्यादुत्पन्नं पङ्कमध्यस्थितं वा। पङ्कजं नलिनम्। नोपलिप्यते न स्पृश्यते कर्दमेन। धर्मोपकरणधृतवपुरपि [२]साधुरलेपकस्तद्वद् धर्मार्थमुपकरणं धर्मोपकरणं रजोहरण-मुखवस्त्रिका-चोपलट्टक-कल्पादिकं तेन धृतवपुरपि कृतशरीरसंरक्षोऽपि । स्वव्यतिरिक्तजीवकायकृतसंरक्षणश्च साधुरलेपक एव लोभदोषेण न स्पृश्यते, शुद्धाशयत्वादमूर्च्छितत्वादित्यर्थः ॥१४०॥

**(१४१) टीका—**तथापरोऽपि दृष्टान्तः—**यद्वत्तुरग इत्यादि**। यथा तुरगः सत्स्वपि विभूषणेषु [१]वालव्यजनादिष्वश्वमण्डनकेषु [२]चाऽनभिसक्तः अमूर्च्छितः अकृतगार्द्ध्यः। न तेन परिग्रहेणासौ परिग्रहवान्। तद्वदिति दृष्टान्तेन [३]समीकरोति दार्ष्टान्तिकमर्थम्। तद्वदुपग्रहवानपि धर्मायोप-करणमुपग्रहः तद्वानपि धर्मोपकरणयुक्तोऽपीत्यर्थः। न सङ्गं स्नेहं मूर्च्छामुपयाति। अत एव च बाह्यग्रन्थाभावाद[४]भ्यन्तरलोभादिग्रन्थाभावाच्च निर्ग्रन्थ इति। निर्गतो ग्रन्थो निर्ग्रन्थः ॥१४१॥

**(१४२) टीका—**कः पुनरयं ग्रन्थ इत्याह—**ग्रन्थः कर्मेत्यादि**। ग्रथ्यते वेष्ट्यते [१]बध्यते येन स ग्रन्थः। तच्चाष्टप्रकारं कर्म ज्ञानावरणाद्यन्तरायपर्यवसानम्। मिथ्यात्वाविरतिदुष्टयोगाश्च

---

यथा पङ्काधारं-कर्दममध्यादुत्पन्नमपि पङ्कजं-पद्मं नोपलिप्यते-न स्पृश्यते तेन-कर्दमेन । दार्ष्टान्तिकमाह-धर्मोपकरणेन-वस्त्रपात्रादिना धृतं वपुर्यस्य स तथा साधुरलेपकः तद्वत् तथा। लोभेन न स्पृश्यते शुद्धाशयत्वादिति ॥१४०॥

**(१४१) (वि०)** तथा अपरोऽपि दृष्टान्तः—**यद्वदिति** । यद्वत्-यथा तुरगो-घोटकः सत्स्वपि-विद्यमानेष्वप्याभरणविभूषणेषु-[१]वालव्यजनादिष्वश्वमण्डनेषु अनभिषक्तः-अमूर्च्छितः, तद्वदिति दृष्टान्तः, उपग्रहवानपि-धर्मोपकरणयुक्तोऽपि न सङ्गमुपयाति-न स्नेहमुपगच्छति निर्ग्रन्थो-वक्ष्यमाणपरिग्रहरहित इति ॥१४१॥

**(१४२) (वि०)** कः पुनरयं ग्रन्थ इत्याह—**ग्रन्थ इति** । ग्रथ्यते-वेष्ट्यते येन स ग्रन्थः सोऽष्टविधं कर्म मिथ्यात्वाविरतियोगाश्च पूर्वोक्ताः, तज्जयहेतोः-कर्मादिनिराकरणनिमित्तमशठं-

---

**(१४१) (अव०)—अकृतगार्द्ध्यः धर्मोपकरणयुक्तोऽपि न स्नेहमुपगच्छति निर्ग्रन्थो=वक्ष्यमाणबाह्याभ्यान्तरपरिग्रहरहित इति ॥१४१॥**

**(१४२) (अव०)—ग्रन्थोऽष्ट[१]प्रकारं कर्म, सम्यक्त्वाद्विपरीतं, प्राणातिपातादिभ्योऽनिवृत्तिः अशुभमनोवाक्कायाः, अशठं=मायारहितं, [२]सम्यगुद्यच्छति ॥१४२॥**

**यज्ज्ञानशीलतपसामुपग्रहं निग्रहं च दोषाणाम् ।**
**कल्पयति निश्चये यत् तत् कल्प्यमकल्प्यमवशेषम् ॥१४३॥**
**यत्पुनरुपघातकरं सम्यक्त्वज्ञानशीलयोगानाम् ।**
**तत्कल्प्यमप्यकल्प्यं प्रवचनकुत्साकरं यच्च ॥१४४॥**

---

मिथ्यात्वं तत्त्वार्थाश्रद्धानं, अविरतिरनिवृत्तिः प्राणातिपातादिभ्यः, दुष्टयोगा मनोवाक्कायाः । मिथ्यात्वादयश्चाष्टविधस्य कर्मणो हेतव इति ग्रन्थशब्दवाच्याः । तेषां मिथ्यात्वादीनां जयेऽभिभवे निराकरणे । यतते मायादिशल्यरहितस्तज्जयहेतोस्ताञ्जेष्यामीति, सम्यगागमोक्तेन विधिना । स निर्ग्रन्थ इति । [२]एतेन मूलसङ्घादिदिगम्बराः प्रत्युक्ताः ॥१४२॥

**( १४३ ) टीका—**किं पुनः कल्प्यमकल्प्यं चेत्याह—**यज्ज्ञानशीलतपसामित्यादि** । यदिति यस्मात् । ज्ञानं श्रुतमागमः । शीलं मूलोत्तरगुणाः । तपोऽनशनादि द्वादशभेदम् । उपग्रहमुपोद्बलनं संवर्धनम् । **निग्रहं च दोषाणाम्** । दोषाः क्षुत्पिपासादयः शीतोष्णादयो वा रागद्वेषप्रभृतयो वा । तेषां निग्रहं [१]निवारणं करोति । कल्पयति समर्थमुपग्रहनिग्रहयोर्भवति । यद्वस्तु आहारोपधिशय्यादि । [२]निश्चयोऽपवादः । व्यवहारो विधिः । तत्कल्प्यम् । यस्मान्निश्चये व्यवहारे । ज्ञानादीनामुपग्रहकारि दोषाणां च निग्रहकारि यद्वस्तु तत् कल्पनीयम् । [३]अकल्पनीयम् अवशिष्टमिति ॥१४३॥

**( १४४ ) टीका—**[१]एनमेवार्थं स्पष्टयति—**यत्पुनरुपघातेत्यादि** । उपघातो विनाशस्तं

---

मायारहितं यथा भवति[१] । संयतते–सम्यगुद्यच्छति यः स निर्ग्रन्थो भवतीति ॥१४२॥

**( १४३ ) ( वि० )** सम्प्रति कल्प्यमकल्प्यं वा किं तत् साधूनामित्यावेदयन्नाह—**यदिति** । यद्वस्तु ज्ञानादीनां त्रयाणां प्रसिद्धस्वरूपाणामुपग्रहम्–उपष्टम्भं, तथा निग्रहं च–निवारणं दोषाणां–क्षुदादीनां रागादीनां वा, कल्पयति–करोति तद्वस्तु, क्व ?–निश्चये–निश्चयनये [१]विचार्ये एतत् कल्प्यं–कल्पनीयं । यदित्थंभूतं वस्तु न भवति तदकल्प्यमवशेषम्–अन्यदिति ॥१४३॥

**( १४४ ) ( वि० )** विपर्ययमाह—**यत्पुनरिति** । यदित्यार्याधं कण्ठ्यम् । तत् कल्प्यमपि–शुद्धमपि पिण्डाद्यकल्प्यं, यच्च वस्तु प्रवचनकुत्साकरं–शासननिन्दाविधायकं तदप्य–

---

**( १४३ ) ( अव० )—[१]संवर्धनमुपष्टम्भे, व्यवहारेण [२]व्यापारयितुं, अवशेषम्=अवशिष्टम् ॥१४३॥**

**( १४४ ) ( अव० )—उपघातकरं=हानिकरं, योगाः=शुभव्यापाराः, जिनशासनविकुत्साकरं=**

**किञ्चिच्छुद्धं कल्प्यमकल्प्यं स्यात्स्यादकल्प्यमपि कल्प्यम् ।**
**पिण्डः शय्या वस्त्रं पात्रं वा भेषजाद्यं वा ॥१४५॥**

**देशं कालं पुरुषमवस्थामुपयोगशुद्धि[1]परिणामान् ।**
**प्रसमीक्ष्य भवति कल्प्यं नैकान्तात् कल्प्यते कल्प्यम् ॥१४६॥**

---

करोति । यद्वस्तु आहारादि गृह्यमाणं प्रत्युतोपहन्ति । सम्यग्दर्शनं सम्यग्ज्ञानं [2]श्रुतं आगमाख्यम्। शीलं मूलगुणा उत्तरगुणाश्च । योगा मनोवाक्कायाख्याः । अहर्निशाभ्यन्तरानुष्ठेया वा व्यापारा योगाः । तदुपघातकारित्वात् कल्प्यमपि सदकल्प्यमेव द्रष्टव्यम् । प्रवचनकुत्साकरं यच्च [3]कुत्सा निन्दा गर्हा तां करोति । यत्सर्वमकल्पनीयं [4]मांसं मद्यादि [5]अभोज्यादिकुलेषु भक्तपानादिग्रहणम् । सर्वमेव प्रवचनकुत्साकारि भवत्यकल्प्यमिति ॥१४४॥

**( १४५ ) टीका—किञ्चिदित्यादि** । किञ्चिदाहाराद्युद्गमा[1]दिशुद्धमपि [2]कल्प्यम-कल्प्यमेव स्यात् । घृतक्षीरदधिगुडादि विकारहेतुत्वाद्, अनर्थापत्तेः परिहार्यम् । तथा अकल्प्यमपि कल्प्यं तदेव, क्षीरघृतादि [3]वातविकारिणां कल्प्यं जायते । पिण्ड इत्याहारश्चतुर्विधः, शय्या प्रतिश्रयः, वस्त्रं पात्रं वा भैषजाद्यं वा औषधमपि व्याध्यार्तानां मिश्रं [4]चेतनं वा कल्पनीयमेव । नीरोगवपुषस्त्वकल्प्यमिति ॥१४५॥

**( १४६ ) टीका—**कदा कल्प्यं कदा वाऽकल्प्यमिति[1] विभजते—**देशं काल-मित्यादि**। [2]देशं प्राप्य किञ्चिदकल्प्यमपि कल्प्यं भवति । कालो दुर्भिक्षादिः तत्राप्येवम्।

---

कल्पनीयमिति ॥१४४॥

**( १४५ ) ( वि० )** किञ्चिद्वस्तु शुद्धं-कल्प्यमकल्प्यं स्याद्, अतिस्निग्धादि, विकार-हेतुत्वादनर्थापत्तेः परिहार्यम्। तथा अकल्प्यमपि कल्प्यं स्याद्, वातविकारिणामिति । किं तदेवं स्यादित्याह-**पिण्ड** इत्यादि स्पष्टमिति[1] ॥१४५॥

**( १४६ ) ( वि० )** कदा कल्प्यं कदा वा अकल्प्यमिति विभजते—**देशमिति** । देशं-ग्रामादिकं तथा कालं-दुर्भिक्षादिकं पुरुषं-प्रव्रजितराजपुत्रादि[1] अवस्थां-सहिष्णुत्वप्रभृतिकां प्रसमीक्ष्येति योगः, तथोपयोगश्च-गुणः, पाठान्तरे तु उपघातश्च-सक्तुकादिषु जीवसंसक्तिदोषः,

---

**निन्दाकरं, तदप्यकल्पनीयम् ॥१४४॥**

**( १४५ ) ( अव० )—[1]घृतक्षीरादि विकारहेतुत्वात्, तदेव वातविकारिणां=व्याध्यार्तानां, मिश्रं सचेतनं चाकल्पनीयमेव, अजीर्णेऽन्नपरिभोगवत्। सरोगस्य औषधवत्, नीरोगस्याकल्प्यम् ॥१४५॥**

**( १४६ ) ( अव० )—[1]देशं=ग्रामारण्यादिकं, कालं=सुभिक्षदुर्भिक्षादिकं, पुरुषं=प्रव्रजित-श्रेष्ठिसुत-राजपुत्रादिकम्, अवस्थां=[2]सहिष्णुत्वेतरादिरूपाम्, उपघातः=संसक्तदोषः, तच्च अग्राह्यं**

**तच्चिन्त्यं तद्भाष्यं तत्कार्यं भवति सर्वथा यतिना ।**
**नात्मपरोभयबाधकमिह यत्परतश्च सर्वाद्धम् ॥१४७॥**

---

पुरुषो राजादिप्रव्रजितः तदर्थमकल्प्यमपि कल्प्यम् । अवस्था मान्द्यादिका तत्रापि वैद्योपदेशादकल्प्यमपि कल्प्यम्। उपघातः संसक्तदोषः तच्च [३]सक्तुकादि संसक्तं सदग्राह्यं अकल्प्यं तदेव चान्यालाभे [४]यत्नेन प्रत्यवेक्ष्य ग्राह्यं कल्प्यमिति । शुद्धपरिणामानिति [५]शुद्धपरिणामचेतसः, सर्वत्र क्रिया गृह्यते । अकल्प्यमपि कल्प्यं भवतीत्येतदेव दर्शयति पश्चार्द्धेन । प्रसमीक्ष्य सम्यगालोच्य कल्पनीयं गृह्णतः । नैकान्तात् कल्पते कल्प्यमिति न खल्वेकान्तेनैव कल्प्यते जायते कल्प्यम्। अथवा नैकान्तेनैव कल्प्यते कल्प्यम् । अकल्प्यमेकान्तेनैव [६]कल्पनीयमकल्प्यमिति यस्माद्देशकालाद्यपेक्षया कल्प्यमकल्प्यं भवति अकल्प्यमपि कल्पनीयमिति ॥१४६॥

**( १४७ ) टीका**—एवमनैकान्तिकं कल्प्याकल्प्यविधिं निरूप्य योगत्रयनियमनाय सङ्क्षेपत[१]इत्याह—**तच्चिन्त्यमित्यादि**। मनसा तदेव चिन्त्यमालोच्यं आर्तरौद्रध्यानद्वयव्युदासेन, [२]यन्नात्मनः परस्योभयस्य वा बाधकं भवति । वाचापि तदेव भाष्यं भाषणीयं, यन्नात्मादीनां बाधकं भवति । [३]सर्वथा यतिना कायेनापि धावनवल्गनादिक्रियात्यागेन तदेव कार्यं कर्तव्यं, यन्नात्मादीनां बाधकं भवति। सर्वाद्धमिति अद्धा कालः सर्वकालमित्यर्थः। वर्तमानेऽनागते च। तत्रापि वर्तमानो व्यावहारिकः परिग्राह्यः। अनागतश्च सर्व एव। अतो मनोवाक्कायैः सम्यग्व्यापाराः[४] कार्याः तथा, यथा स्वल्पोऽपि कर्मबन्धो न जायत इति ॥१४७॥

---

शुद्धिः-चित्तनैर्मल्यं परिणामश्च-भावस्यान्यथाभवनं ते तथा तान्, क्वापि समाहारो दृश्यते ततस्तत्, प्रसमीक्ष्य-पर्यालोच्य भवति-जायते कल्प्यं-ग्राह्यं, भवति कल्प्यं शुद्धं पिण्डादि । [२]न-नैवैकान्तात्-निश्चयेन कल्पते-ग्राह्यं भवति, कल्प्यं-शुद्धं पिण्डादि, देशाद्यपेक्ष्य [३]अकल्प्यमपि कल्प्यं भवतीति भावनेति ॥१४६॥

**( १४७ ) ( वि० )** एवमनैकान्तिकं कल्प्याकल्प्यविधिं निरूप्य योगत्रयनियमनायाह—**तच्चिन्त्यमिति**। तत् चिन्त्यं-चित्तेन चिन्तनीयं तद् भाष्यं-वचनेन भणनीयं तत् कार्यं-शरीरेण विधेयं भवति-जायते सर्वथा-सर्वैः प्रकारैः, केन?-यतिना-साधुना, [२]न-नैव, आत्मा च परश्चोभयं च [१]आत्मपरोभयाः तेषां बाधकं-दुःखकारकमिह[२]-इहलोके यत् परतश्च-परलोके सर्वाद्धं-सकलकालमिति॥१४७॥

---

**कदाचिद् ग्राह्यं शुद्धिः=चित्तनैर्मल्यं, परिणामो=भावस्यान्यथात्वं, कल्प्यार्हे[३], अनैकान्तिकं कल्प्याकल्प्यम् ॥१४६॥**

**( १४७ ) ( अव० )—[१]आत्मनः परस्योभयेषां च, बाधाकरम्, [२]इहलोके परत्र च, सर्वाद्धं= सर्वकालम् ॥१४७॥**

**सर्वार्थेष्विन्द्रियसङ्गतेषु वैराग्यमार्गविघ्नेषु ।**
**परिसङ्ख्यानं कार्यं कार्यं परमिच्छता नियतम् ॥१४८॥**
**भावयितव्यमनित्यत्वमशरणत्वं तथैकताऽन्यत्वे ।**
**अशुचित्वं संसारः कर्माश्रवसंवरविधिश्च ॥१४९॥**

---

**( १४८ ) टीका—**सम्प्रतीन्द्रियनियममाचष्टे—**सर्वार्थेष्वित्यादि** । सर्वे च तेऽर्थाश्च [१]शब्दरूपगन्धरसस्पर्शा[२] इन्द्रियैः सङ्गताः इन्द्रियाणां गोचरतां गताः तेषु । वैराग्यमार्गविघ्नेषु वैराग्यमार्गः सम्यग्ज्ञानक्रियास्तद्विघ्नेषु तदन्तरायकारिषु शब्दादिविषयेषु । परिसङ्ख्यानं कार्यं इत्वरानेतान्[३] शब्दादीन् विज्ञाय निःसारान् आयतावहितान् परिसङ्ख्याय [४]प्रत्याख्याय गोचरवर्तिनोऽपि रागद्वेषवर्जनद्वारेण ज्ञानपरिज्ञया प्रत्याख्यानपरिज्ञया चेत्युभाभ्यां प्रकाराभ्यां परिसङ्ख्यानं कार्यमित्यर्थः । कस्मात्पुनः [५]परिसङ्ख्यायन्ते गोचरमागता विषयाः शब्दादयः ? इत्याह—**कार्यं परमिच्छता नियतं** । कार्यं सकलकर्मक्षयलक्षणो मोक्षः । प्रकृष्टं परं धर्मार्थकाममोक्षाणां मोक्षाख्यमेव कार्यं परं[६] । कामस्य दुःखात्मकत्वात् दुःखहेतुत्वात् तत्साधनव्यभिचारात्, अर्थस्यार्जनरक्षणक्षयसङ्गहिंसादिदोषदर्शनात् अनर्थानुबन्धित्वाच्च नृसुरैश्वर्याणां क्षयातिक्लेशयुक्तत्वात्, अभ्युदयलक्षणस्य धर्मस्यार्थकामफलत्वाद् दुष्टता, सर्वत्रा [७]त्यन्तिकैकान्तिकसुखस्वभावत्वात् परं कार्यं मोक्षस्तमिच्छता । नियतं शाश्वतमित्यर्थः । तच्चेच्छता परं कार्यं विषयसुखेषु निःस्पृहेण भवितव्यम् ॥१४८॥

**( १४९ ) टीका—**निःस्पृहता चानित्यादि[१]भावनायत्तेत्याह—**भावयितव्यमित्यादि** ।

---

**( १४८ ) ( वि० )** इत[१] इन्द्रियनियन्त्रणमाचष्टे—**सर्वार्थेष्विति** । सर्वार्थेषु–शब्दादिषु, कीदृशेषु ?–इन्द्रियैः सङ्गताः–इन्द्रियाणां गोचरतां गतास्तेषु, तथा वैराग्यमार्गविघ्नेषु–सम्यग्ज्ञानक्रियान्तरायेषु, किमित्याह–परिसङ्ख्यानं–तत्त्वावलोचनं कार्यं, यथा[२] एते शब्दादय इत्वरा आयतावहिता इति ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानं विधेयं । कस्मात् पुनः परिसङ्ख्यायन्ते गोचरमागताः शब्दादय इति ?–कार्यं–प्रयोजनं परं–प्रकर्षवद्[३] मोक्षपदप्राप्तिलक्षणमिच्छता–अभिलषता नियतं–शाश्वतम् ॥१४८॥ ॥ **इत्याचाराधिकारः ॥८॥**

**( १४९ ) ( वि० )** तच्चेच्छता भावना भाव्या इत्याह—**भावयितव्यमिति** । **निर्जरणेति** ।

---

**( १४८ ) ( अव० )—[१]शब्दादिषु सर्वेष्वर्थेषु सचि [ त्ताचि ]त्तमिश्रेषु, शरीरेन्द्रियसङ्गार्हेषु, संसारविरक्तिः, परिसङ्ख्यानं=परिगणनं परिहरणं, कार्यं=तद्विषयं, परं=मुक्त्यादिकं शाश्वतमिच्छता साधुनेति योगः ॥१४८॥**

**( १४९ ) ( अव० )—भावयितव्यमहर्निशं चिन्तनीयमभ्यसनीयम्, [१]अनित्यतां, अशरणत्वं**

**निर्जरणलोकविस्तरधर्मस्वाख्याततत्त्वचिन्ताश्च ।**
**बोधेः सुदुर्लभत्वं च भावना द्वादश विशुद्धाः ॥१५०॥**

---

भावयितव्यमहर्निशं चिन्तनीयमभ्यसनीयम् । किं तदनित्यत्वं ? सर्वस्थानान्यशाश्वतानि, संसारे नास्ति किञ्चिन्नित्यमिति । तथाऽशरणत्वं जन्मजरामरणाभिभूतस्य नास्ति क्वचिदपि शरणं । तथा एकत्वभावना एक एवाहमित्यादिका । तथाऽन्यत्वभावना अन्य एवाहं [२]स्वजनकेभ्यो धनधान्यहिरण्यसुवर्णादेः शरीरकाच्चेति । तथाऽशुचित्वभावना आद्युत्तरकारणाशुचित्वादिका । तथा संसारभावना माता भूत्वा [३]इत्यादिका । तथा कर्माश्रवभावना आश्रवद्वाराणि [४]विभृतानि कर्माश्रवन्तीति विभावयेत् तस्मात् स्थगनीयानि इति । [५]तथा संवरविधिराश्रवद्वारनिरोधः [६]स्थगनं निरुद्धेष्वाश्रवद्वारेषु कर्मागमनिरोधः कृतो भवति ॥१४९॥

**( १५० ) टीका–निर्जरणेत्यादि** । तथा निर्जराभावना निरुद्धेषु आश्रवद्वारेषु पूर्वोपात्तस्य कर्मणस्तपसा क्षयो भवतीति । तथा लोकविस्तरभावना ऊर्ध्वाधस्तिर्यग्लोकेषु भ्रान्तमनादौ संसारे सर्वत्र च [१]मृतं जातं चेति चिन्तयेत् । स्वाख्यातधर्मचिन्तनं क्षमादिदशलक्षणको धर्मः शोभन आख्यातो निर्दोषः भव्यसत्त्वानुग्रहायेति भावयेत् । बोधेश्च दुर्लभता भावनीया मनुष्यजन्मकर्मभूम्यार्यदेशकुलकल्पतायु[२]रुपलब्धौ सत्यामपि सम्यक्त्व–

---

भावयितव्यं–चिन्तनीयम् । किं तत् ?–अनित्यत्वं १, तथा अशरणत्वं–जन्माद्यभिभूतस्य नास्ति त्राणं, २ तथैकताऽन्यत्वे–तत्रैकत्वम्–एक एवाहमित्यादि ३ अन्यत्वम्–अन्य एवाहं स्वजनेभ्यः ४ अशुचित्वं शुक्रशोणितादीनामादि[१]कारणानामशुचिरूपत्वात् ५ संसार इति भवभावना '**माता भूत्वा**' इत्यादिका ६ कर्माश्रवश्च संवरश्च कर्माश्रवसंवरौ तयोर्विधिः, तत्र कर्माश्रवविधिना आश्रवद्वाराणि विवृतानि कर्माश्रवन्तीति भावयेत् ७ संवरविधिश्चाश्रवद्वाराणां स्थगनमिति ८ ॥१४९॥

**( १५० ) ( वि० )** सुष्ठ्वाख्यातः स्वाख्यातो धर्मश्चासौ स्वाख्यातश्च धर्मस्वाख्यातः, निर्जरणं लोकविस्तरश्च धर्मस्वाख्यातश्च निर्जरणलोकविस्तरधर्मस्वाख्याताः तेषां, तत्त्वचिन्ताश्च निर्जरण लोकविस्तरधर्मस्वाख्याततत्त्वचिन्ताः । तत्र निर्जरणं–तपसा कर्मक्षपणं ९ लोकविस्तरो–लोकायामादिः

---

**जन्माद्यभिभूतस्य नास्ति किञ्चिच्छरणं । एक एवाहं इत्याद्येकत्वं । अन्य एवाहं स्वजनादिभ्यः । शुक्रशोणितादीनामादिकारणानां शरीरस्याशुचित्वं । संसार इति माता भूत्वा भगिनीत्यादि भवभावना । आश्रवद्वाराणि विवृतानि कर्माश्रवः । आश्रवद्वारपिधानं संवरः ॥१४९॥**

**( १५० ) ( अव० )–कर्मणां क्षपणोपायो निर्जरणं, लोकायामादि लोकविस्तरः, शोभनोऽयं धर्मस्तत्त्वतः परमार्थतश्चिन्ता धर्मस्वाख्याततत्त्वचिन्ता, बोधेः सुदुर्लभत्वं चेति प्रकटम् ॥१५०॥**

**इष्टजनसम्प्रयोगर्द्धिविषयसुखसम्पदस्तथारोग्यम् ।**
**देहश्च यौवनं जीवितञ्च सर्वाण्यनित्यानि ॥१५१॥**

**जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।**
**जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ॥१५२॥**

---

ज्ञानाचरणानि[३] बोधिस्तस्य दुर्लभत्वं अहर्निशं भावयेत् । एवमेता द्वादश भावनाः सततमनुप्रेक्ष्याः ॥१५०॥

**( १५१ ) टीका—**सम्प्रत्येकैकया कारिकया भावनामेकैकां कथयति । तत्र प्रथमा भावनाऽनित्याख्या तद्दर्शयन्नाह[१]—**इष्टजनेत्यादि** । इष्टेन जनेन सह संयोगोऽनित्यः । ऋद्धिः सम्पद्विभूतिः साप्यनित्या । विषयाः शब्दादयस्तज्जनिता सुखसम्पदो[२]ऽनित्या । आरोग्यं नीरोगता तदप्यनित्यम् । देहः शरीरकं आहारस्नानपानाच्छादनानुगृहीतमेतदप्यनित्यम् । यौवनमपि कतिपयदिवसरमणीयम् । जीवितमप्यकाण्डभङ्गुरम् । एवमेतत्सर्वमनित्यमिति [३]भावयतो न क्वचित् स्नेहः समुपजायते । निःसङ्गश्च मोक्षचिन्तायामेव[४] व्याप्रियत इति ॥१५१॥

**( १५२ ) टीका—**अशरणभावनामधिकृत्याह—**जन्मजरामरणेत्यादि** । जन्मोत्पत्तिः । जरा वयोहानिः । मरणं [१]प्राणत्यागः । एभ्यो भयानि तैरभिद्रुतेऽभिभूते । व्याधयो ज्वरातीसारहृद्रोगादयः । वेदनाः शरीरजा मनोभवाश्च । व्याधिवेदनाग्रस्ते व्याधिवेदनाभिगृहीते

---

१० धर्मस्वाख्यातश्च-शोभनोऽयं धर्मो भव्यहिताय जिनैः कथितः, एषां तत्त्वचिन्तनानि ११ बोधेः सुदुर्लभत्वं चेति १२ भावना द्वादश विशुद्धा इति स्पष्टम् ॥१५०॥

**( १५१ ) ( वि० )** तत्रानित्यत्वमाह—**इष्टेति** । इष्टजनसम्प्रयोगश्च ऋद्धिसम्पच्च विषयसुखसम्पच्च, सम्पच्छब्दः प्रत्येकं सम्बध्यते, ता अनित्याः, तथा आरोग्यादीनि सर्वाण्य-नित्यानीति ॥१५१॥

**( १५२ ) ( वि० )** अशरणभावनामाह—**जन्मेति** । लोके क्वचिन्नास्ति शरणमिति योगः । कीदृशे ?-अभिद्रुते-अभिभूते । कैः ?-जन्मजरामरणेभ्यो भयानि जन्मजरामरणभयानि तैः, तथा

---

**( १५१ ) ( अव० )—इष्टजनसम्प्रयोगश्च ऋद्धिसम्पच्च विषयसुखसम्पच्च सम्पच्छब्दः प्रत्येकं योज्यः ॥१५१॥**

**( १५२ ) ( अव० )—अभिद्रुतेऽभिभूते ॥१५२॥**

**एकस्य जन्ममरणे गतयश्च शुभाशुभा भवावर्ते ।**
**तस्मादाकालिकहितमेकेनैवात्मनः कार्यम् ॥१५३॥**

**अन्योऽहं स्वजनात् परिजनाच्च विभवाच्छरीरकाच्चेति ।**
**यस्य नियता मतिरियं न बाधते तं हि शोककलिः ॥१५४॥**

---

लोके प्राणिसमूहे । जिनवरा जिनप्रधानास्तीर्थङ्करा इत्यर्थः । तेषां वचनं वाग्योगस्तत्प्रति[१]-पादितोऽर्थस्तमादाय क्षायोपशमिकभाववर्तिभिर्गणधरैर्दृष्टं[२] द्वादशाङ्गं प्रवचनं, तन्मुक्त्वाऽन्यत्र नास्ति शरणं परित्राणमिति[४] ॥१५२॥

**( १५३ ) टीका—**एकत्वभावनामधिकृत्याह—**एकस्येत्यादि** । एकस्येत्यसहायस्य । जन्म च मरणं च। न खल्वस्य जायमानस्य म्रियमाणस्य वा कश्चित्सहायोऽस्ति । गतयो नरकाद्या मरणोत्तरकालं नरकादिगतिषु स्वकृतकर्मफलमनुभवतो नास्ति कश्चि[१]दवसरः । शुभा देवमनुष्यतिर्यग्योनयः । नरकगतिरशुभा । भवो जन्म । भव एवावर्तः संसारार्णवो यत्र प्रदेशे भ्राम्य[२]दास्ते जलं तत्रैव भयावर्तो । जीवस्यापि [३]तत्र तत्र जन्ममरणे समनुभवतो भवावर्तः । तस्मादाकालिकं अकालहीनं । हितमेकेनैवात्मनः कार्यम् । हितं संयमानुष्ठानं तत्प्राप्यो वा मोक्षोऽत्यन्तहितम्, एकेन असहायेनात्मना कर्तव्यमिति ॥१५३॥

**( १५४ ) टीका—**अन्यत्वभावनामधिकृत्याह—**अन्योऽहमित्यादि** । स्वो जनः स्वजनो मातापित्रादिः पत्नीपुत्रादिश्च । अस्मादहमन्यो विभिन्नः पृथक्कर्मा । परिजनो दासदासीप्रभृतिः ।

---

व्याधिवेदनाग्रस्ते । ततः किं ?-नास्ति-न विद्यते । किं तत् ?-शरणं-त्राणं । क्व ?-अन्यत्र । कस्मात् ?-जिनवरवचनात्-सर्वज्ञागमादिति ॥१५२॥

**( १५३ ) ( वि० )** एकत्वभावनामाह—**एकस्येति** । एकस्य जीवस्य जन्ममरणे भवत इति शेषः । तथा गतयश्च शुभाशुभाः, तत्र देवमनुष्यगती शुभे नरकतिर्यग्गती अशुभे भवतः । क्व ?-भवावर्ते-संसारे पुनःपुनर्भ्रमणे । तस्मादाकालिकं-सदाभावि हितं-पथ्यमेकेनैव जीवेनात्मनः-स्वस्य कार्यं-करणीयं, तच्च हितं संयमानुष्ठानमित्यर्थ इति ॥१५३॥

**( १५४ ) ( वि० )** [१]अन्यत्वमाह—**अन्योऽहमिति** । न बाधते-न पीडयति । कः ?-

---

**( १५३ ) ( अव० )—आकालिकहितं सदाभाविशुभाचरणम्, एकेनैवात्मनाऽसहायेन [१]स्वार्थे ॥१५३॥**

**( १५४ ) ( अव० )—स्वजनात् पित्रादेः, परिजनाद्दासादेः, विभवात्कनकादेः, शरीराद्देहाच्च ।**

**अशुचिकरणसामर्थ्यादाद्युत्तरकारणाशुचित्वाच्च ।**
**देहस्याशुचिभावः स्थाने स्थाने भवति चिन्त्यः ॥१५५॥**

---

अस्माच्च परिजनादन्य एवाहम् । विभवो धनधान्यादिः कनकरजतवास्त्वादिर्वा[१] अस्मादन्योऽहं शरीरकमुपभोगाधिष्ठानं, तस्मादप्यत्य[२]न्तविभिन्न एवाहम् । इत्थं यस्येयं बुद्धिर्नियता नक्तंदिन-[३]मालोचिका । न बाधते तं न पीडयति । हिशब्दो यस्मादर्थे । यत्तदोर्नित्याभिसम्बन्धाद् यस्मादेवं भावयन्न बाध्यते शोककलिना, तस्मादन्य[४]त्वभावना कार्या ॥१५४॥

**( १५५ ) टीका—**अशुचित्वभावनामधिकृत्याह—**अशुचिकरणेत्यादि** । [१]शुचिनोऽपि द्रव्यस्याशुचित्व[२]करणेऽस्ति सामर्थ्यं शक्तिर्देहस्य । कर्पूरचन्दनागरुकुङ्कुमादिद्रव्यं देहसम्पर्कादशुच्येव जायते । तस्मादशुचिकरणसामर्थ्याद्देहस्याशुचित्वमनुचिन्तनीयम् । यथाह—

**एतावदेतदशुचि नाऽन्यत् किञ्चिन्न विद्यते ।**
**यथा कायः कलेरङ्गं, यद्वा तेनैव दूषितम् ॥**

आद्युत्तरकारणाशुचित्वाच्च । आदिकारणं शुक्रशोणिते । उत्तरकारणं जनन्यभ्य[३]-वहृतस्याहारस्य रसहरण्योपनीतस्य रसस्यास्वादनमत्यन्ताशुचि । एवमाद्युत्तरकारणयोर-शुचित्वादशुचिर्देह इति प्रतिक्षणमनुचिन्तनीयम् । स्थाने स्थाने इति शिरःकपालादिष्ववयवेषु चरणान्तेषु त्वगाच्छादितासृग्मांसमेदोमज्जास्थिस्नायुजालसन्तानबन्धेषु न क्वचिच्छुचि-

---

शोककलिः-कलिकालस्वरूपं, कं ?-तं जीवम् । हिशब्दः स्फुटार्थो यस्य नियता-निश्चिता, काऽसौ ?-मतिः-बुद्धिरियमेषेति[२] अन्यतोल्लेखेन[३], अन्योऽहं स्वजनात्-पित्रादेः परिजनाद्-दासादेर्विभवात्-कनकादेः शरीराद्-देहात्, एतेभ्यो भिन्नोऽहमिति ॥१५४॥

**( १५५ ) ( वि० )** अशुचित्वमाह—**अशुचीति** । भवति-जायते चिन्त्यः-चिन्तनीयः । कः ?-अशुचिभावः-जुगुप्सनीयत्वं । क्व ?-स्थाने स्थाने-शिरःकपालादिषु । कस्य ?-देहस्य-तनोः । कस्मात् ?-अशुचिकरणसामर्थ्यात्, शुचिनो[१] द्रव्यस्य कर्पूरादेरशुचिकरणे [२]सामर्थ्यमस्त्येव । तथा आद्युत्तरकारणाशुचित्वाच्च, कारणशब्दस्य प्रत्येकं योजनाद् आदिकारणोत्तरकारणयोर-शुचित्वात्, तत्रादिकारणं शुक्रशोणितादि उत्तरकारणं तु [३]जनन्याऽभ्यवहृतस्याहारस्य रसहरण्योपनीतस्य

---

**तेभ्यो भिन्नोऽहं, पृथक्कर्मणि यस्य नियता नक्तंदिनमालोचिका । हिर्यस्मात् । शोककलिः= कलि-कालस्वरूपम् ॥१५४॥**

**( १५५ ) ( अव० )—कर्पूरादीनां वपुःसम्पर्कादशुचिकरणसामर्थ्यात् । शुक्रशोणिताद्याद्य-कारणानामन्नपानाद्युत्तरकारणानामशुचित्वात् ॥१५५॥**

**माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे ।**
**व्रजति सुतः पितृतां भ्रातृतां पुनः शत्रुतां चैव ॥१५६॥**

**मिथ्यादृष्टिरविरतः प्रमादवान् यः कषायदण्डरुचिः ।**
**तस्य तथाश्रवकर्मणि यतेत तन्निग्रहे तस्मात् ॥१५७॥**

---

गन्धोऽस्तीत्यशुचिगन्ध एव विजृम्भते इति ॥१५५॥

**( १५६ ) टीका—**संसारभावनामधिकृत्याह-**माता भूत्वेत्यादि** । संसारे परिभ्रमतां सत्त्वानां माता भूत्वा भूयः सैव दुहिता भवति, सैव च [१]पुनर्भगिनी भवति, सैव च पुनः संसृतौ परिवर्तमाना जायापि भवति । तथा पुत्रो भूत्वा पिता भवति । स एव सुतः पुनर्भ्रातृत्वमायाति । स एव च पुनः सपत्नो भवतीत्येवमा[२]जवंजवीभावप्राये संसारे सर्वसत्त्वाः पितृत्वेन मातृत्वेन [३]शत्रुत्वेन चेत्यादिना सम्बन्धेन कृतसम्बन्धा बभूवुरिति ॥१५६॥

**( १५७ ) टीका—**आश्रवभावनामधिकृत्याह**—मिथ्यादृष्टिरित्यादि** । मिथ्यादर्शनादयः कर्मण आश्रवाः । तत्त्वार्थाश्रद्धानलक्षणो मिथ्यादृष्टिः । मिथ्यादर्शनोदयाच्च [१]कर्मबन्धः । अविरतः सम्यग्दृष्टिरपि यो न विरतः कुतश्चित्प्राणातिपातदोषादसावपि कर्माश्रवेषु वर्तते ।

---

रसस्यास्वादनमत्यन्ताशुचिरिति ॥१५५॥

**( १५६ ) ( वि० )** संसारभावनामधिकृत्याह**—मातेति** । माता भूत्वा दुहिता-पुत्रिका भवति । तथा भगिनी च-सहोदरी भार्या भवति । क्व ?-संसारे । तथा व्रजति-याति । सुतः-पुत्रः । कां ?-पितृतां-जनकत्वं भ्रातृतां बन्धुत्वं । पुनः शत्रुतां-वैरित्वं चैवेति ॥१५६॥

**( १५७ ) ( वि० )** आश्रवभावनामुररीकृत्याह**—मिथ्यादृष्टिरिति** । मिथ्यादर्शनादयः पञ्चापि पूर्वोक्ताः । यच्छब्दः पञ्चस्वपि योज्यः । ततो मिथ्यादृष्टिर्यो जीवः तथा अविरतः प्रमादवान् । रुचिशब्दोऽपि प्रत्येकं योज्यः । ततः कषायरुचिर्दण्डरुचिः । तस्य जीवस्य आश्रवकर्मणि-कर्माश्रवे सति, तथा-तेन प्रकारेण तन्निग्रहे-आश्रवनिग्रहे यतेत-यत्नं कुर्वीत, यतिरिति शेषः ।

---

**( १५६ ) ( अव० )—संसारभावनामाह—दुहिता=सुता ॥१५६॥**

**( १५७ ) ( अव० )—[१]सम्यग्दृष्टिरपि न विरतः प्राणातिपातात्[२] सोऽपि[३] प्रमादवान् । मनोदण्डाः ४ वाग्दण्डाः ४ कायदण्डाः[४] ७। तदेवं पञ्चदशप्रकारदण्डरुचिः । ततश्चायमर्थः प्रमादवान् यो जीवस्तस्य [५]प्रमत्तस्य । यथैते भेदा बहवस्तथाश्रवकर्माणि आश्रवस्थानानि**

**या पुण्यपापयोरग्रहणे वाक्कायमानसी वृत्तिः ।**
**सुसमाहितो हितः संवरो वरददेशितश्चिन्त्यः ॥१५८॥**

---

सम्यग्दृष्टिर्विरतोऽपि यः प्रमादवान् सोऽपि कर्म श्रवत्यादत्ते। प्रमादश्च निद्राविषयकषाय-विकटविकथाख्यः पञ्चधा, अनेन प्रमादेन युक्तः कर्म बध्नाति । कषायप्रमादो गरीयानिति भेदेनोपादानम् । दण्डस्त्रिधा मनोवाक्कायाख्यः । मनसार्तरौद्राध्यवसायः कर्माश्रवति, वाचापि हिंसकपरुषादितया कर्म बध्नाति । कायेनापि धावनवल्गनप्लवनादिरूपेण कर्मादीयते । दण्डयन्तीति दण्डाः । मन एव दण्डयत्यात्मानं, एवमितरावपि । तस्याश्रवहेतोः, कर्मणि क्रियायां, यतेत यत्नं कुर्वीत । [२]तेषामाश्रवाणां निग्रहो निरासस्तस्माद्यत्नादिति। विवृतान्याश्रवद्वाराणि यथा न सम्भवन्ति तथा यतेत ॥१५७॥

**( १५८ ) टीका—**संवरभावनामधिकृत्याह**—या पुण्येत्यादि** । पुण्यकर्म सातादि[१] । पापं ज्ञानावरणादि । तयोः पुण्यपापयोरग्रहणेऽनुपादाने । वाक्कायमानसी वृत्तिर्या [२]व्यापार इत्यर्थः । अग्रहणं च संवृताश्रवद्वारस्य भवति, न पुनः पुण्यमादत्ते न पापम् । सुसमाहितः सुष्ठु समाहितः [३]संरोपितः । आयत्यां [४]तदात्वे च संवर आश्रवनिरोधलक्षणः । वरदास्तीर्थकृतः ईप्सितार्थप्रदानाद्वरदाः, [५]मोक्षार्थश्चेप्सितः । स चिन्तनीयो भावनीय इत्यर्थः ॥१५८॥

---

यत्तदोर्नित्याभिसम्बन्धाद् यथाऽऽश्रवविशेषा न भवन्तीत्यर्थः । कस्मात् ?-तस्माद्भावनाबलादिति ॥१५७॥

**( १५८ ) ( वि० )** संवरभावनामाह**—येति** । यत्तदोर्नित्याभिसम्बन्धात् संवरः-आस्रवनिरोधलक्षणश्चिन्त्यः-चिन्तनीयो भवति । या [१]किमित्याह-या वृत्तिः-व्यापारः, पाठान्तरे गुप्तिः-गोपनं । कीदृशी ?-वाक्कायमानसी, एतद्भावात्, का ?-अग्रहणे-अनुपादाने । कयोः ?-पुण्यं कर्म सातादिद्विचत्वारिंशद्भेदं, पापं कर्मज्ञानावरणीयादि द्व्यशीतिभेदम्, उभयमपि वक्ष्यमाणं, ततो द्वन्द्वः, तयोः, अग्रहणं च संवृतास्रवद्वारस्य भवति, ततो न पुण्यमादत्ते, न पापमिति । कीदृशः संवरः ?-सुसमाहितः-सुष्ठु आत्मन्यारोपितः । तथा हित आयत्यां । तथा वरदाः-तीर्थकरास्तैर्देशितः-कथित इति समासः ॥१५८॥

---

**भवन्तीति । आश्रवविधिरुक्तस्तस्मिन्नाश्रवकर्मणि विषये तेषां भेदानां निग्रहे यतेत[६] ॥१५७॥**

**( १५८ ) ( अव० )—अनुपादाने । वृत्तिर्व्यापारः । पाठान्तरे गुप्तिर्गोपनम् । आत्मन्यारोपितं हितः । वरदैस्तीर्थकरादिभिः ॥१५८॥**

**यद्वद्विशोषणादुपचितोऽपि यत्नेन जीर्यते दोषः ।**
**तद्वत् कर्मोपचितं निर्जरयति संवृतस्तपसा ॥१५९॥**

**लोकस्याधस्तिर्यग् विचिन्तयेदूर्ध्वमपि च बाहल्यम् ।**
**सर्वत्र जन्ममरणे रूपिद्रव्योपयोगांश्च ॥१६०॥**

---

**( १५९ ) टीका—**निर्जराभावनामधिकृत्याह—**यद्वद्विशोषणादित्यादि** । कथं पुनः संवृतात्मनः कर्मनिर्जरणमिति दर्शयति—निरुद्धेष्वाश्रवद्वारेषु संवृतात्मनोऽपूर्वकर्मप्रवेशो नास्ति, पूर्वोपात्तस्य च कर्मणः प्रतिक्षणं क्षयस्तपस्यतो भवति । यथोपचितस्याजीर्णस्य आमविदग्धविष्टब्धरसशेषलक्षणस्य आहारनिरोधे सति [१]विशोषणायाः प्रतिदिवसं क्षयो भवति प्रयत्नेन दोषाणामामादीनां, तद्वत्कर्मापि[२] ज्ञानावरणादि चितं संसृतौ भ्रमता [३]चतुर्थषष्ठाम-दशमद्वादशादिभिस्तपोविशेषैर्नीरसीकरोति । [४]कृतं च निरनुभावं निष्पीडितकुसुम्भवत् परिशटत्यात्मप्रदेशेभ्य इति ॥१५९॥

**( १६० ) टीका—**लोकभावनामधिकृत्याह—**लोकस्याधस्तिर्यगित्यादि** । जीवाजीवा-धारक्षेत्रं लोकः, तस्याधस्तिर्यगूर्ध्वञ्च चिन्तयेत् । बाहल्यं विस्तरम् । अधः सप्तरज्जुप्रमाणो विस्तीर्णतया लोकः । तिर्यग् रज्जुप्रमाणः । ऊर्ध्वं ब्रह्मलोके पञ्चरज्जुप्रमाणः । पर्यन्ते रज्जुप्रमाण

---

**( १५९ ) ( वि० )** निर्जराभावनामाह—**यद्वदिति** । यद्वद् यथा शोषणात्-लङ्घनादिकाद् यत्नेन-महादरेण उपचितोऽपि-पुष्टोऽपि ज्वरादिदोषो जीर्यते-हानिं याति, दृष्टान्तः । दार्ष्टान्तिकमाह-तद्वत्-तथा कर्म-ज्ञानावरणादिकमुपचितं-बद्धादि निर्जरयति-क्षपयति संवृतो-निरुद्धास्रवद्वारो जीवः । केन ?-तपसा-अनशनादिनेति ॥१५९॥

**( १६० ) ( वि० )** लोकभावनामाह—**लोकस्येति** । लोकस्य-जीवाजीवाधारक्षेत्रस्याध-स्तिर्यगूर्ध्वमपि च बाहल्यं-विस्तरं विचिन्तयेत् । तत्राधः सप्तरज्जुप्रमाणो लोकः, तिर्यग् रज्जुप्रमाणः, ऊर्ध्वं ब्रह्मलोके पञ्चरज्जुप्रमाणः, पर्यन्ते रज्जुप्रमाणः, चशब्दादूर्ध्वाधश्चतुर्दशरज्जुप्रमाणः । सर्वत्र

---

**( १५९ ) ( अव० )—विशोषणाल्लङ्घनात् । उपचितोऽपि=पुष्टोऽपि । दोषोऽजीर्णात्मकः । तत्कर्मोपचितं बन्धादिभिः निरुद्धाश्रवद्वारो जीवः संवृतः ॥१५९॥**

**( १६ ) ( अव० )—सर्वत्र यत्र न जातं न मृतं मयेति । परमाणुप्रभृतीन्यनन्तानन्तस्कन्ध-पर्यवसानानि द्रव्याणि । तेषां मनोवाक्कायादिभिरुपयोगाः । न च तैस्तृप्त इति चिन्तयेत् ॥१६०॥**

**धर्मोऽयं स्वाख्यातो जगद्धितार्थं जिनैर्जितारिगणैः ।**
**येऽत्र रतास्ते संसारसागरं लीलयोत्तीर्णाः ॥१६१॥**

**मानुष्यकर्मभूम्यार्यदेशकुलकल्पतायुरुपलब्धौ ।**
**श्रद्धाकथकश्रवणेषु सत्स्वपि सुदुर्लभा बोधिः ॥१६२॥**

---

इति । अधःशब्दादूर्ध्वाधश्चतुर्दशरज्जुप्रमाणः । सर्वत्र लोके जन्ममरणे समनुभूते, व्यापकमधिकरणं, नास्ति तिलतुषप्रमितोऽपि लोकाकाशदेशो यत्र न जातं न मृतं वा मयेति । रूपिद्रव्योपयोगांश्चेति । रूपीणि यानि द्रव्याणि परमाणुप्रभृतीन्यनन्तानन्तस्कन्धपर्यवसानानि, तेषां य उपयोगः परिभोगो मनोवाक्कायाहारोच्छ्वासनिश्वासादिरूपेण सर्वेषां कृतोऽनादौ [१]संसारे पर्यटता चास्मि न तृप्त इत्यनुक्षणमनुचिन्तयेदिति ॥१६०॥

**( १६१ ) टीका—**स्वाख्यातधर्मभावनामधिकृत्याह—**धर्मोऽयं स्वाख्यात इति** । श्रुतधर्मश्चारित्रधर्मश्च सुष्ठु निर्दोषमाख्यातः [१]स्वाख्यातः । किमर्थमाख्यात इत्याह—जगद्धितार्थं, जगच्छब्देन प्राणिनोऽभिधित्सिता । जगद्भ्यः प्राणिभ्यो हितमेतदिति प्रतिविशिष्टं प्रयोजन-मुद्दिश्याख्यातः । जिनैस्तीर्थकृद्भिः । अरयः क्रोधादिपरीषहकर्माख्याः । जितोऽभिभूतो निराकृतोऽरिगणो यैस्ते जितारिगणाः । इत्थंलक्षणे च धर्मे आगमरूपे क्षमादिलक्षणे च । ये रताः सक्तास्ते संसारसागरं लीलया अनायासेन सुखपरंपरया । उत्तीर्णाः [२]परं पारमुपगताः । मोक्षं प्राप्ता इत्यर्थः ॥१६१॥

**( १६२ ) टीका—**[१]दुर्लभबोधित्वभावनामधिकृत्याह—**मानुष्यकर्मेत्यादि** । प्राक्तावन्ज्जन्मैव[२] दुर्लभं चोल्लकादिदृष्टान्तदशकेन विभावनीयम् । सति च मानुषजन्मनि[३]

---

जन्ममरणे समनुभूते, नास्त्येकोऽप्याकाशप्रदेशो यत्र न जातं न मृतं वा मयेति । रूपिद्रव्योपयोगांश्च-रूपीणि[१] च तानि द्रव्याणि च-परमाणुप्रभृतीन्यनन्तानन्तस्कन्धपर्यवसानानि तेषामुपयोगाः-परिभोगाः[२](णामाः)मनोवाक्कायादिभिः कृतास्तांश्च । न च तैस्तृप्त इति चिन्तयेदिति ॥१६०॥

**( १६१ ) ( वि० )** स्वाख्यातधर्मभावनामाह—**धर्मोऽयमिति** । इति व्यक्तम् ॥१६१॥

**( १६२ ) ( वि० )** दुर्लभ[१]बोधित्वभावनामाह—**मानुष्येति** । मानुष्यं-नरत्वं कर्मभूमिः-

---

**( १६१ ) ( अव० )—सुष्ठु निर्दोषः ख्यातः । [१]क्षमादिलक्षणधर्मे । सुखपरंपरया ॥१६१॥**

**[१]( १६२ ) ( अव० )—कल्पता=नीरोगता । आयुर्दीर्घायुष्कम् । श्रद्धा=धर्मजिज्ञासा । कथकश्चाचार्यः श्रवणं=चाकर्णनम् । एतेषु नवसु उत्तरोत्तरदुर्लभेषु सत्स्वपि । बोधितः ।**

**तां दुर्लभां भवशतैर्लब्ध्वाऽप्यतिदुर्लभा पुनर्विरतिः ।**
**मोहाद्रागात्कापथविलोकनाद् गौरववशाच्च ॥१६३॥**

[४]कर्मभूमिरपि सुदुर्लभा । कर्मभूमिरपि यत्र तीर्थकृत उत्पद्यन्ते सद्धर्मदेशनाप्रवणाः परिनिर्वाणं प्राप्नुवन्ति भव्याः पञ्च [५]भरतान्यैरावतानि विदेहाश्च पञ्चैव । मानुषत्वे कर्मभूमौ च सत्यां आर्यो देशो [६]मगधाङ्गबङ्गकलिङ्गादि दुर्लभः । सत्स्वेतेषु त्रिषु कुलमन्वयविशुद्धिर्दुर्लभा, इक्ष्वाकुहरिवंशादि कुलम् । एतेष्वपि कुलपर्यन्तेषु लब्धेषु कल्पता नीरोगता दुर्लभा । एतेषु च कल्पतान्तेषु अवाप्तेषु दीर्घमायुर्दुर्लभम् । आयुष्कान्तेषु च समासादितेषु श्रद्धा धर्मजिज्ञासा दुर्लभा । सत्यामपि जिज्ञासायां कथकः सद्धर्मस्याख्याता दुर्लभः । सत्यपि कथके श्रवणमाकर्णनं प्रस्तावाभावाद् दुर्लभं, अनेकगृहकार्यव्यग्रत्वात् आलस्यमोहा[७]वज्ञामदप्रमाद-कृपणत्वभयशोकाज्ञानकुतूहलादिभिश्च श्रवणं प्रति न प्रवृत्तिर्भवति । सत्स्वप्येतेषु श्रवणपर्यन्तेषु प्राप्तेष्वपि सुदुर्लभा बोधिर्भवति । बोधिः सम्यग्दर्शनसम्यग्ज्ञानलाभः । तत्सम्यक्त्वं शङ्कादिशल्यरहितं सुदुर्लभं भवतीत्यर्थः ॥१६२॥

**( १६३ ) टीका—तां दुर्लभामित्यादि** । तां दुर्लभां सम्यग्दर्शनादिकां बोधिमवाप्य । भूयोऽपि दुर्लभा विरतिः सर्वविरतिर्देशविरतिश्च । किं पुनः कारणं सम्यक्त्वलाभे सति विरतिर्दुर्लभेत्याह—मोहोऽज्ञानं मोह—'इदं कृत्वा इदं चानुष्ठाय ततः प्रव्रजिष्यामीति, श्रावकधर्मं वा प्रतिपत्स्ये न सर्वत्यागं कर्तुं शक्नोमि' इत्येतदज्ञानम् । नेदमवगच्छत्यकाण्डभङ्गुरमिदं

---

भरतादि पञ्चदशधा आर्यदेशो-मगधादिः कुलं-उग्रादि कल्पता-[२]नीरोगता आयुः-दीर्घायुष्कं तेषां षण्णां कृतद्वन्द्वानामुपलब्धिः-प्राप्तिस्तत्र, तथा श्रद्धा च-धर्मजिज्ञासा कथकश्च-आचार्यादिः श्रवणं च-आकर्णनं तानि श्रद्धाकथकश्रवणानि तेष्वप्येतेषु नवस्वप्युत्तरोत्तरदुष्प्रापेषु दुर्लभा बोधिः-दुष्प्रापः सम्यक्त्वलाभ इति ॥१६२॥ **इति भावनाधिकारः ॥९॥**

**( १६३ ) ( वि० )** अथ स रागादिविजयो दशविधधर्मासेवनद्वारेण साध्य इति बिभणिषुस्तमन्वयव्यतिरेकाभ्यामाह—**तामिति** । तां बोधिं दुर्लभां भवशतैर्लब्ध्वाऽप्यतिदुर्लभा पुनर्विरतिः-देशविरतिः सर्वविरतिश्च । अथ कुतो दुष्प्रापा विरतिरित्याह-मोहाद्-अज्ञानात्, तथा

---

**सद्धर्मस्याख्यानं सम्यग्ज्ञानलाभो भवति ॥१६२॥**

**( १६३ ) ( अव० )—अवाप्य अज्ञानात्, रागात्=[१]पत्न्याद्यासक्तेः[२] कापथविलोकनात्=कुपथदर्शनात् एकैकनयानुसारिजिनप्रणीतागमवचनैकदेशस्वयुक्तिनिरपेक्षान्ययुक्तिविचारणाद्बहवो निह्नवा जज्ञिरे गौरववशात् ॥१६३॥**

**तत् प्राप्य विरतिरत्नं विरागमार्गविजयो दुरधिगम्यः ।**
**इन्द्रियकषायगौरवपरीषहसपत्नविधुरेण[१] ॥१६४॥**

---

जीवितं सहसैव ध्वंसते [१]न मे प्रस्तावं प्रतीक्षत इति । रागाद्वा न लभते विरतिम् । पत्नी पुत्रादिषु अनुरक्तहृदयो न शक्नोति त्यक्तुं गृहवासरतिम् । कुत्सिताः पन्थानः कापथाः [२]तैर्विलोकनं [३]चित्तविभ्रमः । कः पुनरत्र पन्थाः संसारादुत्तारणे क्षम इति कापथजनितभ्रान्तिदर्शनादपि भ्रंशमवाप्नोति । दूरतर एव चारित्रलाभः । गौरववशाच्चेति । गौरवमादरः [४]सक्तिः । ऋद्धिरससुखेषु ऋद्धिर्विभूतिः महती द्रव्यसम्पत् तां हातुं न शक्नोति लोभकषायानुगतचेताः । रसेष्वभीष्टेषु तिक्तादिषु [५]सक्तिरादरो गौरवं [६]तां न शक्नोति हातुं रसनेन्द्रियवशीकरणात् । सुखगौरवं यथर्तुव्यपेक्षं प्रवातनिवातसाधारणशय्यासु [७]शयनमाहारं इष्टचन्दनादिविलेपनं गन्धधूपमाल्यादिसेवनमिष्टस्त्रीपरिभोगश्च तदप्रत्यलः परिहर्तुम् । अतो बोधिलाभे सत्यपि सर्वविरतिर्दुर्लभेत्युक्तम् ॥१६३॥

**( १६४ ) टीका—तत्प्राप्येत्यादि** । सकलं विरतिरत्नं प्राप्य यदुक्तं पूर्वं दुर्लभं तदवाप्य सर्वविरतिरत्नम् । विरागमार्गविजयो [१]दुरधिगम्यः । विरागस्य मार्गो रागप्रहाणमार्गः यथोक्तलक्षणः शास्त्रे '**हिंसादिष्विहामुत्र चापायावद्यदर्शनम् । दुःखमेव वेत्यादि ।**' (तत्वार्थसूत्रम्-६-४,५)एवंलक्षणकस्य विरागमार्गस्य विजयः परिचयोऽभ्यसनम् । अधिगम्यते प्राप्यतेऽधिगम्यः, दुःखेनाधिगम्यो दुःप्राप्य इत्यर्थः । कस्मात् पुनर्दुःखेनाधिगम्यत इत्याह—इन्द्रियाणि परिपन्थानि विरागमार्गस्य विघ्न[२]कारणानि । कषायाः क्रोधादयः सपत्नाः शत्रवः परिपन्थिनः । गौरवमुक्तलक्षणं त्रिधा ऋद्धिरससाताख्यम् । क्षुत्पिपासादयः परिषहाः ते चानन्यतुल्याः सपत्नाः । एभिरिन्द्रियादिभिः सपत्नैर्विधुरो विसंस्थुल आकुलीकृतः न वैराग्यमार्गमभ्यसितुं समर्थो भवति । इन्द्रियादिसपत्नविधुरेण न शक्यते विरागमार्गविजयः कर्तुमिति ॥१६४॥

---

रागात्-पत्न्यादिस्नेहरागात्, कापथविलोकनात्-कुत्सितमार्गचित्तविभ्रमात्, गौरववशाच्च-ऋद्धिरससातायत्ततायाश्चेति ॥१६३॥

**( १६४ ) ( वि० )** दुष्प्रापां तां विरतिं प्राप्य ततः किं कार्यमत आह-**तदिति** । तत्-पूर्वोक्तस्वरूपं विरतिरेव रत्नं विरतिरत्नम् तत् प्राप्य-लब्ध्वा विरागमार्गस्य-विरागतापथस्य विजयः-परिचयोऽभ्यसनं स तथा, किं ?-दुरधिगम्यो-दुष्प्रापः । केनेत्याह-इन्द्रियादयः प्रतीतार्थास्त एव सपत्ना-वैरिणस्तैर्विधुरः-आकुलीकृतस्तेनेति ॥१६४॥

---

**( १६४ ) ( अव० )—[१]तत्प्राप्य रागप्रहाणमार्गो दुःखेनाधिगम्यः इन्द्रिया[२]दय एव सपत्नाः=तैर्विह्वलेन विरागमार्गप्राप्तौ विजयस्तेन प्राप्तो न भवति, येन सर्वविरतिरवाप्तेति ॥१६४॥**

**तस्मात् परीषहेन्द्रियगौरवगणनायकान् कषायरिपून् ।**
**क्षान्तिबलमार्दवार्जवसन्तोषैः साधयेद्धीरः ॥१६५॥**

**सञ्चिन्त्य कषायाणामुदयनिमित्तमुपशान्तिहेतुं च ।**
**त्रिकरणशुद्धमपि तयोः परिहारासेवने कार्ये ॥१६६॥**

---

**( १६५ ) टीका—तस्मात्परीषहेत्यादि** । यस्मादेते रिपवो बलिनः कषायगण-नायकाः।[१] तस्मात्कषायानेव पूर्वं नायकानिन्द्रियादीनां विजयेत । जितेषु च नायकेषु हतं सैन्यमनायकमिन्द्रियादीनि । गणशब्दः प्रत्येकमभिसम्बध्यते इन्द्रियगणस्य परीषहगणस्य गौरवगणस्य च नायकाः प्रवर्तका नेतारः । तान् कषायान् वैरिणः क्षान्तिबलमार्दवार्जव-सन्तोषैर्यथासङ्ख्यं साधयेद्धीरः। बलशब्दः प्रत्येकमभिसम्बध्यते क्षान्तिबलेन मार्दवबलेन आर्जवबलेन सन्तोषबलेन चतुरङ्गबलेनामुना बलेन साधयेद् उत्थितान् विरागमार्गाद्धीरः सात्त्विक इत्यर्थः । यथासङ्ख्यं क्रोधादयो रिपवः क्षान्त्यादिबलैः साध्या भवन्ति ॥१६५॥

**( १६६ ) टीका—सञ्चिन्त्येत्यादि** । कषायाणामुदयनिमित्तमालोच्य क्रोधादी-नामनेन[१] निमित्तेन अयं क्रोधादिकषायो जायत इति । उपशान्तिहेतुं [२]च सञ्चिन्त्य अनेन क्रियमाणेनायमुपशाम्यति कषायः प्रशमं गच्छति । अतस्तयोरुदयनिमित्तो[३]पशमहेत्वोर्यथा-सङ्ख्यं परिहार आसेवनं च कार्यम् । परिहारोऽपि कार्यः कायवाङ्मनोभिः कृतकारितानु-मतिभिश्च[४] । उदयनिमित्तस्योपशान्तिहेतूनामपि कृतकारितानुमतिभिः [५]कायादिभिश्चासेवनं त्रिकरणशुद्धं कार्यमिति रागद्वेषमोहानां निवारणार्थम् ॥१६६॥

---

**( १६५ ) ( वि० ) तस्मादिति** । तस्मात् कषाया एव रिपवः कषायरिपवः तान्। कीदृशान् ?-परीषहेन्द्रियगौरवाणां गणः- समूहस्तस्य नायकास्तान्, गणशब्दः प्रत्येकमभिसम्बध्यते। साधयेत्-विजयेत। कः ?-धीरः-बुद्धिमान्। कैरित्याह-क्षान्तिबलादिभिरिति व्यक्तम् ॥१६५॥

**( १६६ ) ( वि० ) सञ्चिन्त्येति** । सञ्चिन्त्य-आलोच्य। केषाम् ?-कषायाणां। किं तत् ?-उदयनिमित्तं-प्रादुर्भावकारणमुपशान्तेर्हेतुः-कारणं स तथा तं च, तयोः परिहारासेवने कार्ये, अयमर्थः-कषायाणामुदयनिमित्तं परिहार्यमुपशान्तिहेतुरासेवनीयः । कथं ?-त्रिकरणशुद्धं यथा भवति कायवाङ्मनोनिर्दोषं, अपिरभ्युच्चय इति ॥१६६॥ **इति भावनाधिकारः ॥९॥**

---

**( १६५ ) ( अव० )—गणशब्दः प्रत्येकमभिसम्बध्यते । नेतारः । तान् [१]कषायारीन् पूर्वं, हतं सैन्यमनायकमिति न्यायात्[२] ॥१६५॥**

**( १६६ ) ( अव० )—सञ्चिन्त्यालोच्य । उदयनिमित्तं=प्रादुर्भावकारणं । उपशान्तेर्हेतुः= कारणं च कषायाणामुदयनिमित्तं परिहार्यमुपशान्तिहेतुरासेवनीयः । [१]त्रिकरणशुद्धं कायवाङ्मनो-निर्दोषं, अपिरभ्युच्चये ॥ इति भावनाधिकारः ॥१६६॥**

**सेव्यः क्षान्तिर्मार्दवमार्जवशौचे च संयमत्यागौ ।**
**सत्यतपोब्रह्माकिञ्चन्यानीत्येष धर्मविधिः ॥१६७॥**
**धर्मस्य दया मूलं न चाक्षमावान् दयां समादत्ते[१] ।**
**तस्माद्यः क्षान्तिपरः स साधयत्त्युत्तमं धर्मम् ॥१६८॥**

---

**( १६७ ) टीका—सेव्यः क्षान्तिरित्यादि** । सेव्योऽनुष्ठेयो दशविधो धर्मः । तान् दश भेदान् नामग्राहमाचष्टे। क्षान्तिः '[१]क्षमूषु सहने' क्षमितव्याः सोढव्याः आक्रोशप्रहारादयः । मार्दवं मानविजयस्तद्वृत्तापनोदः । आर्जवं ऋजुता यथाचरिताख्यायिता । [२]शुचेर्भावः शौचम्। अलोभता विगततृष्णत्वम् । संयमः पञ्चाश्रवादिविरमणं पृथिवीकायसंयमादिर्वा सप्तदशभेदः । [३]बान्धवधनादित्यागः प्रासुकैषणीयं वा साधुभ्यो भक्तपानवस्त्रपात्रादिदानं, यतिरेव ददाति स वा[४] त्यागः । [५]सत्यं चतुर्विधम् । तपो द्वादशभेदं अनशनादिकम् । ब्रह्म अब्रह्मणो निवृत्तिः[६] मैथुननिवृत्तिरित्यर्थः । अकिञ्चनस्य भाव आकिञ्चन्यं निष्परिग्रहता, धर्मोपकरणादृते नान्यत् किञ्चन परिग्राह्यम् । एष धर्मस्य विधिर्भेद इत्यर्थः ॥१६७॥

**( १६८ ) टीका—**क्षान्तेः प्राधान्यं प्रदर्शनायाह[१]**—धर्मस्य दया मूलमित्यादि** । योऽयं दशप्रकारो धर्मस्तस्य[२] दया मूलम् । दया प्राणिनां रक्षाऽहिंसेत्यर्थः। सा मूलं प्रतिष्ठा, धर्मस्याहिंसादिलक्षणत्वात् । प्राणिप्राणरक्षणार्थश्चाशेषव्रतोपदेशः। न चाक्षमावान् दयां

---

**( १६७ ) ( वि० )** अथ दशविधधर्म उद्देशनिर्देशाभ्यामभिधीयते**—सेव्य इति** । सेव्यः-आसेवनीयः एष धर्मविधिः-क्षान्त्यादिपुण्यविधानं, कथमिति ?, एवंप्रकारः, क्षान्तिः-कोपाभावः मार्दवं-मानविजयः । आर्जवं च शौचं च ते तथा, तत्रार्जवं-मृदु(ऋजु)ता शौचं-संयमनिर्लेपता अदत्तादानपरिहारो वा । चः समुच्चये । संयमत्यागौ, तत्र संयमः-सप्तदशभेदः त्यागस्तु द्रव्यभावग्रन्थत्यजनं ततो द्वन्द्वस्तौ सेव्यौ, सत्यादिपदचतुष्टयस्येतरेतरयोगः, तत्र सत्यं-मृषावर्जनं, तपः-अनशनादि, ब्रह्म-मैथुननिवृत्तिः, आकिञ्चन्यं-निष्परिग्रहत्वं, एतानि सेव्यानीति ॥१६७॥

**( १६८ ) ( वि० )** क्षान्तेः प्राधान्यदर्शनार्थमाह**—धर्मस्येति** । धर्मस्य दशप्रकारस्य दया मूलं । न चाक्षमावान् दयां समाधत्ते-करोति । तस्माद् यः क्षान्तिपरः स साधयत्युत्तमं

---

**( १६७ ) ( अव० )—[१]क्षान्तिः=कोपाभावः । मार्दवं=मानविजयः । आर्जवं=ऋजुता । शौचं संयमं प्रति निर्लेपता अदत्तादानपरिहारो[२] वा । चः समुच्चये । संयमः सप्तदशभेदः । त्यागो द्रव्यभावग्रन्थत्यजनम् । [३]सत्यं=मृषावर्जनम् । तपोऽनशनादि । ब्रह्म=मैथुनविरतिः । आकिञ्चन्यं=निःपरिग्रहता । एष दशविधः ॥१६७॥**

**( १६८ ) ( अव० )—क्षमाप्रधानः ॥१६८॥**

**विनयायत्ताश्च गुणाः सर्वे विनयश्च मार्दवायत्तः ।**
**यस्मिन् मार्दवमखिलं स सर्वगुणभाक्त्वमाप्नोति ॥१६९॥**

**नानार्जवो विशुद्ध्यति न धर्ममाराधयत्यशुद्धात्मा ।**
**धर्मादृते न मोक्षो मोक्षात्परं सुखं नान्यत् ॥१७०॥**

---

समादत्ते। [३]अविद्यमानक्षमः, नासौ दयां समादत्ते, न सङ्गृह्णातीति । क्रोधाविष्टो हि न कश्चिदपेक्षते चेतनमचेतनं [४]च ऐहिकमामुष्मिकं [५]च [६]प्रत्यपायम्। तस्माद्यः क्षमाप्रधानः क्षान्त्या वा प्रकृष्टः स साधयत्याराधयति दशलक्षणमुत्तमं धर्ममिति ॥१६८॥

**( १६९ ) टीका—**मार्दवमधिकृत्याह—**विनयायत्ताश्चेत्यादि** । विनयो ज्ञानदर्शन-चारित्रोपचाराख्यः । तदायत्ता गुणाः [१]सर्वे मूलोत्तराख्याः । स च विनयो मार्दवायत्तः । मार्दवं च मानविजयः । गर्वे निराकृते उपचारविनयोऽभ्युत्थानाञ्जलिप्रग्रहादिकः शक्यः कर्तुम् । यत्र च [२]पुरुषे मार्दवमखिलं जात्यादिमदाष्टकनिराकारि स सर्वगुणभाग्भवति। ज्ञानदर्शनचारित्र-साध्याः सर्वे गुणास्तत्र [३]सन्तीति । तस्मान्मानं निराकृत्य मार्दवमासेवनीयम् ॥१६९॥

**( १७० ) टीका—**मायामधिकृत्याह—**नानार्जव इत्यादि** । माया शाठ्यं कौटिल्यं, तत्प्रतिपक्षमार्जवं ऋजुता यथा चेष्टितं तथाख्याति, न किञ्चिदपह्नुते । यस्तु तथा न करोति, स खल्वनार्जवः, तस्य च शुचिर्नास्ति । तस्माद्यथाख्यातापराधप्रतिपन्नप्रायश्चित्तस्य शुद्धिर्जायते। तद्विपरीतस्य न जातुचिच्छुद्धिः । न चाशुद्धात्मा धर्ममाराधयति क्षमादिकम् ।

---

धर्ममिति ॥१६८॥

**( १६९ ) ( वि० )** मार्दवमाह—**विनयायत्ता इति** । विनयायत्ता-गुर्वभ्युत्थानाद्यधीना गुणा-ज्ञानादयः सर्वे, विनयश्च मार्दवायत्तो-मृदुत्वाधीनो, यस्मिन् मार्दवमखिलं-समस्तं स प्राणी सर्वगुणभाक्त्वं-समस्तज्ञानाद्याश्रयतामाप्नोति-लभते, तस्मान्मार्दवं कार्यमिति ॥१६९॥

**( १७० ) ( वि० )** आर्जवमाह—**नानार्जव इति** । यत् नानार्जवो-मायावान् विशुध्यति, न च धर्ममाराधयति-निष्पादयत्यशुद्धात्मा-सङ्क्लिष्टजीवो, धर्मादृते न मोक्षो-धर्मं विना न मुक्तिः, [१]ऋतेः अत्रापि योगात् मोक्षादृते परमं सुखं नास्ति-न विद्यतेऽन्यदिति ॥१७०॥

---

**( १६९ ) ( अव० )—गुर्वभ्युत्थानाद्यधीना गुणा ज्ञानादयः । यस्मिन्=पुरुषे ॥१६९॥**

**( १७० ) ( अव० )—यथा चेष्टितं [१]तथा ख्याति । तस्य च शुद्धिर्नास्ति ॥१७०॥**

**यद् द्रव्योपकरणभक्तपानदेहाधिकारकं शौचम् ।**
**तद् भवति भावशौचानुपरोधाद्यत्नतः कार्यम् ॥१७१॥**

---

न चामुं धर्ममन्तरेण [१]मोक्षावाप्तिः । न च मोक्षावाप्तिमन्तरेणैकान्तिकात्यन्तिकादिसुखलाभ इति । तस्मादृजुना भवितव्यमालोचनादाविति ॥१७०॥

**( १७१ ) टीका**—शौचमधिकृत्याह—**यद्द्रव्योपकरणेत्यादि** । द्विविधं शौचं द्रव्यभावभेदात् । तत्र द्रव्यशौचं [१]बाह्यम् । द्रव्यम् सचेतनमचेतनं वा शैक्षादि ।

**अट्ठारस पुरिसेसु वीसं इत्थीसु दस नपुंसेसु ।**
**पव्वावणे अणरिहा [२]अणला अह एत्तिया भणिया ॥१॥**
**( अष्टादश पुरुषेषु विंशतिः स्त्रीषु दश नपुंसकेषु ।**
**प्रव्राजनेऽनर्हाः अनला अथैतावन्तो भणिताः ।)**

इत्यादि । सदोषत्वात्त्याज्यम् । उपकरणमुपकारि ज्ञानादीनाम् । तच्चोद्गमादिशुद्धं शुचि भवति, अन्यथाऽशुचीति । तथा भक्तपानमप्युद्गमादिदोषरहितं शुचि, अन्यथाऽशुचीति । देहशौचं तु पुरीषाद्युत्सर्गपूर्वकं [३]निर्लेपनं निर्गन्धं चेति । एतानि प्रयोजनान्यधिकृत्य यत्प्रवृत्तं [४]देहाधिकारकं तद्भवतीति तत् कार्यं कर्तव्यं भवति । भावशौचस्यानुपरोधादबाधनात् । यत्नतः[५] परीक्ष्य सचेतनमितरद्वा उपकरणादि मलप्रक्षालनादिष्वपि प्रवचनोक्तेन

---

**( १७१ ) ( वि० )** शौचमाह—**यदिति** । यच्छौचं द्रव्योपकरणभक्तपानदेहाधिकारकं तद्भवति कार्यं भावशौचानुपरोधादिति सम्बन्धः । तत्र द्रव्यरूपं-पुद्गलात्मकं तच्च तदुपकरणं च-रजोहरणादि तच्च भक्तपाने च देहश्च तथा, तानाश्रित्याधिकारो-गोचरो यस्य तत्तथा । अयमत्र भावार्थः-एतान्युपकरणादीनि समस्तान्यशुच्यादिना रुधिरादिना (वा) खरण्टितानि प्रक्षालनीयानि, पूर्वयतिवरैरेवं कृतत्वाद्, भावशौचानुपरोधात्-संयमाक्षतेरिति ॥१७१॥

---

**[१]( १७१ )( अव० )—द्रव्यं सचेतनाचेतनादि शिष्यादि । सचेतनानि अठ्ठारसपुरिसे० इत्यादौ । अचेतनानि रजोहरणाहारादीनि । एतावता यत्किञ्चिद् द्रव्यरूपं रजोहरणपात्रादिभक्तपानचतुर्विधाहाररूपाः देहः शरीरमेते चत्वारोऽपि विकृत्यन्नपानसंश्लिष्टाः । अविसंसृष्टाः । रुधिराद्यवयवस्पृष्टाः । अधिकारो विषयो गोचरो यस्य तत् । सर्वेषु कार्येषु निरुपलेपतायाः । क्रियाया अनुपरोधात्= अपीडनात् ॥१७१॥**

**पञ्चाश्रवाद्विरमणं पञ्चेन्द्रियनिग्रहः[१] कषायजयः ।**
**दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः ॥१७२॥**

**बान्धवधनेन्द्रियसुखत्यागात् त्यक्तभयविग्रहः साधुः ।**
**त्यक्तात्मा निर्ग्रन्थस्त्यक्ताहङ्कारममकारः ॥१७३॥**

---

विधिनाऽनुष्ठेयम् । भावशौचं तु निर्लोभता । [६]लोभकषायेण रञ्जितो हि दुःप्रक्षालयति, तत्प्रक्षालनं च परमार्थतो भावशौचमिति ॥१७१॥

**( १७२ ) टीका—**संयममधिकृत्याह-**पञ्चाश्रवादित्यादि** । सम्यगुपरमः पापस्थानेभ्यः संयमः सप्तदशप्रकारः । पञ्चाश्रवाः प्राणातिपातमृषाभाषणादत्तादानमैथुनपरिग्रहाः कर्मादानहेतवस्तेभ्यो विरमणं[१] संयमः । पञ्चेन्द्रियाणि स्पर्शनादीनि तेषां निग्रहः नियमनं निरोधः । शब्दादिषु गोचरप्राप्तेष्व[२]रक्तद्विष्टता माध्यस्थ्यम् । कषः संसारः कष्यते यत्र जीवः स्वकृतैः कर्मभिः कदर्थ्यते पीड्यते तस्य आयाः प्राप्तिहेतवः क्रोधादयश्चत्वारस्तेषां जयोऽभिभव उदयनिरोधः, उदितानां वा विफलतापादनम् । दण्डा मनोवाक्कायाख्याः । अभिद्रोहाभिमानेर्ष्यादिलक्षणो मनोदण्डः । हिंस्रपरुषानृतादिलक्षणो वाग्दण्डः । धावनवल्गनप्लवनादिरूपः कायदण्डः । एभ्यो विरतिर्निवृत्तिः । एवमेष संयमः सप्तदशभेदो भवति। आर्षे त्वन्येन क्रमेणायमेवार्थो निबद्धः । पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुःपञ्चेन्द्रियेषु संयमः । तथा पुस्तकाद्यपरिग्रहः अजीवकायसंयमः। प्रेक्षोपेक्षाप्रमार्जनापरिष्ठापनसंयमः मनोवाक्कायसंयम इति ॥१७२॥

**( १७३ ) टीका—**त्यागमधिकृत्याह**—बान्धवेत्यादि** । बान्धवाः स्वजनकाः, धनं

---

**( १७२ ) ( वि० )** संयममाह**—पञ्चेति** । पञ्चभ्यः प्राणातिपातादिभ्यः आश्रवः-कर्मग्रहणं तस्माद्विरमणं-विरतिः, पञ्चेन्द्रियनिग्रहः कषायजयः दण्डत्रयविरतिश्चेति पदत्रयमपि सुगमम्। संयमः सप्तदशभेदः, पृथिव्यादिरक्षणरूपो वेति ॥१७२॥

**( १७३ ) ( वि० )** त्यागमाह**—बान्धवेति** । बान्धवाः-स्वजनाः धनं-कनकादि इन्द्रियसुखं-शब्दादिसातं तानि तथा तेषां त्यागः । तस्मात्किमित्याह-साधुः-यतिर्भवतीति शेषः ।

---

**( १७२ ) ( अव० )—[१]पृथिव्यादिरक्षणरूपो वा संयमः ॥१७२॥**

**( १७३ ) ( अव० )—[१]परिहृतभीतिकलहः । त्यक्तो विषयादिविनिवृत्तेरात्मा येन ।**

**अविसंवादनयोगः कायमनोवागजिह्मता चैव ।**
**सत्यं चतुर्विधं तच्च जिनवरमतेऽस्ति नान्यत्र ॥१७४॥**

---

हिरण्यसुवर्णादि, इन्द्रियाणि स्पर्शनादीनि, तद्विषयं सुखम् । एषां त्यागादिन्द्रियसम्बन्धी सुखत्यागः, प्राप्तेषु विषयेषु स्पर्शादिषु माध्यस्थ्यम् । त्यक्तभयविग्रहः साधुः, भयमिह-परलोकादादानादि सप्तविधं, विग्रहः शरीरं तस्य त्यागो निष्प्रतिकर्मशरीरता, [1]कलह-द्वन्द्वादिर्वा विग्रहः । त्यक्तात्मा [2]असंयमपरिणतिलक्षण आत्मा त्यक्तः । अष्टविधग्रन्थविजय-प्रवृत्तो निर्ग्रन्थः । त्यक्ताहङ्कारममकार इति अरक्तद्विष्ट इत्यर्थः ॥१७३॥

**( १७४ ) टीका—**सत्यमधिकृत्याह—**अविसंवादेत्यादि** । विसंवादनमन्यथास्थित-स्यान्यथाभाषणं गामश्वं अश्वं वा गामिति भाषते, पिशुनो [1]चान्यथा चान्यथा च व्युद्ग्राह्य प्रीतिच्छेदनं करोति विसंवादयति । विसंवादनेन योगः सम्बन्धः न विसंवादनयोगः अविसंवादनयोगः, सत्यं यथादृश्यमानवस्तुभाषणम् । कायेनाजिह्मता जिह्मः कुटिलो मलीमसः, कायेनान्यवेषधारितया प्रतारयति । न जिह्मोऽजिह्मः द्वितीयः सत्यभेदः । मनसा वाऽजिह्मता सत्यं, मनसा प्रागालोच्य भाषते करोति वा, प्रायः न तादृगालोचयति जिह्मेन येन परः प्रतार्यते, एष तृतीयो भेदः । वागजिह्मता च सत्यं, जिह्मा वाक् सद्भूतनिह्नवः असद्भूतोद्भावनं कटुकपरुषसावद्यादि चेति चतुर्थो भेदः । एतच्च जैनेन्द्र एव मते, नान्यत्र सत्यमिति ॥१७४॥

---

कीदृशः ?-त्यक्तभयविग्रहः-परिहृतभीतिकलहः, तथा त्यक्तो-विषयादिपरिहारेण परिहृत आत्मा-स्वदेहो येन स तथा, निर्ग्रन्थः-परिहृतद्रव्यः, तथा त्यक्ताहङ्कारममकार इति प्राग्वदिति ॥१७३॥

**( १७४ ) ( वि० )** सत्यमाह—**अविसंवादनेति** । विसंवादनम्-अन्यथा स्थितस्यान्यथात्व-भाषणं, गां अश्वं अश्वं गामिति भाषते, तेन योगः-सम्बन्धो, न विसंवादनयोगोऽविसंवादनयोगः । सत्यं-यथादृश्यमानवस्तुभाषणं, तथा कायमनोवाचामजिह्मता-अकुटिलतेति समासः । सत्यं चतुर्विधं जिनवरमतेऽस्ति नान्यत्रेति व्यक्तम् ॥१७४॥

---

**निर्लोभात्मेति भावः ॥१७३॥**

**( १७४ ) ( अव० )—[1]यद्यस्याग्रे प्रतिपन्नमङ्गीकारादिना तत्तथैव सम्पादनमवि-संवादनयोगः । अजिह्मता=अवक्रता । सत्यं चतुर्भेदं यथादृश्यमानवस्तुभाषणम्[2]( १ ) । तथा काय( २ )मनो( ३ )वाचाम् ( ४ ) अकुटिलता ॥१७४॥**

**अनशनमूनोदरता वृत्तेः सङ्क्षेपणं रसत्यागः ।**
**कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम् ॥१७५॥**
**प्रायश्चित्तध्याने वैयावृत्त्यविनयावथोत्सर्गः ।**
**स्वाध्याय इति तपः षट्प्रकारमभ्यन्तरं भवति ॥१७६॥**

---

**( १७५ ) टीका—**तपः सम्प्रत्युच्यते—**अनशनमित्यादि** । तत्रानशनं चतुर्थभक्तादि षण्मासान्तं, तथाऽपरं भक्तप्रत्याख्यानम्, इङ्गिनीमरणं, पादपोपगमनमिति । ऊनोदरता द्वात्रिंशतः कवलेभ्यो यथाशक्ति न्यूनयत्याहारं यावदष्टकवलाहार इति । वृत्तिर्वर्तनं भिक्षा तस्याः सङ्क्षेपणं परिमितग्रहणम् दत्तिभिर्भिक्षाभिश्च । रसत्यागः रसाः क्षीरदधिनवनीत-घृतगुडादिप्रभृतयो विकृतयस्तासां त्यागः । कायक्लेशः कायोत्सर्गोत्कटुकासनातापनादिः । [१]संलीनता संलीन आगमोपदेशेन, तद्भावः संलीनता इन्द्रियनोइन्द्रियभेदात् द्विधा, इन्द्रियैः संलीनः संहृतेन्द्रियव्यापारः कूर्मवत्, यथाङ्गानि स्वात्मन्याहरति कूर्मः, [२]तथेन्द्रियाणि आत्मन्याहृत्य तिष्ठति साधुः रागद्वेषहेतूभ्यः शब्दादिभ्यो निवर्त्य व्यवस्थापितेन्द्रियः इन्द्रियसंलीनः । नोइन्द्रियं मनः क्रोधादयश्च । आर्तरौद्रध्यानरहिते मनसि नोइन्द्रियसंलीनः । क्रोधादीनामुदयनिरोधः उदयप्राप्तानां च वैफल्यापादनं नोइन्द्रियसंलीनता। षोढा विभक्तं बाह्यं तपः परोपलक्ष्यत्वाद्बाह्यमुच्यते ॥१७५॥

**( १७६ ) टीका—**[१]अभ्यन्तरतपोनिरूपणायाह—**प्रायश्चित्तेत्यादि** । प्रायो बाहुल्येन

---

**( १७५ ) ( वि० )** तत्र देशतोऽनशनं चतुर्थभक्तादि षण्मासान्तं, तथा अपरं सर्वतो भक्तप्रत्याख्यानमिङ्गिनीमरणं पादपोपगमनं चेति । ऊनोदरता-द्वात्रिंशत्कवलेभ्यो यथाशक्ति न्यूनयत्याहारं यावदष्टकवलाहारः २, अत्र गाथा-

**अप्पाहार ८ अवड्ढा[१] १२ दुभाग १६ पत्ता २४ तहेव किंचूणा ३१ ।**
**अट्ठदुवालससोलसचउवीस तहेक्कतीसा य ॥**
**( अल्पाहारापार्धद्विभागप्राप्ताः तथैव किञ्चिदूनाः ।**
**अष्ट-द्वादश-षोडश-चतुर्विंशतयस्तथैकत्रिंशच्च ॥ ) ( अट्ठारस सहससीलंगरह गाहा-४ )**

वृत्तिः-वर्तनं भिक्षा तस्याः सङ्क्षेपणं-मयैतावत्सु गृहादिषु भिक्षा अद्य ग्राह्या ३ । रसत्यागो-दुग्धादिपरिहारः ४। कायक्लेशः-केशोत्पाटनादिः ५। संलीनता-इन्द्रियनोइन्द्रियसंवृतत्वं ६। बाह्यं तपः प्रोक्तम् इति ॥१७५॥

**( १७६ ) ( वि० )** अथाभ्यन्तरमाह—**प्रायश्चित्तेति** । प्रायश्चित्तं-कृतातीचारस्यालोचनादिदानं

---

**( १७५ ) अव०—[१]इन्द्रियसंलीनता, नोइन्द्रियसंलीनता ॥१७५॥**

**दिव्यात्कामरतिसुखात् त्रिविधं त्रिविधेन विरतिरिति नवकम् ।
औदारिकादपि तथा तद् ब्रह्माष्टादशविकल्पम् ॥१७७॥**

[२]चित्तविशोधनात् प्रायश्चित्तमालोचनादि [३]दशविधं कृतातीचारमलप्रक्षालनार्थम्। एकाग्रचित्त-निरोधो ध्यानमामुहूर्तात् । तत्रार्तरौद्रे व्युदसनीये । आर्तं चतुर्विधं अमनोज्ञविषयसम्प्रयोगे [४]तद्विगमार्थं चित्तनिरोधः । शिरोरोगादिवेदनायाश्च विप्रयोगार्थो मनोनिरोधः । मनोज्ञविषय-सम्प्रयोगे[५]ऽविप्रयोगार्थो मनोनिरोधः । चन्दनो[६]शीरादिजनितसुखवेदनायाश्चाविप्रयोगार्थश्चित्त-निरोधः आर्तध्यानम् । रौद्रं हिंसानुबन्धि [७]अनृतानुबन्धि स्तेयानुबन्धि विषयसंरक्षणं[८] चेति। एतयोस्त्यागस्तपः । धर्म्यं शुक्लं च ध्यानमनुष्ठेयम् । धर्मादनपेतं धर्म्यं चतुर्विधम्—आज्ञा-विचयमपायविचयं विपाकविचयं संस्थानविचयं चेति । शुक् शोको दुःखं शारीरं मानसं चेति तल्लुनाति विच्छेदयतीति शुक्लम्। पृषोदरादिपाठाच्छब्द[९]संस्कारः। तच्चतुर्विधं—पृथक्त्ववितर्कं सविचारं, एकत्ववितर्कमविचारं, सूक्ष्मक्रियमप्रतिपाति, व्युपरतक्रियमनुवर्तीति[१०] । व्यापृतभावो वैयावृत्त्यम्, आचार्योपाध्यायादीनां भक्तपानवस्त्रपात्रादिना दशानामुपग्रह-शरीरशुश्रूषा चेति । विनीयते येनाष्टविधं कर्म स विनयः ज्ञानदर्शनचारित्रोपचारभेदः । तत्रोपचारविनयो विनयार्हेषु अभ्युत्थानमासनदानाञ्जलिप्रग्रह[११]दण्डकग्रहणचरणप्रक्षालनमर्दनादि । व्युत्सर्गोऽतिरिक्तोपकरणसंसक्तभक्तपानादेरुज्झनम् । अभ्यन्तरस्य[१२] मिथ्यादर्शनकषायादेरपा-करणम् । स्वाध्यायः पञ्चधा—वाचना प्रच्छना अनुप्रेक्षा आम्नायः धर्मोपदेशश्च । तत्र वाचना आलापकदानं, सञ्जातसन्देहप्रच्छनं[१३] अनुप्रेक्षा मनसा परिवर्तनमागमस्य, आम्नायो-[१४]ऽनुयोगकथनं, धर्मोपदेश आक्षेपणी विक्षेपणी संवेदनी निर्वेदनी चेति कथा धर्मोपदेशः । एवमभ्यन्तरमपि षोढा तपः ॥१७६॥

**( १७७ ) टीका—**सम्प्रति ब्रह्मचर्यप्रतिपादनायाह—**दिव्यात्कामेत्यादि** । दिव्यं भवनपतिव्यन्तरज्योतिष्कविमानवासिदेव्यः, ताभ्यो विरतिस्त्रिविधं त्रिविधेनेति । मनसा न

---

दशधा १। ध्यानं चतुर्द्धा, तत्रार्तरौद्रत्यागेन धर्मशुक्लध्यानविधानं, ततः पदद्वयस्य द्वन्द्वः २। वैयावृत्त्यविनयौ गुरुभक्तदानादि-गुर्वभ्युत्थानादिकरणरूपौ ३-४। तथोत्सर्गः-कायोत्सर्गः ५। स्वाध्यायो-वाचनादिः पञ्चधा ६। इति तपः षट्प्रकारमाभ्यन्तरं भवतीति ॥१७६॥

**( १७७ ) ( वि० )** ब्रह्म प्राह—**दिव्यादिति** । दिव्यात्-भवनपत्यादिदेवीसम्भवात् कामरतिसुखात्-मदनासक्तिसातात्, त्रिविधं त्रिविधेन-मनसा न करोति, न कारयति, नानुमन्यते, एवं

---

**( १७७ ) अव०—दिव्याद्=भवनपत्यादिदेवीसम्भवात् । मदनासक्तिसातात् । निवृत्तिः ॥१७७॥**

**अध्यात्मविदो मूर्च्छां परिग्रहं वर्णयन्ति निश्चयतः ।**
**तस्माद् वैराग्येप्सोराकिञ्चन्यं परो धर्मः ॥१७८॥**

**दशविधधर्मानुष्ठायिनः सदा रागद्वेषमोहानाम् ।**
**दृढरूढघनानामपि भवत्युपशमोऽल्पकालेन ॥१७९॥**

---

करोति न कारयति नानुमन्यते। एवं वाचा कायेन चेति ।[१] एते नवभेदाः। औदारिकं मानुष्यतिर्यक्स्त्रीषु । तत्र मनोवाक्कायैः कृतकारितानुमतिभिश्च विरतिरिति नवकम् । तदेतद् ब्रह्माष्टादशभेदं भवति ॥१७७॥

**( १७८ ) टीका—**आकिञ्चन्यमधिकृत्याह—**अध्यात्मेत्यादि** । अध्यात्मशब्देनात्मन्येव व्यापारः, 'कथमयमात्मा बध्यते कथं वा मुच्यते इति' [१]तदध्यात्मं विदन्तीत्यध्यात्मविदः । ते [२]विदितपराः परिग्रहं मूर्छालक्षणं वर्णयन्ति । मूर्छा गार्द्ध्यम् । निश्चयनयाभिप्रायेणात्मनः प्रतिविशिष्टः परिणामः परिग्रहशब्दवाच्यः । यस्मादेवंलक्षणकः परिग्रहस्तस्माद्वैराग्यमा[३]सुमिच्छता । आकिञ्चन्यं परो धर्मः, न क्वचिन्मूर्छा कर्तव्येति यावत् ॥१७८॥

**( १७९ ) टीका—**धर्मानुष्ठाने फलं दर्शयति—**दशविधेत्यादि** । दशप्रकारः [१]क्षमादिको धर्मः तदनुष्ठायिनः तदासेविनः । सदैवानवरतम् । रागद्वेषमोहानामुपशमो भवति।

---

वाचा कायेन चेति विरतिरिति नवकम्, औदारिकादपि-मानुषतिर्यक्स्त्रीसम्भवात् विरतिरिति नवकं, तथा तद् ब्रह्माष्टादशविकल्पमिति ॥१७७॥

**( १७८ ) ( वि० )** आकिञ्चन्यमाह—**अध्यात्मेति** । अध्यात्मम्-अध्यात्मक्रियामागमं वा विदन्ति-जानन्तीत्यध्यात्मविदः-तीर्थकरादयो मूर्च्छां-गृद्धिं परिग्रहं वर्णयन्ति-प्रतिपादयन्ति निश्चयतः-परमार्थतः, तस्मात्-ततः कारणाद्वैराग्येप्सोः-विरागताभिलाषिणः साधोराकिञ्चन्यं-मूर्च्छारूपपरिग्रहपरिहारस्वभावं परः-प्रधानो धर्म इति ॥१७८॥

**( १७९ ) ( वि० )** अथास्य धर्मस्य फलमार्याद्वयेनाह—**दशविधेति** । **ममकारेति** । दशविधधर्मानुष्ठायिनः-क्षान्त्यादिदशधाश्रेयःपरिपालकस्य सदा-सर्वदा रागदोषमोहानां कृतद्वन्द्वानां

---

**( १७८ ) ( अव० )—[१]निश्चयनयाभिप्रायेण वैराग्यमिच्छतः । आकिञ्चन्यं मूर्च्छारूपपरिग्रह परिहारस्वभावम् । परः प्रधानः ॥१७८॥**

**( १७९ ) अव०—[१]सदासेविनः । दृढानां=[२]वज्रदुर्भेद्यानां रूढानां=चिरकालावस्थितिप्राप्तस्थैर्याणां घनानां=बहलानां एवंविधानामपि ॥१७९॥**

**ममकाराहङ्कारत्यागादतिदुर्जयोद्धतप्रबलान् ।**
**हन्ति परीषहगौरवकषायदण्डेन्द्रियव्यूहान् ॥१८०॥**
**प्रवचनभक्तिः श्रुतसम्पदुद्यमो व्यतिकरश्च संविग्नैः ।**
**वैराग्यमार्गसद्भावभावधीस्थैर्यजनकानि ॥१८१॥**

---

एते च संसारभ्रमणस्य मूलं दृढं रूढा घनाश्च सुष्ठु दृढं रूढा जाता घना बहुलाः प्रभूतकर्मांशाः । अथवा यथासङ्ख्यं दृढो रागः, रूढो द्वेषः, घनो मोहः । एवंविधानामपि स्वल्पेनैव कालेन भवत्युपशमः क्षयो वा ॥१७९॥

**( १८० ) टीका—ममकारेत्यादि ।** ममकारो माया लोभश्च । अहङ्कारो[2] मानः क्रोधश्च । तयोर्ममकाराहङ्कारयो[1]स्त्यागात् । किं भवतीत्याह—अतिदुर्जयोद्धतप्रबलान् अतीव दुर्जयानुद्धतांश्च सावष्टम्भान् प्रकृष्टफ[3]लांश्च । हन्ति विनाशयति । परीषहगौरवकषाय-दण्डेन्द्रियव्यूहान् । परीषहाः क्षुत्पिपासादयः, गौर[4]वमृद्ध्यादिः, कषायाः क्रोधादयः, दण्डाः मनोवाक्कायाख्याः, इन्द्रियाणि स्[5]पर्शनादीनि, एषां व्यूहाः समूहाः । चक्रव्यूहगरुडव्यूहादिवत्[6] व्यूहा ग्राह्याः । तान् हन्ति विजयतेऽभि[7]भवतीत्यर्थः ॥१८०॥

**( १८१ ) टीका—**यथा वैराग्यमार्गे स्थैर्यं भवति तथा च यतत इत्याह—**प्रवचन-भक्तिरित्यादि** । प्रोच्यन्ते येन जीवादयस्तत्प्रवचनम्, तत्र भक्तिः सेवा तदनुध्यानपरता सङ्घभट्टारको वा प्रवचनं प्रवक्तीति । श्रुतसम्पदि उद्यम उत्साहः श्रुतमागमस्तस्य सम्पद्

---

दृढरूढघनानां, तत्र दृढा-दुर्भेदाः रूढाः-प्राप्तस्थैर्याः घना-बहुलाः तेषामपि भवत्युपशमोऽल्प-कालेनेति व्यक्तं, साधोरिति प्रकृतमिति ॥१७९॥

**( १८० ) ( वि० )** हन्तीति क्रिया । कः ?-साधुरिति शेषः । कान् ?-परीषहादीन् कृतद्वन्द्वान् पूर्वोक्तस्वरूपान्। कीदृशान् ?-अतिदुर्जयान्-अतीव दुःखाभिभवनीयान् । उद्धताः-सावष्टम्भाः प्रबलाः-प्रकृष्टसामर्थ्याः, ततः पदत्रयस्य कर्मधारयः तान् । कुतः ?-ममकाराहङ्कार-त्यागात् पूर्वव्याख्यातादिति ॥१८०॥

**( १८१ ) ( वि० )** यथा वैराग्यस्थैर्यं स्यात्तथा यतेतेत्याह—**प्रवचनेति** । प्रवचनभक्तिः-चतुर्विधसङ्घप्रीतिः । तथा श्रुतसम्पदि-विशिष्टागमसम्पत्तावुद्यमः-पठनादावुत्साहः स तथा । तथा

---

**( १८० ) ( अव० )—माया लोभश्च, मानः क्रोधश्च, उद्धताः सावष्टम्भाः, प्रबलाः प्रकृष्टसामर्थ्याः, विनाशयति [1]कः ? साधुरिति योगः ॥१८०॥**

**( १८१ ) ( अव० )—व्यतिकरः सम्पर्कः, विरक्तता पूर्वमहर्षिसमाचीर्णक्रियाकलापपरता, सद्भावा= जीवादयः एतानि धर्मस्थैर्यजनकानि ॥१८१॥**

**[1]आक्षेपणीं विक्षेपणीं विमार्गबाधनसमर्थविन्यासाम् ।**
**श्रोतृजनश्रोत्रमनःप्रसादजननीं यथा जननी ॥१८२॥**

उपचयः अपूर्वमपूर्वमधीते प्रवचनम् । व्यतिकरश्च संविग्नैः संविग्नाः संसारभीरवः तैः सह सम्पर्को यथोक्तक्रियानुष्ठायिभिर्व्यतिकरः संसर्गः । एभिर्वैराग्यमार्गस्थैर्यं भवति । न केवलं [1]वैराग्यमार्गे सद्भावविषया बुद्धिस्तस्याश्च भवति स्थैर्यम् । सद्भावा जीवादयः । एते च यथा भगवद्भिरुक्तास्तथेति स्थिरीभवति बुद्धिः । भावः क्षयोपशमजं दर्शनादि भगवत्सु वा तीर्थकृत्सु साधुषु वा 'एते वन्दनीयाः' इति धीः, [2]स्थैर्यं..........सा धीः । धियः स्थैर्यं जनयन्त्येतानीत्यर्थः ॥१८१॥

**( १८२ ) टीका—**एतेष्वेव [1]च धीस्थैर्यमिच्छता चतुर्विधा धर्मकथाभ्यसनीयेत्याह—**आक्षेपणीमित्यादि** । आक्षिपत्यावर्जयत्यभिमुखीकरोति या [2]सात्र आक्षेपणी कथा शृङ्गारादिप्राया । विक्षिपति भोगाभिलाषाद्या कामभोगेषु वैमुख्यमापादयति सा विक्षेपणी । विमार्गः सम्यग्दर्शनादित्रयविपरीतः सुगतादिप्रदर्शितस्तस्य बाधनं दोषवत्त्वख्यापनम् । विमार्गबाधने समर्थः शक्तो विन्यासो रचना यस्याः सा विमार्गबाधनसमर्थविन्यासा । शृणोतीति श्रोता जनो लोकः श्रोतृजनस्तस्य श्रोत्रं मनश्च तयोः प्रसादो हर्षो जन्यते यया सा

व्यतिकरः-परिचयः, कैः सह ?-संविग्नैः-उद्यतविहारिभिः साधुभिः। तथा वैराग्ये-विरागतायां मार्गः-पन्थाः स तथा, तथा सन्तो-विद्यमाना भावा-जीवादिपदार्थाः, भावः-क्षायोपशमादिकः, तत्र धीः-बुद्धिः तस्यां स्थैर्यजनकानि-स्थिरतोत्पादकानि भवन्तीति शेषः ॥१८१॥ **धर्माधिकारः ॥१०॥**

**( १८२ ) ( वि० )** एतानि धर्मस्थैर्यजनकानीच्छता चतुर्विधा धर्मकथा अभ्यसनीयेत्यार्याद्वयेनाह—**आक्षेपणीति । संवेदनीमिति** । आक्षिपति-आवर्जयति-अभिमुखीकरोतीत्याक्षेपणिः कथा, विक्षिपति परदर्शनात् क्षोदाक्षमत्वेन वैमुख्यमापादयति विक्षेपणिः । ततः समाहारद्वन्द्वः । ताम् कुर्यादिति वक्ष्यमाणार्याक्रियायोगः । इति कथाद्वयम्, अत्राणिप्रत्यय औणादिकः । ततः प्रत्यासत्त्या व्याख्या, तत्र विक्षेपण्या **विमार्गे**त्यादिना आक्षेपण्यां **श्रोतृजने**त्यादिना च, ततो विमार्गा-मिथ्यामार्गा मोक्षविपरीतास्तस्य बाधनं-दोषवत्त्वख्यापनं तत्र समर्थः-शक्तो विन्यासो-रचना यस्यास्तां, शृणोतीति श्रोता स चासौ जनश्च श्रोतृजनः तस्य श्रोत्रमनसी-श्रवणचित्ते तयोः प्रसादो-हर्षो जन्यते यया सा तथा । जननी-मातुरिव हितकारिणी सदुपदेशदायिनी स्वापत्यानां, तथैषाऽपि भव्यानामिति भावना।

**( १८२ ) ( अव० )—आक्षिप्यन्ते धर्मं प्रत्यभिमुखाः प्राणिनो यया सा आक्षेपणिः । विक्षिप्यन्ते पराः परदेवादिदोषकथनेन प्रेर्यन्ते प्राणिनो यत्र सा विक्षेपणी । विमार्गा जैनमार्गादन्ये एकान्तमतावलम्बिनस्तेषां बाधने समर्था पदरचना यस्याः सा । [1]श्रोता चासौ जनश्च तस्य श्रोत्रमनसोस्तयोः[2] प्रसादजननी यथा जननी माता [3]चतुर्विधा कथा प्रस्तुता ॥१८२॥**

**[१]संवेजनीं च निर्वेदनीं च धर्म्यां कथां सदा कुर्यात् ।**
**स्त्रीभक्तचौरजनपदकथाश्च दूरात् परित्याज्याः ॥१८३॥**

---

श्रोतृजनश्रोत्रमनःप्रसादजननी। यथा जननी माता हितकारिणी सदुपदेशदायिनी स्वापत्यानां श्रोत्रमनसी प्रसादयति परितोषयति तथैषापीति सम्बन्धः ॥१८२॥

**( १८३ ) टीका—**चतुर्विधा कथा प्रस्तुतेति तच्छेषमाह—**संवेजनीमित्यादि** । [१]सम्यग्वेज्यते भयं ग्राह्यते श्रोता यया सा [२]संवेजनी कथा। नरकगतावुष्णा वेदनाः शीताश्च, न चास्त्यक्षिनिमेषमात्रमपि तस्या वेदनाया विच्छेदः । तत्र च तादृशीं तावत् वेदनामनुभवतां जघन्येन दशवर्षसहस्राण्यायुरुत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणीति । तिर्यग्योनावपि शीतोष्ण-क्षुत्तृष्णातिगुरुभारसन्तापजं दुःखं वाहनताडनदमनच्छेदनादि चेति । मानुषेष्वपि काणखञ्ज-वामनजडबधिरा[३]नयनकुब्जविकृताकृतित्वानि ज्वरकुष्ठशोषकासातिसारहृद्रोगवेदनाश्च । तथा प्रियविप्रयोगाप्रियसम्प्रयोगेप्सितालाभदारिद्र्यदौर्भाग्यदौर्मनस्यवधबन्धनाभियोगादि दुःखानु-भवः। देवेषु चोत्कर्षविशेषदर्शनादात्मनश्च तद्धानेः[४], तथा बलवता देवेनाभियोगादन्ये-ऽल्पपुण्याः करिवृषभाश्वमयूरादिरूपाणि कारिताः सन्तो वाह्यन्ते प्रतिसेव्यन्ते च, तथा च्यवनकाले आयुषि षण्मासावशेषे [५]उत्पत्तिस्थानानि बीभत्सानि विकृताकृतीन्यवधि[६]नाव-लोक्य महदशर्म भजन्ते। अतश्चतुर्विधादपि संसारादुद्विजते मोक्षार्थमेव च घटत इति। निर्वेदं नीयते यया कथया[७] कामभोगेषु सा निर्वेदनी इत्वराः कामभोगा न तृप्तिमा[८]धातुमात्मनः प्रत्यलाः। सदा क्लिन्नश्च स्त्रीव्रणो दुर्गन्धिरशुचिरत्यन्तजुगुप्सितस्तत्र चारतिरित्येवं [९]पामन इव [१०]कण्डूपरिगतः कण्डूयन् मोहोदयात्सुखमिति मन्यते । अतो निर्विण्णः परित्यज्य कामभोगान् निःसङ्गः सिद्धिवध्वाराधने प्रवर्तत इति। एवमेतां संवेजनीं निर्वेदनीं च धर्म्यां कथां सदा कुर्यात्, धर्मादनपेतामित्यर्थः । स्त्र्यादिकथाश्च दूरात् परित्याज्याः । तत्र स्त्रीकथा [११]रूपवयोलावण्यवेषभाषाचङ्क्रमणानि योषितां वर्णयति यया सा स्त्रीकथा । भक्तमाहार-स्तत्कथा, ओदनव्यञ्जनखण्डखाद्यादिपरिनिष्ठान्ता भक्तकथा। चौरा मलिम्लुचा अमुना प्रकारेण

---

अन्ये त्वत्रार्यायां चत्वार्यपि पदानि प्रथमाविभक्त्यन्तानि व्याख्यान्ति। संवेदनीमित्यार्यायां कुर्यादिति क्रियायाः कर्मपदानि योजयन्ति ॥१८२॥

**( १८३ ) ( वि० )** संवेदनीं–नरकादिदुःखकथनेन कामेभ्यो निवर्तनीं ३ निर्वेदनीं–भवत्रासा-न्मोक्षाभिलाषप्रवर्तिकाम् ४ इति चतुर्विधां धर्म्यां कथां कुर्यादिति, स्त्र्यादिकथा ४ दूरतस्त्याज्या इति सुगममिति ॥१८३॥

---

**( १८३ ) ( अव० )—सम्यग् विवेच्यते नरकादिदुःखेभ्यो भयं ग्राह्यते यया सा संवेजनी। निर्वेदं कामभोगेभ्यो यया सा एवमेताम् ॥१८३॥**

**यावत्परगुणदोषपरिकीर्तने व्यापृतं मनो भवति ।**
**तावद्वरं विशुद्धे ध्याने व्यग्रं मनः कर्तुम् ॥१८४॥**

**शास्त्राध्ययने चाध्यापने च सञ्चिन्तने तथात्मनि च ।**
**धर्मकथने च सततं यत्नः सर्वात्मना कार्यः ॥१८५॥**

---

खात्राणि खनन्ति, इष्टकाश्च गालयन्ति, ग्रन्थींश्छिन्दन्ति, तालकान्युद्घाटयन्ति, परं च छलयन्तीति चौरकथा । जनपदकथा सेतुजानि केतुजानि वा सस्यान्यस्मिन् जनपदे जायन्ते, [१२]अस्मिन्नतिप्रभूतो गवां रसः, शालिमुद्गगोधूमादि वोत्पद्यतेऽत्र नान्यत्रेति जनपदकथा । एवमेता मनसापि नालोच्याः किमुत वाचा इति दूरात्परिहार्याः ॥१८३॥

**( १८४ ) टीका—**अपि च—**यावत्परेत्यादि**। यावदिति कालपरिमाणम्। यावन्तं कालं परस्य गुणान् दोषांश्च परिकीर्तयत्युद्घाटयति तत्प्रवणव्यापारो भवति। परदोषोद्घट्टने व्यापारयति व्यग्रं मनः करोति, पैशुन्यात् कर्मबन्धकारि। तावदिति तावन्तं कालं वरं शोभनतरं निर्जरालाभात्। विशुद्धे ध्याने निर्मले [१]धर्मे शुक्ले वा। व्यापृतमक्षणिकं मनः कृतमिति। **ननु** च परगुणोत्कीर्तनं न निन्द्यं ? **उच्यते—**अध्यात्मचिन्तापन्नस्य न तेनापि किञ्चित्प्रयोजनम् ॥१८४॥

**( १८५ ) टीका—**विशुद्धध्यानप्रदर्शनायाह—**शास्त्राध्ययने चाध्यापने चेत्यादि** । शिष्यन्तेऽनेनोन्मार्गप्रस्थिता इति शास्त्रम् । शास्तीति शास्त्रम्, कर्तृव्यापारविवक्षायाम् । तस्याध्ययनमपूर्वग्रहणं पूर्वगृहीतानुचिन्तनं वाचनादानमित्यादि । अध्यापनग्रहणात् सञ्चिन्तने सञ्चिन्त्य पश्चाद्दोषादिविशुद्धमध्यापयति। [१]पर्यालोचने चात्मनि 'किमद्य मया कृतं शास्त्रोक्तं किं वा नो कृतमिति'। दशविधधर्माख्याने च सततं यत्नः सर्वात्मना मनोवाक्कायैः कार्यः ॥१८५॥

---

**( १८४ ) ( वि० )** अपि च—**यावदिति** । यावन्तं कालं परेषां–आत्मव्यतिरिक्तानां गुणदोषयोः प्रतीतयोः परिकीर्तनं तत्र व्यावृतं–व्याकुलं मनः–अन्तःकरणं भवति तावद्वरं, वर्तते इति शेषः । विशुद्धे ध्याने व्यग्रं मनः कर्तुमिति ॥१८४॥

**( १८५ ) ( वि० )** तच्च ध्यानमीदृशम्—**शास्त्राध्ययन इति** । शास्त्राध्ययने च–आचारादिश्रुतपाठे अध्यापने च–पाठने, सञ्चिन्तने, क्व ?–आत्मनि, पदव्यत्ययादात्मनि सञ्चिन्तने आत्मना शास्त्रचिन्तनिकायामित्यर्थः । धर्मकथने–धर्मदेशनायाम् । चकाराः समुच्चयार्थाः । सततम्–अनवरतं, यत्नः–आदरः, सर्वात्मना–सर्वादरेण कार्यः–कर्तव्य इति ॥१८५॥

---

**( १८४ ) ( अव० )—यावत्कालम्, अध्यात्मचिन्तापन्नस्य, न तेनापि परदोषगुणकीर्तन-व्यापारेण किञ्चित्प्रयोजनं, तावत्कालं व्यग्रं व्यापृतम् ॥१८४॥**

**( १८५ ) ( अव० )—आचारादिश्रुतपाठेऽपरेषां पाठने चाद्य मया किं कृतमित्यादि स्वात्मनि [१]सञ्चिन्तने ॥१८५॥**

**शास्विति वाग्विधिविद्भिर्धातुः पापठ्यतेऽनुशिष्ट्यर्थः ।**
**त्रैङिति पालनार्थे विनिश्चितः सर्वशब्दविदाम् ॥१८६॥**

**यस्माद् रागद्वेषोद्धतचित्तान् समनुशास्ति सद्धर्मे ।**
**सन्त्रायते च दुःखाच्छास्त्रमिति निरुच्यते सद्भिः ॥१८७॥**

---

**( १८६ ) टीका—**शास्त्रशब्दव्युत्पत्त्यर्थमाह—**शास्विति वाग्विधिविद्भिरित्यादि** । 'शासू अनुशिष्टौ' इति । वाग्विधिविदश्चतुर्दशपूर्वधराः । पापठ्यत इति अनुशासनेऽत्यर्थं पठ्यत इत्यर्थः । अनेकार्था धातव इत्यन्यस्मिन्नप्यर्थे वृत्तिरस्तीति तद्दर्शयति—**अनुशिष्ट्यर्थ इति** । [१]'त्रैङ् पालने' । विनिश्चितो विशेषेण नियतः । [२]सर्वशब्दविदां प्राकृतसंस्कृतशब्दप्राभृतज्ञानां विनिश्चित इत्यर्थः ॥१८६॥

**( १८७ ) टीका—यस्माद्रागेत्यादि** । शास्त्रनिर्वचनद्वारेण शब्दं संस्कारयति । रागद्वेषाभ्यां उद्धतमुल्बणं चित्तं येषां ते[१] रागद्वेषोद्धतचित्तास्तान्[२] सम्यगनुशास्ति । सद्धर्मे क्षमादिदशलक्षणके[३] सद्धर्मविषयमनुशासनं करोति । सन्त्रायते च दुःखात् शारीरान्मानसाच्च[४] परिरक्षति यस्मात्तस्माच्छास्त्रमभिधीयते । सद्भिर्यथान्यायवादिभिर्निश्चयेनोच्यते निरुच्यत इत्यर्थः ॥१८७॥

---

**( १८६ ) ( वि० )** शास्त्रशब्दस्य व्युत्पत्त्यर्थमाह—**शास्वितीति** । शास्विति–'**शासु अनुशिष्टौ**'इति वाग्विधिविद्भिः–चतुर्दशपूर्वधरैः धातुः पापठ्यते–अत्यर्थं पठ्यत इत्यर्थः । कीदृशः ?–अनुशिष्ट्यर्थः । त्रैङिति पालनार्थे विनिश्चितो–विशेषेण निर्णीतः। केषाम् ?–सर्वशब्दविदां–प्राकृतसंस्कृतादिशब्दज्ञानां, विनिश्चित इति योग इति ॥१८६॥

**( १८७ ) ( वि० )** पूर्वोक्तमर्थं व्यक्तीकुर्वन्नाह—**यस्मादिति** । यस्माद्–यतः कारणाद्रागद्वेषोद्धतचित्तान्–प्रीत्यप्रीतिक्रोडीकृतहृदयान् समनुशास्ति शिक्षयति–'विपरीतमशुभं मा कुरु, शुभं चानवरतं कुरु, ततस्ते धर्मः', इत्यादिरूपां शिक्षां ददाति इत्यार्याधेन '**शासु अनुशिष्टौ**'अयं धातुर्व्यक्तीकृतः, तथा सन्त्रायते च–रक्षति, कान् ?–सद्धर्मे–सदाचारे स्थितानिति शेषः, कुतः ?–दुःखात्, शास्त्रमिति निरुच्यते–निश्चितमभिधीयते तस्मादित्यत्र योगः ॥१८७॥

---

**( १८६ ) ( अव० )—शासूक् अनुशिष्टौ इति वाग्विधिविद्भिश्चतुर्दशपूर्वधरैः । विशेषेण नियतो=निर्णीतः । दैङ् त्रैङ् पालनार्थे । सर्वशब्दविदां=संस्कृतप्राकृतादिशब्दविज्ञानाम् ॥१८६॥**

**( १८७ ) ( अव० )—रागद्वेषव्याप्तचित्तान् शिक्षयति विपरीतमशुभं मा कुरु अनवरतं शुभमविपरीतं कुरु[१] इत्यादिना । तथा सन्त्रायते रक्षति सदाचारे स्थितानिति शेषः । कुतो ? नरकादिदुःखात् ॥१८७॥**

**शासनसामर्थ्येन तु सन्त्राणबलेन चानवद्येन ।**
**युक्तं यत्तच्छास्त्रं तच्चैतत् सर्वविद्वचनम् ॥१८८॥**

**जीवाजीवाः पुण्यं पापाश्रवसंवराः सनिर्जरणाः ।**
**बन्धो मोक्षश्चैते सम्यक् चिन्त्या नवपदार्थाः ॥१८९॥**

---

**( १८८ ) टीका—**[१]यतः-**शासनेत्यादि** । शासनसामर्थ्येन[२] तु अनुशानसमर्थमिदं द्वादशाङ्गं प्रवचनमतस्तेन शासनसामर्थ्येन संसारस्वभावमनुवदता तद्विपरीतं च मोक्षमार्गं दर्शयता निराबाधं परिरक्षता च शरणागतान् प्राणिनोऽनवद्येनोपायेन कश्चित् परिरक्ष-त्यन्यानुपघ्नन्,[३] तथेदं शासनं न कस्यचिदुपघातकम् । युक्तमिदं प्रतिबद्धम्, यतः शास्त्र-मुक्तेनार्थद्वयेन । तच्चैतच्छास्त्रं सर्वविदः सर्वज्ञस्य वचनमर्थद्वारेण क्षीणाशेषरागद्वेषमोहस्य नान्यस्येति ॥१८८॥

**( १८९ ) टीका—**तदेव सर्वज्ञवचनमुद्देशतो दर्शयन्नाह—**जीवाजीवा पुण्यमित्यादि** । जीवा इति सम्भवन्तः प्राणभाज उक्ताः । ते च द्रव्यभावभेदेन प्राणा द्विप्रकाराः । तत्र द्रव्यप्राणाः '[१]**पञ्चेन्द्रियाणि त्रिविधं बलं च उच्छ्वासनिःश्वासबलं तथायुरिति**' ( ) । भावप्राणास्तु ज्ञानदर्शनोपयोगाख्याः । एभिः प्राणैरजीविषुर्जीवन्ति जीविष्यन्ति चेति जीवाः । तद्विपरीता-स्त्वजीवाः । पुण्यं [२]सातादिद्विचत्वारिंशत्कर्मप्रकृतयः । पापं द्व्यधिकाशीतिः कर्मभेदानाम् । आश्रवः कायवाङ्मनोभिः कर्मयोग आत्मनः । एषामेवाश्रवाणां निरोधः संवरः । सह निर्जरणेन सनिर्जरणाः । निरुद्धेष्वाश्रवद्वारेषु गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचरणयुक्तस्य तपोऽनुष्ठानात् कर्मनिर्जरणं भवतीति । मिथ्यादर्शनादयो बन्धहेतवः । तद्योगात् सकषायः सन्नात्मा कर्मणो [३]योग्यान् दलानादत्ते स बन्धः । बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मक्षयो

---

**( १८८ ) ( वि० )** शासनस्य-शिक्षणस्य सामर्थ्यं-बलिष्ठता तेन । तुरवधारणे । सन्त्राणस्य-पालनस्य बलं-सामर्थ्यं तेन । चः समुच्चये । उभयेन कथम्भूतेन ?-अनवद्येन-निर्दोषेण, युक्तं-सहितं यत्किमपि तच्छास्त्रम्, उच्यत इति शेषः । तच्च शास्त्रमेतत्-जगत्प्रसिद्धं सर्वविद्वचनं-जिनोक्तमिति ॥१८८॥ **इति कथाधिकारः ॥११॥**

**( १८९ ) ( वि० )** इदमेव वचनं सङ्क्षेपत आह—**जीवाजीवा इति** । जीवाः-चैतन्यलक्षणाः १ अजीवा-धर्मास्तिकायादयः २ अत्र द्वन्द्वः, पुण्यं वक्ष्यमाणं ३ पापमपि ४,

---

**( १८८ ) ( अव० )—शासनस्य[१] शिक्षणस्य सामर्थ्यं बलिष्ठतानेन सन्त्राणस्य पालनस्य बलेन च उभयेन सहितं यत्तच्छास्त्रमुच्यते सिद्धान्तः, संसारभावमनुवदतां मोक्षं दर्शयतां सर्वविदामेतद्वचनम् ॥१८८॥**

**( १८९ ) ( अव० )—बन्धः=कर्मोपादानं, मोक्षः=कर्माभावः ॥१८९॥**

**जीवा मुक्ताः संसारिणश्च संसारिणस्त्वनेकविधाः ।**
**लक्षणतो विज्ञेया द्वित्रिचतुःपञ्चषड्भेदाः ॥१९०॥**

---

मोक्षः । इत्थमेते सम्यक् चिन्त्याः सम्यगालोच्या अन्यस्मै प्रतिपाद्या नव पदार्थाः । ननु च शास्त्रे सप्ताभिहिताः कथमत्र नवेति ? उच्यते—शास्त्रे पुण्यपापयोर्बन्धग्रहणेनैव ग्रहणात् सप्त-सङ्ख्याः[४] । इह तु भेदेनोपादानं पुण्यपापप्रकृतिविभागप्रतिपादनार्थमिति ॥१८९॥

**( १९० ) टीका—**जीवभेदप्रतिपादनायाह—**जीवा मुक्ता इत्यादि** । द्विप्रकारा जीवाः । मुक्ताः सकलकर्मक्षयभाज एकरूपाः । संसारिणस्त्वनेकविधाश्चतुर्गतिवृ[१]त्तयस्ते चानेकभेदाः नारकास्तिर्यञ्चो मनुष्या देवाः[२] । पुना रत्नप्रभापृथिवीनारका इत्यादिभेदाः । तिर्यञ्चोऽप्येकद्वित्रिचतुःपञ्चेन्द्रियभेदाः । पुनरेकेन्द्रियाः पृथिव्यादिभेदाः । द्वीन्द्रियाः शङ्ख-शुक्तिकादयः । त्रीन्द्रियाः पिपीलिकादयः । चतुरिन्द्रिया मक्षिकाभ्रमरपतङ्गादयः । पञ्चेन्द्रिया गोमहिष्यजाविकादयः गर्भव्युत्क्रान्तादयः सम्मूर्छजाश्च । मनुष्या आर्यम्लेच्छादिभेदाः गर्भजाः सम्मूर्छजाश्चेति । देवा भवनपतिव्यन्तरज्योतिष्कवैमानिकाः भवनपतयो दशधा[३]सुरादयः । व्यन्तराः किन्नरादयोऽष्टभेदाः । ज्योतिष्काः पञ्चप्रकाराः सूर्यादयः । वैमानिकाः सौधर्म-वास्यादय इति ॥१९०॥

---

एवमाश्रवोऽपि ५ संवरोऽपि ६ अत्रापि द्वन्द्वः । सनिर्जरणा-निर्जरायुक्ता इत्यर्थः ७, बन्धः-कर्मोपादानं ८ मोक्षः-कर्माभावः ९, एते सम्यक् चिन्त्या नव पदार्था इति व्यक्तमिति । नन्वन्यत्रैते सप्त तत्त्वान्यभिहिताः कथमत्र नव पदार्था उक्ता इति ?, उच्यते-अन्यत्र पुण्यपापयोर्बन्धग्रहेणेनैव ग्रहणं कृतं, इह तु तौ पृथग्विवक्षितौ इति न दोष इति ॥१८९॥ (परस्परवैलक्षण्यभाजः सप्तेति तु तर्कः)

**( १९० ) ( वि० )** एतान् विवरीषुस्तावज्जीवानाह—**जीवा इति** । जीवा विज्ञेया इति योगः, कीदृशा ?-मुक्ताः-सिद्धाः, तथा संसारिणो-भवस्थाः । चः समुच्चये । तत्र संसारिणस्त्वनेकविधाः लक्षणतो विज्ञेयाः-चिह्नतो बोद्धव्याः, द्वित्र्यादयो भेदा येषां ते तथा, इति ॥१९०॥

---

**( १९० ) ( अव० )—एतानि विवरीषुस्तावज्जीवानाह—असङ्ख्येयप्रदेशात्मकाः सकलो-पयोगभाजः मुक्ताः सिद्धाः । संसारिणो भवस्थाः लक्षणतश्चिह्नत एकेन्द्रियादयो ज्ञातव्या इति । लक्षणतोऽसाधारणस्वरूपतः ॥१९०॥**

**द्विविधाश्चराचराख्यास्त्रिविधाः स्त्रीपुंनपुंसका ज्ञेयाः ।**
**नारकतिर्यङ्मानुषदेवाश्च चतुर्विधाः प्रोक्ताः ॥१९१॥**

**पञ्चविधास्त्वेकद्वित्रिचतुःपञ्चेन्द्रियाश्च निर्दिष्टाः ।**
**क्षित्यम्बुवह्निपवनतरवस्त्रसाश्चेति षड्भेदाः ॥१९२॥**

**एवमनेकविधानामेकैको विधिरनन्तपर्यायः ।**
**प्रोक्तः स्थित्यवगाहज्ञानदर्शनादिपर्यायैः ॥१९३॥**

---

**( १९१ ) टीका—**[१]प्रकरणकारस्त्वनेकविधत्वमन्यथा दर्शयति—**द्विविधा[२] इत्यादि** । चरा जङ्गमास्तेजोवायुद्वीन्द्रियादयः । अचराः स्थावराः पृथिव्यादयः । त्रिविधाः स्त्रियः पुमांसो नपुंसकाः । नारकादिभेदेन चतुर्विधाः । शासनेऽभिहिताः ॥१९१॥

**( १९२ ) टीका—पञ्चविधेत्यादि** । पञ्चप्रकारा एकद्वित्रिचतुःपञ्चेन्द्रियाः कथिताः । भूमिजलवह्निवायुवनस्पतिद्वीन्द्रियादयश्चेति षड्भेदाः ॥१९२॥

**( १९३ ) टीका—एवमनेकेत्यादि** । एवमुक्तेन न्यायेनानेकविधानामनेकभेदानामेकैको विधिर्मूलभेदोऽनन्तपर्यायोऽनन्तभेदः कथितः । केन [१]प्रकारेण स्थितितोऽवगाहतो

---

**( १९१ ) ( वि० )** प्रस्तावात् संसारिजीवभेदानार्याद्वयेनाह—**द्विविधा इति** । द्विविधाः । केन द्वैविध्येन ?–चराः–त्रसाः अचराः–स्थावराः पृथिव्यादयः एवमाख्या–नाम येषां ते तथा । तथा त्रिविधाः स्त्रीपुंनपुंसकाः–नारीनरषण्ढा ज्ञेयाः । तथा नारकतिर्यङ्मानुषदेवाश्चतुर्विधाः प्रोक्ता इति व्यक्तमिति ॥१९१॥

**( १९२ ) ( वि० ) पञ्चेति** । पञ्चविधास्त्वेकेन्द्रियादयो निर्दिष्टाः, तथा क्षित्यादयः षड् भेदाः प्रसिद्धस्वरूपा इति ॥१९२॥

**( १९३ ) ( वि० )** सर्वजीवभेदानां व्याप्तिमाह–**एवमिति** । अत्र द्वितीयार्यार्धे चतुर्थगणः पञ्चमात्रः पञ्चमगणस्तु त्रिमात्रो, यथा ज्ञानदर्शनादिपर्यायैः, एवमेकोत्तरवृद्ध्याऽनेकविधानां–बहुभेदानां

---

**( १९३ ) ( अव० )—एवमनेकप्रकाराणामेकैको विधिरेकैको भेदोऽनन्तकालवर्तित्वादनन्तपर्यायः, अनन्ताः पर्याया धर्मा यस्य, अन्तर्मुहूर्तादारभ्यैकैकसमयवृद्ध्या त्रयस्त्रिंशत्सागरोपमाणि यावत् स्थितयः । अङ्गुलासङ्ख्येयभागादारभ्य यावत्समस्तलोकावगाहः, ज्ञानं–वस्तुविशेषावबोधो दर्शनं–वस्तुसामान्यावबोधः, पर्यायास्तारतम्यकृतविशेषाः ॥१९३॥**

**सामान्यं खलु लक्षणमुपयोगो भवति सर्वजीवानाम् ।**
**साकारोऽनाकारश्च सोऽष्टभेदश्चतुर्धा च ॥१९४॥**

---

ज्ञानतो दर्शनतश्च । स्थितितस्तावदनन्तपर्यायः । अनादौ संसारेऽनन्ताः स्थितिपर्यायाः । अवगाहतोऽप्यसङ्ख्येयप्रदेशावगाहे हीनाधिकसमप्रदेशभेदेनावगाहोऽपि बहुप्रकारः । तथा ज्ञानतोऽप्यनन्तपर्यायता दर्शनतश्च । यथोक्तम्—'**अणंता णाणपज्जवा, अणंता दंसणपज्जवा**' (**अनन्ता ज्ञानपर्याया, अनन्ता दर्शनपर्यायाः**)। एकैको नारकादिभेदो यथासम्भवमनन्तपर्यायो भवति ॥१९३॥

**(१९४) टीका**—जीवलक्षणाभिधित्सयाह—**सामान्यं खल्वित्यादि** । सामान्यं लक्षणं सर्वजीवानामुपयोगश्चेतना ज्ञानदर्शनव्यापारः । खलुशब्दोऽवधारणे । उपयोग एव [1]सामान्यलक्षणम् । सर्वजीवानामिति । तमुपयोगं विस्पष्टयति—साकारोपयोगः । आकारो विकल्पः । सहाऽऽकारेण [2]वर्तते इति साकारः, सविकल्पो ज्ञानव्यापारः । अनाकारो दर्शनोपयोगः सामान्यग्रहणं निर्विकल्पमित्यर्थः। ज्ञानोपयोगोऽष्टभेदः मतिश्रुतावधिमनः-पर्यायकेवल[3]ज्ञानमत्यज्ञानश्रुताज्ञानविभङ्गज्ञानाख्यः। दर्शनोपयोगश्चतुर्धा चक्षुरचक्षुरवधि-केवलदर्शनाख्यः ॥१९४॥

---

एकैको विधिः-एकैको भेदोऽनन्तपर्यायः-अनेकभेदः प्रोक्तः-तीर्थकरैः प्रतिपादितः । कैः कृत्वेत्याह-स्थितिः-कायस्थानरूपा ''**अस्संखोसप्पिणी**''त्यादिका (**असङ्ख्योत्सर्पिणी**) आयुष्करूपा च ''**बावीसई सहस्सा**'' (**द्वाविंशतिः सहस्राणि**) इत्यादिरूपा । अवगाहस्तु अङ्गुलासङ्ख्येयभागमात्रादारभ्य यावत् समस्तलोकावगाहः, ज्ञानं वस्तुविशेषावबोधो, दर्शनं वस्तुसामान्यावबोधः, आदिशब्दाद्यथासम्भवं चारित्रसुखवीर्यादिग्रहस्तेषां पर्याया-अवस्थाविशेषाः, धर्मा इत्यर्थः ते तथा, तैरिति ॥१९३॥

**(१९४) (वि०)** अनन्तरं जीवा उक्ताः, अतः सामान्यं तल्लक्षणमाह—**सामान्यमिति** । सामान्यं खलु-साधारणमेव लक्षणं-चिह्नं सर्वजीवानां भवतीति योगः । यत्किमित्याह-उपयोगः-चेतना । उपयोगमेव स्पष्टयति-साकारो-विकल्परूपो ज्ञानोपयोगः तथा अनाकारः-तद्विपरीतो दर्शनोपयोगः । चः समुच्चये । अनयोर्भेदानाह-सोऽष्टभेदश्चतुर्धा चेति यथासङ्ख्येनेति ॥१९४॥

---

**(१९४) (अव०)—उपयोगश्चेतनाज्ञानदर्शनव्यापारः, साकारो विकल्परूपो ज्ञानोप-योगः, तद्विपरीतो दर्शनोपयोगः ८(अष्ट)भेदः ४(चतुः)भेदः[1] ॥१९४॥**

**ज्ञानाऽज्ञाने पञ्चत्रिविकल्पे सोऽष्टधा तु साकारः ।**
**चक्षुरवक्षुरवधिकेवलदृग्विषयस्त्वनाकारः ॥१९५॥**

**भावा भवन्ति जीवस्यौदयिकः पारिणामिकश्चैव ।**
**औपशमिकः क्षयोत्थः क्षयोपशमजश्च पञ्चैते ॥१९६॥**

---

**( १९५ ) टीका—**तानष्टौ भेदांश्चतुरश्च[१] कथयति—**ज्ञानाज्ञान इत्यादि** । यथासङ्ख्यं पञ्चविकल्पं मत्यादिज्ञानं, त्रिविकल्पमज्ञानं मत्यज्ञानादि । एषोऽष्टप्रकार उपयोगः साकारः । तुशब्दोऽवधारकः[२] । अष्टविध एवेति । चक्षुर्दर्शनादिसामान्योपयोगश्चतुर्धैवेति ॥१९५॥

**( १९६ ) टीका—**जीवस्यैवमुपयोगलक्षणस्य सतः [१]परिणतिविशेषान् भावान् दर्शयन्नाह—**भावा भवन्तीत्यादि** । [२]जीवस्य भावाः परिणतिविशेषाः कर्मोदयोपशमक्षयोपशमक्षयनिर्वृत्ताः । औदयिकः पारिणामिकः औपशमिकः क्षायिकः क्षायोपशमिकश्च पञ्चेति ॥१९६॥

---

**( १९५ ) ( वि० )** एतदेव व्यक्तीकुर्वन्नाह—**ज्ञानाज्ञान इति** । ज्ञानं चाज्ञानं च ते तथा, यथासङ्ख्येन पञ्चत्रिविकल्पे, तत्र ज्ञानं मतिज्ञानादि पञ्चधा, अज्ञानं तु मत्यज्ञानादि त्रिधा, भवतीति शेषः । तत्राद्यपञ्चकं सम्यग्दृष्टेः इतरन्मिथ्यादृष्टेः, एवं राशिद्वयमीलने सोऽष्टधा-अष्टप्रकारः । कीदृशः ?-साकारो-विशेषग्राही । चक्षुर्दर्शनादिरनाकारः-सामान्यग्राही चतुर्धेति ॥१९५॥

**( १९६ ) ( वि० )** एते द्वादशोपयोगा भावाः, अतः प्रस्तावादन्यानपि भावानादर्शयन्नाह—**भावा इति** । भावाः-परिणतिविशेषाः, कस्य भवन्ति ?-जीवस्य जायन्ते । कीदृशा ?-औदयिकः पारिणामिकः औपशमिकः क्षायिकः क्षायोपशमिकश्च पञ्चैते, कर्मणामुदयोपशमक्षयक्षयोपशम-निर्वृत्ताश्चत्वारः, पारिणामिकस्तु जीवाजीवानां परिणतिरिति ॥१९६॥

---

**( १९५ ) ( अव० )—ज्ञानं मत्यादि[१] ५ अज्ञानं तु मत्यज्ञानादि ३, मतिश्रुतावधयो मिथ्यात्वोदयोपरक्तस्वभावा अज्ञानतां यान्ति ॥१९५॥**

**( १९६ ) ( अव० )—औदयिकः स च जीवोपात्तकर्मणां[१] विपाकप्रदेशद्वयरूप उदयो, देवनारकादिपर्यायकारी । पारिणामिको जीवभव्याभव्यत्वादिरूपस्त्रिकालतदविच्युतिरूपः । उपशमः कर्मणां विपाकप्रदेशद्वयरूपोदयाभावस्तेन निर्वृत्त औपशमिकः । सम्यक्त्वचारित्ररूपः सम्यक्त्वज्ञान[२]चारित्रादिरूपः क्षयोत्थः ॥१९६॥**

**[1]ते चैकविंशति-त्रि-द्वि-नवाष्टादशविधाश्च[2] विज्ञेयाः ।**
**षष्ठश्च सान्निपातिक इत्यन्यः पञ्चदशभेदः ॥१९७॥**

---

**( १९७ ) टीका—**एषामेवौपशमिकादिभावानां[1] क्रमेण भेदानाचष्टे—**ते चैकविंशती त्यादि** । कर्मोदये भवः कर्मोदयनिर्वृत्तो वा औदयिकः स एकविंशतिभेदः । गतिर्नारकादिका चतुर्विधा, कषायाः क्रोधादयश्चतुर्धा, लिङ्गं स्त्रीपुंनपुंसकाख्यं त्रिधा, मिथ्यादर्शनमश्रद्धान[2]-लक्षणमेकप्रकारं, अज्ञानमेकविधं, असंयतत्वमेकप्रकारं, असिद्धत्वमेकविधं, लेश्याः षट्प्रकाराः । एते गत्यादयः सर्वे कर्मोदयात्प्रादुःषन्ति[3] । अनादिपारिणामिको भावस्त्रिविधः । जीवत्वं भव्यत्वमभव्यत्वं चेति नैते कर्मोदयाद्यपेक्षन्ते । कर्मोपशमनिर्वृत्त औपशमिकः सम्यक्त्वं चारित्रं च द्विविधः । क्षयोत्थः कर्मक्षयाज्जातः क्षायिकः, स नवभेदः, केवलज्ञानं, केवलदर्शनं, दानलब्धिः, लाभलब्धिः, भोगलब्धिः, उपभोगलब्धिः, वीर्यलब्धिः सम्यक्त्वं चारित्रं चेति । क्षयोपशमजः क्षायोपशमिकः, सोऽष्टादशभेदः, मत्यादिज्ञानं चतुर्विधम्, अज्ञानं मत्यज्ञानादि त्रिविधं, दर्शनं चक्षुर्दर्शनादि त्रिविधं, दानादिलब्धयः पञ्च, सम्यक्त्वं, चारित्रं, संयमासंयमश्चेति । **षष्ठश्च सान्निपातिक इति** । सन्निपातः संयोगः, सन्निपातः प्रयोजन-मस्येति सान्निपातिकः संयोगजो भावः । तत्र पञ्चानां भावनामौदयिकौपशमिक-क्षायिकक्षायोपशमिकपारिणामिकानां द्विकादिसंयोगेन षड्विंशतिर्विकल्पा भवन्ति । तत्र विरोधित्वादेकादश त्याज्याः, शेषाः पञ्चदशाविरोधिनः सम्भवन्ति । तेषामविरोधि[4] पञ्चदशानां ग्रहणं कृतं प्रकरणकारेणेति । ते चामी विज्ञेयाः ।

---

**( १९७ ) ( वि० )** एतेषां क्रमेण भेदानाचष्टे-ते पुनरेकविंशतिश्च त्रयश्च[1] द्वे च नव चाष्टादश च ते तथा ते विधा-भेदा येषामिति समासो, विज्ञेया इति घटना । तत्र कर्मोदये भवः कर्मोदयनिर्वृत्तो वा [2]औदयिकः, स एकविंशतिभेदः, तत्र गतयो नारकाद्याश्चतुर्धा ४ कषायाश्चतुर्धा ४ लिङ्गत्रयं ३ मिथ्यात्वमेकप्रकारं १ अज्ञानं च १ असंयतत्वं च १ असिद्धत्वं च १ लेश्याः षट्प्रकाराः ६, एते गत्यादयः सर्वे कर्मोदयात्प्रादुर्भवन्ति, अत्र [3]गतिग्रहणेन शेषभवोपग्राहिकर्म गृहीतं, कषायादिना घातिकर्म गृहीतम्, इदं च **गन्धहस्तिना** भणितमास्ते । तर्हि अज्ञानादीनि कथमौदयिके भावे ?, सत्यं, तत्कार्यत्वात्तेषामौदयिकता भावनीया । तथा अनादिपारिणामिको भावस्त्रिधा-जीवत्वं १ भव्यत्वं २ अभव्यत्वं ३ चेति, नैते कर्मोदयाद्यपेक्षन्ते । तथा कर्मोपशमनिमित्त औपशमिकः, सम्यक्त्वं १ चारित्रं २ चेति द्विविधः । तथा क्षयोत्थः-कर्मक्षयाज्जातः क्षायिकः, स नवभेदः-केवलज्ञानं १ केवलदर्शनं १ दानलब्धिप्रभृतयः ५ सम्यक्त्वं १ चारित्रं १ चेति । तथा क्षयोपशमजः-क्षायोपशमिकः, सोऽष्टादशभेदो, मतिज्ञानादिज्ञानं चतुर्विधं ४ मत्यादि अज्ञानत्रयं ३ दर्शनं चक्षुरादि त्रिविधं ३

---

**( १९७ ) ( अव० )—[1]गति-कषाय-लिङ्ग-मिथ्यात्वज्ञातासंयतासिद्धत्व-लेश्याःजीवत्वं-**

[५]उदइय-खओवसमिय-परिणामिक्किक्कगइचउक्के वि ।
खयजोगेण वि चउरो तयभावे उवसमेणं पि ॥१॥
उवसमसेढीइक्को केवलिणो वि य तहेव सिद्धस्स ।
अविरुद्धसंनिवाइय भेया एमेव पन्नरस ॥२॥
( औदयिकक्षयोपशमिक-पारिणामिकैकैको गतिचतुष्केऽपि ।
क्षययोगेनापि चत्वारः तदभावे उपशमेनापि ॥
उपशमश्रेण्यैकः केवलिनोऽपि च तथैव सिद्धस्य ।
अविरुद्धसान्निपातिको भेदा एवमेते पञ्चदश ॥ )

अन्यः [६]षष्ठो विकल्पः सान्निपातिक इत्यर्थः ॥१९७॥

दानादिलब्धयः ५ सम्यक्त्वं १ चारित्रं १ संयमासंयमश्चेति १, तथा षष्ठश्च सान्निपातिकश्चेति, सन्निपातः-संयोगः स प्रयोजनमस्येति सान्निपातिकः-संयोगजो भावः, तत्र पञ्चभावानामौद-यिकादीनां द्विकादिसंयोगेन षड्विंशतिर्भङ्गा भवन्ति, तत्र द्विकयोगः षष्ठः परिणामिकक्षायिकरूपः सिद्धानामिति १, द्वितीयत्रिकयोगः औदयिकपारिणामिकक्षायिकलक्षणः केवलिनः २ तृतीयत्रिकयोग औदयिकपारिणामिकक्षायोपशमिकलक्षणः, स चतुर्गतिकजीवविषयः ३ चतुष्कसंयोगो द्वितीय औदयिकपारिणामिक-औपशमिकक्षायोपशमिकरूपश्चतुर्गतिकानां ४ तृतीयश्चतुष्कयोग औदयिकः पारिणामिकः क्षायिकः क्षायोपशमिकः, एषोऽपि चतुर्गतिकानामेव ५ मनुजानां तु पञ्चकयोगः-औदयिकः पारिणामिकः औपशमिकः क्षयोत्थः क्षयोपशमिकश्च ६, इति षडेव भङ्गा यथोक्तसङ्ख्या ग्राह्या, घटमानत्वात्, न तु विंशतिरिति । तथा चोक्तम्-

दुगजोगो सिद्धाणं केवलिसंसारियाण तिगजोगो ।
चउजोगजुयं चउसुवि गईसु मणुआण पणजोगो ॥ इति ।
( द्विकयोगः सिद्धानां केवलिसंसारिणोस्त्रिकयोगः ।
चतुर्योगयुगं चतुःस्वपि गतिषु मनुष्याणां पञ्चकयोगः ॥ )

सिद्धसत्कद्विकयोग-केवलिसत्कत्रिकयोग-कृतखण्डश्रेणि-उपशमश्रेणिस्थितमनुष्य-सत्कपञ्चकयोग-गतिचतुष्टयद्वारागतद्वादशयोगमीलनेन पञ्चदश भवन्ति, अत्र चोक्तम्-

एक्केक्को उवसमसेढि १ सिद्ध २ केवलिसु ३ एवमविरुद्धा ।
पन्नरस सन्निवाइय भेया वीसं असंभविणो ॥१॥

उदइयखओवसमियपरिणामिएहिं चउरो गइयचउक्के ।
खइयजुएहिं चउरो तयभावे उवसमजुएहिं ॥२॥

[२]भव्यत्वं अभव्यत्वं च, सम्यक्त्वं चारित्रं मत्यादिज्ञानं त्रिविधं दर्शनं त्रिविधं, दानादिलब्धयः पञ्च, सम्यक्त्वं, संयमासंयमः । एषां द्विकादिसंयोगेन षड्विंशतिर्विकल्पाः [३]भवन्ति । तत्र विरोधित्वादेकादश त्याज्याः, शेषा १५ ( पञ्चदश ) ग्राह्याः ॥१९७॥

**एभिर्भावैः स्थानं गतिमिन्द्रियसम्पदः सुखं दुःखम् ।**
**सम्प्राप्नोतीत्यात्मा सोऽष्टविकल्पः समासेन ॥१९८॥**

**(१९८) टीका—एभिर्भावैः स्थानमित्यादि** । एभिरौदयिकादिभिर्भावैः स्थानं [१]सम्प्राप्नोतीत्यात्मा[२] । स्थानमिति स्थीयते यत्र संसारे तत्स्थानं सामान्येनाविशेषितं प्राप्नोति । यत उक्तम्—

**[३]सव्वठाणाइं असासयाइं ति । (सर्वस्थानानि अशाश्वतानि)**

गतिः [४]नरकादिका तां च गतिं प्राप्नोति भावैरेव । ननु च गतिस्थानयोर्नास्ति विशेषः ? उच्यते-नरकगतावेव जघन्यमध्यमोत्कृष्टानि स्थानानि बहूनि सन्तीति तत्प्रति-पादनार्थं स्थानग्रहणं पृथगिति । इन्द्रियाणि स्पर्शनादीनि । [५]एषां सम्पत्समग्रताऽविकलता

---

**(एकैक उपशमश्रेणि सिद्ध केवलिषु एवमविरुद्धाः ।**
**पञ्चदश सान्निपातिकभेदाः विंशतयोऽसम्भवाः ॥**
**औदयिकक्षायोपशमिकपारिणामिकैः चत्वारः गतिचतुष्के ।**
**क्षायिकयुतैश्चत्वारः तदभावे उपशमयुतैः ॥ )**
अत्र यन्त्रकं पञ्चदशभेदानाम् ॥१९७॥

**सान्निपातिकभावयन्त्रम्**

| भावः | भावः | भावः | भावः | भावः | गतिषु | संयोगः |
|---|---|---|---|---|---|---|
| औदयिकः | मिश्रः | – | – | पारिणामिकः | ४ | ३ |
| औदयिकः | मिश्रः | क्षायिकः | – | पारिणामिकः | ४ | ४ |
| औदियकः | मिश्रः | – | औपशमिकः | पारिणामिकः | ४ | ४ |
| औदयिकः | मिश्रः | क्षायिकः | औपशमिकः | पारिणामिकः | १ | ५ |
| औदयिकः | – | क्षायिकः | – | पारिणामिका | केवलिनः | ३ |
| – | – | क्षायिकः | – | पारिणामिकः | सिद्धानाम् | २ |

१५

**(१९८) (वि०)** [१]यदेभिर्लभ्यते तदाह—**एभिरिति** । एभिः-पूर्वोक्तैर्भावैः करणभूतैः स्थानं-स्थितिमायुर्वा गतिं-पञ्चविधामिन्द्रियसम्पदः-एकेन्द्रियादिविभूतीः सुखं-आह्लादम् असुखम्-असातं सम्प्राप्नोति-लभते । इतिरिह यथासम्भवप्रदर्शनार्थः, न ह्यौपशमिकक्षायिकयोरेते प्रायः

---

**(१९८) (अव०)—[१]स्थानं=स्थितिमायुर्वा गतिः । चतुर्विधा । इन्द्रियसम्पदः= पञ्चेन्द्रियादिविभूतिः । सम्पदः=समग्रता । समासेन=सङ्क्षेपेण ॥१९८॥**

**द्रव्यं कषाययोगावुपयोगो ज्ञानदर्शने चेति ।**
**चारित्रं वीर्यं चेत्यष्टविधा मार्गणा तस्य ॥१९९॥**

**जीवाजीवानां द्रव्यात्मा सकषायिणां कषायात्मा ।**
**योगः सयोगिनां पुनरुपयोगः सर्वजीवानाम् ॥२००॥**

---

[६]ताश्चेन्द्रियसम्पदः प्राप्नोतीत्यात्मा । अथवा इन्द्रियाणि च सम्पदश्च विभूतय इत्यर्थः । तथा [७]सुखदुःखे औदयिक[८]ादिभाववशादेवाप्नोति । अतति गच्छति तांस्तान् स्थानादिविशेषान् प्रकर्षेणाप्नोतीत्यात्मा । स चाष्टभेदः सङ्क्षेपतोऽनुगन्तव्यः ॥१९८॥

**( १९९ ) टीका—**तानष्टौ विकल्पानभिधातुकाम आह—**द्रव्यं कषायेत्यादि** । द्रव्यात्मा कषायात्मा योगात्मा उपयोगात्मा ज्ञानात्मा दर्शनात्मा चारित्रात्मा वीर्यात्मा चेति अष्टविधाऽष्टप्रकारा मार्गणा गवेषणा परीक्षा तस्यात्मनः कार्येति ॥१९९॥

**( २०० ) टीका—**सम्प्रत्येषां [१]द्रव्याद्यात्मनां [२]स्वरूपाचिख्यासयाऽऽह—**जीवाजीवानामित्यादि** । [३]जीव इत्यनादिपरिणामिको भावः । जीवश्च द्रव्यमन्वयी सर्वत्र [४]परिणामे पर्यायेऽनुस्यूतं द्रवति तांस्तान् पर्यायानाप्नोति नारकादीन् । सर्वत्राविच्छेदेन वर्तते । एकं द्रव्यं द्रव्यात्मा सर्वत्रान्वेति यस्मादिति । एवमजीवानामपि योऽन्वय्यंशः पुद्गलानां स द्रव्यात्मा । धर्मादीनां तु परप्रत्यया उत्पादादिपरिणामास्तत्राप्यन्वयी द्रव्यात्मेति । कषायाः क्रोधादयस्ते

---

सम्भवन्ति । एतानि स्थानादीनि कः कर्ता लभते अत आह-आत्मा-जीवः, सोऽष्टविकल्पः समासेनेति ॥१९८॥

**( १९९ ) ( वि० )** तानेवाह-**द्रव्यमिति** । द्रव्यं-द्रव्यात्मा कषाययोगौ-कषायात्मा योगात्मा, एवमुपयोगादिष्वात्मा योज्यः, इत्यष्टविधा मार्गणा-अन्वेषणा तस्य-जीवस्येति ॥१९९॥

**( २०० ) ( वि० )** एतानेव आर्याद्वयेनाह-**जीवाजीवानामिति** । जीवाजीवानां-सचेतना-चेतनानां षण्णां द्रव्याणां यद् द्रव्यं-स्थित्यंशरूपं तदात्मा भण्यते, न हि तानि ताद्रूप्यं कदाचन त्यजन्तीति कृत्वा । सकषायिणां-कषायोपरक्तचेतनायां[१] कषायात्मा-कषायप्रधान आत्मा-जीवो, मिथ्यादृष्ट्यादिसूक्ष्मसम्परायान्तानां स ज्ञेयः । योगो-योगप्रधान आत्मा सयोगिनां-त्रयोदशगुण-

---

**( १९९ ) ( अव० )—[१]द्रव्यं० आत्मशब्दः प्रत्येकं योज्यः द्रव्यादीनाम् । गवेषणा आत्मनः ॥१९९॥**

**( २०० ) ( अव० )—[१]जीवाजीवानां=सचेतनाचेतनानां द्रव्याणाम् । द्रव्याणां यद् द्रव्यं स्थित्यंशरूपं तदात्मा भण्यते । न हि तानि कदाचन तत् त्यजन्तीति कृत्वा । उपयोगो ज्ञानदर्शन व्यापारः । सर्वग्रहणं मुक्त[२]परिग्रहार्थम् ॥२००॥**

**ज्ञानं सम्यग्दृष्टेर्दर्शनमथ भवति सर्वजीवानाम् ।**
**चारित्रं विरतानां तु सर्वसंसारिणां वीर्यम् ॥२०१॥**

**द्रव्यात्मेत्युपचारः सर्वद्रव्येषु नयविशेषेण ।**
**आत्मादेशादात्मा भवत्यनात्मा परादेशात् ॥२०२॥**

---

सन्ति येषां ते कषायिणस्तेषां कषायिणामात्मा कषायैः सहैकत्वापत्तेः कषायात्मेत्युच्यते । [५]योगो मनोवाक्कायाख्यस्तदेकत्वपरिणतस्[६]त्वात्मा यः स खलु योगात्मा सयोगानामिति । उपयोगो ज्ञानदर्शनव्यापारो ज्ञेयविशेषस्तत्परिणत आत्मा उपयोगात्मेति सर्वजीवविषयः । [७]सर्वग्रहणं–मुक्तपरिग्रहार्थम् ॥२००॥

**( २०१ ) टीका–ज्ञानं सम्यग्दृष्टेरित्यादि** । सम्यग्दर्शनसम्पन्नस्यात्मनस्तत्त्वार्थश्रद्धान-परिणामभाजो यो ज्ञानपरिणामः स ज्ञानात्मा । [१]दर्शनात्मा तु चक्षुर्दर्शनादिपरिणतस्यात्मनस्तदेक[२]त्वा-पत्तेर्दर्शनात्मा । सर्वजीवविषय[३]प्राणातिपातादिपापस्थानेभ्यो विरतस्य तदाकारपरिणतस्य चारित्रात्मा । वीर्यं शक्तिश्चेष्टा तेन वीर्येण सर्वे संसारिणो वीर्यात्मान उच्यन्ते ॥२०१॥

**( २०२ ) टीका–**एवमेतेऽष्टौ [१]आत्मविकल्पाः प्रतिपादितास्तत्र द्रव्यात्मानमाशङ्कते–

---

[२]स्थानवर्तिनां ज्ञेयः । एतेषु यथासम्भवं मनोवाक्कायभेदानां सम्भवात् । पुनरुपयोगः-साकारानाकाररूपः सर्वजीवानां–सिद्धानां संसारिणां चेति ॥२००॥

**( २०१ ) ( वि० ) ज्ञानमिति** । ज्ञानं सम्यग्दृष्टेः क्षायिकक्षायोपशमिकौपशमिक-रूपत्रिविधस्य, न तु मिथ्यादृशः दर्शनं–सामान्योपयोगरूपं, चतुर्विधमथ भवति सर्वजीवानां–संसारिणां मुक्तानां च यथायोगं चारित्रं विरतानां तु, न त्वसंयतानां । सर्वसंसारिणां–चेतनानां "**संसारी चेतनो मतः**" ( ) इति वचनात्, भवस्थमुक्तानां चैतन्यवतामित्यर्थः, किं तद् ?–वीर्यमिति ॥२०१॥

**( २०२ ) ( वि० )** द्रव्यात्मेति यदुक्तं तत्किं तत्त्वत उता[१]न्यथेत्याह–**द्रव्यात्मेति** । द्रव्यात्मेति यत्पूर्वमुक्तं सर्वद्रव्येषु तदुपचारतो–व्यवहाराच्छब्दनिबन्धनात्, न तत्त्वतः, आत्मनो जीवरूपत्वात्

---

**( २०१ ) ( अव० )–[१]चक्षुर्दर्शनादि सामान्योपयोगरूपम् । सर्वजीवानां=संसारिणां मुक्तानां च यथायोगम् ॥२०१॥**

**( २०२ ) ( अव० )–[१]द्रव्यात्मेत्यादि । कथं पुद्गलादिष्वात्मा उच्यते ? आत्मनो जीवरूपत्वात्, उच्यते, शब्दनिबन्धनः । तदुभयत्र तुल्यं, यथैव चेतनोऽतति तथाचेतनोऽपि अन्वयी पुद्गलांशो भवतीत्यात्मा । सामान्यग्राहिणा नयेन । स्वरूपात् ॥२०२॥**

**एवं संयोगाल्पबहुत्वाद्यैर्नैकशः स परिमृग्यः ।**
**जीवस्यैतत् सर्वं स्वतत्त्वमिह लक्षणैर्दृष्टम् ॥२०३॥**

---

अजीवविषयमात्मेति ज्ञानदर्शनोपयोगस्वभावश्चेतनः प्रतीतः, कथं पुद्गलादिष्वात्मशब्दप्रवृत्तिरित्युच्यते–**द्रव्यात्मेत्युपचार इत्यादि** । उपचारो व्यवहारः शब्दनिबन्धनः । स च शब्दो निमित्तमाश्रित्य [२]प्रवृत्तः, तच्च निमित्तमुभयत्र तुल्यम्, स यथैव चेतनो [३]अतति तथाऽचेतनोऽपि अन्वयी पुद्गलांशोऽततीति भवत्यात्मशब्दवाच्यः । सर्वद्रव्यविषयश्चैष न्याय इति । नयविशेषेणेत्याह सामान्यग्राहिणा नयभेदेन सर्वत्रात्मशब्दप्रवृत्तिः । [४]सोऽप्यात्मा द्रव्यक्षेत्रादिविवक्षयास्ति न सर्वथा । तत्र स्वरूपेणादिष्टो विवक्षित आत्मास्ति, पररूपेणादिष्टो नास्ति । यथैव स्वास्तिस्त्वादस्तीत्युच्यते, तथा परनास्तित्वान्नास्तीत्युच्यते । स्वावगाहक्षेत्रादिष्टस्तेनैव पर्यायेणास्ति, नान्येन । एवं कालात्मा वर्तमानतयादिष्टो[५]ऽस्तीति । अतीतानागततया नास्ति । औदयिकादीनामन्यतमेन भावेनादिष्टोऽस्ति, शेषभावेन नास्ति ॥२०२॥

**( २०३ ) टीका–एवं संयोगेत्यादि** । संयोगस्तावद्येन येन संयुक्तस्तेन तेन रूपेणात्मास्ति, येनासंयुक्तस्तेन नास्ति । नारको[१] नरकगतिसंयोगेनैव [२]विद्यते, न देवगतिसंयोगेनेति । अल्पत्वेन बहुत्वेन चादिष्टः स्यादस्ति स्यान्नास्ति । अल्पे[३] मनुष्या, [४]सङ्ख्येयत्वेनैव तिर्यञ्चोऽनन्तसङ्ख्याः तेन [५]सङ्ख्यात्मना मनुष्यो नास्तीति

---

सर्वद्रव्याणां जीवाजीवरूपत्वात्, किन्तु स्वस्वरूपवाचके आत्मध्वनौ नयविशेषेण–सामान्यग्राहिणा [२]नयविशेषे भेदेन गृह्यमाणे कथञ्चिदयमपि घटत इति । यत आत्मादेशात्–स्वरूपाभिधानादात्मा भवति, भवत्यनात्मा च परादेशात्, [३]परस्वरूपापेक्षया सदसद्रूपं वस्तु, जैनानां प्रसिद्धमिदमिति ॥२०२॥

**( २०३ ) ( वि० )** साम्प्रतं निगमयन्नाह–एवमिति । एवमने[१]कप्रकारेण स–आत्मा परिमृग्यः–अन्वेषणीय इति सम्बन्धः । कैः कृत्वा ?–अल्पत्वं च बहुत्वं च ते, त्वप्रत्ययस्य प्रत्येकमभिसम्बन्धात्, ततः संयोगाश्चाल्पबहुत्वे च तानि, तानि आद्यानि येषां तानि तथा तैः । तत्र संयोगतस्तावत् येन येन संयुक्तस्तेन तेन रूपेणात्मा विद्यते, येन[२] संयुक्तस्तेन [३]विद्यते, यथा नारको नरकगतिसंयोगेनैव विद्यते, न देवादिसंयोगेनेति, अल्पत्वं बहुत्वव्यतिरेकेण न भवति, बहुत्वं अल्पत्वेन

---

**( २०३ ) ( अव० )–संयोगो रूपं अनेकेन भेदेन निर्देशः परीक्षणीयः, स्वतत्त्वं सहजं स्वरूपं, दृष्टमुपलब्धं, लक्षणैश्चिह्नैरनेकभेदं समस्तमात्मनः ॥२०३॥**

**उत्पादविगमनित्यत्वलक्षणं यत्तदस्ति सर्वमपि ।**
**सदसद्वा भवतीत्यन्यथार्पितानर्पितविशेषात् ॥२०४॥**

---

मनुष्येभ्यस्तिर्यञ्चोऽनन्ताः । तेन कारणेन सङ्ख्यात्मना नास्ति मनुष्य इत्यादिनाल्प-बहुत्वादिचिन्ता कार्या । आदिग्रहणान्नामाद्यनुयोगद्वारभेदेना[६]प्यस्तित्वनास्तित्वे भावयितव्ये । नैकश[७] इत्यनेकेन भेदेन निर्देशस्वामित्वादिनापि आत्मा परिमृग्यः परीक्षणीयः । एते [८]च जीवस्य स्वतत्त्वं सर्वमेव लक्षणैर्दृष्टम् । लक्ष्यते येन येनात्मा देशादिना तल्लक्षणं बहुप्रकारं, तैर्लक्षणैर्दृष्टमुपलब्धमनेकभेदमित्यर्थः ॥२०३॥

**( २०४ ) टीका—**[१]तथा परं लक्षणमाह-**उत्पाद इत्यादि** । उत्पत्तिरुत्पादः । विगमो विनाशः । नित्यत्वं ध्रौव्यम् । सर्वमेव[२] चोत्पादव्ययध्रौव्यलक्षणं सद्भवत्यङ्गुलिवत् । यथा मूर्तत्वेनाङ्गुलिरवस्थिता ध्रुवा, ऋजुत्वेन विनष्टा, वक्रत्वेनोत्पन्नेति । एवं यदुत्पादादि-त्रयवत्तदस्ति सर्वं, यन्नास्ति तदुत्पादादित्रयवदपि न भवति, खरविषाणादिवत् । अतो

---

च, अतः संलुलिते एव विचार्येते, ताभ्यामादिष्टः स्यादस्ति स्यान्नास्ति-सम्मूर्च्छजगर्भजभेदेना-सङ्ख्येयमनुष्यास्ते चाल्पे, तिर्यञ्चोऽनन्ताः एकेन्द्रियादिभेदेन, ते च बहवः, ततस्तिर्यक्सङ्ख्यया मनुष्या न सन्ति, मनुष्यसङ्ख्यया तिर्यञ्चो नेति । आदिग्रहणान्नामादिभिरप्यस्तित्वनास्तित्वे भावयितव्ये, कथं ?-नैकशो-बहुभिः प्रकारैः । एतस्य जीवस्य स्वतत्त्वं-सहजं स्वरूपं सर्वमेव-समस्तमपि, किं- ? दृष्टम्-उपलब्धम् । कैः कृत्वा ?-लक्षणैः-लक्ष्यते यैरात्मा तानि लक्षणानि-चिह्नानि तानि तथा तैः, तानि चामूनि-

**चित्तं चेयण सन्ना विन्नाणं धारणा य बुद्धी य ।**
**ईहा मई वियक्का जीवस्स उ लक्खणा एए ॥१॥** ॥२०३॥
**( चित्तं चेतना सञ्ज्ञा विज्ञानं धारणा च बुद्धिश्च ।**
**ईहा मतिः वितर्का जीवस्य तु लक्षणान्येतानि ॥)**

**( २०४ ) ( वि० ) उत्पाद इति ।** तथा अपरं लक्षणमाह-उत्पादः-प्रादुर्भावः तेन, स्वेन स्वरूपेण वस्तुनां घटपटादीनां धर्माधर्मादीनां च, पत्रादिनीलतावत्, विगमो-विनाशः प्रलयः तेषामेव,

---

**( २०४ ) ( अव० )—चित्तं चेयण सन्ना विन्नाणं धारणा य बुद्धि य ।**
**ईहा मई विअक्का जीवस्स उ लक्खणा एए ॥१॥**
**( चित्तं चेतना सञ्ज्ञा विज्ञानं धारणा च बुद्धिश्च ।**
**ईहा मतिः वितर्काः जीवस्य तु लक्षणान्येतानि ॥)**

विकल्पद्वयमुक्तम्—स्यादस्ति स्यान्नास्तीति । सदसद्वा भवतीति तृतीयविकल्पः स्यादस्ति[३] च स्यान्नास्ति चेति । अन्यथार्पितानर्पितविशेषादिति चत्वारो विकल्पाः सूचिताः—स्यादवक्तव्यः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्चेति । तत्रास्ति च नास्ति चेति एकस्य घटादेर्द्रव्यस्य देशो ग्रीवादिः सद्भावपर्यायेणादिष्टो ग्रीवात्वेन, अपरश्च देशस्तथैव वस्तुनाऽसद्भावपर्यायैरादिष्टो वृत्तबुध्नत्वेन परगतपर्यायेण च [४]तद्वस्तु अस्ति च नास्ति चेति भावना कार्या । स्यादवक्तव्य इति सकलमेवाखण्डितं तद्वस्तु अर्थान्तरभूतैः [५]पटादिभिः पर्यायैर्निजैश्चोर्ध्वकुण्डलेष्वा[६]यतवृत्तो ग्रीवादिभिर्युगपदभिन्ने[७] काले समादिष्टं नास्तीति वक्तुं न शक्यते, न चास्तीति वक्तुं पार्यते। युगपदादेशद्वयप्राप्तौ वचनविशेषाती[८]तत्वादेवावक्तव्यमिति । अस्ति चावक्तव्यश्चेति पञ्चमो विकल्पः । तस्यैव घटादेर्वस्तुनः एको देशः सद्भावपर्यायैरादिष्टोऽपरो देशः स्वपर्यायैः परपर्यायैश्च युगपदादिष्टः [९]तत्र द्रव्यमस्ति

---

पत्रादिशाटवत्, नित्यत्वं स्थिरत्वं कालत्रयेऽप्यविनाशित्वम्, एतानि कृतद्वन्द्वानि विवक्षावशप्रापितभेदानि तत्त्वतो मनागप्यभिन्नानि समुदितानि लक्षणं-स्वरूपं यस्य तत्तथा । यदेवंविधं त्रिविधत्वमुक्तं तदस्ति वर्तते[२] सर्वमपि, तथाहि-घटस्य घटरूपेणोत्पादः कुशूलादिरूपेण विनाशो मृद्रूपेण च सदैव नित्यत्वं, तथा पुंसः पुंस्त्वेनोत्पादः प्राक्तनरूपेण विनाशो जीवरूपेण ध्रौव्यमिति । न चोत्पादे असति विनाशो, न च विनाशे [३]चासत्युत्पादः, न हि घटाद्यनुत्पादे कुशूलादिविनाशो, न च कुशूलाद्यविनाशे घटाद्युत्पादः,[४] न च तौ मृत्त्वं विना, निर्मूलत्वात् , न च साऽपि तौ विना, पर्यायत्वाद्, गन्धादिविशेषरहितेन्दीवरवत् । तदेवं त्रितयं परस्परापेक्षं सत्त्वलक्षणमिति । अन्यथा त्रितयं यदि नाभ्युपगम्यते किन्त्वेकस्य द्वयोर्वा सत्त्वलक्षणत्वेऽभ्युपगम्यमाने यत्सत् तदसद्भवति, असद्वा-अविद्यमानं सद्भवति । यच्च सतोऽसद्भवनं असतो वा सद्भवनं तन्महालीकतां महाकर्मबन्धं च तस्य वादिन आवेदयतीत्युपेक्षणीयमिति । **ननु** च सैद्धान्तिका अपि क्वचिदुत्पादं क्वचिद्विनाशं क्वचिन्नित्यत्वं प्रतिपादयन्ति, तथाहि-"**जिणपवयणउप्पत्ती**" (**जिनवचनोत्पत्तिः**) इत्यादि "**सव्वट्ठाणाइं असासयाइं**" (**सर्वस्थानान्यशाश्वतानि**) इत्यादि "**इयं दुवालसंगी न कयाई [५]नासी**" (**इयं च द्वादशाङ्गी न कदाचिन्नासीत्**) इत्यादि, अतस्तेषामप्ययं दोषः प्रसजति इति अत्र[६] **उच्यते,** नायं तेषां दोषः, कुतः ?-अर्पितानर्पितविशेषात्-अर्पितं-विशेषितं अनर्पितम्-अविशेषितं तद्रूपो विशेषस्ततः, तमादायेत्यर्थः । इदमत्र तात्पर्यं-अर्पितं-विशेषितं जिनप्रवचनं उत्पन्नमिति [७]वचनोत्पादोऽर्पितः, अनर्पितम्-अविशेषितं प्राक्तनजिनप्रणीतं तदतीतम्, अर्थतस्तु ध्रुवं, घटे

---

**उत्पत्तिविपत्तिस्थिरतालक्षणं यत्सर्वमपि तदस्ति अङ्गुलीवत् । एवं यन्नास्ति तदुत्पादादित्रयवन्न भवति [१]खरविषाणवत् । अर्पितं विशेषितं जिनप्रवचनमुत्पन्नम् । अनर्पितमविशेषितं [२]प्राक्तनजिनप्रणीतं, अतीतं सप्तविकल्पवचनम् ॥२०४॥**

चावक्तव्यं च । षष्ठो विकल्पः नास्ति चावक्तव्यश्च तस्यैव घटादेर्द्रव्यस्य एकदेशः परपर्यायैरादिष्टः, अपरदेशः स्वपर्यायैः परपर्यायैश्च युगपदादिष्टः, तद् द्रव्यं नास्ति चावक्तव्यं च भवति । अथ सप्तमो विकल्पः-तदेव घटादिद्रव्यं एकस्मिन् देशे स्वपर्यायैरादिष्टम्, अन्यत्र देशे परपर्यायैरादिष्टम्, अपरत्र देशे स्वपर्यायैः परपर्यायैश्च युगपदादिष्टं अस्ति च नास्ति चावक्तव्यं चेति । एवमयं सप्तप्रकारो वचनविकल्पः । अत्र च सकलादेशास्त्रयः-स्यादस्ति, स्यान्नास्ति, स्यादवक्तव्यः । शेषाश्चत्वारो विकलादेशाः, [१०]स्यादस्ति च नास्ति च क्रमेण [११]भावितः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, [१२]स्यादस्ति च नास्ति चावक्तव्यश्चेति । अतोऽन्यथा चान्यथार्पितं विशेषितमुपनीतं, अनर्पितमविशेषितमनुपनीतं चेत्येतस्माद्विशेषात्सप्तविकल्पं भवतीति ॥२०४॥

---

कुशूलविगममृतत्त्ववत्[८] इति । वचनमुच्चार्य विगमध्रौव्यद्वयं नार्पितमिति । न पुनस्तेषामयमाशयः यथोत्पाद एवास्ति सर्वथा विगमध्रौव्यशून्यः । ननु[९] कथमेकस्मिन् उक्तेऽन्यद्वयसद्भावो भवति ?, भवत्येव, कथं ? यथा हि पुरुषस्य भ्रातृपुत्रपितृत्वाद्यनेकरूपसम्भवेऽपि तत्कार्यकरणक्षमत्वेन केनापि भ्रातेत्युक्ते न पुनः पुत्रादित्वं तत्र नास्तीति, एवमत्रापि एवंविधविवक्षासद्भावात् नान्यवादिनामिव जैनानां दोषः प्रादुर्भवति । केचन विद्वांसः सप्तभङ्गीसूचनद्वारेण व्याख्यान्तीमामार्याम् । सा च व्याख्यैवम्-उत्पादः-उत्पत्तिः विगमो-विनाशो नित्यत्वं-ध्रौव्यमेतेषां द्वन्द्वस्तानि लक्षणं यस्य तत्तथा, यदेतल्लक्षणत्रयोपेतं तदस्ति सर्वमपि, अङ्गुलिवत्, यथा मूर्तत्वेनाङ्गुलिरवस्थिता ध्रुवा ऋजुत्वेन विनष्टा वक्रत्वेनोत्पन्नेति, एवं यदुत्पातादित्रयोपेतं तत्सर्वमस्ति, यन्नास्ति तदुत्पादादित्रितयवदपि न भवति, खरविषाणवत्, अतो विकल्पद्वयमुक्तं-स्यादस्ति १ स्यान्नास्ति[१०] २। सदसद्वा भवतीति तृतीयविकल्पः, स्यादस्ति च नास्ति चेति ३। अन्यथा-अन्येन प्रकारेणार्पितानर्पितविशेषादिति चत्वारो विकल्पाः सूचिताः, स्यादवक्तव्यः[११] ४ स्यादस्ति चावक्तव्यश्च ५ स्यान्नास्ति चावक्तव्यश्च ६ स्यादस्ति च नास्ति चावक्तव्यश्चेति ७, तत्राद्यभङ्गकद्वयं[१२] भावितार्थमेव। तृतीयस्तु अस्ति च नास्ति चेति, एकस्य घटादेर्द्रव्यस्य देशो ग्रीवादिः सद्भावपर्यायेणादिष्टो वृत्तबुध्नत्वेन परगतपर्यायेण च तद्वस्तु अस्ति च नास्ति चेति भावना कार्या ३ [१३]इतश्चतुर्थो विकल्पः स्यादवक्तव्य इति, सकलमेवाखण्डितं तद्वस्तु अर्थान्तरभूतैः पटादिपर्यायैर्निजैश्चोर्ध्वकुण्डलौष्ठायन[१४]वृत्तग्रीवादिभिर्युगपद्-अभिन्नकाले समादिष्टं न अस्तीति वक्तुं शक्यते न च[१५] नास्तीति वक्तुं पार्यते, युगपदादेशद्वयप्राप्तौ वचनविशेषातीतत्वादेवा-वक्तव्यमिति ४ इतोऽस्ति चावक्तव्यश्चेति पञ्चमो विकल्पः, तस्यैव घटादेर्वस्तुन एको देशः सद्भावपर्यायैरादिष्टोऽपरो देशः स्वपर्यायैः परपर्यायैश्च युगपदादिष्टः तद् द्रव्यमस्ति चावक्तव्यं च ५ अथ षष्ठो विकल्पः-स्यान्नास्ति चावक्तव्यश्च, तस्यैव घटादेर्द्रव्यस्य एकदेशः परपर्यायैरादिष्टोऽपरो देशः स्वपर्यायैः परपर्यायैर्यु[१६]गपदादिष्टस्तद् द्रव्यं नास्ति चावक्तव्यं च भवति ६ अथ सप्तमो विकल्पो

**योऽर्थो यस्मिन्नाभूत् साम्प्रतकाले च दृश्यते तत्र ।**
**तेनोत्पादस्तस्य विगमस्तु तस्माद्विपर्यासः ॥२०५॥**
**साम्प्रतकाले चानागते च यो यस्य भवति सम्बन्धी ।**
**तेनाविगमस्तस्येति स नित्यस्तेन भावेन ॥२०६॥**

---

**( २०५ ) टीका—**उत्पादादित्रयभावनायाह—**योऽर्थो यस्मिन्नाभूद् इत्यादि** । घटार्थो मृत्पिण्डे नास्ति नाभूदित्यर्थः । स च मृत्पिण्डश्चक्रमस्तकारोपणादिना परिकर्मविधिना वर्तमानकाले परिनिष्पन्न उपलभ्यते घटोऽयमुत्पन्न इति । [१]तेनाकारेणोत्पादः तस्य घटस्येति । विगमस्तु विनाशः, तस्मादुत्पादाद्विपर्यासः विपरीतः[२], पिण्डो विनष्टो नोपलभ्यते न दृश्यते इति ॥२०५॥

**( २०६ ) टीका—साम्प्रतकाल इत्यादि** । वर्तमानकालेऽनागते भविष्यति च काले । चशब्दादतीते च[१] । यः पदार्थो मृदादिस्वरूपं न जहाति वर्तमानघटपर्यायसम्बन्धी मृन्मृदिति

---

भाव्यते–तदेव घटादि द्रव्यमेकस्मिन् देशे स्वपर्यायैरादिष्टं अन्यत्र देशे परपर्यायैरादिष्टं अपरत्र देशे स्वपर्यायैः परपर्यायैश्च युगपदादिष्टं स्यादस्ति च नास्ति चावक्तव्यं चेति ७। एवमयं सप्तप्रकारो वचनविकल्पः । अत्र च सकलादेशास्त्रयः–स्यादस्ति १ स्यान्नास्ति २ स्यादवक्तव्यः ३, शेषाश्चत्वारो [१७]विकलादेशाः–स्यादस्ति च नास्ति च १ स्यादस्ति चावक्तव्यश्च २ स्यान्नास्ति च अवक्तव्यश्च ३ स्यादस्ति च नास्ति चावक्तव्यश्चेति ४ । अतोऽन्येन प्रकारेणान्यथा, अर्पितं विशेषितमुपन्यस्तम्, अनर्पितमविशेषित[१८]मनुपनीतं चेत्यस्माद्विशेषात्[१९] सप्त विकल्पा भवन्ति ॥२०४॥

**( २०५ ) ( वि० )** उत्पादादित्रितयभावनामाह—**योऽर्थ इति** । योऽर्थो घटादिर्य[१]स्मिन्-कुशूलादौ नाभूत्–नासीत्, सुप्रसिद्धं चैतत्, कुशूलाद्यवस्थायां घटाद्यभावः, साम्प्रतकाले च-वर्तमानकाले च दृश्यते–उपलभ्यते तत्र–कुशूलादौ दण्डचक्र–चीवरादि–सामग्र्यां वा तेन–घटरूपेण तस्य–कुशूलादेरुत्पादः–प्रादुर्भावस्तस्य–कुशूलस्य, ततो घटादिः[२], विगमो–विनाशस्तस्मात्-कुशूलाद्यो विपर्यासो घटः स एव तस्य विनाशो, य एव च तस्य विनाशः स एव तस्योत्पादः, तुलादण्डसमकालभाव्युन्नत्यवनतिवत् । न हि जैनानां निरूपो विनाशोऽस्ति, न च प्राक्तनरूपानुपमर्दे समुत्पादोऽस्तीति ॥२०५॥

**( २०६ ) ( वि० ) साम्प्रतेति** । साम्प्रतकाले–वर्तमानकाले अनागते च–भाविनि चकाराद्भूते–अतीते घटकुशूलकपालेषु च यो मृदादिर्यस्य घटस्य कुशूलस्य कपालादीनां च भवति

---

**( २०५ )( अव० )—[१]कुशूलाद्यवयवावस्थायां घटाद्यभावः । घटोऽयमुत्पन्न इति तेनाकारेण तस्य घटस्य ॥२०५॥**

**( २०६ ) ( अव० )—चशब्दादतीते । यस्य पदार्थस्य तेन पदार्थेन ॥२०६॥**

**धर्माधर्माकाशानि पुद्गलाः काल एव चाजीवाः ।**
**पुद्गलवर्जमरूपं तु रूपिणः पुद्गलाः प्रोक्ताः ॥२०७॥**

**द्व्यादिप्रदेशवन्तो यावदनन्तप्रदेशिकाः स्कन्धाः ।**
**परमाणुरप्रदेशो वर्णादिगुणेषु भजनीयः ॥२०८॥**

---

त्रिकाल-विषयः पिण्डघटकपालावस्थासु न नष्टो न विगतः स तेन भावेन मृदादिना ध्रुवो भवन्[2] नित्यः । एवं यदस्ति तत्सर्वमुत्पादव्ययध्रौव्यरूपम् । न च ध्रौव्यमन्तरेणोत्पाद-विनाशयोर्निर्बीजयोः सम्भवः क्वचित्[3] । उत्पादश्च ध्रौव्यविनाशापेक्षः । विनश्यदपि ध्रौव्योत्पादापेक्षम् । ध्रुवमप्युत्पादविनाशापेक्षम[4][5]विनाभावित्वात् परस्परमुत्पादादीनामिति ॥२०६॥

**( २०७ ) टीका—**अजीवानधिकृत्याह—**धर्माधर्म इत्यादि** । धर्मद्रव्यं, अधर्मद्रव्यम्, आकाशद्रव्यं, पुद्गलद्रव्यं, कालद्रव्यमिति पञ्चाजीवद्रव्याणि । तत्र तेषु पञ्चसु पुद्गलद्रव्यं रूपरसगन्धस्पर्शवत्, शेषं द्रव्यचतुष्टयमरूपं, रूपादिवर्जितमित्यर्थः । रूपिण इत्यत्र [1]रसगन्धस्पर्शाः सर्वदा रूपाविनाभाविन इति परमाणावपि सम्भवन्तीति तत्[2] दर्शितं भवति ॥२०७॥

**टीका—**स्कन्धास्तु—**द्व्यादिप्रदेश इत्यादि** । द्व्यादिप्रदेशभाजः स्कन्धाः सङ्घाताः एकद्व्यणुकप्रभृतयः । द्वयोरण्वोस्त्रयाणां वेत्यादिप्रारब्धाः यावदनन्तप्रदेशाः सर्वे स्कन्धाः ।

---

सम्बन्धी-एतस्यैते एतेषां चैतदिति तेन रूपेण मृदादिना अन्वयिना अविगमः-अविनाशस्तस्येति-मृद्रूपस्य घटकुशूलकपालादेश्चेति स-मृदादिर्घटादि वा नित्यो-ध्रुवस्तेन भावेनेति ॥२०६॥

**( २०७ ) ( वि० )** साम्प्रतमजीवपदार्थं प्रकटयितुकामो भेदतः स्वरूपतश्चाह—**धर्मेति** । धर्माधर्माकाशानि कृतद्वन्द्वानि गतिस्थित्यवगाहदानलक्षणानि पुद्गलाः-पूरणगलनधर्माणः कालः एव च-अर्धतृतीयद्वीपसमुद्रद्वयव्यापी वर्तनादिलिङ्गः । एते पञ्चाप्यजीवाः । पुद्गलवर्जं-पुद्गलास्ति-कायविकलं धर्मादिचतुष्टयमरूपं तु-अमूर्तिमदेव । रूपिणो-मूर्तिमन्तः पुद्गलाः प्रोक्ता-भणिता इति ॥२०७॥

**( २०८ ) ( वि० ) द्व्यादीति** । द्व्यादिप्रदेशवन्तो-द्वित्रिचतुष्पञ्चादिपरमाणुसङ्घातनिष्पन्ना यावदनन्तप्रदेशिकाश्च-अनन्तानन्तपरमाणूपचयघटितमूर्तयः स्कन्धा-अवयविनो, यः पुनस्तेषां कारणं

---

**( २०७ ) ( अव० )—पञ्चाजीवद्रव्याणि रूपरसगन्धस्पर्शवत् ॥२०७॥**

**( २०८ ) ( अव० )—न हि ते द्रव्यप्रदेशाः सन्ति, अन्ये च वर्णादयः, किन्तु तमेव प्रदेशं वर्णादिपुद्गलाः सन्निहिताः स्युः ॥२०८॥**

**भावे धर्माधर्माम्बरकालाः पारिणामिके ज्ञेयाः ।**
**उदयपरिणामि रूपं तु सर्वभावानुगा जीवाः ॥२०९॥**

---

परमाणुस्तु न स्कन्धशब्दाभिधेयोऽप्रदेशत्वात् । न हि तस्य द्रव्यप्रदेशाः सन्त्यन्ये, स्वयमेवासौ[1] प्रदेशः । प्रकृष्टो देशोऽवयवः प्रदेशः, न ततः परमन्यः सूक्ष्मतमोऽस्ति [2]पुद्गल द्रव्यदेशः । वर्णरसगन्धस्पर्शगुणेषु भजनीयः सेवनीयः । प्रदेशत्वेन सन्निहितस्य वर्णादयोऽवयवास्तैरवयवैः सप्रदेश एवासौ द्रव्यावयवैरप्रदेश इति । यथोक्तं शास्त्रे—

**कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः ।**
**एकरसगन्धवर्णो द्विस्पर्शः कार्यलिङ्गश्च ॥** इति ॥२०८॥

**( २०९ ) टीका—**कस्मिन् पुनर्भावे औदयिकादौ धर्मादीन्यजीवद्रव्याणि वर्तन्त इत्याह—**भावे धर्मेत्यादि** । अनादिपारिणामिकभावे धर्माधर्माकाशकालद्रव्याणि चत्वारि वर्तन्ते जीवभव्यत्वादिवत् । यथा चानादिः संसारस्तथा धर्मादिद्रव्यपरिणामोऽपीति । न जातुचिद्धर्मादिद्रव्यरहित आसील्लोकः । पुद्गलद्रव्यं पुनरौदयिके भावे भवति पारिणामिके च । परमाणुः परमाणुरिति अनादिपारिणामिको भावः । आदिमत्पारिणामिकस्तु द्व्यणुकादिरभ्रेन्द्रधनुरादिश्च । वर्णरसादिपरिणाम[1]कस्तु परमाणूनां स्कन्धानां चौदयिको भावः द्व्यणुकादिसंहतिपरिणामश्चेति ॥२०९॥

---

स परमाणुः, न ततोऽप्यन्यो लघुरस्तीति, अत एवाप्रदेशः, अपरद्रव्यविकलत्वात्, वर्णादिगुणेषु च-वर्णगन्धरसस्पर्शेषु च एकगुणाद्यनन्तगुणेषु च भजनीयो निश्चेतव्यो वा, तानङ्गीकृत्यासौ सप्रदेश एव, तदुक्तम्-

**कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः ।**
**एकरसवर्णगन्धो द्विस्पर्शः कार्यलिङ्गश्च ॥** ( ) ॥२०८॥

**( २०९ ) ( वि० ) भाव इति** । भावे पारिणामिके धर्माधर्माम्बरकालाः चत्वारो ज्ञेया-ज्ञातव्याः, अन्यभावाप्रवृत्तेः, एते चत्वारोऽरूपाः, रूपं तु-पुद्गलद्रव्यं पुनरुदयपरिणामि वर्तते, औदयिके पारिणामिके भावे पुद्गला वर्तन्ते इत्यर्थः । तत्रौदयिको भावः स्कन्धपरमाणूनां वर्णरसादिपरिणामः, पारिणामिके परमाणुः[1] इत्यजीवाः पञ्चधा । जीवाः सर्वभावानुगाः-यथासम्भवं द्व्यादिभाववन्त इति ॥२०९॥

---

**( २०९ ) ( अव० )—अनादिपारिणामिके[1] पुद्गलद्रव्यं सर्वभावेषु औपशमिकादिषु वर्तते ॥२०९॥**

**जीवाजीवा द्रव्यमिति षड्विधं भवति लोकपुरुषोऽयम् ।**
**वैशाखस्थानस्थः पुरुष इव कटिस्थकरयुग्मः ॥२१०॥**

**तत्राधोमुखमल्लकसंस्थानं वर्णयन्त्यधोलोकम् ।**
**स्थालमिव च तिर्यग्लोकमूर्ध्वमथ मल्लकसमुद्गम् ॥२११॥**

---

**( २१० ) टीका–**जीवाः पुनः सर्वभावेषु औपशमिकादिषु वर्तन्त इति पूर्वमेव भावितम् । अथ कोऽयं लोक इत्याशङ्कते, किं द्रव्यान्तरमुतान्यत् किञ्चिदित्याह–**जीवाजीवा इत्यादि** । जीवा[१] अजीवा धर्माधर्माकाशपुद्गलाः कालश्च षट् द्रव्याणि । [२]लोकपुरुषः पुरुष इव लोकपुरुषः प्रतिविशिष्टसंस्थानत्वात्[३] । अत्र [४]च जीवादीनां पञ्चानां [५]द्रव्याणामाधारभूतं यत्क्षेत्रं तल्लोकशब्दाभिधेयं लोकपुरुष इत्युक्तम् । तन्नि[६]बन्धनमाह–**वैशाखस्थानस्थ इति** । वैशाखं धानुष्कस्य स्थानकम् । ऊर्ध्वमधस्थितः[७] पुरुषो विक्षिप्तजङ्घाद्वयः कट्यां व्यवस्थापिताकुञ्चितहस्तद्वयो यथा [८]तद्वल्लोकपुरुष इति ॥२१०॥

**( २११ ) टीका–**तदेव वैशाखस्थानकं दर्शयति–**तत्राधोमुखेत्यादि** । तत्र तस्मिन् लोके अधोलोकविभागः अधोमुखमल्लकाकारः । उपरि सङ्क्षिप्तमधो विशालं वर्धमानकम् अधोमुखं भवति । रजतस्थालाकारं तिर्यग्लोकं वर्णयन्ति । तिर्यग्लोकादूर्ध्व[१]मल्लकसम्पुटाकारमूर्ध्वलोकं वर्णयन्ति । मल्लकसमुद्गश्च एकं वर्धमानकमूर्ध्वमुखमपरं शरावमधोमुखं तस्योपरीति । एतत्प्रतिपादयति काक्वा । लोकोऽधः सप्तरज्जुप्रमाणो विस्तरेण । तिर्यग्लोको रज्जुप्रमाणः । शरावसम्पुटमध्ये पञ्चरज्जुप्रमाण उपर्येकरज्जुप्रमाण इति ॥२११॥

---

**( २१० ) ( वि० )** अथ कोऽयं लोक इत्याशङ्कते-किं द्रव्यान्तरमुतान्यत्किञ्चिदित्याह–**जीवाजीवा इति** । जीवाजीवा इति षड्विधं द्रव्यं भवति, स च षड्विधः द्रव्यसंयोगः आधाराधेय-रूपो लोकपुरुषः, अयं निगद्यते । स च संस्थानतो[१] वैशाखस्थानस्थो-विवृतपादस्थानस्थितः पुरुष इव-नर इव । कीदृशः ?-कटिस्थकरयुग्मः-कटिप्रदेशस्थापितहस्तद्वयः, विवृतपादभ्राम्यमाणनराकार इति ॥२१०॥

**( २११ ) ( वि० ) तत्रेति** । अत्र स्थालमिव चेत्यत्र चकारो न दृश्यते आदर्शकेषु, तं च विना छन्दो न पूर्यते, तत्त्वं श्रुतविदो विदन्ति । तत्र-पुरुषेऽधोलोकं-सप्तनरकपृथ्वीरूपम् अधोमुखमल्लकसंस्थानम्-अवाङ्मुखशरावाकारं वर्णयन्ति-प्रतिपादयन्ति, स्थालमिव च-वृत्तभाजनाकारं, किं तत् ?-तिर्यग्लोकं-मध्यलोकं, ऊर्ध्वलोकमथ मल्लकसमुद्गं-शराव-सम्पुटाकारमिति ॥२११॥

---

**( २१० ) ( अव० )–विवृतपादस्थानस्थितो विवृतपादभ्राम्यमाणनराकार इति ॥२१०॥**
**( २११ ) ( अव० )–**तत्र=लोके । **अवाङ्मुखशरावाकारमधोलोकम् ऊर्ध्वलोकं शरावसम्पुटाकारम् ॥२११॥**

**सप्तविधोऽधोलोकस्तिर्यग्लोको भवत्यनेकविधः ।**
**पञ्चदशविधानः पुनरूर्ध्वलोकः समासेन ॥२१२॥**

**लोकालोकव्यापकमाकाशं मर्त्यलौकिकः कालः ।**
**लोकव्यापि चतुष्टयमवशेषं त्वेकजीवो वा ॥२१३॥**

---

**( २१२ ) टीका—**एवमधस्तिर्यगूर्ध्वं च विभक्ते लोके को विभागः कतिविध इति दर्शयति—**सप्तविध इति** । समासेनेति सङ्क्षेपेण । रत्नप्रभादिभेदेन महातमःप्रभान्तेन[1] सप्तधाऽधोलोकः। तिर्यग्लोकोऽनेकप्रकारः जम्बूद्वीपादिभेदेन लवणसमुद्रादिभेदेन च । असङ्ख्येयद्वीपसमुद्रा इति। ज्योतिष्कभेदा अपि तिर्यग्लोक एव । ऊर्ध्वलोकस्तु[2] पञ्चदशभेदः । दशकल्पाः सौधर्मादयः, आनत[3]प्राणतावेक एव कल्पः एकेन्द्रस्वामित्वात्, आरणाच्युतौ च । एवं दश कल्पाः । ग्रैवेयकाणि त्रीणि अधोमध्यमोपरितनभेदेन । पञ्च महाविमानानि चतुर्दशो भेदः । ईषत्प्राग्भारा क्षोणि[4] पञ्चदशो भेद इति ॥२१२॥

**( २१३ ) टीका—**अथाकाशं किं लोकमात्रमेवाहोस्वित्सर्वत्रेत्याह—**लोकालोके-त्यादि**। व्यापकमिति लोकालोकस्वरूपमुच्यते लोकस्वरूपमलोकस्वरूपं च । जीवाजीवा-धारक्षेत्रं लोकस्ततः परमलोक इति । यत्राकाशे जीवाजीवादिपदार्थपञ्चकं तल्लोकाकाशं, यत्राभावो जीवादीनां तदलोकाकाशमिति जीवाद्याधारकृतो भेदोऽन्यथा एकमेवाकाशम् ।

---

**( २१२ ) ( वि० ) सप्तेति** । सप्तविधः-सप्तप्रकारो भवत्यधोलोकः, तत्र हि घर्माद्याः सप्त पृथिव्योऽधोऽधो विस्तृताः। तिर्यग्लोको भवत्यनेकविधः, तत्र ह्यसङ्ख्येया द्वीपसमुद्राः । पञ्चदशविधानः-पञ्चदशप्रकारः पुनरूर्ध्वलोकः समासेन-सङ्क्षेपेण, तत्र हि द्वादश कल्पाः ग्रैवेयकाश्च नव इति एकः, [1]पञ्चोत्तराणीत्येकः, सिद्धिश्चेति पञ्चदशेति ॥२१२॥

**( २१३ ) ( वि० ) लोकेति** । लोकालोकयोः समयप्रसिद्धयोर्व्यापकमाकाशं, तत्प्रमाण-मित्यर्थः । मर्त्यलोकभवः कालः। लोकव्यापि चतुष्टयं-चतुर्दशरज्ज्वात्मकाकाशखण्डव्यापि द्वयोराकाशकालयोरुद्धरितं धर्मास्तिकायादिकम् । अवशेषं तु-सर्वलोकस्यासङ्ख्येयभागादिकम् एकजीवः-पृथिव्यादिको व्याप्नोतीति शेषः, वाशब्दात् समस्तलोकं व्याप्नोति केवलिसमुद्घाते [1]वा

---

**( २१२ ) ( अव० )—जम्बूद्वीपादिभेदेन वैमानिकदेवलोकाः[1] १२, ग्रैवेयकाः १३, अनुत्तराः १४, सिद्धिः १५ ॥२१२॥**

**( २१३ )( अव० )—अवशेषं समस्तलोकासङ्ख्येयभागादिकम् ।एको जीवः पृथिव्यादिको व्याप्नोति । वाशब्दात्समस्तलोकम् । केवलीसमुद्घातगतः[1] केवली ॥२१३॥**

**धर्माधर्माकाशानि एकैकमतः परं त्रिकमनन्तम् ।**
**कालं विनास्तिकाया जीवमृते चाप्यकर्तॄणि ॥२१४॥**

---

मर्त्यलौकिकः[१] कालः । [२]मर्त्यलोको मनुष्यलोकः अर्धतृतीया द्वीपाः समुद्रद्वयं च मानुषोत्तरमहीधरेण परिक्षिप्तः[३] । तावत्येव क्षेत्रे [४]वर्तनादिलक्षणः कालो, न परतः । लोकव्यापिचतुष्टयमवशेषं धर्माधर्मजी[५]वपुद्गलाख्यम् । सर्वत्र लोकाकाशे धर्माधर्मौ । सूक्ष्मशरीराश्च जन्तवः सर्वलोक एव । पुद्गलाश्च परमाणुप्रभृतयः सर्वलोक इति । एकोऽपि वा जीवः सकललोकाकाशव्यापी केवलिसमुद्घातकाल एव भवतीति ॥२१३॥

**( २१४ ) टीका—**अत्र किमेकं द्रव्यं किं [१]वानेकद्रव्यमित्याह—**धर्माधर्मेत्यादि** । धर्मद्रव्यमधर्मद्रव्यमाकाशद्रव्यं च त्रीण्यप्येकद्रव्याणि एकमेव[२] द्रव्यं धर्मः, अधर्माकाशावपि तथैव । व्योमद्रव्यं तु लोकालोकरूपमेकमेवेति प्रतिपत्तव्यम् । जीवद्रव्यमनन्तसङ्ख्यम् । तथा पुद्गलद्रव्यं कालद्रव्यमप्यनन्तसमयमतीतानागतादिभेदेनेति । अथायमस्तिकायशब्दः किं सर्वद्रव्यविषयः ? नेत्याह—**कालं विनाऽस्तिकायाः** । कालस्तु नास्तिकायः, न प्रचयोऽस्ति समयानाम् । वर्तमानस्त्वेक एव समयः स नास्तिकायः । अन्यत्र प्रचयोऽस्ति । असङ्ख्येय-प्रदेशो जीवः, तथा धर्माधर्मावपि । व्योमानन्तप्रदेशं पुद्गलद्रव्यं च। जीवादृते द्रव्याणि धर्मादीनि कर्तृत्वपर्यायशून्यानि । [३]जीवस्तु कर्ता शुभाशुभानां कर्मणामिति ॥२१४॥

---

केवली, न पुनरन्य इति । अन्ये त्ववशेषमिति पदं चतुष्टयस्य विशेषणं कृत्वा व्याख्यान्ति-एकजीवो लोकं व्याप्नोति केवलिसमुद्घाते, वाशब्दादजीवोऽप्यचित्तमहास्कन्ध इत्यपि ॥२१३॥

**( २१४ ) ( वि० ) धर्मेति** । धर्माधर्माकाशानि त्रीणि एकैकमिति-एकैकद्रव्यरूपाणि, अत-एतस्मात् परं-व्यतिरिक्तं त्रिकं-कालपुद्गलजीवास्तिकायात्मकमनन्तम्-अनन्तप्रमाणम् । कालं विना-कालमन्तरेण पञ्च अस्तिकायाः-प्रदेशसमूहाः, अयमर्थः-धर्माधर्मलोकाकाशैकजीवप्रदेशा असङ्ख्याः, पुद्गला अनन्ता इति । जीवमृते चापि-जीवास्तिकायं विना अन्यद्रव्याणि पञ्चाप्यकर्तॄणि-न सुखदुःखादेः कारणानि, जीव एव सुखदुःखकारी, अकर्तृत्वे सति संसारा-भावप्रसङ्गादिति ॥२१४॥

---

**( २१४ ) ( अव० )—धर्मास्तिकायादयस्त्रयोऽप्यसङ्ख्येयप्रदेशाः । जीवद्रव्यमसङ्ख्यं कालद्रव्यम[१]नन्तसमयं, कर्तृपर्यायशून्यानि ॥२१४॥**

**धर्मो गतिस्थितिमतां द्रव्याणां गत्युपग्रहविधाता ।**
**स्थित्युपकृच्चाधर्मोऽवकाशदानोपकृद् गगनम् ॥२१५॥**
**स्पर्शरसगन्धवर्णाः शब्दो बन्धश्च सूक्ष्मता स्थौल्यम् ।**
**संस्थानं भेदतमश्छायोद्योतातपश्चेति ॥२१६॥**

---

**( २१५ ) टीका—**[१]धर्मादीनि द्रव्याणि कार्यमिति निर्दिशन्नाह—**धर्मो गतीत्यादि**। धर्मद्रव्यं गतिमतां द्रव्याणां स्वयमेव गतिपरिणतानां उपग्रहे वर्तते जीवपुद्गलानां, न पुनरगच्छज्जीवद्रव्यं पुद्गलद्रव्यं वा बलान्नयति धर्मः, किन्तु स्वयमेव गतिपरिणतमुपगृह्यते धर्मद्रव्येण, मत्स्यस्य गच्छतो जलद्रव्यमिवोपग्राहकम्, यथा वा व्योमद्रव्यं स्वयमेव द्रव्यस्यावगाहमानस्य कारणं भवति, न पुनरनवगाहमानं बलादवगाढं कारयति । यथा [२]वा कृषीवलानां कृष्यारम्भं स्वयमेव कर्तुमुद्यतानामपेक्षाकारणं वर्षं भवति, न च तानकुर्वतः कृषीवलान् बलात् कृषिं कारयति [३]वर्षम् । यथा वा गर्जितध्वनिसमाकर्णनाद् बलाकानां गर्भाधानप्रसवौ भवतः, न च तामप्रसवर्ती[४] बलाकां बलाद् गर्जितशब्दः प्रसा[५]वयति । यथा वा पुरुषः प्रतिबोधनिमित्तं पापाद्विरमति, न चाविरमन्तं पुमांसं बलात्प्रतिबोधो विरमयतीति। एवं गतिपरिणामभाजां पुद्गलजीवानामपेक्षाकारणं धर्मद्रव्यम् । तथा स्थितिमतां द्रव्याणां स्थितेरपेक्षाकारणमधर्मद्रव्यं स्वयमेव तिष्ठतां, न चातिष्ठद् द्रव्यं बलादधर्मः स्थापयति । एवं स्थितिमतां द्रव्याणां स्थित्युपकारी भवत्यधर्मः । गगनं तु जीवपुद्गलानामवगाहमानानाम-वकाशदानेन व्याप्रियते ॥२१५॥

**टीका—**पुद्गलद्रव्यं कमुपकारं विधत्त इत्याह—**स्पर्शेति** । स्पर्शादयः पुद्गलद्रव्य-

---

**( २१५ ) ( वि० )** धर्मादिद्रव्योपकारमाह—**धर्म इति** । धर्मो-धर्मास्तिकायो, गति-स्थितिमतां द्रव्याणां यथासम्भवं सम्बन्धः कार्यः । तत्र गतिपरिणतानां द्रव्याणां-जीवपुद्गलानां गत्युपग्रहस्य विधाता-कर्ता धर्मास्तिकायः । स्थितिपरिणतानां तु स्थित्युपकर्ताधर्मो[१]ऽधर्मास्तिकायः । तथा अवकाशदानोपकृद्-अवगाहतां च द्रव्याणामवकाशदानमुपकरोति, किं तत् ?-गगनम्-आकाशास्तिकाय इति ॥२१५॥

**( २१६ ) ( वि० )** अथ पुद्गलद्रव्यस्य के उपकारा इत्याह—**स्पर्शेति । कर्मेति** । स्पर्शो-

---

**( २१५ ) ( अव० )—गतिनिमित्तं स्थित्युपकारी ॥२१५॥**

**( २१६ ) ( अव० )—सूक्ष्मता परिणामः स्कन्धानामेव तत्सद्भावेन ते इन्द्रियग्राह्याः साक्षात्,**

**कर्मशरीरमनोवाग्विचेष्टितोच्छ्वासदुःखसुखदाः स्युः ।**
**जीवितमरणोपग्रहकराश्च संसारिणः स्कन्धाः ॥२१७॥**

स्योपकाराः । तथा शब्दपरिणामः पुद्गलानामेवोपकारः । बन्धनं बन्धः कर्मपुद्गलानामात्मप्रदेशानां च क्षीरोदकवत् एकलोलीभावः पुद्गलद्रव्यस्योपकारः । सूक्ष्मतापरिणामः पुद्गलानामुपकारोऽनन्तप्रदेशानां स्कन्धानाम् । तथा स्थौल्यपरिणामोऽभ्रेन्द्रधनुरादीनां, संस्थानं चतुरस्रादि पुद्गलोपकारः । भेदः खण्डरूपं सोऽपि पुद्गलपरिणामः । तमोऽन्धकारपरिणामः पुद्गलद्रव्याणामेवोपकारः । छायापि पुद्गलपरिणामः । उद्योतश्चन्द्रतारकादीनां पुद्गलपरिणामः । आतपो दिनकरादीनां पुद्गलपरिणामः ॥२१६॥

**( २१७ ) टीका—कर्मशरीरेत्यादि** । कर्म ज्ञानावरणादि पुद्गलोपकारः । शरीरमौदारिकादि पुद्गलपरिणामः । मनोवाचौ[१] पुद्गलपरिणामः । [२]चेष्टितं क्रिया पुद्गलपरिणामः । उच्छ्वासः प्राणापानौ पुद्गलपरिणामः । दुःखं सुखं चेति पुद्गलजनितमेव ।

गुरुलघुमृदुकठिनशीतोष्णस्निग्धरूक्षभेदादष्टविधः, तिक्तकटुकषायाम्लमधुरभेदात्पञ्चविधो रसः, एवं कृष्णादिः पञ्चधा वर्णः, सुरभीतरभेदो गन्धः, कृतद्वन्द्वा एते चित्रभेदाः पुद्गलद्रव्यस्योपकारा[१] इति शेषः । शब्दोऽनेकप्रकारः, सोऽपि तस्यैवोपकारः, एवं सर्वत्र योजना । बन्धः कर्माणूनां आत्मप्रदेशैः सह, अथ पूरणे, सूक्ष्मता–सूक्ष्मपरिणामः, यत्सद्भावे पुद्गलाः साक्षादिन्द्रियैर्न गृह्यन्ते । तथा स्थौल्यं–स्थूलता, यत्सद्भावे ग्रहणधारणयोग्याः स्कन्धाः[२], तथा संस्थानं[३] वृत्तत्र्यस्रचतुरस्रायतपरिमण्डलभेदात् प्रसिद्धस्वरूपात् पञ्चधा । तथा भेदो–द्विधाभावो द्व्यादिस्कन्धानां पृथक्पृथग्भवनम् । तमः–अन्धकारः । छाया–शीता आह्लादकारिणी । उद्योतो रत्नादिसमुद्भवः । आतपो–दिनकरतापः । भेदादयः पञ्चापि कृतद्वन्द्वाः । सर्वेऽप्येते पुद्गलद्रव्यस्योपकारा युक्त्यागमप्रतिपाद्याः ॥२१६॥

**( २१७ ) ( वि० ) कर्मेति** । तथा कर्म–ज्ञानावरणादि शरीरम्–औदारिकादि मनो–मनोवर्गणाः वाग्–द्वीन्द्रियादिभिरुच्चार्यमाणा विचेष्टितानि–विविधव्यापारा ग्रहणोत्क्षेपणाकुञ्चनादयः उच्छ्वासः–आनपानौ, दुःखं सुखं च प्रतीतम्, एतानि कर्मादीन्यष्टौ पदानि कृतद्वन्द्वानि ददति–कुर्वन्ति [१]ते तथा । तथा जीवितम्–आयुः, तदपि पौद्गलिकमार्हतानां, जीवितोपष्टम्भहेतवो वा–अन्नपानादयः, मरणं प्राणत्यागलक्षणं, तदपि [२]पुद्गलशाटात्मकत्वात्पौद्गलिकं, मरणहेतवो वा शस्त्राग्निविषादयः,

**भेदो द्व्यादिस्कन्धानां पृथग्भवनम् । स्पर्शादयः पुद्गलद्रव्यस्योपकाराः । [१]शब्दपरिणामः पुद्गलद्रव्याणामुपकारः कर्मपुद्गलानां बन्धः क्षीरनीरवत्, इन्द्रधनुरादिः ॥२१६॥**

**( २१७ ) ( अव० )—[१]कर्म ज्ञानावरणादि शरीरम् औदरिकादि मनोवर्गणा वाग्द्वीन्द्रियादिभिरुच्चार्यमाणा विचेष्टितानि विविधव्यापारोत्क्षेपणाकुञ्चनादयः । उपग्रहः सौभाग्याद्दश्यीकरणादिः जीवितदं क्षीरघृतादि, मरणदं विषास्त्रादि । [२]स्कन्धाः ॥२१७॥**

**परिणामवर्तनाविधिः परापरत्वगुणलक्षणः कालः ।**
**सम्यक्त्वज्ञानचारित्रवीर्यशिक्षागुणाः जीवाः ॥२१८॥**

जीवितोपग्रहकराः क्षीरघृतादिपुद्गलाः, मरणोपग्रहकरा [३]विषगरादिपुद्गलाः सर्वेऽप्येते पुद्गलानामुपकाराः संसारिजीवविषयाः स्कन्धरूपेण परिणतानां, न परमाणुरूपेणेति ॥२१७॥

**( २१८ ) टीका**—कालकृतोपकारदर्शनायाह—**परिणामेत्यादि** । परिणामस्तावद्वर्धतेऽङ्कुरो हीयते [१]विनश्यतीत्यादिकः कालजनित उपकारः । **वर्तनेति**—वर्तत इदं[२] न वर्तते कालापेक्षमेतदभिधानं प्रयुञ्जन्ते विद्वांसः । वर्तनाया विधिः प्रकार उक्तेन न्यायेन । परत्वमपरत्वं च कालकृतम् । पञ्चाशद्वर्षात्पञ्चविंशतिवर्षो परः,[३] पञ्चविंशतिवर्षात्पञ्चाशद्वर्षोऽपरः । एवं परिणामादिगुणलक्षणः कालः परिणामादिभिर्यथोक्तैर्लक्ष्यत[४] इत्यर्थः । अथ जीवाः केनोपकारेणोपकुर्वते ? सम्यक्त्वाद्युत्पादनेन । तत्र तत्त्वार्थश्रद्धानलक्षणं सम्यक्त्वमुत्पादयन्ति। ज्ञानं श्रुताद्यधिगमयन्ति । चारित्रं क्रियानुष्ठानमुपदिशन्ति । [५]वीर्यं शक्तिविशेषं दर्शयन्ति । शिक्षा लिप्यक्षरादिसंविज्ञानं जनयन्ति । एते जीवकृता[६] उपकाराः ॥२१८॥

---

उपग्रहः-सौभाग्यादृश्यीकरणधारास्तम्भादयः, एतांस्त्रीनपि कृतद्वन्द्वान् कुर्वन्ति-विदधतीति तत्कराः संसारिणो-जीवस्य, स्कन्धाः-प्रभूताणुसमुदायाः, न तु व्द्यणुकादयः स्कन्धाः, तेषां अत्र कार्येषु अनुपयोगित्वात्, स्युः-भवेयुरिति क्रिया सर्वपदेषु योज्या इति ॥२१७॥

**( २१८ ) ( वि० )** अथ कालकृतोपकारप्रदर्शनायाह—**परिणामेति** । परिणामश्च वर्तनाविधिश्च परापरत्वं च तानि तथा तान्येव गुणा-लक्षणं यस्य कालस्य स परिणामवर्तनाविधिः-परापरत्वगुणलक्षणः । क एवंविधः ?, [१]अत आह-कालः । तत्र परिणमनं परिणामो, यथा वर्धतेऽङ्कुरो हीयते वा इत्यादिकः कालजनित उपकारः । वर्तनाया विधिः-प्रकारो वर्तनाविधिः, वर्तत इदं न वर्तते चेदमित्येतदपि कालापेक्षम्, अस्मिन् काल इदं प्रवर्तते इदं न प्रवर्तत इति । तथा परत्वमपरत्वं च[२], त्वप्रत्यय उभयत्र योज्यते, इदं च कालकृतं, कथं ?, पञ्चाशद्वर्षात्पञ्चविंशतिवर्षोऽपरः-अर्वाग्वर्ती, पञ्चविंशतिवर्षात्पञ्चाशद्वर्षः परः-परवर्तीति। कालः परिणामादिभिर्यथोक्तैर्लक्ष्यत इत्यर्थः । अथ जीवद्रव्यं केनोपकारेणोपकुरुते ? । अत्राजीवपदव्याख्याने यज्जीवपदव्याख्यानं तद् द्रव्यव्याख्याप्रस्तावात् । सम्यक्त्वादयो गुणा येषां ते तथा, जीवाः, तत्राद्यास्त्रयः प्रसिद्धार्था[३], वीर्यं-शक्तिविशेषः, शिक्षा-ग्रहणासेवनरूपेति[४] ॥२१८॥

---

**( २१८ ) ( अव० )—परिणमनं परिणामः, यथा वर्धतेऽङ्कुरो हीयते वा इत्यादिकालजनित उपकारः । इदं वर्तत इदं न वर्तते वर्तनायाः[१] प्रकारः । परत्वमपरत्वं कालकृतं, पञ्चाशद्वर्षात्पञ्चविंशतिवर्षोऽपरः, २५ ( पञ्चविंशति ) वर्षात् ५० ( पञ्चाशत् ) वर्षः[२] परः । शिक्षा लिप्यादि ग्रहणासेवनादिर्वा ॥२१८॥**

**पुद्गलकर्म शुभं यत् तत् पुण्यमिति जिनशासने दृष्टम् ।**
**यदशुभमथ तत्पापमिति भवति सर्वज्ञनिर्दिष्टम् ॥२१९॥**

**योगः शुद्धः पुण्याश्रवस्तु पापस्य तद्विपर्यासः ।**
**वाक्कायमनोगुप्तिर्निराश्रवः संवरस्तूक्तः ॥२२०॥**

---

**( २१९ ) टीका—**एवं जीवाजीवानभिधाय प्रपञ्चेन पुण्यापुण्यपदार्थद्वयमभिधित्सुराह—**पुद्गलकर्मेत्यादि**। द्विचत्वारिंशत्प्रकृतयः शुभाः पुण्याभिधानाः। [१]द्व्यभ्यधिकाशीतिरप्रशस्त-प्रकृतीनां पापाभिधाना। एवमाहुः सर्वज्ञा इति आगमग्राह्यः पदार्थोऽयमिति प्रतिपादयति॥२१९॥

**( २२० ) टीका—**आश्रवसंवरौ निरूपयति—**योग इत्यादि** । योगो मनोवाक्कायाख्यः

---

**( २१९ ) ( वि० )** एवं जीवाजीवावभिधाय सम्प्रति पुण्यापुण्यपदार्थद्वयमाह—**पुद्गल कर्मेति** । सूचकत्वात्सूत्रस्य पुद्गलमयं पौद्गलिकं, किमेवंविधमित्याह-कर्म । तच्च द्वेधा। तत्र यच्छुभं तत् पुण्यमिति जिनशासने दृष्टम् । यदशुभं तत् पापम् । अथानन्तर्ये । इति भवति सर्वज्ञनिर्दिष्टम्। तत्र पुण्यप्रकृतयः-

**सायं उच्चागोयं सत्ततीसं तु नामपयडीओ ।**
**तिन्नि य आऊणि तहा बायालं पुन्नपयडीओ ॥**
**( सातमुच्चैर्गोत्रं सप्तत्रिंशत्तु नामप्रकृतयः ।**
**त्रिणि चायूंषि तथा द्विचत्वारिंशत्पुण्यप्रकृतयः ॥)**

पापप्रकृतयस्तु यथा-

**नाणंतरायदसगं[१] दंसण नव मोहपयइछव्वीसं ।**
**नामस्स चउत्तीसं तिण्हं एक्केक्क पावाओ ॥** ॥२१९॥
**( ज्ञानन्तरायदशकं दर्शनं नव मोहप्रकृतिषड्विंशम् ।**
**नाम्नः चतुस्त्रिंशत् त्रयाणां एकैकाः पापाः ॥)**

**( २२० ) ( वि० )** अथाश्रवसंवरौ निरूपयति—**योग इति** । योगो-मनोवाक्कायाख्यः, कीदृशः ?-शुद्धो-जिनागमपूर्वको व्यापारः, स किं ?-पुण्यस्याश्रवः पुण्याश्रवः, तु पुनरर्थः,

---

**( २१९ ) ( अव० )—द्विचत्वारिंशत्प्रकृतयः पुण्यं, द्व्यशीतिः पापम् ॥२१९॥**

**( २२० ) ( अव० )—आगमपूर्वो मनोवाक्कायव्यापारः । तस्य=योगस्य विपरीतता । गुप्तिर्गोपनं स्थगिताश्रवद्वारः ॥२२०॥**

**संवृततपउपधानं तु निर्जरा कर्मसन्ततिर्बन्धः ।**
**बन्धवियोगो मोक्षस्त्विति सङ्क्षेपान्नव पदार्थाः ॥२२१॥**

**एतेष्वध्यवसायो योऽर्थेषु विनिश्चयेन तत्त्वमिति ।**
**सम्यग्दर्शनमेतत्तु तन्निसर्गादधिगमाद्वा ॥२२२॥**

---

[1]स खल्वागमपूर्वको व्यापारः, कायादीनाम् । शुद्धः पुण्याश्रवः पुण्यस्य कारणमित्यर्थः । पापस्य आश्रवः तद्विपर्यासः अशुद्धो यः [2]कायादिव्यापारः स्वेच्छाकृतः स पापस्याश्रव इति। सर्वेषामाश्रवाणां निरोधो गुप्तिसमितिपुरस्सरः नियमितमनोवाक्कायक्रियस्य संवरो भवति स्थगिताश्रवद्वारस्येत्यर्थः ॥२२०॥

**( २२१ ) टीका—**निर्जरणबन्धमोक्षप्रतिपादनायाह-**संवृततप इत्यादि** । एवं संवृताश्रवद्वारस्य तपसि यथाशक्ति घटमानस्यापूर्वकर्मप्रवेशनिरोधे सति पूर्वार्जितस्य कर्मणः तपसा क्षयः निर्जरा निर्जरणम् । उपधानमिवोपधानं शिरोधरायाः सुखहेतुर्यथा तथा तपोऽपि जीवस्य सुखहेतुत्वादुपधानमुच्यते । कर्मसन्ततिर्बन्धः कर्मणां ज्ञानावरणादीनां सन्ततिरविच्छेदो बन्धः कर्मत[1] एव कर्मोपादानमात्मन इत्यर्थः । कार्त्स्न्येन बन्धवियोगो मोक्षः । द्वाविंशत्युत्तरेऽपि [2]कर्मप्रकृतिशते निःशेषतः क्षीणे मोक्षो भवति । इत्युक्ताः [3]समासतो नव पदार्थाः ॥२२१॥

**( २२२ ) टीका—**सम्यग्दर्शनस्वरूपनिरूपणार्थमाह—**एतेष्वित्यादि** । एतेषु जीवादि-पदार्थेषु योऽध्यवसायो विनिश्चयेन परमार्थेन, न दाक्षिण्याद्यनुवृत्त्या, तत्तत्त्वमिति सत्यं तथ्यं

---

पुण्यबन्धहेतुरिति । पापस्य तद्विपर्यासो-व्यत्ययः, अयमर्थः-अशुद्धो योगः पापस्याश्रव इति । वाक्कायमनोगुप्तिः-वचनादिगोपनं निराश्रवः-कर्मप्रवेशविकलः संवरस्तूक्तः-संवरो नाम पदार्थोऽभिहित इति ॥२२०॥

**( २२१ )( वि० )** निर्जरा१बन्ध२मोक्ष३पदार्थत्रयप्रतिपादनार्थमाह—**संवृत इति** । तपश्चोपधानं च तपउपधानं संवृतस्य तपउपधानं संवृततपउपधानं तस्मात्तु, पाठान्तरे तपउपधानमिति । किं ?-निर्जरा-प्राक्तनकर्मशाटः, तत्र तपोऽनशनादि, उपधानं तु योगोद्वहनम् । कर्मणो नवस्य सन्ततिः स बन्ध उच्यते । तथा बन्धवियोगो मोक्षः । तु पुनरर्थः । इति सङ्क्षेपान्नव पदार्था इति ॥२२१॥

**( २२२ )( वि० ) एतेष्विति** । एतेषु-जीवादिष्वर्थेषु योऽध्यवसायः-परिणामो विनिश्चयेन-परमार्थेन तत्त्वमिति-सत्यं तथ्यं सद्भूतमित्यर्थः । एतत् सम्यग्दर्शनं-सम्यक्त्वमभिधीयते । एतच्च

---

**( २२१ ) ( अव० )—संवृतात्मनस्तपसा पूर्वार्जितस्य कर्मणः क्षयः । उपधानं योगो-द्वहनादि तेन नव्यकर्मप्रवेशाभावः ॥२२१॥**

**( २२२ ) ( अव० )—जीवादिषु निश्चयेन परिणामः सद्भूतमिति ॥२२२॥**

**शिक्षागमोपदेशश्रवणान्येकार्थिकान्यधिगमस्य ।**
**एकार्थः परिणामो भवति निसर्गः स्वभावश्च ॥२२३॥**

**एतत्सम्यग्दर्शनमनधिगमविपर्ययौ तु मिथ्यात्वम् ।**
**ज्ञानमथ पञ्चभेदं तत् प्रत्यक्षं परोक्षं च ॥२२४॥**

---

तद्भूतमित्यर्थः । एतदेवंप्रकारं सम्यग्दर्शनं[1], तत्तु द्विहेतुकं निसर्गादधिगमाद्वेति । निसर्गः स्वभावः संसारे परिभ्रमतो जीवस्यानाभोगपूर्वकं[2] कर्म क्षपयतो ग्रन्थिस्थानप्राप्तस्यापूर्वकरण-लाभात् ग्रन्थिं विदारयतः शुभाध्यवसायस्य विभिन्नग्रन्थेरनिवृत्तिकरणप्राप्तौ शुभपरिणामस्य[3] निसर्गतः स्वभावादेव तत्त्वार्थश्रद्धानलक्षणं [4]सम्यग्दर्शनमुत्पद्यते। [5]भगवत्प्रतिमादर्शनाद्वा गुप्त [6]साधुदर्शनाद्वा शुभपरिणामः । निसर्गः स्वभावश्चैकार्थाः । कदाचिद् ग्रन्थौ भिन्ने शिक्षमाण-स्यागमोपदेशादाकर्णयतः शृण्वतोऽधिगमसम्यग्दर्शनमुत्पद्यते ॥२२२॥

**( २२३ ) टीका—**एतदेव दर्शयति—**शिक्षेत्यादि** । उक्तार्था कारिका[1] ॥२२३॥

**( २२४ ) टीका—एतत्सम्यग्दर्शनेत्यादि** । एतद् द्विप्रकारं सम्यग्दर्शनमाधिगमिकं नैसर्गिकं च । एतद्विपरीतं मिथ्यात्वमनधिगमलक्षणं तत्त्वार्थाश्रद्धानम् । अतत्त्वबुद्धिरिति विपर्ययः । ज्ञानं मत्यादिभेदेन पञ्चधा । तत्समासतो द्विधा—प्रत्यक्षं परोक्षं च । तत्र प्रत्यक्षमवधिमनःपर्यायकेवलाख्यमक्षस्यात्मनः साक्षादिन्द्रियनिरपेक्षं क्षयोपशमजं क्षयोत्थं च।

---

निसर्गाद्वा लभ्यते अधिगमाद्वेति ॥२२२॥

**( २२३ ) ( वि० )** एतयोरेव व्यत्ययेन पर्यायानाह—**शिक्षेति** । शिक्षा-जिनधर्माभ्यासः आगमः-पाठः, उपदेशः-आप्तवचनं श्रवणम्-आकर्णनम्, एषां द्वन्द्वः। तान्येकार्थिकान्यधिगमस्य, एकार्थे-एकस्मिन्नर्थे सम्यक्त्वलक्षणे यः परिणामः-परिणतिविशेषः स भवति निसर्गः, स्वभावश्च-स्वस्य-आत्मनस्तेन तेन रूपेण भवनं इति भावना ॥२२३॥

**( २२४ ) ( वि० )** एतन्निगमयन्[1] विपक्षं प्रतिपादयन् उत्तरसम्बन्धं चाह—**एतदिति** । एतत्सम्यग्दर्शनं लेशतोऽभिहितं, यः पुनरनधिगमो-योऽनध्यवसायो १ यश्च विपर्ययो-

---

**( २२३ ) ( अव० )—शिक्षा जिनोदितक्रियाकलापाभ्यासः पुनः पुनः ॥२२३॥**

**( २२४ ) ( अव० )—एतद् द्विप्रकारम् । विस्तरा[1]धिगमो=विस्तरपरिच्छेदः । विपरीतार्थग्राही प्रत्ययो विपर्ययः, समासतो द्वेधा[2] अवधिमनःपर्यायकेवलाख्यं प्रत्यक्षम्, मतिश्रुते परोक्षे ॥२२४॥**

**तत्र परोक्षं द्विविधं श्रुतमाभिनिबोधिकं च विज्ञेयम् ।**
**प्रत्यक्षं चावधिमनःपर्यायौ केवलं चेति ॥२२५॥**
**एषामुत्तरभेदविषयादिभिर्भवति विस्तराधिगमः ।**
**एकादीन्येकस्मिन् भाज्यानि त्वाचतुर्भ्य इति ॥२२६॥**

---

मतिश्रुते परोक्षमिन्द्रियानिन्द्रियनिमित्तमिन्द्रियद्वारकं, न पुनरात्मनः साक्षाद्धूमादग्निज्ञानवत् । इन्द्रियमनोज्ञानावरणक्षयोपशमजन्यं परोक्षमिति ॥२२४॥

**( २२५ ) टीका—तत्र परोक्षमित्यादि** । श्रुतमागमोऽतीन्द्रियविषयो यथार्थपरिच्छेदित्वात् प्रमाणम् । आभिनिबोधिकं मतिरिति तुल्यार्थौ । सा च मानसी मतिरर्थावग्रहाद्या[१] । ततः परं द्विबहुद्वादशविधं श्रुतं भवति। प्रत्यक्षं पुनरवध्यादित्रयम् । मिथ्यादर्शनपरिग्रहान्मतिश्रुतावधयो विपर्ययश्चाज्ञानमपि भवतीति ॥२२५॥

**( २२६ ) टीका—एषामुत्तरेत्यादि** । एषां मत्यादिज्ञानानामुत्तरभेदविषयादिभिर्विस्तराधिगमो भवति । तत्रेन्द्रियानिन्द्रियभेदाद् द्विविधं मतिज्ञानं अवग्रहादिभेदा[१]च्चतुर्धा, बह्वादिभेदादनेकधा । श्रुतमप्यङ्गबाह्याङ्गप्रविष्टभेदाद् द्वेधा । अङ्गबाह्यमनेकप्रकारम् आवश्यकाद्यङ्गप्रविष्टमप्याचारादिद्वादशविधम् । तत्र परोक्षमसर्वद्रव्यविषयम् । अवधिर्जघन्यमध्यमो-

---

विपरीतार्थग्राहिप्रत्ययः २ तुशब्दात्संशयश्च एतत्त्रयमपि मिथ्यात्वमभिधीयते । ज्ञानमथ पञ्चभेदं मत्यादिभेदात्[२], तत् समासतः, प्रत्यक्षं च परोक्षं च वक्ष्यमाणस्वरूपमिति ॥२२४॥

**( २२५ ) ( वि० )** तदेवाह—**तत्रेति** । तत्र-तयोर्मध्ये परोक्षं द्विविधं-द्विभेदं श्रुतं-श्रुतज्ञानं आभिनिबोधिकं-मतिज्ञानं विज्ञेयम् । प्रत्यक्षं पुनरवधिमनःपर्यायौ केवलं चेतीति-त्रिधेति[१] च सुबोधमिति ॥२२५॥

**( २२६ ) ( वि० ) एषामिति** । एषां-मत्यादिज्ञानानाम् उत्तरभेदा-अष्टाविंशतिचतुर्दशविध-षड्विधद्विविधैकभेदादयो, [१]विषयो-गोचरो मतिश्रुतयोः सामान्यद्रव्येष्वसर्वपर्यायेषु अवधे [२]रूपिषु मनःपर्यायज्ञानस्य मनोगतद्रव्येषु केवलस्य सर्वद्रव्यपर्यायेषु, आदिशब्दात् स्वरूपलाभक्रमक्षेत्रादिपरिग्रहः,

---

**( २२५ ) अव०—आभिनिबोधिकं=मतिज्ञानम् ॥२२५॥**

**( २२६ ) अव०—ज्ञानानां क्रमेणाष्टाविंशतिचतुर्दशषड्द्विभेदा उत्तराः । विषयो=गोचरो मतिश्रुतयोः[२] सामान्यतः [१]द्रव्येषु सर्वपर्यायेषु । अवधे रूपिषु । मनःपर्यायं मनोगतद्रव्येषु । केवलं तु सर्वद्रव्यपर्यायेषु । आदिशब्दात्क्षेत्रकालादिपरिग्रहः[३] । एकस्मिन् जीवे युगपदेकादीनि कियन्ति ? भाज्यानि=भजनीयानि । चत्वारि यावत्केवलावाप्तावपरज्ञानाभावः ॥२२६॥**

**सम्यग्दृष्टेर्ज्ञानं सम्यग्ज्ञानमिति नियमतः सिद्धम् ।**
**आद्यत्रयमज्ञानमपि भवति मिथ्यात्वसंयुक्तम् ॥२२७॥**

---

त्कृष्टादिभेदेनानेकधा रूपिद्रव्यनिबन्धनः । मनःपर्यायज्ञानमपि [२]ऋजुविपुलमत्यादिभेदेनावधिज्ञान-विषयीकृतद्रव्यानन्तभागनिबन्धनं विशुद्धतरं चेति । एवं विस्तराधिगमः । आदिग्रहणात् क्षेत्रकालविभागोऽपि द्रष्टव्यः । अथैतानि पञ्च ज्ञानान्येकस्मिन्नात्मनि युगपत् कियन्ति [३]सम्भवन्तीत्याह—**एकादीनीत्यादि** । एकं मतिज्ञानं जघन्यतः श्रुतज्ञानमक्षरात्मकं [४]न सर्वत्र सम्भवतीत्येवमुक्तमेकं मतिज्ञानमिति । अन्यथा भावश्रुतं सर्वजीवानामागमेऽभिहितम् । तथा कदाचिन्मतिश्रुते द्वे भवतः, कदाचित्त्रीणि [५]मतिश्रुतावधिज्ञानानि, [६]कदाचिन्मतिश्रुता-वधिमनःपर्यायज्ञानानीति, न जातुचित्पञ्चापि युगपत्सम्भवन्तीति ॥२२६॥

**( २२७ ) टीका—**सम्यग्ज्ञानमिथ्याज्ञानयोः किंकृतो भेद ? इत्याह—**सम्यग्दृष्टेरिति** । सम्यग्दृष्टिस्तत्त्वार्थश्रद्धानलक्षणसम्यग्दर्शनसम्पन्नः शङ्कादिशल्यरहितस्तस्य यज्ज्ञानं तत्सम्यग्ज्ञानम्, यथावस्थितपदार्थपरिच्छेदित्वात् । नियमेनैवाव्यभिचारि सिद्धम् । **आद्यत्रयमज्ञानमपि** । मिथ्यादर्शनयोगात् मतिश्रुतावधयः सदसदविशेषपरिज्ञानाद्यदृच्छातो वाऽसदुपलब्धेरुन्मत्तवत् ज्ञानफलाभावाच्च मिथ्यादृष्टेरज्ञानमेव ॥२२७॥

---

समासस्त्वेवं-उत्तरभेदाश्च विषयाश्च ते आदिर्येषां ते तथा तैरुत्तरभेदविषयादिभिः करणभूतैर्द्वारैर्भवति[३]-जायते विस्तराधिगमो-विस्तरपरिच्छेदः । तथा एकद्वित्रिचतुःसङ्ख्याभिः[४] एकस्मिन् जीवे भाज्यानि तु-विकल्पनीयानि पुनः आचतुर्भ्यः-चत्वारि यावत् । एकस्मिन् जीवे एकं मतिज्ञानं शास्त्रपाठ-श्रवणाभावात्, तत्त्वतस्तु मतिश्रुते सर्वत्र, तथा द्वे मतिश्रुते, तथा त्रीणि मतिश्रुतावधिज्ञानानि, तथा चत्वारि मतिश्रुतावधिमनःपर्यायज्ञानानि, न तु पञ्च, केवलज्ञाने सत्यन्येषाम[५]भावादिति ॥२२६॥

**( २२७ ) ( वि० )** अथ सम्यग्ज्ञानमिथ्याज्ञानयोः किंकृतो विशेषः ?—**सम्यग्दृष्टेरिति** । सम्यग्दृष्टेः-क्षायिकादित्रिविधसम्यग्[१]दर्शनिनो ज्ञानं-वस्तुपरिच्छेदः सम्यग्ज्ञानमिति नियमतो-नियमेन सिद्धम् । किं तदित्याह-आद्यत्रयं-मतिश्रुतावधिरूपं अज्ञानमपि-विपरीतबोधोऽपि भवति-जायते । कीदृशं सत् ?-मिथ्यात्वसंयुक्तं-मिथ्यात्वोदयोपरक्तस्वभावं, अयमर्थः-तदेव [२]मत्यादित्रयं विपर्यस्तमज्ञानत्रयं भण्यते, मत्यज्ञानं श्रुताज्ञानं विभङ्गमिति ॥२२७॥ **जीव-१२, उपयोग-१३, भाव-१४, द्रव्याणि-१५ इत्याधिकाराश्चत्वारः ॥**

---

**( २२७ ) ( अव० )—मतिश्रुतावधयः ॥२२७॥**

**सामायिकमित्याद्यं छेदोपस्थापनं द्वितीयं तु ।**
**परिहारविशुद्धिकं सूक्ष्मसम्परायं यथाख्यातम् ॥२२८॥**

---

**( २२८ ) टीका—**[१]सम्यग्दर्शनसम्यग्ज्ञाने निरूप्य चारित्रप्रतिपादनार्थमाह—**सामायिकमित्यादि** । अरक्तद्विष्टः समः तस्य आयो लाभ उपचयो ज्ञानादेः समायः स प्रयोजनमस्येति सामायिकम् । प्रथमपश्चिमतीर्थङ्करयोरित्वरं[२] सामायिकं, मध्यमतीर्थङ्कराणां यावज्जीविकम् । पूर्वपर्यायच्छेदादुत्तरपर्यायोपस्थापनं[३] छेदोपस्थापनं, प्रथमपश्चिमतीर्थङ्करयोरेव तीर्थे । परिहारविशुद्धिकं परिहारेण आचाम्लवर्जिताहारपरिहारेण तत्परित्यागेन[४] विशुद्धिः कर्म यत्र तत्परिहारविशुद्धिकम्, [५]अधीतनवमपूर्वतृतीयाचारवस्तूनां[६] गच्छनिर्गतानां पारिहारिक-[७]अनुपारिहारिक-कल्पस्थितित्वेन त्रिधा स्थितानां ग्रीष्मशिशिरवर्षासु चतुर्थादिद्वादशान्तभक्त-भोजिनामाचाम्लेनैव परिहारिकाणाम् [८]अनुपरिहारिकाणां तु प्रतिदिनाचाम्लभोजिनां कल्प-स्थितस्य च एकैकस्य वर्गस्य [९]षण्मासावधिकं तपोऽनुष्ठानं परिहारविशुद्धिकमुच्यते । तथा सूक्ष्मसम्परायं सम्परायः कषायो यस्य सूक्ष्मो लोभाख्यस्तत्सूक्ष्मसम्परायं दशमगुणस्थान-वर्तिनश्चारित्रं भवति । [१०]यथाख्यातं तूपशान्तकषायस्य क्षीणमोहस्य[११] च चैकादशे द्वादशे च गुणस्थाने वर्तमानस्य भवति । यथा भगवद्भिराख्यातं येन प्रकारेण कथितं कथं [१२]चाख्यातम-कषायस्य चारित्रमित्येवमाख्यातम् ॥२२८॥

---

**( २२८ ) ( वि० )** चारित्रमधुना—**सामायिकमिति** । सामायिकं-समशत्रुमित्रभावं प्रथमचरमतीर्थकरयोरित्वरं मध्यमविदेहजिनानां च[१] यावज्जीवमित्येवंरूपमाद्यं, १ पूर्वपर्यायच्छेदा-दुत्तरपर्यायोपस्थापनं द्वितीयं २ [२]पुनराद्यन्तजिनतीर्थयोः । परिहारविशुद्धिकं-परिहारेण-आचाम्लवर्जिताहारेण[३] विशुद्धिः-कर्मक्षयो यत्र तत्तथा, तत्केषां भवति ?-अधीतनवम-पूर्वतृतीयाचारवस्तुनां साधूनां गच्छविनिर्गतानां परिहारिककल्पस्थिततत्वेन त्रिधास्थितानां ग्रीष्मशिशिरवर्षासु चतुर्थादिद्वादशान्तभक्तभोजिनाम्, [४]आचाम्लेनैव परिहारिकाणां, तथा अनुपहारिकाणां कल्पस्थितस्य च प्रतिदिनमाचाम्लभोजनम्, एकैकस्य एकैकस्य वर्गस्य षण्मासावधिकतपोऽनुष्ठानमिति, [५]पारिहारिकं स्थापना । इदं चाष्टादशभिर्मासैर्निष्पद्यते, ततो गच्छमनुप्रविशन्ति तदेव वा पुनस्तपः कुर्वन्ति ३, सूक्ष्मः-अत्यन्तकिट्टीकृतः सम्परायो-लोभो यत्र तत्, सूक्ष्मसम्परायगुणस्थानवर्त्येव ४ यथाख्यातम्-अकषायम् उपशान्तादिगुणस्थान[६]चतुष्टय इति ॥२२८॥

---

**( २२८ ) ( अव० )—समो=रागद्वेषविकलस्तस्य आयो=लाभस्तत्र भवं सामायिकम् । प्राक्तनपर्यायच्छेद उत्तरपर्यायस्थापनम् । परिहरणं=परिहारस्तेन विशुद्धम् । सूक्ष्मोऽत्यन्तकिट्टीकृतः सम्परायो=लोभो यत्र[१] सूक्ष्मसम्परायगुणस्थानवर्तिनः । अकषायं यथाख्यातम् ॥२२८॥**

**इत्येतत् पञ्चविधं चारित्रं मोक्षसाधनं प्रवरम् ।**
**नैकैरनुयोगनयप्रमाणमार्गैः समनुगम्यम् ॥२२९॥**

**सम्यक्त्वज्ञानचारित्रसम्पदः साधनानि मोक्षस्य ।**
**तास्वेकतराभावेऽपि मोक्षमार्गोऽप्यसिद्धिकरः ॥२३०॥**

---

**( २२९ ) टीका—इत्येतत्पञ्चेत्यादि** । पञ्चविधं सामायिकादियथाख्यातपर्यन्तम् अष्टविधकर्मचयरिक्तीकरणाच्चारित्रम्। मोक्षसाधनं सम्यग्ज्ञानपूर्वकं क्रियानुष्ठानम् । प्रवरं प्रधानम्। [१]अनेकानुयोगद्वारमार्गेण, अनेकेन च नयमार्गेण नैगमादिना, तथा प्रमाणमार्गेण प्रत्यक्षपरोक्षगोचरेण समनुगम्यं समधिगम्यं ज्ञेयमित्यर्थः ॥२२९॥

**( २३० ) टीका—**सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रं च किं समुदितमेव साधन-माहोश्विदेकैकमपीत्याशङ्क्याह**—सम्यक्त्वज्ञानेत्यादि** । समुदितमेव त्रितयमविकलं

---

**परिहारविशुद्धितपःस्थापना**

| ऋतुः | जघन्यम् | मध्यमम् | उत्कृष्टम् |
|---|---|---|---|
| ग्रीष्मः | चतुर्थभक्तः | षष्ठभक्तः | अष्टमभक्तः । (त्रय उपवासाः) |
| शिशिरः | षष्ठभक्तः | अष्टमभक्तः | दशमभक्तः । (चत्वार उपवासाः) |
| वर्षा | अष्टमभक्तः | दशमभक्तः | द्वादशभक्तः । (पञ्चोपवासाः) |

(सर्वत्र पारणे आचाम्लम्)

**( २२९ ) ( वि० )** इति-एतेन प्रकारेण एतत्-समीपवर्ति पञ्चविधं चारित्रं मोक्षसाधनं प्रवरमिति प्रतीतम् । नैकैरित्यसमासोऽयं, अनेकैः-बहुभिः प्रकारैः । [१]किंरूपैः ?-अनुयोगाश्च-अनुयोगद्वाराणि उपक्रमादीनि, किं कतिविधमित्यादीनि वा, नयाश्च-नैगमादयः, प्रमाणानि च-प्रत्यक्षादीनि तानि तथा [२]मार्गास्तैः समनुगम्यं-ज्ञेयमिति ॥२२९॥

**( २३० ) ( वि० )** एतत् सम्यग्दर्शनादित्रयं मोक्षसाधकमिति कथयति**—सम्यक्त्वेति** । सम्यग्दर्शनादिसम्पदः-सम्पत्तयः, किं ?-साधनानि-जनकानि वर्तन्ते, कस्य ?-मोक्षस्य-मुक्तेः ।

---

**( २२९ ) ( अव० )—अनेकैर्बहुप्रकारैः अनुयोगैः, किं कतिविधं कस्येत्यादिभिर्नयै-नैगमादिभिः[१], प्रमाणैः प्रत्यक्षादिभिः समनुगम्यं=ज्ञेयम् ॥२२९॥**

**( २३० ) ( अव० )—एकतरस्याः सम्यग्दर्शनादिसम्पदः अभावेऽपि । अपिः पूरणे । मोक्षमार्गोऽपि मुक्तिप्रापकोऽपि न[१] सिद्धिकरः, त्रिफलाव्यपदेशवत् ॥२३०॥**

**पूर्वद्वयसम्पद्यपि तेषां भजनीयमुत्तरं भवति ।**
**पूर्वद्वयलाभः पुनरुत्तरलाभे भवति सिद्धः ॥२३१॥**

**धर्मावश्यकयोगेषु भावितात्मा प्रमादपरिवर्जी ।**
**सम्यक्त्वज्ञानचारित्राणामाराधको भवति ॥२३२॥**

---

मोक्षसाधनम्, एकतराभावेऽप्यसाधनमिति । एताः सम्यक्त्वादिसम्पदः परस्परापेक्षा एव मोक्षं साधयन्ति, त्रिफलाव्यपदेशवत् । एकतराभावे तु साधनाभावः, न मोक्षं साधयन्तीत्यर्थः ॥२३०॥

**( २३१ ) टीका—पूर्वद्वयेत्यादि** । सम्यग्दर्शनसम्यग्ज्ञानयोः सतोरपि चारित्रसम्पत् कदाचिद्भवति कदाचिन्नेति भजनीयमुत्तरं चारित्रमित्यर्थः । यदा पुनश्चरणं लब्धं तदा पूर्वद्वयलाभो नियमेनैव [१]भवति । न हि सम्यग्दर्शनज्ञानाभ्यां विना चरणसम्भवः, तत्पूर्वकत्वाच्चारित्रस्य । तस्माच्चरणलाभाविनाभूते सम्यक्त्वसम्यग्ज्ञाने ॥२३१॥

**( २३२ ) टीका—**कथं पुनः सम्यक्त्वादिसाधनमाराध्यमविकलमनुष्ठेयमित्याह—**धर्मावश्यकेत्यादि** । धर्मे दशप्रकार[१]क्षमादिके, आवश्यकेषु, तानि चावश्यकानि—प्रतिक्रमणालोचनस्वाध्यायप्रत्युपेक्षणप्रमार्जननिर्गमप्रवेशादीन्यवश्यकरणीयानि तेषु । भावितात्मा श्राद्धः समस्तप्रमाद[२]स्थानपरिहारी सम्यक्त्वादिसाधनानामाराधको भवति परिसमापयिता भवतीत्यर्थः ॥२३२॥

---

तासु–सम्पत्सु मध्ये एकतरस्यां–सम्यग्दर्शनादिसम्पदः अन्यतरस्या अभावे–असत्तायाम् । अपिः पूरणे । मोक्षमार्गोऽपि–मुक्तिप्रापकोऽपि असिद्धिकरः–मोक्षप्राप्तेरकर्ता, देवलोकादिप्राप्तिकारी भवत्येव विकलोऽपि इति गम्यम् ॥२३०॥

**( २३१ ) ( वि० ) पूर्वेति** । पूर्वद्वयसम्पद्यपि–दर्शनज्ञानसम्पत्तावपि तेषां–तद्वतां भजनीयं–विकल्पनीयं भवति, कदाचिदस्ति कदाचिन्नास्ति । किं तत् ? उत्तरं–चारित्रं, अविरतदेशविरतानामपि सद्भावात्, अन्यथा तेषामभाव एव स्यात् । उत्तरलाभे पुनः–चारित्रलाभे तु पूर्वद्वयलाभः–[१]दर्शनज्ञानसद्भावः सिद्धो भवति–निश्चयेन जायत एव, चारित्रिणां सम्यक्त्वज्ञाने नियते एव भवत इति ॥२३१॥

**( २३२ ) ( वि० ) धर्मेति** । प्रमादपरिवर्जी जीवो ज्ञानादीनामाराधको भवति । कीदृशः ?–भावितात्मा । केषु ?–धर्मावश्यकयोगेषु स्पष्टार्थमेवेति ॥२३२॥

---

**( २३१ ) ( अव० )—[१]चारित्रे, दर्शनज्ञानचारित्रलाभे ॥२३१॥**

**( २३२ ) ( अव० )—धर्मो दशविधः । आवश्यकानि=प्रतिक्रमणालोचनादीनि ॥२३२॥**

**आराधनाश्च तेषां तिस्रस्तु जघन्यमध्यमोत्कृष्टाः ।**
**जन्मभिरष्टत्र्येकैः सिध्यन्त्याराधकास्तासाम् ॥२३३॥**
**तासामाराधनतत्परेण तेष्वेव भवति यतितव्यम् ।**
**यतिना तत्परजिनभक्त्युपग्रहसमाधिकरणेन ॥२३४॥**

---

**( २३३ ) टीका—आराधनाश्चेत्यादि** । तेषां सम्यक्त्वादीनामाराधनास्तिस्रो जघन्यमध्यमोत्कृष्टभेदेन सम्भवन्ति । तत्र जघन्याष्टभिर्जन्मभिर्देवमनुष्येषूपजातस्य भवति, अष्टाभिस्तेषां भवैरन्तं याति सिद्धिं प्राप्नोतीत्यर्थः । मध्यमा त्वाराधना जन्मत्रयेण मनुष्यजन्मपूर्विका । उत्कृष्टा त्वाराधना एकेनैव भवेन मरुदेव्या इव भवति । एवमाराधकास्तान्याराधयन्तीति ॥२३३॥

**( २३४ ) टीका—तासामाराधनेत्यादि** । तासां सम्यक्त्वज्ञानचारित्रसम्पदाम् । आराधनतत्परेण तत्रैव व्यग्रेण । तेष्वेव सम्यक्त्वादिषु यतितव्यं भवति । यतिना साधुना । तत्परजिनभक्त्युपग्रहसमाधिकरणेन[१] । तत्पर इति सत्त्वादिपरेण जिनभक्तौ समुद्यतेन भगवतामर्हतां यथाकालं वन्दनगुणोत्कीर्तनपरेण उपग्रहो भगवद्बिम्बप्रतिष्ठाफलकथनादि । अथवा साधूनामुपग्रहो वस्त्रपात्रभक्तपानादिना[२] समाध्युत्पादनेन च [३]साधूनाराधयति प्रयत्नमेव [४]कुर्वन्ति ॥२३४॥

---

**( २३३ ) ( वि० ) आराधना इति ।** आराधनाश्च–निष्पादनाश्च तेषां–दर्शनादीनां । कियत्यः ?–तिस्रस्तु । केन रूपेण ?–जघन्यमध्यमोत्कृष्टा[१] वर्तन्ते । कैः ?–जन्मभिः । कियत्सङ्ख्यैः ?–अष्टत्र्येकैः । ततः किं ?–सिध्यन्ति–मोक्षं[२] यान्ति, जघन्येनाष्टभिः मध्यमेन त्रिभिः उत्कृष्टेनैकेन । क एते ?–आराधकाः जीवाः । कासां ?–तासां–ज्ञानादिसम्पदामिति ॥२३३॥

**( २३४ ) ( वि० )** तदाराधकेन यादृशेन भाव्यं तदाह–**तासामिति** । तासां–ज्ञानादिसम्पदाम् आराधनतत्परेण–तत्सेवादत्तावधानेन तेष्वेव–सम्यक्त्वादिष्वेव भवति यतितव्यम् । केन ?–यतिना–साधुना कर्त्रा। केन कारणभूतेन ?–तत्परजिनभक्त्युपग्रहसमाधिकरणेन–तत्परा–ज्ञानाद्याराधनपरायणाः सामर्थ्यात् साध्वादयस्ते च जिनाश्च ते तथा तेषु भक्तिश्च–बहुमान उपग्रहश्च–भक्तपानदानादिरूपः समाधिश्च–स्वास्थ्यं तेषां करणं–क्रिया तेनेति ॥२३४॥

---

**( २३३ ) ( अव० )—सम्यक्त्वादीनाम्[१]** ॥२३३॥

**( २३४ ) ( अव० )—सम्यक्त्वादिसम्पदां तत्परेण=व्यग्रेण । तेष्वेव=सम्यक्त्वादिषु । तत्परेषु साधुषु जिनेषु भक्तिरान्तरा प्रीतिः । उपग्रहस्तदुचितान्नपानशयनासनादिप्रदानरूपः, समाधिः= स्वास्थ्यं स्वपरयोः । एतेषां करणेन ॥२३४॥**

**स्वगुणाभ्यासरतमतेः परवृत्तान्तान्धमूकबधिरस्य ।**
**मदमदनमोहमत्सररोषविषादैरधृष्यस्य ॥२३५॥**
**प्रशमाव्याबाधसुखाभिकाङ्क्षिणः सुस्थितस्य सद्धर्मे ।**
**तस्य किमौपम्यं स्यात् सदेवमनुजेऽपि लोकेऽस्मिन् ॥२३६॥**

---

**( २३५ ) टीका–**तमेव यत्नं प्रपञ्चेन दर्शयति–**स्वगुणाभ्यासेत्यादि** । स्वगुणाः सम्यक्त्वज्ञानचरणाख्याः साधुगुणास्तेष्वभ्यास आवृत्त्यनुष्ठानं तत्र रता सक्ता मतिर्यस्यासौ स्वगुणाभ्यासरतमतिः । स हि परवृत्तान्ते परवार्तायां परचेष्टितेऽन्धः, न पश्यति परदोषान् गुणान् वा, स्वगुणेष्वेव सम्यक्त्वादिषु व्यग्रत्वात् । न च परदोषान् गुणान् वा [१]उद्घट्टयति मूक इव तदुद्घट्टने न [२]वाऽन्येन परगुणदोषानुद्घाट्यमानान् बधिर इव [३]शृणोति । मदो गर्वः । मदनः कामः । मोहो हास्यरत्यादिः । मत्सरश्चित्तस्थ एव कोपो न बहिः प्रकटः नो क्रोष्टारमाहन्तारं[४] वा प्रतिभिनत्ति । रोषस्तु रक्तनयनाक्रोशताडनादिः बहिर्लिङ्गः । विषादः स्वजनादिव्यापत्तावुपकरणादिनाशे वा । एभिर्मदादिभिरधृष्यस्यानभिभूतस्य ॥२३५॥

**( २३६ ) टीका–प्रशमेत्यादि** । प्रशमसुखाभिकाङ्क्षिणः अव्याबाधमोक्ष[१]सुखाभिकाङ्क्षिणश्च । सद्धर्मे मूलोत्तरगुणलक्षणे[२] । सुस्थितस्य निश्चलस्य । तस्यैवंविधस्य साधोः केनोपमानं क्रियेत ? । अस्मिन् लोके सदेवमानुष्ये[३], नास्त्येव [४]सदेवेषु मनुष्येषु वा प्रशमसुखतुल्यं सुखं, दूरत एव मोक्षसुखमिति ॥२३६॥

---

**( २३५ ) ( वि० )** गुणवतो यदिहैव स्यात्तदार्याद्वयेनाह–**स्वगुणेति** । **प्रशमेति** । एवंविधसाधोरिहैव किमौपम्यं स्यादिति द्वितीयार्यायां सम्बन्धः, कीदृशस्य ?–स्वगुणानां–ज्ञानादीनामभ्यासस्तत्र रता मतिर्यस्य स तथा तस्य । परवृत्तान्तेषु–परतप्तिषु अन्ध इव मूक इव बधिर इव यस्तस्य । तथा अधृष्यस्य–अधर्षणीयस्य । कैः ?–मदादिभिः कृतद्वन्द्वैः षड्भिर्दोषैः सुगमार्थैरिति ॥२३५॥

**( २३६ ) ( वि० ) प्रशमेत्यादि** । प्रशम एवाव्याबाधसुखं–सकलबाधारहितं शर्म तस्याभिकाङ्क्षिणः । पुनः किंविशिष्टस्य ? सुस्थितस्य–सदा स्थितिमतः । क्व ?–सद्धर्मे–सदाचारे । तस्य किमौपम्यं ?–किं साधर्म्यं स्यात्–भवेत् । क्व ?–सदेवमनुजेऽपि[१] ससुरमर्त्येऽपि लोकेऽस्मिन् इति ॥२३६॥

---

**( २३५ ) ( अव० )–यत्नमेव प्रपञ्चयति–गुणानां=ज्ञानादीनाम् परतप्तिषु अधृष्यस्याधर्षणीयस्य । मत्सरश्चित्तस्थ एव कोपः ॥२३५॥**

**( २३६ ) ( अव० )–प्रशम एव निराबाधसुखं सदाचारे रतस्य साधोरिति । तस्य किं साधर्म्यं सुरासुरनरलोकेऽस्मिन् ? ॥२३६॥**

**स्वर्गसुखानि परोक्षाण्यत्यन्तपरोक्षमेव मोक्षसुखम् ।**
**प्रत्यक्षं प्रशमसुखं न परवशं न च व्ययप्राप्तम् ॥२३७॥**

**निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम् ।**
**विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम् ॥२३८॥**

**शब्दादिविषयपरिणाममनित्यं दुःखमेव च ज्ञात्वा ।**
**ज्ञात्वा च रागद्वेषात्मकानि दुःखानि संसारे ॥२३९॥**

---

**( २३७ ) टीका—**अपि च—**स्वर्गेत्यादि** । [१]स्वर्गोऽपवर्गस्तत्र च यत्सुखम् । तद्द्वयमपि परोक्षमागमगम्यम् । मोक्षसुखमत्यन्तपरोक्षमेव । अत्यन्तमिति सुतरां परोक्षम् । स्वर्गसुखस्य केनचिल्लेशेन किञ्चिदिह उपमानं स्यात्, न तु मोक्षसुखस्येति, अतोऽत्यन्त-परोक्षम्। सर्वप्रमाणज्येष्ठेन प्रत्यक्षेण स्वात्मवर्तिना परिच्छिद्यमानं प्रशमसुखम्, न च पराधीनं स्वायत्तमेव, नापि व्ययप्राप्तं, स्वाधीनत्वादेव, यतस्तन्न व्येति न विगच्छति । वैषयिकं तु सुखं परवशं विषयाधीनं, विषयाभावे तु न भवतीति ॥२३७॥

**( २३८ ) टीका—निर्जितेत्यादि** । न्यक्कृतगर्वकामानां स्वस्थीभूतचेतसां शान्तानां वागादिविकाररहितानाम् । वाग्विकारो हिंस्रपरुषानृतादिः, कायविकारो धावनवल्गनादिः, मनोविकारोऽभिद्रोहाभिमानेर्ष्यादिः, एभिर्विरहितानाम् । विनिवृत्ता परविषया आशा येषां ते विनिवृत्तपराशाः । 'परस्मादिदं लभ्यं धनधान्यरजतादि, केवलं [१]परकृतभिक्षामात्रोपजीविनः साऽपि यदि लभ्यते प्रवचनोक्तेन विधिना ततः साधु, ज्ञानचारित्रोपकारित्वात्, न लभ्यते चेत्ततः शुद्धाशयस्य निर्जरैवेति' । एवंविधानां यतीनामिहैव मोक्षः । मोक्षसुखमुपमानमुपमेयं प्रशमसुखमिति ॥२३८॥

**( २३९ ) टीका—शब्दादीत्यादि** । शब्दादयो विषयाः [१]शब्दरूपगन्धरसस्पर्शास्तेषां

---

**( २३७ ) ( वि० )** किमिति प्रशमसुखमेव प्रशस्यते इत्याह—**स्वर्गेति** । स्पष्टा ॥२३७॥

**( २३८ ) निर्जितेति**[१] । सुबोधमेव ॥२३८॥

**( २३९ ) ( वि० )** [१]शब्दादीनां विषयाणां परिणामस्तं ज्ञात्वेति सम्बन्धः । कीदृशं ?-

---

**( २३७ ) ( अव० )—न केनापि व्ययं[१] प्राप्तं अपि तु बाधितम् ॥२३७॥**

**( २३८ ) ( अव० )—विनिवृत्ता परस्मिन्नाशा येषाम् ॥[१]२३८॥**

**( २३९ ) ( अव० )—शब्दादीनां[२] विषयाणां परिणामनित्यमन्यथाभवनरूपं दुःखहेतुमेव च सम्प्रधार्य । संसारे दुःखान्येव रागदोषात्मकानि ॥२३९॥**

**स्वशरीरेऽपि न रज्यति शत्रावपि न प्रदोषमुपयाति ।**
**रोगजरामरणभयैरव्यथितो यः स नित्यसुखी ॥२४०॥**

**धर्मध्यानाभिरतस्त्रिदण्डविरतस्त्रिगुप्तिगुप्तात्मा ।**
**सुखमास्ते निर्द्वन्द्वो जितेन्द्रियपरीषहकषायः ॥२४१॥**

---

परिणामः इष्टानिष्टता, [2]शब्दादिविषयपरिणामाच्च यत्सुखं तदनित्यम्, विषयसन्निधौ भवति तदभावे च न भवतीत्यनित्यम् । अपि च [3]दुःखमेवेदं वैषयिकं सुखं पामनपुरुषकण्डूति-सुखवत्, दुःखमेवायं सुखाभिमानोऽल्पचेतसाम् एवं विज्ञाय ज्ञात्वा च रागद्वेषात्मकानि रागद्वेषपरिणतिजातानि रागद्वेषानुविद्धानि[4] दुःखानि संसारे करोतीदम् ॥२३९॥

**( २४० ) टीका–स्वशरीर इत्यादि** । निजशरीरकेऽपि न रज्यति न[1] रागं करोति स्नेहमित्यर्थः । शत्रावपि न प्रदोषं प्रद्वेषं करोति । रोगो ज्वरादिः, जरा वयोहानिः, प्राणनाशो मरणम्, भयमिहलोकादिस[2]प्तप्रकारम्, अपिशब्दश्चार्थे, एभिश्च न व्यथितः सम्पतद्भिरपि न बाधितः, एभ्यो वा [3]न भीतो यः स नित्यमेव[4] सुखीति ॥२४०॥

**( २४१ ) टीका–धर्मेत्यादि** । धर्मादनपेतं धर्म्यं ध्यानमाज्ञाविचयादि, तत्राभिर-तस्तत्परस्तत्रासक्तः । मनोवाक्कायाख्याद्दण्डत्रयाद्विरतः । [1]अनागमिको मनोवाक्कायव्यापारो दण्डः । तिस्रो गुप्तयस्ताभिर्गुप्तात्मा । मौनी निरवद्यभाषी । [2]कायोत्सर्गी प्रवचनोक्तविधिगामी

---

अनित्यम्-अन्यथाभवनरूपं। कथम् ?-एते विषयाः शुभा अशुभभावं यान्ति, अशुभाः शुभभावं यान्तीति। दुःखं-दुःखकारणमेव[2] च ज्ञात्वा-बुद्ध्वा । ततो ज्ञात्वा च रागदोषात्मकानि दुःखानि । क्व ?-संसारे ॥२३९॥

**( २४० ) ( वि० )** यत एवमतः सुसाधुः किम् ? **स्वशरीरेऽपीति** । स्वशरीरेऽपि न रज्यति-रागं न करोति। तथा शत्रावपि-अपकारकेऽपि न प्रदोषं-प्रद्वेषमुपयाति-सामीप्येन गच्छति । तथा अव्यथितः-अपीडितः। कैरित्याह-रोगादिभिः[1] । य एवंविधः स नित्यसुखीति ॥२४०॥

**( २४१ ) ( वि० ) धर्मेति** । तथा धर्मध्यानेऽभिरतः । तथा त्रिदण्डविरतो-दुष्टमनोवाक्काय-त्रयान्निवृत्तः । तथा त्रिगुप्तिगुप्तात्मा-मनोगुप्त्यादिभिः रक्षितजीवः । सुखमास्ते-एवंविधः सुखेन

---

**( २४० ) ( अव० )–प्रदोषं=प्रद्वेषम्, अव्यथितोऽपीडितः ॥२४०॥**

**( २४१ ) ( अव० )–मौनी=निरवद्यभाषी, एकाकी निष्कलहो वा, वशे स्थापितानि, परीषहाः सम्यक् सह्यन्ते, कषायाणामुदयो निरुद्धः ॥२४१॥**

**विषयसुखनिरभिलाषः प्रशमगुणगणाभ्यलङ्कृतः साधुः ।**
**[१]द्योतयति यथा सर्वाण्यादित्यः सर्वतेजांसि ॥२४२॥**
**सम्यग्दृष्टिर्ज्ञानी विरतितपोबलयुतोऽप्यनुपशान्तः ।**
**तं न लभते गुणं यं प्रशमगुणमुपाश्रितो लभते ॥२४३॥**

---

वा धर्मध्यायी निरुद्धार्तरौद्राध्यवसायः सुखमास्ते निराबाधमशेषक्रियानुष्ठानं कुर्वन् । निर्द्वन्द्वः निर्गतसकलोपद्रवः एकाकी निष्कलहो वा । जितानीन्द्रियाणि वशे स्थापितानि । परीषहाः सम्यक् सह्यन्ते । कषायाणामुदयो निरुद्ध उदितो वा विफलीकृतः । स एवंविधः सुखमास्ते ॥२४१॥

**( २४२ ) टीका—विषयेति** । शब्दादिजनिते विषयसुखे निर्गताभिलाषो निर्गतेच्छः । प्रशमगुणा ये स्वाध्यायसन्तोषादयस्तेषां[१] गणः समूहस्तेनालङ्कृतो विभूषितः । साधुर्भास्कर इव द्योतयति अभिभवति तारकादिप्रभां स्वप्रभया तिरोभाव्य स्वतेजसा एव प्रकाशयति सर्वाणीत्यशेषाणि तेजांस्यभिभवतीत्यर्थः । तद्वत्साधुरुक्तगुणयुक्तः सर्वतेजांसि देवमनुष्यादीनामभिभूय प्रकाशते स्वतेजसेति ॥२४२॥

**( २४३ ) टीका—[१]सम्यग्दृष्टिरित्यादि** । सम्यग्दर्शनसम्पन्नः सम्यग्ज्ञानसम्पन्नश्च । विरतितपोबलयुतोऽपि विरत्या मूलोत्तरगुणेन युक्तोऽपि, तपोबलेन च सम्पन्नः । अनुपशान्तः क्रोधादिकषायोदयालब्धप्रशमः । तं गुणं न लभते कषायोदये वर्तमानः, यं गुणं [२]प्रशमगुणसमाश्रितः

---

तिष्ठति । निर्द्वन्द्वो–निर्गताशेषकलहः । तथा जितेन्द्रिय[१]परीषहकषायः इति सुगममिति ॥२४१॥

**( २४२ ) ( वि० ) विषय इति** । विषयसुखनिरभिलाषः–शब्दादिसङ्गनिःस्पृहः प्रशमगुणगणाभ्यलङ्कृतो[१] साधुर्यथा द्योतयति न तथा सर्वाण्यादित्यतेजांसि–देवप्रभाः । किलैवंविधसाधूनां केवलावधयः सम्भाव्यन्ते, अतः [२]परैरनभिभवनीयं च तेजः सम्भाव्यते इति ॥२४२॥ **इति चरणाधिकारः ॥१६॥**

---

**( २४२ ) ( अव० )—[१]प्रशमे स्वाध्यायादयः तेषां समूहस्तेन विभूषितोऽभिभवति देवमनुष्यादीनां नारकादीनां च ॥२४२॥**

**सम्यग्दृष्टिर्ज्ञानी विरतितपोध्यानभावनायोगैः ।**
**शीलाङ्गसहस्राष्टादशकमयत्नेन साधयति ॥२४४॥**

---

प्राप्नोति । [3]प्रशमस्थितस्य हि प्राग्वर्णिता एव गुणाः । तस्मादुपशान्तकषायेण भवितव्यमिति ॥२४३॥

**( २४४ ) टीका—**तथा शीलाङ्गानामविकलानामेवंविध एव निष्पादको भवतीति दर्शयति—**सम्यग्दृष्टिरित्यादि** । सम्यग्दर्शनसम्यग्ज्ञानसम्पन्नो विरत्या मूलोत्तरगुणस्वरूपया ।

---

**( २४४ ) ( वि० )** अयं च साधुः प्रशमवानेव शीलाङ्गाराधको भवति—**सम्यग्दृष्टिरिति** । सम्यग्दृष्टिस्तथा ज्ञानी साधुरयत्नेन-सुखेनैव साधयति-निष्पादयति । किं तत् ?-शीलाङ्ग-सहस्राणामष्टादशकं शीलाङ्गसहस्राष्टादशकम् तत् । कैरित्याह-विरतिः-पापविरमणं, तपः-अनशनादि, ध्यानं-धर्मध्यानादि, भावना-अनित्याद्या, योगा-आवश्यकव्यापाराः एतैः कृतद्वन्द्वैः करणभूतैरिति । इयं स्थापना, चारणा पुनरियं-'**न करेइ मणेणं आहारसण्णाविप्पजढे**[1] **फासिंदियसंवुडे पुढविकायसंरक्खणपरे खंतिसंपन्ने ( न करोति मनसा, आहारसञ्ज्ञाविप्रयुक्तः, स्पर्शनेन्द्रियसंवृतः, पृथ्वीकायसंरक्षणपरः, क्षान्तिसम्पन्नः )** इत्याद्यभ्यूह्य वक्तव्येति ॥२४४॥

**[2]अष्टादशसहस्रशीलाङ्गानि-**

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| धर्मः | क्षान्तिः | मार्दवम् | आर्जवः | मुक्तिः | तपः | संयमः | सत्यम् | शौचम् | आकिञ्च-न्यम् | ब्रह्म-चर्यम् | १० × |
| संयमः | पृथ्वी-कायः | अप्कायः | तैजस्-कायः | वायु कायः | वनस्पति-कायः | द्वीन्द्रियः | त्रीन्द्रियः | चतुरि-न्द्रियः | पञ्चेन्द्रियः | अजीवाः | १० =१०० |
| इन्द्रि-याणि | स्पर्श-नेन्द्रियम् | रसनेन्द्रियम् | | घ्राणेन्द्रियम् | | चक्षुरिन्द्रियम् | | श्रोत्रेन्द्रियम् | | | × ५ =५०० |
| सञ्ज्ञाः | आहारः | | भयः | | | मैथुनम् | | परिग्रहः | | | × ४ |
| योगा | मनः | | वचनम् | | | | | काया | | | =२००० × ३ =६००० |
| करणानि | करणम् | | कारापणम् | | | | | अनुमोदना | | | × ३ |
| | | | | | | | | | | | =१८००० |

---

**( २४४ ) अव०—विरतिः=पापविरमणं, ध्यानं=धर्मध्यानादि, भावना=अनित्याद्याः, योगा आवश्यकादिव्यापाराः । सुखेन ॥२४४॥**

**धर्माद्भूम्यादीन्द्रियसञ्ज्ञाभ्यः करणतश्च योगाच्च ।**
**शीलाङ्गसहस्राणामष्टादशकस्य निष्पत्तिः ॥२४५॥**

---

तपसा चाऽनशनादिना । ध्यानेन च [१]धर्म्यादिना । भावनाभिश्चानित्यादिकाभिर्योगैश्च प्रशस्तैर्मनोवाक्कायव्यापारैः । शीलाङ्गसहस्राणामष्टादशकं अष्टादशशीलाङ्गसहस्राणीत्यर्थः । अयत्नेनानायासेन लीलयैव । साधयति स्वीकरोतीति ॥२४४॥

**( २४५ ) टीका—**कानि पुनस्तान्यष्टादशशीलाङ्गसहस्राणीति केन चोपायेनाभिगम्यानीत्याह—**धर्मादित्यादि** । क्षमादिदशलक्षणको धर्मः [१]प्रथमपङ्क्तौ रचनीयः । तस्या अप्यधो द्वितीयपङ्क्तौ भूम्यम्बुतेजोवायुवनस्पतिद्वीन्द्रियत्रीन्द्रियचतुःपञ्चेन्द्रिया अजीवकायश्च विन्यसनीयः । तस्या अप्यधस्तृतीयपङ्क्तौ श्रोत्रचक्षुर्घ्राणरसनस्पर्शनानि लेख्यानि । तस्या अप्यधश्चतुर्थपङ्क्तौ आहारभयपरिग्रहमैथुनसञ्ज्ञा रचनीयाः । पञ्चमपङ्क्तावधस्तस्या न करोमि न कारयामि कुर्वन्तमन्यं नानुमोदते एतत्त्रयं स्थाप्यम् । [२]तस्या अप्यधः षष्ठपङ्क्तौ मनसा वाचा कायेनेति त्रयं विरचनीयम् । तत्र विकल्पानयने उच्चारणम् । क्षमयान्वितः पृथ्वीकायसमारम्भं संवृतश्रोत्रेन्द्रियद्वारः आहारसञ्ज्ञाविप्रमुक्तो[३] न करोति मनसा । एवं पृथ्वीकायमपरित्यजन् दश विकल्पान् लभते । एवमप्कायसमारम्भादिष्वपि दशसु दश विकल्पा लभ्यन्ते । ते दश दशकाः शतम् । एतच्छतं श्रोत्रेन्द्रियममुञ्चता लब्धम् । एवं चक्षुरादिभिरपि शतं शतं लभ्यते। जातानि पञ्च शतानि । एतान्याहारसञ्ज्ञाममुञ्चता लब्धानि। तथा भयमैथुनपरिग्रहसञ्ज्ञादिभिरपि प्रत्येकं पञ्च पञ्च शतानि लभ्यन्ते । जातं सहस्रद्वयम् । एतत्सहस्रद्वयं न करोमीत्यमुञ्चता लब्धम् । एवमितराभ्यामपि द्वे द्वे सहस्रे लब्धे । ततश्च षट् सहस्राणि जातानि। एतानि च मनसा लब्धानि । [४]वाचा षट् सहस्राणि । कायेनापि षडेव सहस्राणीति। एवमेषां शीलाङ्गानां शीलकारणानामष्टादशसहस्राणि निष्पद्यन्ते[५] ॥२४५॥

---

**( २४५ ) ( वि० )** चारणाकारणषट्पदप्रतिपादनपरेयमार्या कथ्यते, तानि च षट् पदान्यधस्तात् [१]पूर्वोक्ते यन्त्रकवचार्याणि । धर्मात्-क्षान्त्यादिकात् भूम्यादि-पृथिव्यादि इन्द्रियाणि-स्पर्शनादीनि सञ्ज्ञा-आहाराद्याः ततः पदत्रयस्य द्वन्द्वः । करणतश्च-मनःप्रभृतिकात्, [२]योगात्-करणकारणानुमतिस्वरूपात्, शीलाङ्गसहस्राणाम् अष्टादशकस्य पूर्वोक्तयुक्त्या निष्पत्तिरिति ॥२४५॥

---

**( २४५ ) ( अव० )—धर्मात् खंतीयमद्द० १० । भूम्यादिजीवा नव अजीवा १० । करणकारणानुमतित्रयम् । मनोवचनकायत्रयम् ॥२४५॥**

**शीलार्णवस्य पारं गत्वा संविग्नसुगमपारस्य ।**
**धर्मध्यानमुपगतो वैराग्यं प्राप्नुयाद्योग्यम् ॥२४६॥**

**आज्ञाविचयमपायविचयं च सद्ध्यानयोगमुपसृत्य ।**
**तस्माद्विपाकविचयमुपयाति संस्थानविचयं च ॥२४७॥**

---

**( २४६ ) टीका—शीलार्णवस्येत्यादि** । शीलं मूलोत्तरगुणाः । शीलमर्णव इव दुरुत्तरत्वात् अनेकातिशयनिधानाद्वा । पारं गत्वा सम्पूर्णमवाप्य । कथं पुनः केन वा पारं गम्यते ? **संविग्नसुगमपारस्येति** । संविग्नाः संसारभीरवः सुखेनैव सकलशीलप्रापिणो भवन्ति । लब्ध्वा च सम्पूर्णशीलं धर्मध्यानं प्राप्ताः । वैराग्यं प्राप्नुयाद्योग्यमिति । [१]योग्यं तत्कालावस्थायामुचितं [२]प्रकृष्टं वैराग्यमित्यर्थः ॥२४६॥

**( २४७ ) टीका—**तच्च धर्मध्यानं चतुर्भेदमाचक्षाण आह—**आज्ञाविचयेत्यादि** । आज्ञाविचयमपायविचयं विपाकविचयं संस्थानविचयं च । स खलु [१]चतुःप्रकारधर्मध्यान शीलार्णवपारगामी । आद्यध्यानद्वय[२]मुपसृत्य सम्प्राप्य ततस्तृतीयं विपाकविचयमुपयाति ततस्तुरीयं संस्थानविचयमभ्येति ॥२४७॥

---

**( २४६ ) ( वि० )** तदेवं **शीलेति** । शीलार्णवस्य–महाशीलसमुद्रस्य पारं–पर्यन्तं गत्वा । कीदृशस्य ?–संविग्नैः–सुसाधुभिः सुगमः–सुप्राप्यो मार्गः–पन्थाः, पाठान्तरतः पारः–पर्यन्तो वा यस्य स तथा। तस्य किमित्याह–प्राप्नुयात्–लभते । किम् ?–वैराग्यम् । कीदृशम् ?–योग्यं–उचितम् । तथा कीदृशः साधुरित्याह–उपगतः । किं तत् ?–धर्मध्यानमिति ॥२४६॥ **इति शीलाङ्गाधिकारः ॥१७॥**

**( २४७ ) ( वि० )** तच्च धर्मध्यानं चतुर्धा प्राह—**आज्ञेति** । आज्ञाविचयमाद्यम् अपायविचयं द्वितीयं सद्ध्यानयोगं–सद्बुद्धिसम्पर्कमुपसृत्य–प्राप्य तस्मात्–तदनन्तरं विपाकविचयं–तृतीयं भेदं धर्मध्यानस्योपयाति–प्राप्नोति । संस्थानविचयं च चतुर्थभेदमिति ॥२४७॥

---

**( २४६ ) ( अव० )—संसारभीरुसुखप्राप्यपारम्य[१]प्राप्तः, विरक्तायादूरानुयायिनं तत्का-लावस्थायामुचितं प्रकृष्टम् ॥२४६॥**

**( २४७ ) ( अव० )—धर्मध्यानस्य भेदचतुष्टयमाह—[१]सद्बुद्धिसम्पर्कमाप्य ॥२४७॥**

**आप्तवचनं प्रवचनं चाज्ञाविचयस्तदर्थनिर्णयनम् ।**
**आश्रवविकथागौरवपरीषहाद्येष्वपायस्तु ॥२४८॥**
**अशुभशुभकर्मपाकानुचिन्तनार्थो विपाकविचयः स्यात् ।**
**द्रव्यक्षेत्राकृत्यनुगमनं संस्थानविचयस्तु ॥२४९॥**

---

**( २४८ ) टीका—**तत्राज्ञाविचयापायविचययोः स्वरूपनिरूपणायाह—**आप्तवचनमित्यादि** । आप्तः क्षीणाशेषरागद्वेषमोहस्तस्य वचनं प्रवचनं अलीकादिशङ्कादिरहितं द्वादशाङ्गमागमः । तस्याः खल्वाज्ञायाः सर्वज्ञदत्ताया विचयो गवेषणं गुणवत्त्वेन निर्दोषत्वेन च। तस्यार्थः प्रवचनस्य निर्णयनं विनिश्चयः । सर्वाश्रवद्वारनिरोधैकरसत्वाद् गुणयुक्तं, न कश्चिद्दोषोऽस्तीति [१]आज्ञाविचयं वा । विचयोऽभ्यासः सूत्रार्थविषयः । आश्रवाः कायवाङ्मनांसि, विकथा स्त्रीभक्तचौरजनपदविषयाः, गौरवमृद्धिसातरसाख्यं त्रिधा, परीषहाः क्षुत्पिपासादयः । आदिग्रहणादगुप्तत्वमसमितत्वं च । एतेषु वर्तमानस्य जन्तोरपाय[२]बहुलत्वं नारकतिर्यक्त्वदेवमानुषजन्मसु प्रायेण प्रत्यवायाः सम्भवन्ति भूयांस इति पश्चार्धेन निरूपितमपायविचयम् ॥२४८॥

**( २४९ ) टीका—**तृतीयचतुर्थभेदयोर्निरूपणायाह—**अशुभेत्यादि** । [१]अशुभं शुभं च कर्म द्वयोः कोट्योः वर्तते, तस्य[२] पाको विपाकोऽनुभवो रस इत्यर्थः । तस्यानुचिन्तनं

---

**( २४८ ) ( वि० )** एतानेव लेशतो व्याचष्टे—**आप्तेति** । आप्तस्य-रागादिरहितस्य वचनमाप्तवचनं प्रवचनं च, किम् ?-आज्ञा, तस्या विचयः कः ?, उच्यते, तदर्थनिर्णयनं, तस्या-आज्ञाया अर्थो वाच्यः । तस्य निर्णयनमिति । आश्रवाः-प्राणातिपातादयः विकथाः-स्त्रीकथाद्या गौरवाणि-ऋद्धिप्रभृतीनि परीषहाः-क्षुदादयः एतदाद्यैरनुष्ठानैः शास्त्रनिषिद्धैर्योऽपायस्त्वैहिकः पारत्रिकश्च, चिन्त्यते धर्मार्थिना सोऽपायविचयः स्यादिति सम्बन्ध इति ॥२४८॥

**( २४९ ) ( वि० )** तृतीयचतुर्थभेदयोः स्वरूपमाह-**अशुभेति** । अशुभानि च व्द्यशीति-प्रमाणानि पूर्वोक्तानि शुभानि द्विचत्वारिंशत्प्रमाणानि च तानि च तानि कर्माणि च तेषां पाका-विपाका रसविशेषा एकद्वित्रिचतुःस्थानिकाः क्वथ्यमानकटुकमधुररसोन्नीयमानस्वरूपास्तेषामनुचिन्तन-

---

**( २४८ ) ( अव० )—वीतरागवचनं [१]प्रवचनं वाज्ञायाः सर्वज्ञदत्तायाः गवेषणं तस्या अर्थनिश्चयः । एभिर्हेतुभिरैह[२]लौकिकोऽयशः पारलौकिको नरकतिर्यग्गतिभ्रमणरूपो धर्मार्थिना चिन्त्यते सोऽपायविचयः ॥२४८॥**

**( २४९ ) ( अव० )—अशुभकर्मणां [१]व्द्यशीतिः शुभकर्मणां [२]( द्विचत्वारिंशद् )४२भेदानां, पाको[३] रसः कटुकमधुरत्वादिस्तस्यानुचिन्तनार्थः । द्रव्याणां षण्णां[४], क्षेत्रमूर्ध्वाधस्तिर्यग्भेदं तेषामाकारानुचिन्तनमनुगमनं=चिन्तनम् ॥२४९॥**

**जिनवरवचनगुणगणं सञ्चिन्तयतो वधाद्यपायांश्च ।**
**कर्मविपाकान् विविधान् संस्थानविधीननेकांश्च ॥२५०॥**

**नित्योद्विग्नस्यैवं क्षमाप्रधानस्य निरभिमानस्य ।**
**धुतमायाकलिमलनिर्मलस्य जितसर्वतृष्णस्य ॥२५१॥**

---

प्रयोजनमशुभानां कर्मांशानामयं विपाकः शुभानां चायमिति संसारभाजां जीवानां तदन्वेषणं [३]विपाकविचयः । द्रव्यक्षेत्रा[४]कृत्यनु[५]गमनं धर्म[६]द्रव्यमधर्मश्च तौ लोकपरिणामाणौ [७]तयोः संस्थानं लोकाकाशस्यैव । **तत्राधोमुखमल्लक** [८]इत्यादावुक्तम् । पुद्गलद्रव्यमनेकाकारमचित्त-महास्कन्धश्च सर्वलोकाकारः । जीवोऽप्यनेकाकारः शरीरादिभेदेन यावल्लोकाकारः समुद्घात-काले। [९]कालोऽपि यदा क्रियामात्रं द्रव्यपर्यायः तदा द्रव्याकार एव। यदा तु स्वतन्त्रं कालद्रव्यं [१०]तदैकसमयोऽर्धतृतीयद्वीपसमुद्राकृतिरित्येकः[११] संस्थानविचयः ॥२४९॥

**( २५० ) टीका—**सम्प्रति पारम्पर्येण धर्मध्यानस्य विशिष्टफलदर्शनायाह-**जिन-वरेत्यादि** । जिनानां वरास्तीर्थकरास्तेषां वचनं तस्य(गुणा अहिंसकत्वादयस्तेषां[१]) गुणगणः गुणसमूहस्तम् । सञ्चिन्तयतः सम्यगालोचयतः आज्ञागुणान् । वधाद्यपायांश्च द्वितीयभेदे तु चिन्तयतः वधबन्धनाभियोगासमाधिप्रभृतीन् । तृतीयभेदे[२] च कर्मणो विपाकान् विविधान् शुभानशुभांश्च । चतुर्थभेदे संस्थानविधीन् संस्थानप्रकारान् बहूनिति ॥२५०॥

**( २५१ ) टीका—**किं भवतीत्याह**—नित्योद्विग्नस्येत्यादि** । नित्यमित्यहर्निशमुद्विग्नो

---

मेवार्थो-वाच्यं यस्य स तथा । क एवंविधो ?-विपाकविचय इति तृतीयभेदः स्यादिति। द्रव्याणि षट् क्षेत्रम्-ऊर्ध्वाधस्तिर्यग्लक्षणं तयोराकाराः-आकृतयस्तासामनुगमनं-चिन्तनं । तत्किं ?-संस्थानविचयस्तु स्यादिति चतुर्थभेद इति ॥२४९॥

**( २५० ) ( वि० )** एकैकभेदं चिन्तयतो यत्स्यात्तदाह-**जिनेति** । तस्य शीलधारिणो जिनवरवचनगुणगणं [१]सञ्चिन्तयतः साधोरपूर्वकरणमुपजातं भवतीति षष्ठ्यार्यायां सम्बन्धः । कीदृशस्य जिनवरवचनगुणगणं प्रथममाज्ञाविचयं १ वधाद्यपायांश्च चिन्तयतो द्वितीयमपायविचयं २ कर्मविपाकान् विविधान् विचिन्तयतस्तृतीयं कर्मविपाकविचयं ३ संस्थानविधीननेकांश्च चतुर्थं संस्थानविचयमिति ४ ॥२५०॥

**( २५१ ) ( वि० )** अग्रेतनानि साधुविशेषणान्याह**—नित्य इति** । नित्योद्विग्नस्य-

---

**( २५१ ) ( अव० )—नित्योद्विग्नस्य=संसारोपरि नित्यमुद्वेगं कुर्वतः । जितकोपाहङ्कारस्य । कलिमलं=पापं । जितसर्वलोभस्य ॥२५१॥**

**तुल्यारण्यकुलाकुलविविक्तबन्धुजनशत्रुवर्गस्य ।**
**समवासीचन्दनकल्पनप्रदेहादिदेहस्य ॥२५२॥**
**आत्मारामस्य सतः समतृणमणिमुक्तलोष्ठकनकस्य ।**
**स्वाध्यायध्यानपरायणस्य दृढमप्रमत्तस्य ॥२५३॥**

---

भीतः संसारात्। एवमुक्तेन प्रकारेण । क्षमाप्रधानस्य क्षमामूलत्वाद्धर्मस्य तत्प्रधानत्वम् । निर्गताभिमानस्य गर्वरहितस्येति । धुतमायाकलिमलनिर्मलस्य धुतो [१]विधितो विक्षिप्तो मायैव कलिमलः कल्मषं पापं, तत्क्षपयतः । [२]जितसकललोभकषायस्य ॥२५१॥

**( २५२ ) टीका—तुल्यारण्येत्यादि** । तुल्यमरण्यं कुलाकुलश्च जनपदः सदृशः स्वात्मकार्यव्यग्रत्वात्, यादृगरण्यं तादृग् जनाकुलमपि । विविक्तबन्धुजनशत्रुवर्गस्य बन्धुजनः स्वजनलोकः शत्रुवर्गो रिपुसमूहः तौ विविक्तौ यस्य पृथग्भूतात्मनः सकाशात्, यथा बन्धुवर्गस्तथा शत्रुवर्गः, मत्तोऽन्य एव बन्धुवर्गः शत्रुवर्गश्च विविक्तः, तत्र तुल्यचित्तवृत्तिः, यथा स्वजनवर्गस्तथा शत्रुवर्गोऽपीति । तथा समस्तुल्यः यो वास्या तक्ष्णोति यश्च चन्दनादिनोपलिम्पति । कल्पनं तक्षणं, प्रदेह उपलेपनं चन्दनादिभिः, तत्र समवासीचन्दन-कल्पनप्रदेहो[१] यस्य स एवमुक्तः ॥२५२॥

**( २५३ ) टीका—आत्मारामस्येत्यादि** । आत्मन्येवारमति प्रीतिं करोति स्वकार्य एव व्याप्रियते, न बहिः प्रीतिं बध्नाति । समं तुल्यं तृणं [१]दर्भांशुकादि मणयश्च पद्मरागादयः, लोष्टं

---

संसारस्योपरि उद्वेगं कुर्वतः क्षमाप्रधानस्य निरभिमानस्य-जितकोपाहङ्कारस्य धुतमायाकलिमलः-अपनीतपापः[१] स चासौ निर्मलश्च स तथा तस्य । जितसर्वतृष्णस्य-निर्जिताशेषलोभस्येति ॥२५१॥

**( २५२ ) ( वि० ) तुल्येति** । तुल्यौ-समानौ अरण्यकुलाकुलौ प्रदेशौ यस्य जीवस्य स तथा, तत्रारण्यं-अटवी कुलानि-उग्रादीनि तैराकुलः-आकीर्ण इति । विविक्तौ-पृथग्भूतौ बन्धुजनशत्रुवर्गौ यस्य स तथा । ततोऽनयोः कर्मधारयस्तस्य । वासी चन्दनं[२] च ते तथा, ताभ्यां कल्पनप्रदेहौ-छेदनविलेपौ[१] तावादी येषां ते तथा । समः-तुल्यो वासीचन्दनकल्पनप्रदेहादिषु देहः-शरीरं यस्य स तथा तस्य, इह प्रदेहशब्देनानुलेपनं 'दिह उपचय' इति धातुप्रयोगादिति ॥२५२॥

**( २५३ ) ( वि० ) आत्मेति** । आत्मारामस्य-कृतजीवाभिरतेः । सतः-शोभनस्य । समौ-

---

**( २५२ ) ( अव० )—विविक्तौ=पृथग्भूतौ बन्धुजनशत्रुवर्गौ यस्य । समस्तुल्यो वासी-चन्दनाभ्यां कल्पनप्रदेहादिः च्छेदनानुलेपनादिः यस्य स तथैवंविधो देहो यस्य [१]सः ॥२५२॥**

**( २५३ ) ( अव० )—कृतात्माभिरतेः । [१]स्वकार्य एव व्याप्रियते, न बहिः प्रीतिं विदधाति । दृढमप्रमत्तस्य ॥२५३॥**

**अध्यवसायविशुद्धेः प्रशस्तयोगैर्विशुद्ध्यमानस्य[1] ।**
**चारित्रशुद्धिमग्र्यामवाप्य लेश्याविशुद्धिं च ॥२५४॥**

**तस्यापूर्वकरणमथ घातिकर्मक्षयैकदेशोत्थम् ।**
**शुद्धिप्रवेकविभववदुपजातं जातभद्रस्य ॥२५५॥**

---

[2]काञ्चनं च मुक्तं येन नाभिलषितं, यथा लोष्टः मृत्पिण्डो नाभिलष्यते एवं कनकमपि । एतदुक्तं भवति—न मृत्पिण्डः तृष्णास्पदं तथा कनकमपि यस्य स मुक्तलोष्टकाञ्चनः । मुक्तं परित्यक्तम् । स्वाध्यायो वाचनादिपञ्चप्रकारः, ध्यानं [3]धर्म्यादिस्तत्परायणस्तद्व्यग्रस्तदुपयोगः । दृढं बाढं सुष्ठु। अप्रमत्तस्य सकलप्रमादपरिहारिणः ॥२५३॥

**( २५४ ) टीका—अध्यवसायेत्यादि** । अध्यवसायविशुद्धिर्मनःपरिणामस्य निर्मलता । तस्याश्चाध्यवसायविशुद्धेर्हेतुभूतायाः । प्रमत्तयोगैर्विशुद्ध्यमानस्य[1] ये व्यापारा मनोवाक्कायविषयास्तैर्विशोधनशीलस्य[2] [3]विमुच्यमानस्येति । ततश्च चारित्रशुद्धिमग्र्यां प्रधानभूतामवाप्य लेश्याविशुद्धिं च तैजसीपद्मशुक्ललेश्यानामन्यतमलेश्यायाः प्रकृष्टां विशुद्धिं [4]सम्प्राप्येति ॥२५४॥

**( २५५ ) टीका—**एताः सर्वाः पूर्वकालाः क्रियाः सम्प्रत्युत्तरक्रियानिर्देशार्थमाह–**तस्येत्यादि** । यदेतदुक्तमेतदन्तेऽपूर्वकरणमुपजातमप्राप्तपूर्वं घातिकर्माणि ज्ञानावरणदर्शनावरणमोहान्तरायाख्यानि तेषामेकदेशक्षयः, [1]कस्यचित्सर्वक्षयः, तस्मादुद्भूतमाविर्भूतम् । ऋद्धिप्रवेकाः ऋद्धिप्रकराः तेषां विभवः प्राचुर्यं ते यत्र विद्यन्ते तद् ऋद्धिप्रवेकविभववत् भद्रं

---

तुल्यौ तृणमणी यस्य स तथा। मुक्ते लेष्टुकनके येन स तथा । ततः कर्मधारयस्तस्य । स्वाध्यायध्यानपरायणस्येति व्यक्तम्। दृढं–अत्यर्थमप्रमत्तस्य–प्रमादरहितस्येति ॥२५३॥

**( २५४ ) ( वि० ) अध्यवसायेति** । अध्यवसायविशुद्धेः सकाशात् प्रशस्तयोगैः–शुभमनोवाक्कायैर्विशुद्ध्यमानस्य–निर्मलतां गच्छतः । तथा अवाप्य–प्राप्य । काम् ?–चारित्रशुद्धिम्। कीदृशीम् ?–अग्र्याम्–उत्तरोत्तरकालभाविनीम् । [1]लेश्याविशुद्धिं चेति ॥२५४॥

**( २५५ ) ( वि० ) तस्येति** । तस्य–यतेः पूर्वोक्तानेकगुणान्वितस्य [1]अपूर्वं–करणं–प्राक्तनकर्मक्षयदक्षमुपजातं भवति । अथ–अनन्तरं । कीदृशम् ?–घातिकर्मणां चतुर्णां क्षयैकदेशः–असमस्तक्षयस्तदुत्थं–तत्प्रभवम्। पुनः कीदृशम् ?–ऋद्धेः प्रवेकाः–प्रकारा अवधिज्ञानादयस्त एव

---

**( २५४ )( अव० )—चित्तनैर्मल्यात् प्रमाददण्डयोगैः[1]=विमुच्यमानस्य अग्र्यां=प्रधानभूताम् ॥२५४॥**

**( २५५ )( अव० )—प्राक्तनकर्मक्षयकरणदक्षम्, अथानन्तरं घातिकर्मणां चतुर्णां क्षयैकदेशोऽसमस्तक्षयस्तदुत्थम्।ऋद्धय=आमर्षौषध्यादयः।प्रवेका=अवधिज्ञानादिविशेषाः।विभवास्तृणाग्रादपि कनकवृष्टिकर्तृत्वादयः ते विद्यन्ते यत्र तत्तथा, जातं भद्रं कल्याणमस्य तस्य ॥२५५॥**

**सातर्द्धिरसेष्वगुरुः सम्प्राप्य विभूतिमसुलभामन्यैः ।**
**सक्तः प्रशमरतिसुखे न भजति तस्यां मुनिः सङ्गम् ॥२५६॥**
**या सर्वसुरवरर्द्धिर्विस्मयनीयाऽपि साऽनगारर्द्धेः ।**
**नार्घति सहस्त्रभागं कोटिशतसहस्त्रगुणितापि ॥२५७॥**

---

कल्याणम् । [२]ऋद्धिप्रकारविशेषास्तस्यामवस्थायामुपजायन्ते वियद्गमनवैक्रियाणिमादिकाः । भद्रं कल्याणं जातं भद्रं कल्याणमस्येति, तस्य जातभद्रस्य ॥२५५॥

**( २५६ ) टीका—सातर्द्धीत्यादि** । साते ऋद्धौ रसे च अगुरुः अकृतादरः । [१]प्राप्य विभूतिमाकाशगमनादिकाम् । अन्यैरसुलभामप्राप्ताम् । तादृक्चारित्रैः सक्तोऽभिरतःप्रशमरतिसुखे । न भजति न करोति । तस्यां विभूतौ मुनिः सङ्गं स्नेहं, नोपजीवति लब्धीरित्यर्थः ॥२५६॥

**( २५७ ) टीका—**सर्वर्द्ध्यति[१]शायिनी यतीनामृद्धिर्भवति परमातिशयप्राप्तत्वादिति दर्शयति**—या सर्वेत्यादि** । सर्वसुराणां ये वराः प्रधानभूताः कल्पाधिपतय इन्द्राः शक्रादयः कल्पातीताश्च । तेषामृद्धिर्विभूतिर्या सा विस्मयकारिणी भवति प्राणिनाम्, अतो विस्मयनीयापि सती सा विभूतिरनगारर्द्धेः साधुजनसमृद्धेर्नार्घति सहस्त्रभागम् । कोटिशतसहस्त्रगुणितापि सा [२]सुरवरर्द्धिः कोटिलक्षगुणितापि नार्घति, सहस्त्रांशेनाप्यनगारर्द्धेः तुल्यतामेतीत्यर्थः ॥२५७॥

---

विभवास्ते विद्यन्ते यत्र तत्तथा । पुनः किंविशिष्टस्य साधोः ?–जातभद्रस्य–समुत्पन्नकल्याणस्येति ॥२५५॥ **इति ध्यानाधिकारः ॥१८॥**

**( २५६ ) ( वि० )** साम्प्रतं तामृद्धिं प्राप्यापि न तस्यां सङ्गं करोतीत्येतदाह**—सातर्द्धिरिति** । सातं च–सुखम् ऋद्धिश्च–विभूतिः रसश्च–अमृतकल्पाहारस्ते तथा तेषु । अगुरुः–गौरवरहितः । तथा प्राप्य–लब्ध्वा । काम् ?–ऋद्धिं–विभूतिं–अणिमा [१]महिमा, लघिमा, गरिमा, ईशित्वं, वशित्वं सर्वजनप्रियत्वमित्यादिकाम् । कीदृशीम् ?–असुलभां–दुष्प्रापामन्यैः कापुरुषैः । सक्तः–आसक्तः । क्व ?–प्रशमे रतिः प्रशमरतिः सैव सुखं प्रशमरतिसुखं तस्मिन् प्रशमरतिसुखे, न–नैव भजति–करोति । कम् ?–सङ्गं–रागं । मुनिः–साधुः । क्व ?–तस्याम्–ऋद्धाविति ॥२५६॥

**( २५७ ) ( वि० )** यस्यां सङ्गं न धत्ते मुनिस्तां स्वरूपत आह**—या इति** । या सर्वसुरवरर्द्धिः–चतुर्विधेन्द्रविभूतिर्विस्मयनीयाऽपि–जनानन्दकारिणी[१] साऽनगारर्द्धेः–साधुजनविभूतेः सहस्त्रभागमपि न–नैवार्घति–नार्घं प्राप्नोति–न तुल्या भवतीत्यर्थः । कीदृश्यपि ?–कोटिशतसहस्त्र-गुणिताऽपि–कोटिलक्षाभ्यस्ताऽपीति ॥२५७॥

---

**( २५६ ) ( अव० )—सुखविभूतिरसामृतकल्पाहारेषु [१]अगुरुर्गौरवरहितः अकृतादर इत्यर्थः । [२]लब्धिमाकाशगमनादिकां दुष्प्रापां कापुरुषैः, तस्यामामर्षौषध्यादिविभूतौ प्राप्तायामपि ॥२५६॥**

**( २५७ ) ( अव० )—सर्वसुरवर्द्धिश्चतुर्विधेन्द्रविभूतिः ॥२५७॥**

**तज्जयमवाप्य जितविघ्नरिपुर्भवशतसहस्रदुष्प्रापम् ।**
**चारित्रमथाख्यातं सम्प्राप्तस्तीर्थकृत्तुल्यम् ॥२५८॥**
**शुक्लध्यानाद्यद्वयमवाप्य कर्माष्टकप्रणेतारम् ।**
**संसारमूलबीजं मूलादुन्मूलयति मोहम् ॥२५९॥**
**पूर्वं करोत्यनन्तानुबन्धिनाम्नां क्षयं कषायाणाम् ।**
**मिथ्यात्वमोहगहनं क्षपयति सम्यक्त्वमिथ्यात्वम् ॥२६०॥**

---

**( २५८ ) टीका—तज्जयमित्यादि** । तस्या जयस्तज्जयस्तमवाप्य । तज्जयं विभूतेरनुपजीवनम्, उत्पन्नानामपि लब्धीनां साधवो न परिभोगं[१] विदधते । जिता निराकृता विघ्नप्रधाना रिपवः कषायाः क्रोधादयो । भवशतसहस्रैर्जन्मलक्षाभिरपि दुष्प्रापं दुर्लभं चारित्रमथाख्यातं यथाख्यातमेवाख्यातं सम्प्राप्त[२]स्तीर्थकरत्तुल्यं, यथा तीर्थकरस्तत्स्थानं प्राप्तस्तथासावपि भवतीति विशिष्टेनोपमा क्रियते ॥२५८॥

**( २५९ ) टीका—शुक्लध्यानेत्यादि** । शुक्लध्यानस्याद्यद्वयमवाप्य पृथक्त्ववितर्कसविचारमेकत्ववितर्कमविचारं च । किं करोति ? मोहमुन्मूलयति । कीदृशं मोहं ? कर्माष्टकस्य प्रणेतारं नायकम् । संसारतरोर्मूलमाद्यं प्रथमं बीजम् । समूलकाषं कषत्युन्मूलयतीति ॥२५९॥

**( २६० ) टीका—**अथ केन [१]क्रमेण मोहोन्मूलनमित्याह—**पूर्वं करोतीत्यादि** ।

---

**( २५८ ) ( वि० )** [१]यदुपरि तस्य स्यात्तदाह—**तज्जयमिति** । **शुक्लेति** । तस्या जयः तज्जयः तं–विभूत्यनुपजीवनमवाप्य–प्राप्य, को ?–जितविघ्नरिपुः–तिरस्कृतरागादिशत्रुः । सम्प्राप्तः । किं तत् ?–चारित्रम् । कीदृशम् ?–अथाख्यातं[२]–भण्यते तथा । भवशतसहस्रदुष्प्रापं–बहुकाललभ्यम् । तीर्थकृत्तुल्यं–जिनचारित्रसदृशमिति[३] ॥२५८॥

**( २५९ ) ( वि० )** शुक्लध्यानस्याद्यद्वयमवाप्य–पृथक्त्ववितर्कं सविचारमिति एकत्ववितर्कमविचारमिति भेदरूपं । किं करोति ? मोहमुन्मूलयतीति [१]सम्बन्धः । कीदृशं मोहम् ? कर्माष्टकप्रणेतारं–नायकं । तथा संसारस्य–भवतरोर्मूलबीजम्–[२]आद्यं कारणं, मूलादारभ्योन्मूलयति–क्षपयतीति ॥२५९॥

**( २६० ) ( वि० )** पूर्वं करोति–प्रथमं विदधाति अनन्तानुबन्धिनाम्नां–तत्सञ्ज्ञकानां

---

**( २५८ ) ( अव० )—तज्जयं तपोऽनुष्ठानजन्यातुल्यविभूतिबन्धाभिभवं । यथा तीर्थकरस्तत्स्थानकं प्राप्तस्तथाऽसावपि भवति ॥२५८॥**

**( २५९ ) ( अव० )—पृथक्त्ववितर्कसविचारम् १ [१]एकत्ववितर्कमविचारं २ । कर्माष्टकमध्ये स्वामिनम् ॥२५९॥**

**( २६० ) ( अव० )—अथ क्षपकश्रेणिमारोहन् मोहमुन्मूलयन् प्रथमं अनन्तानुबन्धिनां**

**सम्यक्त्वमोहनीयं क्षपयत्यष्टावतः कषायांश्च ।**
**क्षपयति ततो नपुंसकवेदं स्त्रीवेदमथ तस्मात् ॥२६१॥**
**हास्यादि ततः षट्कं क्षपयति तस्माच्च पुरुषवेदमपि ।**
**सञ्ज्वलनानपि हत्वा प्राप्नोत्यथ वीतरागत्वम् ॥२६२॥**

---

अनन्तानुबन्धिनः क्रोधमानमायालोभास्तान् प्रथमं क्षपयति [२]ततोऽपि मिथ्यात्वं क्षपयति । कीदृशं तत् ? मोहगहनं मोहो गहनो घनो यस्मिन्मिथ्यात्वे तन्मोहगहनम् । ततः [३]सम्यग्मिथ्यात्वं क्षपयति ॥२६०॥

**( २६१ ) टीका—सम्यक्त्वेत्यादि** । ततः सम्यक्त्वं क्षपयति । ततोऽप्रत्याख्यान-कषायचतुष्कम् प्रत्याख्यानावरणकषायचतुष्कं च क्षपयति । ततो नपुंसकवेदम् । पश्चात्स्त्रीवेदं पुरुषः क्षपकश्रेणिमारोहन् । यदा स्त्री समारोहति तदा स्त्रीवेदं पश्चात्क्षपयति । अथ [१]नपुंसक आरोहति ततो नपुंसकवेदं पश्चात्क्षपयति ॥२६१॥

**( २६२ ) टीका—हास्यादीति** । हास्यं रतिररतिर्भयं शोको जुगुप्सा चेति षट्कम् । ततः [१]पुरुषवेदं क्षपयति । सञ्ज्वलनानपि क्षपयित्वा वीतरागत्वमवाप्नोति । उन्मूलितेऽष्टाविंशति-विधे[२]ऽपि मोहे वीतरागो भवतीति ॥२६२॥

---

कषायाणां क्षयं-विनाशं । ततो [१]मिथ्यात्वमोह एव गहनं मिथ्यात्वमोहगहनं, भयानकत्वात् । ततः क्षपयति सम्यक्त्वमिथ्यात्वं-मिश्रमिति ॥२६०॥

**( २६१ ) ( वि० )** अथ केन क्रमेण मोहोन्मूलनमित्याह—**पूर्वमिति** । [१]ततः [२]सम्यक्त्वं [३]क्षायोपशमिकं पुञ्जरूपं चतुर्थगुणस्थानकाद्यप्रमत्तान्तानामन्यतरस्मिन् । अतः क्षपयत्यष्टौ कषायांश्च-द्वितीयतृतीयान् क्षपयति । ततो नपुंसकवेदं स्त्रीवेदमथ तस्मादिति ॥२६१॥

**( २६२ ) ( वि० ) हास्यादीति** । [१]ततः षट्कं कीदृशम् ?-हास्यादि, तस्मात्पुरुषवेदमपि । सञ्ज्वलनानपि हत्वा [२]क्षपकश्रेणिक्रमात् प्राप्नोति-लभते अथ वीतरागत्वं-क्षीणमोहो भवति । श्रेणिस्तु-

**अणमिच्छमीससम्मं अट्ठनपुंसित्थिवेयछक्कं च ।**
**पुंवेयं च खवेइ कोहाईए [३]स संजलणे ॥** इति ॥२६२॥
[ अन( अनन्तानुबन्धिचतुष्कं ) मिथ्यामिश्रसम्यक्त्वं अष्टनपुंसक स्त्रीवेदषट्कं च ।
पुंवेदं च क्षपयति क्रोधादीन् स सञ्ज्वलनान् ।]

---

**[१]कषायाणां यावज्जीवावस्थायिनां कषायाणाम् । ततो मिथ्यात्वमोह एव गहनं, ततोऽपि मिश्रं सम्यक्त्वं च मिथ्यात्वं च सम्यग्मिथ्यात्वं, एतावता मिश्रम् ॥२६०॥**

**( २६१ ) ( अव० )—सम्यक्त्वं क्षायोपशमिकपुञ्जरूपं, ततो द्वितीयतृतीयकषायान् ॥२६१॥**

**( २६२ ) ( अव० )—हास्य-रति[१]-अरति-शोक-भय-जुगुप्सा, उन्मूलितेऽष्टाविंशति-विधेऽपि मोहे वीतरागो भवति ॥२६२॥**

**सर्वोद्घातितमोहो निहतक्लेशो यथा हि सर्वज्ञः ।**
**भात्यनुपलक्ष्यराह्वंशोन्मुक्तः पूर्णचन्द्र इव ॥२६३॥**

---

**( २६३ ) टीका—सर्वोद्घातितेत्यादि** । सर्वः सकल उद्घातितो ध्वस्तो मोहो येन स सर्वोद्घातितमोहः । निहताः क्लेशा येनासौ तथोक्तः । क्लेशयन्तीति क्लेशाः क्रोधादय एव दुर्दमत्वात्पृथगुपात्ताः । यथा हि [१]सर्वज्ञः सर्वज्ञो ह्युत्पन्नकेवलज्ञानो भवति । स तु क्षपितसकलमोहः सर्वज्ञवद्भाति शोभते । **अनुपलक्ष्यराह्वंशोन्मुक्तः** । अनुपलक्ष्यो[२] यो राह्वंशो मुखादिवि[३]भागेन तेन मुक्तः पूर्णचन्द्र इव । अतिसङ्क्षेपेणोक्ता क्षपकश्रेणी प्रकरणकारेण, प्रदर्शनमात्रत्वात् । अधुना विशेषेणोच्यते—अनन्तानुबन्धिनश्चतुरः कषायान् युगपत्क्षपयति । तेषामनन्तभागं शेषं मिथ्यात्वे प्रक्षिप्य मिथ्यात्वं क्षपयति । मिथ्यात्वस्यापि[४] शेषं सम्यङ्मिथ्यात्वे प्रक्षिप्य सम्यङ्मिथ्यात्वं क्षपयति । तच्छेषं सम्यक्त्वे प्रक्षिप्य सम्यक्त्वमपि क्षपयति । यदि च बद्धायुष्कस्ततः क्षीणे स[५]प्तके तत्रैव अवतिष्ठति नोपर्यारोहति । अबद्धायुष्कस्तु अविश्रान्त्या अविच्छेदेन सकलां श्रेणिमध्यारोहति। ततोऽष्टौ कषायान् क्षपयति । सर्वत्र च सावशेषे पूर्वके पुरस्ताल्लगति । अष्टानां[६] कषायाणां सङ्ख्येयभागं क्षपयित्वा[७] विमध्यभागे नामकर्मण इमाः प्रकृतीस्त्रयोदश क्षपयति—नरकतिर्यग्गती द्वे, एकद्वित्रिचतुरिन्द्रियजातयः[८] चतस्रः, नरकतिर्यग्गत्यानुपूर्व्यौ द्वे, अप्रशस्तविहायोगतिः, स्थावरसूक्ष्मापर्याप्तकसाधारणशरीरनामानि चत्वारि । दर्शनावरणीयकर्मणश्च तिस्रः प्रकृतीः क्षपयतीमाः—निद्रानिद्राप्रचलाप्रचलास्त्यानद्धर्याख्याः । ततो [९]यदवशेषमष्टानां तत्क्षपयति कषायाणामप्रत्याख्यानप्रत्याख्यानावरणानाम् । ततो नपुंसकवेदं [१०]स्त्रीवेदं च । ततो हास्यत्यरतिभयशोकजुगुप्साः क्षयं नयति । ततः पुरुषवेदं त्रिधा कृत्वा [११]युगपद्भागद्वयं क्षपयित्वा तृतीयभागं सञ्ज्वलनक्रोधे प्रक्षिप्य, क्रोधमपि त्रिधा कृत्वा युगपद्भागद्वयं क्षपयित्वा तृतीयभागं सञ्ज्वलनमाने प्रक्षिप्य, सञ्ज्वलनमानमपि त्रिधा कृत्वा युगपद्भागद्वयं क्षपयित्वा तृतीयभागं (सञ्ज्वलनमायायां तां च त्रिधा कृत्वा भागद्वयं युगपत्क्षपयित्वा तृतीयं)

---

**( २६३ )( वि० )सर्वेति** । ततः सर्वः–अशेषः उद्घातितो–ध्वस्तो मोहो येन स तथा। निहतक्लेशः–अपगतदुःखः । यथा हि सर्वज्ञः–सर्वज्ञवद् । भाति–शोभते । न उपलक्ष्यते अनुपलक्ष्यो राह्वंशो–मुखादिविभागस्तेनोन्मुक्तो–दुष्टग्रहांशविकलः पूर्णचन्द्र इव, एवं क्षीणमोहो भातीति दृष्टान्तद्वयमिति ॥२६३॥

---

**( २६३ ) ( अव० )—सकल उद्घातितो ध्वस्तो मोहो [१]येन सः निहताः क्लेशः येनासौ, अपगतदुःखः सर्वज्ञवद् अनुपलक्ष्यो नाद्यापि स्वविषयां प्रतीतिमुत्पादयितुं प्रत्यलः, यथा राहुणा पूर्णचन्द्रो मुक्तोऽपि कियन्तं कालमनुपलक्ष्यो भवति, तथा क्षीणमोह इति ॥२६३॥**

**सर्वेन्धनैकराशीकृतसन्दीप्तो ह्यनन्तगुणतेजाः ।**
**ध्यानानलस्तपःप्रशमसंवरहविर्विवृद्धबलः ॥२६४॥**

---

सञ्ज्वलनलोभे प्रक्षिप्य, त्रिधा कृत्वा युगपद्भागद्वयं क्षपयित्वा पश्चात्तृतीयभागं सङ्ख्येयानि खण्डानि करोति । तानि क्षपयन् बादराणि खण्डानि बादरसम्पराय उच्यते । तत्र च यच्चरमं सङ्ख्येयतमं खण्डं, तदसङ्ख्येयानि खण्डानि करोति । तानि क्रमेण क्षपयन् सूक्ष्मसम्पराय उच्यते । तेष्वपि निःशेषतः क्षपितेषु निर्ग्रन्थो भवति । मोहसागरादुत्तीर्णः। तीर्त्वा[१२] मोहमहासमुद्रं मुहूर्तमात्रं विश्राम्यति। [१३]अगाधसमुद्रोत्तीर्णलब्धगाधपुरुषवत् । [१४]विश्राम्य च समयद्वये शेषे मुहूर्तस्य । तत्र [१५]तयोर्द्वयोः समययोः प्रथमे समये निद्रां प्रचलां च दर्शनावरणप्रकृती द्वे क्षपयति । चरमसमये ज्ञानावरणं पञ्चप्रकारं, दर्शनावरणं चतुर्विधम्, अन्तरायं पञ्चविधं युगपत्क्षपयित्वा केवलज्ञानं प्राप्नोति । एवं द्वाविंशत्युत्तरशतमध्ये षष्ठ्या प्रकृतिभिः क्षपिताभिः केवललाभो भवति ॥२६३॥

**( २६४ ) टीका—**तस्यां च क्षपकश्रेण्यां वर्तमानस्य कावस्था जायत ? इत्याह—**सर्वेन्धनैकेत्यादि**। सर्वेन्धनानां पुञ्जीकृतानामेकराशीकृतः सन्दीप्त इन्धनराशिर्दत्ताग्निर्लागिताग्निर्यथा दहति, एवमनन्तगुणतेजा [१]ज्ञानानलः । तपो द्वादशभेदं, प्रशमः कषायजयः संवर आश्रवनिरोधः, तपःप्रशमसंवरा एव हविर्घृतं तत्प्रक्षेपात् विशेषेण वृद्धं बलं शक्तिर्यस्य ज्ञानानलस्येति ॥२६४॥

---

**( २६४ ) ( वि० )** अथ तस्य ध्यानानलः किं करोतीत्यार्याद्वयेनाह—**सर्वेन्धनैकेति** । स ध्यानानलः समर्थो वर्तत इति शेषः । किं कर्तुं ?-क्षपयितुं । किं तत् ?-कर्म । केषां ?-सर्वकर्मिणां-समस्तजीवानामित्यार्याद्वयक्रियाकारकघटना । यदि किं ?-यदि स्याद्-भवेत् । कः ?-सङ्क्रमः-सङ्क्रमणं । कस्य ?-कर्म इति विभक्तिलोपात्कर्मणः । कीदृशस्य ?-परकृतस्य-अन्योपात्तस्य । कीदृशो ध्यानानलः ?-एकः-अद्वितीयः । पुनः कीदृशः ?-सर्वेन्धनानां कर्मणां च एकराशीकरणं-सञ्चयकरणमेकराशीकृतं तेन सन्दीप्तो-देदीप्यमानः सर्वेन्धनैकराशि कृतसन्दीप्तः। हिः पूरणे । अयमर्थो-भावेन्धनं कर्म तद् ध्यानं दहति द्रव्येन्धनं काष्ठादि तदनलो दहतीत्येवमत्र द्रष्टव्यम् । तथाऽनन्तगुणं तेजो यस्य सोऽनन्तगुणतेजाः । क एवंविधः ?-ध्यानमेवानलः-अग्निर्यथा तपःप्रशमसंवरा एव हविः-घृतं तेन विवृद्धं-विशेषवृद्धिमुपगतं बलं-सामर्थ्यं यस्य स तथेति ॥२६४॥

---

**( २६४ ) ( अव० )—यथा [१]लालिताग्निः काष्ठादिः, एवं ध्यानाग्निः । अनन्तगुणं तेजो यस्य । [२]तपोऽनशनादि । त एव हविर्घृतम् ॥२६४॥**

[१]क्षपकश्रेणिमुगपतः स समर्थः सर्वकर्मिणां कर्म ।
क्षपयितुमेको यदि कर्मसङ्क्रमः स्यात् परकृतस्य ॥२६५॥
परकृतकर्मणि यस्मान्न क्रामति सङ्क्रमो विभागो वा ।
तस्मात् सत्त्वानां कर्म यस्य यत्तेन तद्वेद्यम् ॥२६६॥
मस्तकसूचिविनाशात्तालस्य यथा ध्रुवो भवति नाशः ।
तद्वत् कर्मविनाशो हि मोहनीयक्षये नित्यम् ॥२६७॥

---

**( २६५ ) टीका—**स खलु [१]ज्ञानानल किं करोतीत्याह—**क्षपकश्रेणिमित्यादि** । क्षपकश्रेणिमनुप्राप्तः परिदहन् कर्माणि ज्ञा(ध्या)नानलः स समर्थः शक्तः । [२]सर्वकर्मिणां सर्वेषां संसारिणां कर्मवतां कर्मभाजां यत्कर्म । तेषु व्यवस्थितं पुञ्जीकृतं तत्क्षपयितु-मेकोऽसहायः । यदि कर्मणः परकृतस्य तस्य तस्मिन् क्षपकश्रेणिस्थे सङ्क्रमः स्यात् स तु नास्ति, तस्मात्सामर्थ्यमात्रमिदं तस्य वर्ण्यते [३]ज्ञानानलस्य ॥२६५॥

**( २६६ ) टीका—**एतदेव स्पष्टयन्नाह—**परकृतकर्मणीत्यादि** । परेण कृतं कर्म तस्मिन् परकृतकर्मणि विषये । यस्मान्नास्ति सङ्क्रमः [१]सङ्क्रान्तिः । अन्येन [२]कृतं यत्कर्म कृतमस्तीति तदन्यत्र न[३] सङ्क्रामति न सङ्क्रान्तिर्भवति । सर्वस्य कर्मणः सङ्क्रमो मा [४]भूदेकदेशस्य भविष्यतीति नेत्याह—**विभागो वा** । नाप्येकदेशो विभागः सङ्क्रामतीत्यर्थः कृतनाशाकृताभ्यागमप्रसङ्गात् । तस्मात्सत्त्वानां प्राणिनां यस्य यत्कर्म प्राणिनस्तेनैव तद्वेद्य-मनुभवनीयमिति । अथवा न क्रामति न क्रमते, न भवति सङ्क्रान्तिरिति ॥२६६॥

**( २६७ ) टीका—**मोहनीयकर्मक्षयात्[१] अवशेषकर्मक्षयोऽवश्यंभावीति दर्शयति—

---

**( २६५ ) ( वि० ) क्षपकेति** । तथा क्षपकश्रेणिपरिगतः-क्षपकश्रेणिसंस्थितः । शेषं योजितमेव । अयमत्र भावार्थः-स क्षीणमोहो ध्यानानलेनात्मीयं कर्म दग्ध्वा [१]परकीयमपि दहेत् यदि कर्मसङ्क्रमः स्यादिति ॥२६५॥

**( २६६ ) ( वि० )** न चैतदेवं, यतः-**परकृतेति** । न क्रामति सङ्क्रमः-समस्तकर्मप्रवेशो यस्मात्-कारणात् । क्व?-परकृतकर्मणि विषये । अथ सामस्त्येन मा सङ्क्रामतु, एकदेशेन सङ्क्रमः स्याद्, अत आह-[१]विभागो वा न क्रामति-एकदेशेनापि न क्रामति, तस्मात् सत्त्वानां कर्म यस्य यत् तेन तद्वेद्यं, सर्वेषां प्राणिनां मध्ये यद् येन जीवेन बद्धं तत् तेन वेद्यते ॥२६६॥

**( २६७ ) ( वि० )** मोहनीयकर्मक्षयाद्विशेषतः कर्मक्षयोऽवश्यंभावीति दर्शयति—

---

**( २६५ )( अव० )—अनुप्राप्तः=परिगतः ।जीवानां सर्वेषां कर्मभाजां दहेत्, यदि सङ्क्रमः स्यात् ॥२६५॥**
**( २६६ )( अव० )—सङ्क्रमः=सामस्त्येन कर्मप्रवेशः ।अथ स मास्तु[१] विभाग एकदेशोऽपि नाक्रामति २६६**
**( २६७ ) ( अव० )—[१]मस्तकं-शिरोगतांसक्षयात् वृक्षस्य ध्रुवो=निश्चयेन भवति ॥२६७॥**

**छद्मस्थवीतरागः कालं सोऽन्तर्मुहूर्तमथ भूत्वा ।**
**युगपद् विविधावरणान्तरायकर्मक्षयमवाप्य ॥२६८॥**
**शाश्वतमनन्तमनतिशयमनुपममनुत्तरं निरवशेषम् ।**
**सम्पूर्णमप्रतिहतं सम्प्राप्तः केवलं ज्ञानम् ॥२६९॥**

---

**मस्तकेत्यादि**। तालतरोः शिरसि सूचिर्या [२]प्ररोहति । तद्विनाशे च तालतरोरवश्यंभावी ध्रुवो नाशः । तद्वत्तथा शेषकर्मणां विनाशः क्षयोऽष्टाविंशतिविधमोहनीयक्षये ध्रुवो नित्य इत्यर्थः ॥२६७॥

**( २६८ ) टीका—छद्मस्थेत्यादि** । छद्म [१]आवरणं तत्र स्थितः छद्मस्थः, वीतरागश्च क्षपितकषायत्वात्। अन्तर्मुहूर्तं घटिकाद्वयाभ्यन्तरकालं वीतरागो भूत्वा । युगपत्समकमेव । विविधं ज्ञानावरणं मतिज्ञानादिभेदम् । दर्शनावरणं चतुर्विधम् । [२]विविधमित्यनेकरूपम् । तथान्तरायं दानान्तरायादिप्रकारम्। इत्थं कर्मक्षयमवाप्य ॥२६८॥

**( २६९ ) टीका—**किं प्राप्तवानित्याह**—शाश्वतमित्यादि** । शाश्वतं लब्धात्मलाभम् । सर्वकालभावि [१]तदेव भावयति—अनन्तमपर्यवसानम् । [२]अविद्यमानातिशयम् [३]अनतिशयं, न ततः [४]परमतिशयोऽन्योऽस्ति, न तत्केनचिदतिशय्यत इत्यर्थः । अविद्यमानोपममनुपमं, तत्सदृशस्याभावात् । अविद्यमानमुत्तरं [५]ज्ञानं यस्य तदनुत्तरम् । निरवशेषमात्मनः स्वरूपं सम्पूर्णं, सकलज्ञेयग्राहित्वात् । अविद्यमानप्रतिघात[६]मप्रतिहतं सर्वतः पृथ्वीसमुद्रादावपि न प्रतिहन्यते । सम्प्राप्तः प्राप्तवानेवंविधं केवलज्ञानम् ॥२६९॥

---

**मस्तकेति**। भवति । कोऽसौ ?-ध्रुवो [१]नाशः । कस्य ?-तालस्य-वृक्षविशेषस्य । कुतः ?-मस्तकसूचिविनाशात् । तद्वत्-तथा । कर्मविनाशो मोहनीयक्षये भवति [२]नित्यमिति ॥२६७॥

**( २६८ ) ( वि० ) छद्मस्थेति** । छद्मस्थवीतरागः-क्षीणमोहः सोऽन्तमुहूर्तकालं यावदथ भूत्वा-स्थित्वा युगपद्-एककालं द्विविधावरणान्तरायकर्मणां-ज्ञानदर्शनावरणान्तरायाख्यानां पञ्चचतुःपञ्चप्रभेदानां क्षयस्तमवाप्येति ॥२६८॥

**( २६९ ) ( वि० )** इत्थं कर्मक्षयमवाप्य किं प्राप्तवानित्याह**—शाश्वतमिति** । [१]सम्प्राप्तः केवलं ज्ञानमिति सम्बन्धः । कीदृशं केवलज्ञानम् ?-शाश्वतं-लब्धात्मलाभं सत् सर्वकालभावि । तथा अनन्तम्-अपर्यवसानम् । तथा अनतिशयम्-अविद्यमानातिशयम् । तथाऽनुपमम्-अविद्यमानोपमम् । तथा अनुत्तरम्-अविद्यमानमुत्तरम् । तथा निरवशेषं परिपूर्णत्वेनोपपत्तेः । तथा परिपूर्णं सकलज्ञेयग्राहि-

---

**( २६८ ) ( अव० )—क्षपितकषायत्वात् । अन्तर्मुहूर्तकालं यावद्भूत्वा स्थित्वा । युगपदेककालं ज्ञानावरण ५ दर्शनावरण ४ अन्तरायाणां ५ क्षयमाप्य ॥२६८॥**

**( २६९ ) ( अव० )—[१]शाश्वतमनवरतभवनशीलत्वात् । अनन्तं क्षयाभावात् । केनापि तस्यातिशयितुमशक्यत्वात् । अनुपममपगतोपमानत्वात् । अनुत्तरमविद्यमानोत्तरत्वात् । निरवशेषं**

**कार्त्स्न्याल्लोकालोके व्यतीतसाम्प्रतभविष्यतः कालान् ।**
**द्रव्यगुणपर्यायाणां ज्ञाता द्रष्टा च सर्वार्थैः ॥२७०॥**
**क्षीणचतुष्कर्मांशो वेद्यायुर्नामगोत्रवेदयिता ।**
**विहरति मुहूर्तकालं देशोनां पूर्वकोटिं वा ॥२७१॥**

---

**( २७० ) टीका—कार्त्स्न्यादित्यादि** । लोकेऽलोके च कृत्स्नवस्तुग्राहित्वात् कृत्स्नं सकलं तद्भावः कार्त्स्न्यं तस्मात्कार्त्स्न्यात्, सकलवस्तुपरिच्छेदित्वात् । व्यतीतोऽतिक्रान्तः, साम्प्रतो वर्तमानः । भविष्यन्नागामी एतान् कालान् । द्रव्यगुणपर्यायाणां द्रव्याणां गुणानां पर्यायाणां च सम्बन्धिनः कालानुत्पत्तिस्थितिविनाशाख्यान्न द्रव्यादिव्यतिरिक्तकालोऽस्तीत्यमुं पक्षमाश्रित्य [१]ज्ञातपरिज्ञानशीलः दर्शनशीलश्च । तत्र कालो लोक एव कियत्यपि, अन्यत्र नास्ति । सर्वार्थैरिति सर्वप्रकारैः [२]तान् ज्ञाता द्रष्टा च । यत्र तु नास्ति कालद्रव्यं तत्र द्रव्यगुणपर्याणामेव द्रष्टा ज्ञाता च सर्वाकारैरिति । अथवा लोके [३]अलोके च ये द्रव्यगुणपर्यायास्तेषां व्यतीतसाम्प्रतभविष्यतः कालान् कार्त्स्न्येन ज्ञाता द्रष्टा च सर्वाकारैरिति ॥२७०॥

**( २७१ ) टीका—क्षीणचतुरित्यादि** । क्षीणाश्चतुर्णां कर्मणामंशा भागा यस्य स क्षीणचतुःकर्मांशः क्षपितमोहज्ञानदर्शनान्तरायकर्मचतुष्टयः । वेदनीयायुष्कनामगोत्रवेदयितेति वेदनीयादीनां चतुर्णां भवधारणीयानां कर्मणामनुभविता । विहरति पर्यटति । मुहूर्तकालं

---

त्वात् । तथा अप्रतिहतं सदा प्रतिघातकाभावात् । सम्प्राप्तः—प्राप्तवान् इति ॥२६९॥

**( २७० ) ( वि० ) कार्त्स्न्यादिति** । लोकश्चालोकश्च लोकालोकं तत्र । कीदृशे ?—कृत्स्ने—परिपूर्णे । व्यतीतसाम्प्रतभविष्यतः कालान्—कालत्रयं, आश्रित्येति शेषः । द्रव्यगुणपर्यायाणां कृतद्वन्द्वानां, तत्र गुणपर्यायवद् द्रव्यं, सहभाविनो गुणाः, क्रमभाविनः पर्याया इत्यादिलक्षणभाजां सतां सचेतनाचेतनानाम् । ज्ञाता विशेषेण । द्रष्टा सामान्येन । सर्वार्थैः—सर्वप्रकारैर्यथाऽन्तस्तथा बहिः यथा बहिस्तथाऽन्तः इत्यादिकैरिति ॥२७०॥

**( २७१ ) ( वि० )** तस्मिन् केवलज्ञाने सति कीदृशः स्यादित्याह—**क्षीणेति**। क्षीण-चतुष्कर्मांशः—अपगताशेषघातिकर्मा । तथा वेद्यायुर्नामगोत्रवेदयिता—भवोपग्राहिकर्मणामनुभविता ।

---

**परिपूर्णत्वेनोत्पत्तेः, सम्पूर्णं सकलज्ञेयग्राहित्वात् । अप्रतिहतं सदापि प्रतिघातकाभावात् [१] ॥२६९॥**

**( २७० ) ( अव० )—कार्त्स्न्ये परिपूर्णे लोकालोके कृत्स्नलोकवस्तुपरिच्छेदित्वात् । गुणपर्यायवद् द्रव्यं, सहभाविनो गुणाः, क्रमभाविनः पर्यायाः । सर्वार्थैः सर्वप्रकारैः ॥२७०॥**

**( २७१ ) ( अव० )—क्षीणघातिकर्मचतुष्कः भवोपग्राहिकर्मचतुष्कः [१]वेदयिता जघन्येन घटिकाद्वयम् ॥२७१॥**

**तेनाभिन्नं चरमभवायुर्दुर्भेदमनपवर्तित्वात् ।**
**तदुपग्रहं च वेद्यं तत्तुल्ये नामगोत्रे च ॥२७२॥**
**यस्य पुनः केवलिनः कर्म भवत्यायुषोऽतिरिक्ततरम् ।**
**स समुद्घातं भगवानथ गच्छति तत् समीकर्तुम् ॥२७३॥**

---

घटिकाद्वयं लब्ध-केवलज्ञानः सन् विहरति भव्यसत्त्वान् प्रतिबोधयन् । अथवा देशोनां पूर्वकोटिं विहरति, देशोऽष्टौ वर्षाणि तदूनाम् पूर्वकोट्यायुष्को यः पुरुषः सोऽष्टासु वर्षेष्वतीतेषु [1]प्रव्राजितः । प्रतिपन्न[2]चारित्रस्य च केवलं केवलज्ञानमुदपादीति ॥२७१॥

**( २७२ ) टीका—तेनाभिन्नमित्यादि** । तेनायुषा अभिन्नं सदृशमित्यर्थः । चरमे भवे पश्चिमे भवे आयुः पर्यन्तजन्मनि दुर्भेदमित्यभेद्यमेव अध्यवसायनिमित्तादिभिः सप्तभिः कारणैः कस्माद् ? अनपवर्तित्वात् चरमभवायुषोऽ[1]पवर्तनं नास्ति, ततश्च तस्यायुषो यत्प्रमाणं यावती स्थितिः तावत्स्थितिकानि वेद्यनामगोत्राणि तैरभिन्नं सदृशमायुरिति । अथवा न तेनायुषा सह भिन्नं वेद्यादित्रयं सदृशमेवेत्यर्थः । तेन चायुषा उपगृहीतं वेद्यं नामगोत्रे च सत्यायुषि तेषां सम्भवादिति ॥२७२॥

**( २७३ ) टीका—यस्य पुनरित्यादि** । यस्य केवलिनश्चरमायुष्कात् । कर्म वेद्यनाम-

---

एवंविधः सन् विहरति-भ्रमति । मुहूर्तकालं जघन्येन देशोनां पूर्वकोटिं वा उत्कृष्टत इति ॥२७१॥

**( २७२ ) ( वि० ) तेनेति** । चरमभवायुः-चरमभवयोग्यं आयुः अभिन्नं क्षीरोदकवत् संस्थितं केवलिना दुर्भेदं-भेत्तुमशक्यम्-अपनेतुमशक्यम् । हेतुमाह-अनपवर्तित्वाद्-अनपवर्तनीय-त्वात् । तथा वेद्यं च कीदृशं ? तेन-आयुषोपगृह्यते-उपष्टभ्यते तदुपग्रहं, अनपवर्तित्वात् । [1]तेनायुषा तुल्ये-तुल्यके नामगोत्रे चापि । स एव हेतुरिति ॥२७२॥

**( २७३ ) ( वि० )** ननु ज्ञानोत्पत्त्यनन्तरमेव किं न मोक्षं याति ?, यावता एतावन्तं कालं विहरति ?, उच्यते—**यस्येति** । यस्य पुनः केवलिनः कर्म-कर्मत्रयं वेद्यनामगोत्राख्यं भवत्या-

स्थापना



**॥ इति श्रेण्यधिकारः ॥१९॥**

---

**( २७२ ) ( अव० )—तेनायुषाऽभिन्नं सदृशं क्षीरोदकवत् संस्थितचरमभवयोग्यमायुः केवलिना दुर्भेदमनपव[2]र्तनीयत्वात् । तथा [1]वेद्यं वेदनीयं कर्म, तदुपग्रहं तेनायुषोपगृह्यते= उपष्टभ्यते । तदुपग्रहमनपवर्तनीयत्वात्=आयुःकर्मणा सह वेद्यत्वात् ॥२७२॥**

**दण्डं प्रथमे समये कपाटमथ चोत्तरे तथा समये ।**
**मन्थानमथ तृतीये लोकव्यापी चतुर्थे तु ॥२७४॥**
**संहरति पञ्चमे त्वन्तराणि मन्थानमथ पुनः षष्ठे ।**
**सप्तमके तु कपाटं संहरति ततोऽष्टमे दण्डम् ॥२७५॥**

---

गोत्राख्यम् । अतिरिक्तम् अधिकं भवति । स केवली वेद्यादित्रयमायुषा सह समीकर्तुं [१]तुल्यतामेतुं समुद्घातं याति। गत्वा च यावत्प्रमाणमायुस्तावत्प्रमाणानि वेद्यनामगोत्राणि विदधाति । सम्यगुत्कृष्टं हननं गमनं समुद्घातः । नातः परं गमनमस्ति, लोकाद्बहिर्गमनाभावात् ॥२७३॥

**( २७४ ) टीका—**तस्य चायं विधिरुच्यते—**दण्डमित्यादि** । स्वशरीरप्रमाण[१]दण्डंबाहल्येनोर्ध्वमधश्चात्मप्रदेशान् विक्षिपत्यालोकान्तात् । तत्र प्रथमसमये दण्डम् । द्वितीयसमये तु [२]तदेव दण्डं कपाटीकरोति दक्षिणोत्तरतो विस्तारयत्यालोकान्तात् । एवं तृतीयसमये तदेव कपाटं मन्थानं करोति [३]पूर्वापरयोर्विस्तारयत्यालोकान्तात् । एवं चतुर्थसमये मन्थानान्तराणि पूरयित्वा [४]चतुर्थे तु लोकव्यापी भवति । एवमात्मप्रदेशेषु निरावरणेन वीर्येण विरचितेषु कर्म वेद्यादित्रयमायुषा समं करोति । आयुष्कं तु नापवर्तते, अनपवर्तितत्वादेवेत्युक्तम् । आत्मप्रदेशविस्तारणाच्च तद्वेद्यादिकर्म अतिरिक्तं क्षयं गच्छदायुषा सह समीकरोति ॥२७४॥

**( २७५ ) टीका—संहरतीति** । एवं चतुर्भिः समयैर्लोकं क्रमेण व्याप्य चतुर्भिरेव

---

युषोऽतिरिक्ततरं–अतिशयेन समधिकं स केवली समुद्घातं वक्ष्यमाणं भगवानथ गच्छति–करोति[१] तस्य–आयुषः समीकर्तुं तत्समीकर्तुम् । त्रीण्यपि कर्माणीति ॥२७३॥

**( २७४ ) ( वि० )** इति श्रेणिफलप्रतिपादनमार्यापञ्चदशकेन कृतम् । साम्प्रतं केवलिसमुद्घातं योगनिरोधं तत्कालं कर्मक्षयं च प्रतिपादयन्नाह—**यस्येति** । दण्डं ऊर्ध्वाधश्चतुर्दशरज्ज्वात्मकं बाहल्यतः शरीरमानं प्रथमसमये–आद्यसमये करोति । कपाटमिव कपाटं पूर्वापरलोकान्तव्यापिनं अथ चोत्तरे तथा समये करोति । मन्थानं दक्षिणोत्तरलोकान्तव्यापिनम् अथ तृतीये समये । लोकव्यापी समस्तनिष्कुटव्यापनात् चतुर्थे तु समये भवति केवलीति ॥२७४॥

**( २७५ ) ( वि० ) संहरतीति** । संहरति–सङ्क्षिपति पञ्चमे त्वन्तराणि, निष्कुटगतजीवप्रदेशानित्यर्थः । मन्थानमथ पुनः षष्ठे, दक्षिणोत्तरलोकान्तगतजीवप्रदेशान् । सप्तमके तु कपाटं

---

**( २७३ ) ( अव० )—[१]अतिरिक्ततरम् अधिकतरम् ॥२७३॥**

**( २७४ ) ( अव० )—दण्डमूर्ध्वाधश्चतुर्दशरज्ज्वात्मकं बाहल्यतः शरीरमानं कपाटं पूर्वापरलोकान्तव्यापिनं [१]मन्थानं दक्षिणोत्तरलोकान्तव्यापिनं समस्तनिष्कुटव्यापनाल्लोकव्यापी ॥२७४॥**

**( २७५ ) ( अव० )—अन्तराणि=निष्कुटगतजीवप्रदेशान् ॥२७५॥**

**औदारिकप्रयोक्ता प्रथमाष्टमसमययोरसाविष्टः ।**
**मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु ॥२७६॥**

**कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च ।**
**समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात् ॥२७७॥**

**स समुद्घातनिवृत्तोऽथ मनोवाक्काययोगवान् भगवान् ।**
**यतियोग्ययोगयोक्ता योगनिरोधं मुनिरुपैति ॥२७८॥**

---

समयैर्विपरीतं संहरति । पञ्चमे समये मन्थानान्तराण्युपसंहरति । षष्ठे समये [१]मन्थानं संहरति। सप्तमे समये कपाटम्। अष्टमे समये दण्डमुपसंहृत्य शरीरस्थ एव भवति ॥२७५॥

**( २७६ ) टीका—**अथ कस्मिन्समये को योगः समुद्घातकाले भवतीत्याह—**औदारिकेत्यादि** । प्रथमेऽष्टमे च समये औदारिक एव योगो भवति शरीरस्थत्वात् । कपाटोपसंहरणे सप्तमः । मन्थनसंहरणे षष्ठः । कपाटकरणे द्वितीयः । एतेषु त्रिष्वपि समयेषु कार्मणव्यतिमिश्र औदारिकयोगो भवति[१] ॥२७६॥

**( २७७ ) टीका—कार्मणेत्यादि** । मन्थानान्तरपूरणसमयश्चतुर्थः । मन्थानान्तरसंहरण-समयः पञ्चमः । मन्थानकरणसमयस्तृतीयः । समयत्रयेऽप्यस्मिन् कार्मणशरीरयोगः । तत्र च नियमेनैव जीवो भवत्यनाहारकः ॥२७७॥

**( २७८ ) टीका—स समुद्घातेत्यादि** । स खलु केवली समीकृतचतुष्कर्मा । ततः

---

संहरति। ततोऽष्टमे दण्डं, जीवप्रदेशानिति ॥२७५॥

**( २७६ ) ( वि० ) औदारिकेति** । औदारिकप्रयोक्ता-औदारिकशरीरव्यापारकः प्रथमाष्टम-समययोः-दण्डकरणसंहारलक्षणयोरसौ केवली इष्टः । मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेष्विति ॥२७६॥

**( २७७ ) ( वि० ) कार्मणेति** । कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च, त्रिष्वपि पूर्वोक्तस्वरूपेषु। समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात्, कार्मणशरीरव्यापारात्, [१]तत्र अनाहारकत्वं **विग्गहगइमावन्ना** (विग्रहगतिमापन्नाः) इति गाथया सिद्धम् इति समुद्घातः ॥२७७॥ (अधि० २०)

**( २७८ ) ( वि० ) स इति** । स मुनिः समुद्घातनिवृत्तोऽथ-अनन्तरं मनोवाक्काययोगवान्-करण-त्रयव्यापारवान् भगवान्-पूज्यः । यतियोग्यस्य-साधुजनार्हस्य योगस्य-व्यापारस्यानीतपीठ-

---

**( २७६ ) ( अव० )—औदारिकशरीरयापकः प्रथमाष्टमसमययोर्दण्डकरणसंहारलक्षणयोः कथितोऽसौ केवली ॥२७६॥**

**( २७८ ) ( अव० )—स केवली करणत्रयशुद्धयोगवान् उचितं सत्यं यतियोग्यं योगं व्यापारं युङ्क्ते [१]व्यापारयति [२]निरोधं करोति ॥२७८॥**

**पञ्चेन्द्रियोऽथ सञ्ज्ञी यः पर्याप्तो जघन्ययोगी स्यात् ।**
**निरुणद्धि मनोयोगं ततोऽप्यसङ्ख्यातगुणहीनम् ॥२७९॥**

**द्वीन्द्रियसाधारणयोर्वागुच्छ्वासावधो जयति तद्वत् ।**
**पनकस्य काययोगं जघन्यपर्याप्तकस्याधः ॥२८०॥**

---

समुद्घातान्निवृत्तः । तदनन्तरं मनोवाक्काययोगी भगवान् योगत्रयवर्तीति । अथ मनोयोगः केवलिनः कुत इत्युच्यते—यदि नामानुत्तरो मनसा तत्रस्थ एव पृच्छेत्, अन्यो वा देवो मनुष्यो वा, ततो भगवान् मनोद्रव्याण्यादाय मनःपर्याप्तिकरणेन तत्प्रश्नव्याकरणं करोति सत्यमनोयोगेन असत्यामृषामनोयोगेन [१]वा व्याकरोति । तथा वाग्योगोऽपि भगवतः सत्यः असत्यामृषारूपो वा। काययोगस्त्वौदारिकादिगमनादिक्रियासाधनः । **यतियोग्ययोगयोक्ते**-त्यनेनैतत्प्रतिपादितम् । तस्यामवस्थायां स यतिः केवली योग्यमुचितं योगं सत्यरूपम् असत्यमृषारूपं वा युङ्क्ते ॥२७८॥

**( २७९ ) टीका—**सम्प्रति तान् योगान्निरोद्धुमिच्छन्नमुना प्रकारेण निरुणद्धि—**पञ्चेन्द्रिय इति** । सयोगस्य सिद्धिर्नास्तीति योगोऽवश्यं निरोद्धव्यः । तत्र प्रथमं मनोयोग[१]मापेक्ष (क्षेप)कं निरुणद्धि। मनःपर्याप्त्याख्यं करणशरीरप्रतिबद्धं, येन मनोद्रव्यग्रहणं करोति। तद्वियोजनार्थमनन्तवीर्यः सन् मनोविषयं निरुन्धन् निरुणद्धि । पूर्वं पञ्चेन्द्रियस्य सञ्ज्ञिनः मनःपर्याप्तिकरणयुक्तस्य प्रथमसमयपर्याप्तकस्य जघन्ययोगस्य मनोद्रव्यवर्गणास्थानानि निरुणद्धि स्वात्मनि । ततोऽपि [३]तद्ग्रहणहान्या असङ्ख्येयगुणान्यवस्थानानि निरुणद्धि। पश्चादमनस्को भवति मनःपर्याप्तिरहित इत्यर्थः ॥२७९॥

**( २८० ) टीका—**ततो वाग्योगं निरुणद्धि तन्निरूपणायाह—**द्वीन्द्रियसाधारणयोः**

---

फलकादेः प्रत्यर्पणमुपदेशादेर्योक्ता–व्यापारयिता यतियोग्ययोगयोक्ता। योगनिरोधमुपैति–गच्छति ॥२७८॥

**( २७९ )( वि० )** येन क्रमेण योगनिरोधं करोति तमाह–**पञ्चेति**। पञ्चेन्द्रियोऽथ सञ्ज्ञी यः पर्याप्तः सन् जघन्ययोगी स्यात्–सर्वस्तोकयोगो भवेत् ततोऽप्यसङ्ख्यातगुणहीनं मनोयोगं निरुणद्धीति॥२७९॥

**( २८० )( वि० ) द्वीन्द्रियेति**। द्वीन्द्रियश्च साधारणश्च तौ तथा तयोर्वागुच्छ्वासौ–भाषाऽऽनपानौ

---

**( २७९ ) ( अव० )—[१]तत्र प्रथमं मनोयोगं मनःपर्याप्तिजनितव्यापारं शरीरप्रतिबद्धं मनोद्रव्यग्राहकं, तद्वियोजनार्थं पञ्चेन्द्रियस्य सञ्ज्ञिनो मनःपर्याप्त्या प्रथमसमयपर्याप्तकस्य यः सर्वजघन्यमनोयोगो मनोवर्गणाग्रहणशक्तेर्व्यापारः तस्मात्स्वात्मनि असङ्ख्येयगुणहान्या प्रतिसमयं निरुन्धन् सकलं निरुणद्धि, मनःपर्याप्त्या रहितो भवति ॥२७९॥**

**( २८० ) ( अव० )—[१]अधस्तनोऽनन्तरम् । यथा मनो रुद्धम् तथा वागुच्छ्वासावपि**

**सूक्ष्मक्रियमप्रतिपाति काययोगोपगतस्ततो ध्यात्वा ।**
**विगतक्रियमनिवर्तित्वमुत्तरं ध्यायति परेण ॥२८१॥**

**इत्यादि** । द्वीन्द्रियस्य प्रथमसमयपर्याप्तकस्य वाक्पर्याप्तिकरणं [१]यत्तद्विघटयति । तस्य जघन्यवाग्योगो यः साधारणजीवस्य च प्रथमसमयपर्याप्तकस्य यदुच्छ्वास[२]पर्याप्तिकरणं ताभ्यां वागुच्छ्वासौ अधः कृत्वा तावन्निरुणद्ध्यसङ्ख्येयगुणहान्या, यावत्समस्तवाग्योगो निरुद्धः उच्छ्वासनिःश्वासपर्याप्तिकरणं च । तद्वदिति यथा मनो [३]निरुद्धं तथा तद्वद्वागुच्छ्वासावपि निरुणद्धीत्यर्थः । तत्र मनोवाचोर्निरुद्धयोः काययोगनिरोधं करोति। पनक उल्लिजीवस्तस्य प्रथमसमयपर्याप्तकस्य यः काययोगो जघन्यस्ततोऽप्यधोऽसङ्ख्येयगुणहान्या निरावरणवीर्यत्वात्सकलं काययोगं निरुणद्धि ॥२८०॥

**( २८१ ) टीका—**काययोगनिरोधकाले च—**सूक्ष्मक्रियमित्यादि**। ध्यानं सूक्ष्मक्रियमप्रतिपाति [१]शुक्लं काययोगस्थित एव ध्यायति। तदैव च शैलेशीं त्रिभागहीनमात्मप्रदेशराशिं[२] करोति। किमर्थमिति ? वेद्यानि शरीरे निर्वर्तितानि मुखश्रवणनासिकादिच्छिद्राणि तत्परिपूरणार्थं घनीकरोति आत्मानं त्रिभागहीनावगाहसंस्थानपरिणाहं करोतीत्यर्थः । [३]ततश्चतुर्थं शुक्लध्यानभेदं

---

कर्मतापन्नौ अधः कृत्वा जयति-निरुणद्धि तद्वत्-पूर्वोक्तमनोयोगवत्। तथा पनकस्य-उल्लिविशेषस्य जघन्ययोगिनः पर्याप्तकस्याधः-अधस्तादसङ्ख्यातगुणहीनमित्यक्षरार्थः । तात्पर्यं चेदम्-द्वीन्द्रियस्य साधारणस्य पनकस्य च त्रयो वागुच्छ्वासकाययोगाः सर्वजघन्याः, तेभ्यः प्रत्येकमसङ्ख्यातगुणहीनां वाचं असङ्ख्यातगुणहीनमुच्छ्वासमसङ्ख्यातगुणहीनं काययोगं बादरं समये समये रुन्धन् केवली चतुर्ष्वन्तर्मुहूर्तेषु गतेषु विश्रान्तिकृद्-अन्तर्मुहूर्तचतुष्टयसमन्वितेषु प्रथमं मनोयोगं बादरम् १ एवं बादरं वाग्योगं २ तत उच्छ्वासं ३ ततः काययोगम् ४ अपान्तराले एकस्य २ [१]अन्तर्मुहूर्तं [२]विश्राम्येत्यष्टावन्तर्मुहूर्ता इति ॥२८०॥

**( २८१ ) ( वि० ) सूक्ष्मेति** । ततो बादरे काययोगे निरुद्धे सति काययोगोपगतस्ततः सूक्ष्मक्रियया काययोगवर्ती केवली [१]सूक्ष्ममनोयोगं सूक्ष्मवाग्योगं निरुन्धन् अन्तर्मुहूर्तद्वयेन सूक्ष्मकाययोगं प्रतिसमयं निरुन्धन्, न चाद्यापि तस्य सर्वथा निरोधोऽजनि । एवंविधकाले सूक्ष्मक्रियमप्रतिपाति ध्यानं ध्यायति । ध्यात्वा ततः सूक्ष्मकाययोगेऽपि निरुद्धे सति सर्वथा

---

**निरुणद्धीत्यर्थः । असङ्ख्येयगुणहान्या । तात्पर्य चेदं द्वीन्द्रियस्य साधारणस्य पनकस्य [२]त्रयः वागुच्छ्वास २ काययोगाः ३ सर्वजघन्यास्तेभ्यः प्रत्येकमसङ्ख्यातगुणहीनां वाचम् । उच्छ्वासं च बादरकाययोगं च निरुणद्धि ॥२८०॥**

**( २८१ ) ( अव० )—[१]सूक्ष्मक्रियमप्रतिपाति ध्यानं काययोगस्थित एव ध्यायति विगत**

**चरमभवे संस्थानं यादृग् यस्योच्छ्रयप्रमाणं च ।**
**तस्मात् त्रिभागहीनावगाहसंस्थानपरिणाहः ॥२८२॥**

**सोऽथ मनोवागुच्छ्वासकाययोगक्रियार्थविनिवृत्तः ।**
**अपरिमितनिर्जरात्मा संसारमहार्णवोत्तीर्णः ॥२८३॥**

---

परेण ध्यायति । विगतक्रियमनिवर्तिध्यानं निरुद्धयोगः व्युपरतसकलक्रियमनिवर्तिध्यायन्न[४] ननुत्तर[५] (ध्यानमनुत्तरं) ध्यायन् चरमकर्मांशं क्षपयति ॥२८१॥

**( २८२ ) टीका—चरमभव इत्यादि** । उक्त एवार्थोऽस्याः कारिकायाः पुनस्तथाप्युच्यते । चरमभवे पश्चिमजन्मनि । संस्थानमाकारः । यादृग् यस्य सिद्धिमुपजिगमिषोः संस्थानं शरीरोच्छ्राय एव प्रमाणं । तस्य त्रिभागहान्या संस्थानपरिणाहं करोति ॥२८२॥

**( २८३ ) टीका—**अथ स भगवान् कीदृगवस्थानिरुद्धेषु [१]योगेषु भवतीत्याह—**सोऽथेत्यादि** । स भगवान् केवली वाक्काय[२]मनोच्छ्वासयोग[३]क्रियार्थाद्विनिवृत्तः निरुद्धसकल-क्रियः । अपरिमितनिर्जर आत्मा यस्य बहुकर्मक्षपणयुक्तः संसारमहार्णवादुत्तीर्ण एव ॥२८३॥

---

विगतक्रियं–अपगतक्रियमनिवर्ति तु [२]निवृत्तिरहितं पुनरनुत्तरं ध्यायति परेण–उपरीति ॥२८१॥

**( २८२ ) ( वि० ) चरमेति** । चरमभवे संस्थानं यादृग् यस्य केवलिन उच्छ्रयप्रमाणं च यत् तस्मादुच्छ्रयप्रमाणात् संस्थानप्रमाणाच्च त्रिभागहीनौ–त्रिभागशून्यावगाहस्य–शरीरस्य संस्थान-परिणाहौ–संस्थित्युच्छ्रायौ यस्य स तथा । योगनिरोधकाल एवंविधप्रमाणः स्यादिति ॥२८२॥

**( २८३ ) ( वि० ) सोऽथेति** । अथ योगनिरोधानन्तरं स केवली मनसो वाचः उच्छ्वासस्य कायस्य च ये योगा याश्च क्रियाः ये चार्थाः–प्रयोजनानि एतेषां यथायोगं समासः तेभ्यो विनिवृत्तो, योगत्रयसाध्यक्रियाविकलो यः स तथा । अपरिमितनिर्जरात्मा–अन्तर्मुहूर्तमात्रेणैव पञ्चाशीतिकर्म-क्षयकारी । संसारमहार्णवोत्तीर्णः–अपगताशेषसंसारभयः सन् । शैलेशीमेतीति वक्ष्यमाणेन सम्बन्धः ॥२८३॥ **इति योगनिरोधाधिकारः ॥२१॥**

---

**क्रियं निरुद्धयोगं निवृत्तिरहितम् उत्तरप्रधानं चरमकर्मांशान् क्षपयति ॥२८१॥**

**( २८२ ) ( अव० )—[१]परिणाहो विशालता ॥२८२॥**

**( २८३ ) ( अव० )—[१]निरुद्धसकलक्षयः । मनसो वाच उच्छ्वासकायस्य च ये योगाश्च क्रिया ये चार्था-प्रयोजनानि तेभ्यो विनिवृत्तः निरुद्धसकलमार्गः ॥२८३॥**

**ईषद्ह्रस्वाक्षरपञ्चकोद्गिरणमात्रतुल्यकालीयाम् ।**
**संयमवीर्याप्तबलः शैलेशीमेति गतलेश्यः ॥२८४॥**
**पूर्वरचितं य तस्यां समयश्रेण्यामथ प्रकृतिशेषम् ।**
**समये समये क्षपयत्यसङ्ख्यगुणमुत्तरोत्तरतः ॥२८५॥**

---

**( २८४ ) टीका—**स व्युपरतक्रियानिवर्तिध्यानकाले शैलेश्यवस्थां यातीत्याह—**ईषदित्यादि** । ईषन्मनाग् [१]ह्रस्वानां पञ्चानामक्षराणां 'कखगघङ' इत्येषामुच्चारणाकाल उद्गिरणमुच्चारणं तत्तुल्यकालीयां तावत्प्रमाणां शैलेशीमेति । संयमेनानुत्तरेण वीर्येण च प्राप्तबलः शैलेशीमेति विगतलेश्यः । शैलेश इव मेरुरिव निष्प्रकम्पो यस्यामवस्थायां भवति, साऽवस्था शैलेशीति स्त्रीलिङ्गशब्दः पृषोदरादिपाठात् संस्क्रियते । [२]शैलानामीशतया शैलानामीश्वरी [३]सा शैलेश्यवस्थेति। विगता लेश्या भावाख्या यस्य स[४] विगतलेश्यः । द्रव्यलेश्याभावाद्भावलेश्यानामसम्भवः ॥२८४॥

**( २८५ ) टीका—पूर्वरचितमित्यादि** । प्रथममेव समुद्घातकाले रचितं व्यवस्थापितं समयश्रेण्यां समयपङ्क्तौ । प्रकृतिशेषं [१]वेद्यनामगोत्रायुषां यदवशिष्टमास्ते तत्प्रकृतिशेषम् । प्रतिसमयं क्षपयन्नसङ्ख्येयगुणमु[२]त्तरोत्तरेषु समयेषु ॥२८५॥

---

**( २८४ ) ( वि० )** कीदृशीमित्याह—**ईषदिति** । ईषत्–मनाक् ह्रस्वाक्षरपञ्चकस्योद्गिरणं–भणनं तस्य मात्रं–प्रमाणं तेन तुल्यकालीया तां–समानकालभवां संयमवीर्येण–[१]संवरसामर्थ्येनावाप्तबलः–प्राप्तसामर्थ्यः शैलेशीं–परमनिष्ठाशब्दवाच्यामेति–गच्छति। स कीदृशः केवली ?–विगतलेश्यो–लेश्यारहित इति ॥२८४॥

**( २८५ ) ( वि० ) पूर्वेति** । पूर्वं–पुरा रचितं–स्थापितं पूर्वरचितं च तस्यां–शैलेश्यवस्थायां समयश्रेण्यामन्तर्मुहूर्तगतसमयप्रमाणायाम् अथ–अनन्तरं प्रकृतिशेषं समये समये क्षपयन्–नाशयन् असङ्ख्यगुणम्–असङ्ख्यातगुणं उत्तरोत्तरत–उत्तरोत्तरेषु समयेष्विति ॥२८५॥

---

**( २८४ ) ( अव० )—[१]ईषन्मनाक् कखगघङतुल्यं तावत्प्रमाणं । अनुत्तरेण संयमवीर्येण च प्राप्तबलः । मेरुरिव निःप्रकम्पोऽस्यामवस्थायां भवति ॥२८४॥**

**( २८५ ) ( अव० )—[१]प्रथममेव [२]समुद्घातकाले । यत् प्रकृतिशेषं=अवस्थापितं गोत्रनामवेद्यायुषो यदवशिष्टमास्ते, तत्प्रकृतिशेषं संयमश्रेण्यां अन्तर्मुहूर्तगतसमयप्रमाणायां संस्थाप्य, [३]समये समये क्षपयन् । असङ्ख्यातगुणमुत्तरोत्तरेषु समयेषु ॥२८५॥**

**चरमे समये सङ्ख्यातीतान् विनिहत्य चरमकर्मांशान् ।**
**क्षपयति युगपत् कृत्स्नं वेद्यायुर्नामगोत्रगणम् ॥२८६॥**

**सर्वगतियोग्यसंसारमूलकरणानि सर्वभावीनि ।**
**औदारिकतैजसकार्मणानि सर्वात्मना त्यक्त्वा ॥२८७॥**

---

**( २८६ ) टीका—चरम इत्यादि** । [१]पश्चिमसमयेऽसङ्ख्येयान् विनिहन्ति शाटयति। चरमाः [२]पश्चिमाः ये कर्मांशाः कर्मभागास्तान् युगपत्क्षपयति । त एव कर्मांशा विशिष्यन्ते- **वेद्यायुर्नामगोत्रगणमिति** । एषां कर्मणां येंऽशा इति तस्मिन् कृत्स्ने क्षपिते वेद्यादिगणे चरमकर्मांशाः क्षपिता एव भवन्तीति ॥२८६॥

**( २८७ ) टीका—**ततश्च**—सर्वगतीत्यादि** । सर्वा गतयो नरकतिर्यङ्मानुष्य- देवाख्यास्तासां योग्यानि संसारमूलकरणानि संसारपरिभ्रमणप्रतिष्ठानि निमित्तानीत्यर्थः औदारिकादीनि, न खलु औदारिकादिभिर्विना सर्वगतयः प्राप्यन्ते । सर्वभावीनि [१]इति सर्वत्र भवन्ति [२]इति नरकादिगतिषु शरीराणि औदारिकं तैजसं कार्मणं च, [३]क्वचिद् गतौ क्वचिद्वैक्रियतैजसकार्मणानि । सर्वात्मना त्यक्त्वा सर्वेषामात्मा औदारिकादीनां यत्स्वरूपं तेन [४]सर्वस्वरूपेण त्यक्त्वा ॥२८७॥

---

**( २८६ ) ( वि० )** अथ**—चरम इति** । चरमे समये-अन्त्यसमये सङ्ख्यातीतान्- असङ्ख्यातान्, कान् ?-चरमकर्मांशान्-उत्तरप्रकृतीस्त्रयोदशसङ्ख्याः, किं ?-विनिहत्य-अपनीय ततो युगपद्-एककालं कृत्स्नं-परिपूर्णं, किं ?-वेद्यायुर्नामगोत्रगणं क्षपयति ॥२८६॥

**( २८७ ) ( वि० )** साम्प्रतं यत्त्यक्त्वा सिद्धो यादृशीं च गतिं प्राप्तो यादृशं च तत् [१]सिद्धिक्षेत्रं यादृशश्चासौ यथा च तस्योर्ध्वगतिरेव यादृशं च सुखं तस्य स्याद् एतत्सर्वमभिधातुकाम आह**— सर्वेति** । सर्वगतियोग्यश्चासौ संसारश्च सर्वगतियोग्यसंसारः तस्य मूलकरणानि-[२]आद्यहेतवस्तानि तथा, किल एतेषु सत्सु सर्वगतयो बध्यन्ते । तथा सर्वान् भावान्-शुभाशुभादीन् भावयन्ति सर्वभावानि, यद्वा पाठान्तरतः सर्वत्र भवनशीलानि सर्वभावीनि । कान्येवंविधानीत्याह-औदारिकतैजसकार्मणानि प्रसिद्धानि सर्वात्मना त्यक्त्वा-विहायेति ॥२८७॥

---

**( २८६ ) ( अव० )—चरमकर्मांशानुत्तरप्रकृतीः त्रयोदशसङ्ख्याः विनिहत्यापनीय युगपदेक- कालम् ॥२८६॥**

**( २८७ ) ( अव० )—सर्वगतियोग्यसंसारमूलहेतूनि । सर्वत्र भवनशीलानि । औदारिकादि- शरीराणां यत्स्वरूपं तेन सर्वेण रहितः ॥२८७॥**

**देहत्रयनिर्मुक्तः प्राप्यर्जुश्रेणिवीतिमस्पर्शाम् ।**
**समयेनैकेनाविग्रहेण गत्वोर्ध्वमप्रतिघः ॥२८८॥**

**सिद्धिक्षेत्रे विमले जन्मजरामरणरोगनिर्मुक्तः ।**
**लोकाग्रगतः सिद्ध्यति साकारेणोपयोगेन ॥२८९॥**

---

**( २८८ ) टीका—देहत्रयेत्यादि** । सिद्ध्यतस्तु नियमेनैव देहत्रयमौदारिकतैजस-कार्मणाख्यं भवति । तेन निरवशेषेण मुक्तो निर्मुक्तो विरहितः । ऋजुश्रेणिवीतिम् ऋज्व्याः श्रेण्या वीतिं गतिं प्राप्य। कीदृशीम् ? अस्पर्शामविद्यमानस्पर्शाम् । सकलकर्मक्षयसमयादन्यं समयं [१]न स्पृशति, नापि स्वावगाहप्रदेशात्प्रदेशान्तरं स्पृशतीत्यस्पर्शेत्युच्यते । एकेन समयेना-सावविग्रहेणावक्रगत्या गत्वोर्ध्वम् [२]ऊर्ध्वलोकान्तमप्रतिघोऽप्रतिहतगतिः । पुनरविग्रहग्रहणं समयविशेषणम् । न ह्येकस्मिन् समये विग्रहः सम्भवतीति ॥२८८॥

**( २८९ ) टीका—**स पुनर्गत्वा क्वावतिष्ठत इत्याह—**सिद्धिक्षेत्र इत्यादि** । कात्स्न्येन कर्मनाशः सिद्धिस्तस्याः क्षेत्रमाकाशं यत्रावगाहः सिद्धस्य । तच्चेषत्प्राग्भारापृथिव्युपलक्षितं तस्याः पृथिव्या उपरितनतलाद्यदुपरितनं योजनं, तस्य यदुपरितनं गव्यूतं, तस्यापि गव्यूतस्योपरितनो यः षड्भागः, त्रीणि धनुःशतानि त्रयस्त्रिंशदधिकानि धनुषश्च त्रिभागः, एष गव्यूतस्य षड्भागः, तावत्प्रमाणमाकाशं सिद्धिक्षेत्रमुच्यते। यत्रावगाहन्ते सिद्धा इति । विमल इति विविक्ते मलपटलवर्जिते । जन्मजरामरणेन रोगैश्च ज्वरादिभिर्विरहितः । [१]लोकाग्रगतो

---

**( २८८ ) ( वि० ) देहेति** । देहत्रयनिर्मुक्तः- अपगताशेषदेहत्रयकरणपञ्चाशीतिकर्मा, तथा प्राप्य-लब्ध्वा ऋजुश्रेणिवीतिम्-अवक्रश्रेणिगतिं, विशिष्टा इतिर्वीतिरिति कृत्वा, अस्पर्शाम्-अकृतप्रदेशान्तर[१]संस्पर्शां, येनैव समयेन गच्छति येष्वेव चाकाशप्रदेशेषु समारूढो गच्छति न तत् समयान्तरं प्रदेशान्तरं वा स्पृशतीत्यर्थः । समयेनैकेनाविग्रहेण गत्वोर्ध्वम्-ऊर्ध्वगतिं तिर्यगादि-व्यवच्छेदेन अप्रतिघो-न केनचिदपि प्रतिहन्तुं [२]शक्यते इति ॥२८८॥

**( २८९ ) ( वि० ) सिद्धीति** । सिद्धिक्षेत्रे विमले-अशेषजन्मजरामरणरोगरहिते । स कीदृशः ?-जन्मजरामरणरोगैः प्रसिद्धैर्निर्मुक्तः स तथा । लोकाग्रगतो-लोकान्तप्राप्तः । त्यक्त्वा-प्राप्य गत्वेति पूर्वक्रियात्रयस्योत्तरक्रियामाह-सिद्ध्यति-सिद्धो भवति साकारेणोपयोगेन-केवल-ज्ञानोपयोगेन। ततः परमुपयोगद्वयं सिद्धानामिति ॥२८९॥

---

**( २८८ ) ( अव० )—अवक्रश्रेणिगतिं, अविद्यमानस्पर्शां, अवक्रगत्या अप्रतिहतगतिः ॥२८८॥**

**( २८९ ) ( अव० )—ज्ञानोपयोगेन वर्तमानः ततः परमुपयोगद्वयं सिद्धानामिति ॥२८९॥**

**सादिकमनन्तमनुपममव्याबाधसुखमुत्तमं प्राप्तः ।**
**केवलसम्यक्त्वज्ञानदर्शनात्मा भवति मुक्तः ॥२९०॥**

**मुक्तः सन्नाभावः स्वालक्षण्यात् स्वतोऽर्थसिद्धेश्च ।**
**भावान्तरसङ्क्रान्तेः सर्वज्ञाज्ञोपदेशाच्च ॥२९१॥**

---

लोकाग्रगतः स एव गव्यूतषड्भागो लोकाग्रं, तं प्राप्तः सिध्यति। [२]पूर्वाहितगतिसंस्थानभावे सति सिद्ध उच्यते। तत्रस्थः साकारेणोपयोगेन [३]ज्ञानोपयोगे वर्तमान सिध्यति न दर्शनोपयोग इति । यस्माल्लब्धयः सर्वाः साकारोपयुक्तस्यैव भवन्तीत्यागमः ॥२८९॥

**( २९० ) टीका—सादिकमनन्तेत्यादि** । सहादिना सादिकं सिद्धत्वपर्यायवत् । अनन्तमपर्यवसानम् । अविद्यमानोपमानमनुपमम् । अविद्यमानव्याबाधमव्याबाधम् । रोगातङ्कादिद्विन्द्वरहितम् । एवंविधं सुख[१]मनुत्तरं प्राप्तः । केवलं क्षायिकं सम्यक्त्वम्, [२]केवल ज्ञानम्, केवलदर्शनम् । केवलमित्यसहायं सम्यक्त्वं पुद्गलरहितम् । एतान्यात्मा यस्य स्वभावः स एवंरूपस्तत्र मुक्त इति ॥२९०॥

**( २९१ ) टीका—**केषाञ्चिदभावमात्रं मोक्षस्तन्निराकरणायाह**—मुक्तः सन्नाभावे-त्यादि**। अष्टाभिः कर्मभिर्मुक्त आत्मा चेतनास्वभावः ज्ञानदर्शनोपयोगलक्षणः । तस्य सर्वात्मना निरन्वयो नाश इति [१]दुःसाधं, परिणामित्वात् । [२]दीपशिखादिवत् । ते हि प्रदीपपुद्गलाः कज्जलाद्याकारेण प्रादुःषन्ति, पुनश्च परिणामान्तरेण जायन्त इति प्रत्यक्षप्रमाणसमधिगम्याः । निरन्वयनाशे च जैनेन्द्रात् प्रतिहेतुदृष्टान्तानामसम्भव एव । अतः

---

**( २९० ) ( वि० ) सादीति** । सादिकं-यस्मिन् समये स सिद्धोऽजनि तमेवादिं कृत्वा अनन्तं पुनः क्षयाभावाद्, अनुपमम्-उपमातीतं, अव्याबाधसुखं-व्याबाधारहितं, सातमुत्तमं-सर्वोत्कृष्टं प्राप्तो-गतवान् । तथा केवलानि-अद्वितीयानि सम्यक्त्वज्ञानदर्शनान्यात्मा-स्वरूपं यस्य स तथा । भवति मुक्तः कृत्स्नकर्मक्षयादिति ॥२९०॥

**( २९१ ) ( वि० )** केषाञ्चिदभावमात्रं मोक्षस्तन्निराकरणमाह**—मुक्त इति** । मुक्तः सन् जीवो नाभावो-नैवासद्रूपः । कुतः ?-स्वालक्षण्याद्-उपयोगलक्षणो जीव इति स्वरूपाद्धेतोः, अवस्थितोपयोगेन सततं व्याप्तत्वाज्जीवस्य । इदमपि कुतः ?-स्वतोऽर्थसिद्धेः-जीवस्वाभाव्या-देवार्थानां-ज्ञानोपयोगादीनां सिद्धिर्जीवस्य निर्हेतुकैव तस्मात् स्वतोऽर्थसिद्धेः । यद्यपि

---

**( २९० ) ( अव० )—सादिकं यस्मिन् सिद्धोऽजनि तमादिं कृत्वा । अनन्तं पुनः क्षयाभावात् । व्याबाधारहितं । केवलान्यद्वितीयानि क्षायिकानि । मुक्तः कृत्स्नकर्मक्षयात् ॥२९०॥**

**( २९१ ) ( अव० )—मुक्तः सन् जीवो नाभावोऽसद्रूपः स्वलक्षणस्य ज्ञानदर्शनादेर्भावात्,**

**त्यक्त्वा शरीरबन्धनमिहैव कर्माष्टकक्षयं कृत्वा ।**
**न स तिष्ठत्यनिबन्धादनाश्रयादप्रयोगाच्च ॥२९२॥**

---

परिणामित्वात् जीवो ज्ञानदर्शनोपयोगात्मा, न पुनरभावः। स्वलक्षणमुपयोगस्तद्भावः स्वालक्षण्यं तस्मात्स्वालक्षण्यात् । न जातुचिदुपयोगात्मस्वतत्त्वं जहाति जीवः । स्वत एव चार्थाः [३]सिद्धाः ज्ञानदर्शनोपयोगस्वभावत्वमात्मनो न कुतश्चिन्निमित्तादुत्पन्नः । स्वत एवासावनादितादृशोऽर्थः । यद्यपि [४]प्राच्योपयोगोपरतौ उपयोगान्तरमुदेति, तथाप्युपयोग-सामान्यान्न भिद्यते, ज्ञानस्वभावत्वात् । तथा भावान्तरसङ्क्रान्तेः, भावो हि भावान्तरत्वेन सङ्क्रामति, न सर्वथोच्छिद्यते द्रव्यक्षेत्रकालभावापेक्षः, इतो ग्रामान्तरगतपुरुषादिवत् । इतश्च नाभावो मुक्तः । सर्वज्ञाज्ञोपदेशाद् वीतरागाः सर्वज्ञास्तत्प्रणीतागम आज्ञा, तदुपदेशात् सिद्धात्मा ज्ञानदर्शनस्वभावोऽस्तीति व्यवस्थितमिति ॥२९१॥

**( २९२ ) टीका—त्यक्त्वा शरीरबन्धेत्यादि** । इहैव मनुष्यलोके कस्मान्न तिष्ठति ? उच्यते—शरीरमेव बन्धनं तद्विहाय । कथं पुनरात्यन्तिकशरीरत्यागः ? कर्माष्टकक्षयकरणा-दत्यन्तवियोगः शरीरकस्य । न चासाविहैव तिष्ठति, अनिबन्धनत्वात्, न हि [१]तस्येह किञ्चिन्निबन्धनमासने कारणमस्ति । शरीरादिनिबन्धनमिहावस्थाने भवति, तच्च समस्तमेव ध्वस्तम् । अनाश्रयत्वात् मुक्तस्यात्यन्तलघोराश्रयः सर्वस्य लोकाग्रशिखरं भवति ।

---

छाद्मस्थिकोपयोगात् कैवल्योपयोगान्तरमुदेति तथाऽप्युपयोगसाम्यान्न भिद्यते ज्ञानस्वभावत्वाद् । तथा भावान्तरसङ्क्रान्तेः सकाशान्मुक्तो नाभावो, भावो हि भावान्तरत्वेन सङ्क्रामति, न सर्वथोच्छिद्यते प्रदीपवत्, यथा प्रदीपो भास्वररूपतामपहाय [१]तामसरूपतां याति । तथा सर्वज्ञाज्ञोपदेशाच्च हेतोर्नाभावो, जिनागमभणनाच्चेति ॥२९१॥

**( २९२ ) ( वि० ) त्यक्त्वेति** । त्यक्त्वा-हित्वा । किं ?-शरीरमेव बन्धनं शरीरबन्धनम्, इहैव-मनुजभवे। तथा कृत्वा किं ?-कर्माष्टकक्षयं न स तिष्ठति । कुतः ?-अनिबन्धान्-मनुजादि-भवकारणानामत्यन्तप्रलयात् । तथा अनाश्रयाच्च, [१]मुक्तस्य हि मनुजभवो नाश्रयः, किन्तु

---

**स्वतोऽर्थसिद्धेः । यद्यपि छाद्मस्थिकोपयोगात्केवल्युपयोगान्तरमुदेति, तथाप्युपयोगसाम्यान्न भिद्यते ज्ञानस्वभावत्वात् । भावान्तरसङ्क्रान्तेः जलस्थितलवणस्य रूपतोऽदर्शनेऽपि रसत उपलब्धिवत् ॥२९१॥**

**( २९२ ) ( अव० )—इहैव संसारे स न तिष्ठति, अनिबन्धनात् मनुजादिभवकारणा-[१]नामत्यन्तप्रलयात् । अनाश्रयात् मुक्तस्य हि मनुजभवोऽनाश्रयः, किं तु सिद्धिरेव ।**

**नाधो गौरवविगमादशक्यभावाच्च गच्छति विमुक्तः ।**
**लोकान्तादपि न परं प्लवक इवोपग्रहाभावात् ॥२९३॥**
**योगप्रयोगयोश्चाभावात्तिर्यङ् न तस्य गतिरस्ति ।**
**सिद्धस्योर्ध्वं मुक्तस्यालोकान्ताद् गतिर्भवति ॥२९४॥**

---

[२]प्रलेपाष्टकलिप्ताम्बुतुकस्येव जलमध्यक्षिप्तस्याष्टासु शीर्णेषु लेपेषु जलस्योपर्येवावस्थानमाश्रयः नाधः, तथा मुक्तस्याप्यत्रोपघ्नो नास्तीत्यत इह नावतिष्ठत इति । तथाऽप्रयोगात् अप्रयोगोऽव्यापार आत्मनस्तस्य च तादृशी नास्ति क्रिया, ययावस्थानं कल्पयिष्यते अतोऽप्रयोगाच्च न स तिष्ठत्यत्रेति ॥२९२॥

**( २९३ ) टीका—**एवं तर्ह्यूर्ध्वमेव तेन गन्तव्यं नान्यत्रेति कुतो नियम इत्याह—**नाध इति** । [१]यतो गुरुद्रव्यमधो गच्छद् दृष्टं [२]पाषाणादि, तस्य गौरवं नास्त्यपेतकर्मत्वात् । अशक्यभावाच्च अशक्योऽनुपपन्नः खल्वयं भावो यत्सर्वकर्म[३]विनिर्मुक्तोऽत्यन्तलघुरधो गमिष्यतीति । न च लोकान्तात्परतो गच्छति, उपग्रहकारिधर्मद्रव्याभावात् । प्लवकस्तारकस्तद्वत् यानपात्रवत् मत्स्यादिवद्वा स्थलेषु गमनशक्तेरभावात् ॥२९३॥

**( २९४ ) टीका—योगप्रयोगेत्यादि** । योगा [१]मनोवाक्कायख्यास्तदभावात् । प्रयोग आत्मनः क्रिया तदभावाच्च । तिर्यग्दिक्षु प्राच्यादिकासु न तस्य गतिसम्भवः ।

---

सिद्धिरेवाश्रयः । तथा अप्रयोगाद्-अव्यापारात्,[२] न स व्यापारोऽस्ति येन भवे स्थीयत इति ॥२९२॥

**( २९३ ) ( वि० )** यदि स न तिष्ठत्यत्र तर्हि अधो यायात् ?, नेत्याह-**नाध इति** । न-नैवाधो गच्छेन्मुक्तः । कुतः ?-गौरवस्य-गुरुत्वकारिकर्माष्टकस्याधोगमनहेतोर्विगमाद्-अभावाद् । अशक्यभावात्-अशक्योऽयं भावो यत् सर्वकर्मविमुक्तोऽधो गच्छतीति । चः समुच्चये । तथा लोकान्तादपि न परं गच्छति उपग्रहकारिधर्मद्रव्याभावात् । दृष्टान्तमाह-प्लवक इवेति, [१]प्लवकः-तारकस्तद्वत् मण्डूकवत् यानपात्रवन्मत्स्यादिवद्वेति । अयमर्थः-यथैते मण्डूकादयो जलाभावान्न स्थलं यान्तीति, तथा जीवोऽप्यलोकं न यातीति ॥२९३॥

**( २९४ ) ( वि० ) योगेति** । योगो-मनःप्रभृतिः प्रयोगः-आत्मनः क्रिया तयोः कृत-

---

**संसारव्यापाराभावात्=शरीरादिकारणाभावाच्च ॥२९२॥**

**( २९३ ) ( अव० )—अधो न याति गुरुत्वाभावात्, अशक्योऽयं भावो यत्कर्ममुक्तोऽधो याति । लोकान्तादपि परतो न याति मुक्तः, उपग्रहकारिधर्मद्रव्याभावात् । प्लवकस्तारकः [१]यानपात्रं यथा स्थले न याति, उपग्रहाभावात् ॥२९३॥**

**( २९४ ) ( अव० )—योगो मनःप्रभृतिकः, प्रयोग आत्मनः क्रिया, तयोरभावान्न**

**पूर्वप्रयोगसिद्धेर्बन्धच्छेदादसङ्गभावाच्च ।**
**गतिपरिणामाच्च तथा सिद्धस्योर्ध्वं गतिः सिद्धा ॥२९५॥**

---

तस्मादधस्तिर्यग्वा गतेरसम्भवात् । [२]इहैव चावस्थाने नास्ति किञ्चित्कारणमतो गच्छत्यूर्ध्वमेव सिद्धः । सा चोर्ध्वगतिरालोकान्तादेव भवति, न परतः, उपग्रहाभावादित्युक्तम्[३] ॥२९४॥

**( २९५ ) टीका—**अथोर्ध्वगतिस्तस्य निष्क्रियस्य सतः कथं भवतीत्याशङ्क्याह—**पूर्वेति** । पूर्वप्रयोगः तृतीये शुक्लध्याने सूक्ष्मक्रियाप्रतिपातिनिवर्तमानेन देहत्रिभागहानिविधानकाले यः संस्कार आहितः क्रियायास्तेन पूर्वप्रयोगेण [१]सिद्धेर्बन्धच्छेदात् असङ्गभावाच्च तस्य गमनं सिध्यति अतः पूर्वप्रयोगसिद्धेर्दोलागमनवत्पूर्वसंस्काराद्भवति । तथा बन्धनच्छेदादेरण्डबीजकुलिकादिवत्[२] कर्मबन्धनत्रोटनादूर्ध्वं गतिः सिद्धा भवति मुक्तात्मनः । असङ्गभावात् [३]गतलेपालाबुवत् पयसि प्लवते सङ्गो लेपस्तदभावादसङ्गत्वात्। तथा गतिपरिणामाच्च दीपशिखावत्, न हि दीपस्य जातुचिच्छिखाऽग्नेर्वा ज्वाला निमित्ताभावे सति तिर्यगधो वा व्रजति । तस्मादूर्ध्वमेव गच्छति मुक्तात्मेति ॥२९५॥

---

द्वन्द्वयोः, चः समुच्चये, अभावात् तिर्यग् न तस्य गतिरस्ति । तथा सिद्धस्य-मुक्तस्योर्ध्वगतिरेव भवति। [१]किं तत् ?, आलोकान्तात्-लोकान्तं यावदिति ॥२९४॥

**( २९५ ) ( वि० )** यथा मुक्तस्य समयमेकं गतिर्भवति तथा हेतूनाह—**पूर्वेति** । सिद्धस्योर्ध्वं गतिः सिद्धा । कुतः ?, हेतुवृन्दात्, तदेवाह-पूर्वप्रयोगसिद्धेः कुम्भकारभ्रामितचक्रस्य कुम्भकारव्यापाराभावेऽपि कियत्कालभ्रमणवत् । बन्धनच्छेदादेरण्डफलवत्। असङ्गभावादलाबुवत् । [१]गतिपरिणामाच्चाग्निधूमवत् । अत्रार्थे आगमगाथा-

**'लाऊ एरंडफले अग्गी धूमे य इसु धणुविमुक्के ।**
**गइ पुव्वपओगेणं एवं सिद्धाण वि गईओ ॥** त्ति ॥२९५॥
**( [२]लाबूरेरण्डफलम् अग्निर्धूमश्च इषुर्धनुर्विमुक्तः ।**
**गतिः पूर्वप्रयोगेण एवं सिद्धानामपि गतिस्तु ॥ )**

---

**तिर्यग्गतिरस्ति । तथा सिद्धस्य मुक्तस्योर्ध्वमेव गतिर्भवति कियद् ? [१]यावदलोकान्तम् ॥२९४॥**

**( २९५ ) ( अव० )—[१]कुम्भकारभ्रामितचक्रस्य तद्व्यापाराभावेऽपि भ्रमणवत् । एरण्डफलवत् । अलाबुवत् । परमहंसवत् । ज्वलनधूमवत् । [२]तृतीये शुक्लध्याने सूक्ष्मक्रियया प्रयोगेण ॥२९५॥**

**देहमनोवृत्तिभ्यां भवतः शारीरमानसे दुःखे ।**
**तदभावात् तदभावे सिद्धं सिद्धस्य सिद्धिसुखम् ॥२९६॥**
**यस्तु यतिर्घटमानः सम्यक्त्वज्ञानशीलसम्पन्नः ।**
**वीर्यमनिगूहमानः शक्त्यनुरूपप्रयत्नेन ॥२९७॥**

---

**( २९६ ) टीका—**अनुपमं तत्र सुखमस्तीति कथमवगम्यत इत्याह—**देहमनोवृत्तीत्यादि**। देहः शरीरं [१]मनश्चित्तं तयोर्वृत्तिर्वर्तनं सद्भावः आत्मनि संश्लेषस्तत्र शरीरसंश्लेषाच्छारीरं दुःखमुपजायते । मनःसम्बन्धाच्च मानसं दुःखमिष्टवियोगादौ । तस्य च शरीरमनसोरभावे सति तत्कृतस्य दुःखस्याभावः । दुःखाभावे च सिद्धं स्वाभाविकं प्रतिष्ठितमव्याहतं सिद्धिसुखमिति ॥२९६॥

**( २९७ ) टीका—यस्तु यतिर्घटेत्यादि** । यतिस्तपस्वी साधुर्घटमान[१]श्चेष्टमानः प्रवचनोक्त[२]सकलक्रियानुष्ठायी। सम्यक्त्वेन शङ्कादिशल्यरहितेन सम्यग्ज्ञानेन [३]च श्रुतादिना शीलेन च मूलोत्तरगुणरूपेण सम्पन्नः । शक्तिर्वीर्यं सामर्थ्यं तदनिगूहमानोऽपह्नवमकुर्वन् स्वशक्त्यनुरूपेण प्रयत्नेन [४]च चेष्टते । अहर्निशमनुष्ठेयासु क्रियासु शाठ्यरहितः ॥२९७॥

---

**( २९६ ) ( वि० ) देहेति** । देहमनोवृत्तिभ्यां–शरीरचित्तवर्तनाभ्यां कृत्वा भवतो–जायेते । के ?, अत आह–शारीरमानसे दुःखे इति, प्रतीतम्। तथा तदभावो [१]दुःखाभावो वर्तते, क्व ? तदभावे–देहाद्यभावे, कारणाभावे कार्याभाव इत्यर्थः । ततः सिद्धं–प्रतिष्ठितं सिद्धस्य–मुक्तस्य सिद्धिसुखमिति ॥२९६॥ **इति शिवगमनविधानाधिकारः ॥२२॥**

**( २९७ ) ( वि० )** इति प्रशमरतेर्मुख्यफलमुक्तम्, अधुनाऽवान्तरसुखपूर्वकं तदेवाह—**यस्त्विति** । यः पुनरनिर्दिष्टनामा यतिः–साधुः । कीदृशः ?–घटमानः–चेष्टमानः तां तां क्रियां कुर्वन्, तथा सम्यक्त्वज्ञानशीलैः कृतद्वन्द्वैः सुगमार्थैः सम्पन्नः–युक्तः सम्यक्त्वज्ञानशीलसम्पन्नः। तथा अनिगूहमानः–अनाच्छादयन्। किं तत् ?–वीर्यम्–उत्साहम्, कथम् ?–शक्त्यनुरूपं–यथाशक्ति। केन ?–प्रयत्नेन–आदरेणेति ॥२९७॥

---

**( २९७ ) ( अव० )—घटमानः प्रवचनोक्तसकलक्रियासु प्रयत्नेन चेष्टतेऽहर्निशं क्रियासु ॥२९७॥**

**संहननायुर्बलकालवीर्यसम्पत्समाधिवैकल्यात् ।**
**कर्मातिगौरवाद्वा स्वार्थमकृत्वो[१]परमेतेति ॥२९८॥**

**सौधर्मादिष्वन्यतमकेषु सर्वार्थसिद्धिचरमेषु ।**
**स भवति देवो वैमानिको महर्द्धिद्युतिवपुष्कः ॥२९९॥**

---

**( २९८ ) टीका—संहननायुरित्यादि** । संहननं वज्रर्षभनाराचादि । आयुः स्वल्पं । [१]बलहानिर्दुर्बलशरीरत्वादसामर्थ्यस्य हेतुः । कालो दुःषमादिः । वीर्यसम्पन्नास्ति[२] प्रचुरवीर्यत्वाभावः । [३]समाधिः स्वस्थता चित्तस्याव्यग्रता सापि नास्ति । एषां संहननादीनां वैकल्याद्विकलत्वात् । कर्मणां चातिगौरवात् ज्ञानावरणादीनाम्[४] इति । गौरवं निकाचनावस्था-प्राप्तिः । स्वार्थः सकलकर्मक्षयः । तमकृत्वा म्रियते [५]उपरमेतेति तपस्वी ॥२९८॥

**( २९९ ) टीका—सौधर्मादीत्यादि** । सम्यग्दृष्टिर्वैमानिकेष्वेवोत्पद्यते सौधर्मादिषु कल्पेषु द्वादशसु, नवसु च ग्रैवेयकेषु, पञ्चसु [१]सर्वार्थसिद्ध्यादिविमानेषु [२]स्वर्गपर्यन्तव्यवस्थापितेषु देवः सञ्जायते वैमानिकान्यतमस्थाने विमानवासीत्यर्थः । महती ऋद्धिर्द्युतिर्वपुश्च यस्य स महर्द्धिद्युतिवपुष्कः[३] । ऋद्धिः परिवारादिका, द्युतिः शरीरच्छाया, वपुः शरीरं, तदपि [४]महत् न प्रमाणतः किन्तु महत्पूजितः । [५]समचतुरस्रसंस्थानं वैक्रियम् उत्तरोत्तरसंस्थानप्राप्तौ च स्थितिः प्रभावः सुखादिभिः प्रकृष्टं प्रकृष्टतरं प्रकृष्टतमं च [६]भवतीति ॥२९९॥

---

**( २९८ ) ( वि० ) संहननेति** । संहननं-वज्रऋषभनाराचमायुः अशेषकर्मक्षपणसमर्थं, बलं शरीरादिसमुद्भवं कालो-दुष्षमसुषमादिः, वीर्यसम्पद्-उत्साहसमृद्धिः, समाधिः-चित्तस्वास्थ्यम् एषां षण्णां पदानां वैकल्याद्-असम्पूर्णत्वात्, तथा कर्मातिगौरवाद्वा-ज्ञानावरणादिकर्मणां बहुस्थितित्वादिति हेतुद्वयात् स्वार्थं-कर्मक्षयमकृत्वा-अविधाय उपरमं-पर्यन्तमेति-गच्छति ॥२९८॥

**( २९९ )( वि० ) सौधर्मादीति** । सौधर्मादिषु [१]अन्यतमकेषु [२]सर्वार्थसिद्धचरमेषु स भवति देवो वैमानिको महान्ति-पूज्यानि 'अर्ह मह पूजाया'मिति धातोः ऋद्धिद्युतिवपूंषि यस्य स तथेति ॥२९९॥

---

**( २९८ ) ( अव० )—वीर्यसम्पत्साहससमृद्धिः । एतेषां संहननादीनां [१]विकलत्वात् । कर्मणां निकाचनावस्थाप्राप्तिः । कर्मक्षयमकृत्वाऽविधाय उपरमं=विनाशमेति=गच्छति ॥२९८॥**

**( २९९ ) ( अव० )—नवसु ग्रैवेयकेषु । 'अर्ह मह पूजायां' इति धातोर्महान्ति=पूज्यानि ऋद्धिद्युतिवपूंषि यस्य ॥२९९॥**

**तत्र सुरलोकसौख्यं चिरमनुभूय स्थितिक्षयात् तस्मात् ।**
**पुनरपि मनुष्यलोके गुणवत्सु मनुष्यसङ्घेषु ॥३००॥**
**जन्म समवाप्य कुलबन्धुविभवरूपबलबुद्धिसम्पन्नः ।**
**श्रद्धा-सम्यक्त्व-ज्ञान-संवर-तपोबलसमग्रः ॥३०१॥**

---

**( ३०० ) टीका—तत्र सुरेत्यादि** । [१]सौधर्मादौ सुरलोके सौख्यमनुभूय चिरं स्थितिभेदादुपर्युपरीति । ततः स्थितिक्षयादायुषः । तस्मात्सुरलोकान्मनुष्यलोकमागत्य गुणवत्सु मनुष्येषु विशिष्टान्वयेषु जातिकुलाचारसम्पन्नेषु सङ्घेष्विति बहुपुरुषकेषु ॥३००॥

**( ३०१ ) टीका—जन्म समवाप्येत्यादि ।** समवाप्य [१]आत्मलाभं जन्म । बन्धुः स्वजनलोकः । कुलं [२]पितुरन्वयः । विभवो द्रव्यसम्पत् । रूपं विशिष्टशरीरावयवसन्निवेशः । बलं वीर्यसम्पत् । बुद्धिरौ[३]त्पत्तिक्यादिः । एभिर्बन्धुकुलादिभिः सम्पन्नः सम्बन्धः । श्रद्धा भगवदर्हत्सु प्रीतिरतिशयवती, [४]दक्षिणीयेषु च यतिषु श्रद्धा परितोषः । सम्यक्त्वं तत्त्वार्थश्रद्धानलक्षणम् । [५]मत्यादिज्ञानं यथासम्भवम्। संवर आश्रवनिरोधलक्षणः, तपोबलं तपसि [६]द्वौ द्वादशविधे उत्साहोऽनुष्ठानं च । एभिः समग्रः सम्पूर्णः संयुक्तो वेति ॥३०१॥

---

**( ३०० ) ( वि० ) तत्रेति** । तत्र-विमाने सुरलोकसौख्यं चिरं-प्रभूतकालमनुभूय[१] संवेद्य सेत्स्यतीत्यग्रे योगः । स्थितिक्षया[२]दायुःक्षयात्तस्माद् [३]विमानाच्च्युतः सन् । पुनरपि-भूयोऽपि मनुष्यलोके-नरलोके गुणवत्सु-सम्यक्त्वादिगुणयुतेषु मनुष्यसङ्घेषु [४]पित्र्यादिप्रचुरजनेष्विति ॥३००॥

**( ३०१ ) ( वि० ) जन्म समवाप्य सेत्स्यती**त्यत्रास्याप्यग्रे[१] सम्बन्धः, कीदृशः सन् ?, कुलं-उग्रादि बन्धुः-पित्रादिवंशः, विभवो-धनादिः, रूपं-करादिसमतास्वभावं बलं-प्राणो, बुद्धिः-औत्पत्त्यादिका ताभिः सम्पन्नो-युक्तः कुलबन्धुविभवरूपबलबुद्धिसम्पन्नः । तथा श्रद्धादिभिः [२]कृतद्वन्द्वैः [३]प्रसिद्धार्थैः समग्रः-समन्वित इति ॥३०१॥

---

**( ३०० ) ( अव० )—विशिष्टान्वयेषु बहुपुरुषेषु गुणवत्सु=सम्यक्त्वादिगुणयुतेषु ॥३००॥**

**( ३०१ ) ( अव० )—उत्पत्तिमात्मलाभं प्राप्य । कुलमुग्रादि । बन्धुः=पित्रादिवंशः । विभवो=धनादिः । रूपं=[१]करादेः समतास्वभावं । बलं=प्राणः । बुद्धिरौत्पत्तिक्यादिका । ताभिः सम्पन्नः ॥३०१॥**

**पूर्वोक्तभावनाभावितान्तरात्मा विधूतसंसारः ।**
**सेत्स्यति ततः परं वा स्वर्गान्तरितस्त्रिभवभावात् ॥३०२॥**

**यश्चेह जिनवरमते गृहाश्रमी निश्चितः सुविदितार्थः ।**
**दर्शन-शील-व्रतभावनाभिरभिरञ्जितमनस्कः ॥३०३॥**

---

**( ३०२ ) टीका—पूर्वोक्तभावनेत्यादि** । पूर्वोक्ता द्वादश भावना या अनित्यादिकाः । [१]ताभिर्भावितो वासितोऽन्तरात्मा ज्ञानदर्शनोपयोगस्वभावः । विधूतस्त्यक्तो विक्षिप्तो [२]नारकतिर्यङ्मानुष्यदेवगतिलक्षणभेदभिन्नः संसारो येन स विधूतसंसारः, उत्तीर्णप्रायः संसारसागरात् स्वल्पशेषभव इत्यर्थः । सेत्स्यति सिद्धिं प्राप्स्यति एवंविधक्रियानुष्ठायी[३] ततः परं प्रकर्षतः स्वर्गान्तरितस्त्रिभवभावात् । सम्प्रति मनुष्य उक्तानन्तरक्रियानुष्ठायी, ततो देवस्तस्मात्प्रच्युतः पुनर्मनुष्यः सन् सेत्स्यतीति । त्रीन् भवाननुभूय त्रीणि जन्मानि लब्ध्वेत्यर्थः ॥३०२॥

**( ३०३ ) टीका—**एवं यतेश्चर्यामभिधाय गृहाश्रमिणं प्रत्याह—**यश्चेह जिनवरेत्यादि** । इह मनुष्यलोके यो गृहाश्रमी जन्म लब्ध्वा गृहस्थ एव तीर्थकरवचने सुविदितार्थः [१]सन् निश्चितः 'सत्यं भगवद्भिरुक्तम्, एतदेव संसारादुत्तारकं प्रवचनम्' । दर्शनं तत्त्वार्थश्रद्धान-[२]लक्षणम् [३]शीलमुत्तरगुणाः, व्रतग्रहणादनुव्रतानि, अनित्यादिका द्वादश भावनाः, एवं

---

**( ३०२ ) ( वि० ) पूर्वोक्तेति** । तथा पूर्वोक्ताभिर्भावनाभिर्भावितोऽन्तरात्मा-मनो यस्य स तथा । विधूतः-अपनीतः संसारो येन स तथा । किं ?-सेत्स्यति-मोक्षं यास्यति । ततो-मनुजभवात् परम्-अनन्तरं स्वर्गान्तरितः । कथं ?-प्रथमभवे चारित्री द्वितीयभवे देवः तृतीये मनुजः, तत्र चारित्रं प्राप्य मोक्षगामीति [१]त्रिभवभावात्, वाशब्दात् सप्ताष्टभवान्ते वा सेत्स्यति । तत्र सप्त भवा देवा अष्टौ चारित्रयुताः, मिलिताः पञ्चदश १५ इति, अविराधितश्रामण्यस्य [२]नरस्य त्वष्टमे चारित्रे मोक्षः, अत्र विचाले भवा अनेकादयो द्रष्टव्याः ॥३०२॥

**( ३०३ ) ( वि० )** साम्प्रतं गृहाश्रमपरिपूर्णधर्मयुक्तानामनन्तरपरम्परफलमभिधित्सुराह—**यश्चेहेति** । यश्च कश्चन इह जिनवरमते-सर्वज्ञागमे गृहाश्रमी मनुष्यः निश्चितः-कृतनिश्चयः सुविदितार्थः-अतिशयज्ञाताभिधेयः तथाऽभिरञ्जितमनस्को-वासितान्तःकरणः । काभिः कृत्वा ?-

---

**( ३०२ ) ( अव० )—भावितोऽन्तरात्मा मनो यस्य सः । ततः परं मनुष्यलोकात् स्वर्गान्तरितः ॥३०२॥**

**( ३०३ ) ( अव० )—[१]इह मनुष्यलोके जिनागमे मनुष्यः श्रावकः निश्चयेन कृतनिश्चयः । अतिशयज्ञाताभिधेयः, दर्शनं=सम्यक्त्वं, व्रतानि अनुव्रतादीनि भावितव्रतः । इत्यार्याषट्कस्य प्रशमरतिस्वर्गापवर्गफलप्रतिपादकस्य सङ्क्षेपार्थः ॥३०३॥**

**स्थूलवधानृतचौर्यपरस्त्रीरत्यरतिवर्जितः सततम् ।**
**दिग्व्रतमिह देशावकाशिकमनर्थविरतिं च ॥३०४॥**

---

दर्शनादिभिरभिरञ्जितं वासितं मनो यस्य स भवति अभिरञ्जितमनस्कः ॥३०३॥

**टीका–स्थूलवधेत्यादि** । स्थूलात्प्राणातिपाताद्विरतिः प्रथममनुव्रतम् । स्थूला बादरा प्राणिनो ये तेभ्यो विरतिस्तेषामवधः, न सूक्ष्मेभ्यो विरतिः पृथिव्यादि[1]कायेभ्यः । अथवा सङ्कल्पजः स्थूलस्तस्माद्विरतिः । सङ्कल्पं हृदि व्यवस्थाप्य व्यापादयामीति स्थूलप्राणातिपातस्तस्माद्विरतिः प्रथममनुव्रतम् । न पुनरारम्भजाद्विरतिरिति । स्थूलमनृतं यन्निरोध[2]पूर्वकमादित्यमण्डलाधिरोहणे सत्यन्यथा वृत्तमन्यथा भाषते, तस्माद्विरतिः, न परिहासादिभाषणात् । चौर्यमदत्तस्यादानं स्थूलं, यस्मिन्नपहृते [3]चौर्य इति व्यपदिश्यते, तत्स्थूलं तस्माद्विरतिः । **परस्त्रीति** । स्वदारसन्तोषव्रतस्य परपरिगृहितस्त्रीगमनं वेश्यापरिभोगो वा स्थूलं तस्माद्विरतिः । परदारनिवृत्तिव्रतस्य तु परपरिगृहितस्त्रीपरिहारः, न तु वेश्यापरिहारः । रत्यरतिभ्यां वर्जितस्त्यक्तः । सततं सर्वदा रतिर्विषयेषु प्रीतिः, अरतिरुद्वेगः व्रतपरिपालनादिक्रियास्विति । [4]क्षेत्रवस्त्वादिष्विच्छा तस्याश्च परिमाणं व्रतं, 'एतावन्ति [5]क्षेत्राणि वस्तूनि हिरण्यं सुवर्णमेतावत् तथा [6]धनधान्यं कटाहादि चोपस्कर[8]जातं सर्वं परिमितं धार्यम्' इति । परिमाणादुपरि[7] स्थूलं तस्माद्विरतिरनुव्रतम् साक्षादनुपात्तमपि शेषव्रतग्रहणादाक्षिप्तं द्रष्टव्यम् । रात्रिभोजनविरतिश्च यथाशक्तीति । दिग्व्रतं चतसृषु दिक्षु ऊर्ध्वमधश्च गमनपरिमाणम् । 'एतावद् गन्तव्यं न परत' इति परतो गमनाद्विरतिः चतुर्मास्यादिषु [9]सकृद् गृह्णाति । तथा देशावकाशिकं व्रतं 'प्रतिदिवसं ममे[10]यति मर्यादा गमनस्य' इति, तस्यैव सकृद्गृहित[11]व्रतस्य देशेऽवकाशं कल्पयति देशावकाशिकं व्रतम् । अनर्थदण्ड-विरतिर्व्रतं प्रयोजनाभावोऽनर्थः विना प्रयोजनेनात्मानं दण्डयति अग्निशस्त्रादिप्रदानादिनाऽनेकभेदेन तस्माद्विरतिर्व्रतम् ॥३०४॥

---

दर्शनादि-भावनाभिः प्रतीतार्थाभिः कृतद्वन्द्वाभिरिति ॥३०३॥

**( ३०४ ) ( वि० )** तथा स्थूलानि च तानि वधानृतचौर्याणि कृतद्वन्द्वानि च तानि तथा, तानि च परस्त्रीरत्यरती च तास्तथा, ताभिर्वर्जितः स तथा, उपलक्षणत्वात् परिग्रहवर्जित इति च दृश्यम् । सततं-अनवरतं, तथोर्ध्वं-उपरिष्टादणुव्रतेभ्यः दिग्व्रतं देशावकाशिकमनर्थविरतिं चेति ॥३०४॥

---

**( ३०४ ) ( अव० )–[1]स्थूलानियतानि वधादीनि वा रत्यरती शुभाऽशुभवस्तुनि । एतावता परिग्रहः । ताभीरत्यरतीभिर्वर्जितः परिग्रहवर्जित इत्यर्थः । सततं अनवरतम् । तत ऊर्ध्व-मुपरिष्टादणुव्रतेभ्यो दिग्व्रतादि ॥३०४॥**

**सामायिकं च कृत्वा पौषधमुपभोगपारिमाण्यं च ।**
**न्यायागतं च कल्प्यं विधिना पात्रेषु विनियोज्यम् ॥३०५॥**
**चैत्यायतनप्रस्थापनानि कृत्वा च शक्तितः प्रयतः ।**
**पूजाश्च गन्धमाल्याधिवासधूपप्रदीपाद्याः ॥३०६॥**

---

**( ३०५ ) टीका—सामायिकमित्यादि** । सामायिकं प्रतिक्रमणम्, अथवा चैत्यायतन-साधुसन्निधौ वा यावदास्ते तावत्सामायिकं [१]करोति—**'करोमि भदन्त सामायिकं, सावद्यं योगं प्रत्याख्यामि, यावन्नियमं भगवदर्हद्बिंबसाधून् वा पर्युपासे द्विविधं त्रिविधेन' इत्याह**। तथा पौषधव्रतं कृत्वा । पौषध आहारादिः तस्य [२]वारणं निवारणं प्रतिषेधः पौषधः । स चाहारशरीरसत्कारब्रह्मचर्याव्यापारभेदेन चतुर्विधः, अष्टमीपौर्णमास्यादिषु क्रियते । उपभोग [३]परिभोगपरिमाणव्रतं उपभोगः पुष्पधूपस्नानाङ्गरागादिः, परिभोगो वस्त्रशयनासनादिः[४] । स च द्वेधा भोजनतः कर्मतश्च । भोजनतोऽशनपानखाद्यस्वाद्यरूपः मांसमद्यानन्तकायमध्वादि-विषयः । कर्मतः पञ्चदशभेदः अङ्गारकरणवनशकटभाटकादिलक्षणः, अधिकाद्विरतिर्मांसादेश्च उपभोगपरिभोगपरिमाण[५]व्रतम् । तथाऽन्योऽतिथिसंविभागः । स च पौषधपारणकाले न्यायागत[६]स्यागर्हित[७]व्यवहारेणोपात्तस्य तण्डुलघृतादेरुपसाधितस्य कल्पनीयस्य साधूद्देशेना-कृतस्य । विधिनेति यावन्निर्वृत्तः पाकः [८]सर्वस्य सत्कारपूर्वकं साधूनां पात्रेषु दानं विनियोगः । पात्रग्रहणात्साधुभ्यो गृहमागतेभ्यो देयं, न स्वभाजनेषु कृत्वा नीत्वा साधुवसतिं[९] देयमिति । यच्च साधुभ्यो न दत्तं पारणकाले तन्नाभ्यवहरति स्वयमिति ॥३०५॥

**टीका—**[१]जिनपूजामधिकृत्याह-**चैत्यायतनेत्यादि**। चैत्यं चितयः प्रतिमा इत्येकार्थाः ।

---

**( ३०५ ) ( वि० ) सामायिकमिति**। तथा सामायिकं च कृत्वा-विधाय पौषधम् उपभोगस्य पारिमाण्यं-परिमाणकरणं तच्च। न्यायागतं च-नीत्यागतं च। किमेवंविधं?-कल्प्यं-कल्पनीयमन्नादि। केन?-विधिना, पात्रेषु-चारित्रिषु विनियोज्य, दिग्व्रतादि कृत्वेति सम्बन्धः। व्यत्ययनिर्देशश्छन्दोऽर्थ इति ॥३०५॥

**( ३०६ ) ( वि० ) चैत्येति** । चैत्यायतनप्रतिष्ठापनानि-बिम्बगृहप्रतिष्ठाः, कृत्वेत्यादि

---

**( ३०५ ) ( अव० )—[१]उपभोगस्य परिमाणकरणं पारिमाण्यं न्यायादागतं नीत्यायातम् ॥ कल्प्यमन्नपानादि केन विधिना पात्रेषु चारित्रिषु विनियोज्यं व्यत्ययनिर्देशश्छन्दोऽर्थ इति ॥३०५॥**

**( ३०६ ) ( अव० )—देवकुलानि बिम्बानि च तेषां प्रकृष्टानि स्थापनानि प्रयतः प्रयत्नवान्=शक्तितो महत्या विभूत्या यथा यथा प्रवचनोद्भासनं भवति तथा तथा कृत्वा ॥३०६॥**

**प्रशमरतिनित्यतृषितो जिन-गुरु-साधुजनवन्दनाभिरतः ।**
**संलेखनां च काले योगेनाराध्य सुविशुद्धाम् ॥३०७॥**

---

तेषामायतनमाश्रयः [२]देवकुलानि। प्रकृष्टानि स्थापनानि प्रस्थापनानि । महत्या विभूत्या वादित्रनृत्यतालानुचरस्वजनपरिवारादिकया [३]स्थापनं प्रतिष्ठेति तानि कृत्वा शक्तितः प्रयत्नवान् यथा यथा प्रवचनोद्भावना[४] भवति तथा कृत्वेति। [५]पूजाः सपर्याः। [६]गन्धाः विशिष्टद्रव्यसंयोगाः। माल्यं पुष्पम् । अधिवासः पटवासादिः । धूपः सुरभिद्रव्यसंयोगजः । [७]प्रदीपदानम् । आदिग्रहणादुपलेपनसंमार्जन[८]खण्डस्फुटितसंस्करणचित्रकर्माणि चेति ॥३०६॥

**( ३०७ ) टीका—प्रशमरतीइत्यादि** । प्रशमः कषायादिजयस्तत्र रतिः प्रीतिस्तस्यां प्रशमरतौ नित्यमेव तृषितः साभिलाषः ''कदा साधुत्वमवाप्य कषायरिपुं जेष्यामीति'' । जिनानां तीर्थकृतां गुरूणामाचार्योपाध्यायादीनां, साधुजनस्य साधुलोकस्य च वन्दने नमस्करणे प्रतिक्षणमभिरतः। मारणान्तिकसंलेखनाकाले प्रत्यासन्ने जीवितच्छेदे, द्रव्यतो भावतश्च संलिख्य शरीरं कषायादींश्च । योगेनेति ध्यानेनाराध्याभिमुखीकृत्य धर्मेणाज्ञाविचयादिना । सुष्ठु बाढं विशुद्धां [१]निर्मलां जीवितमरणाशंसादिदोषरहितां कृत्वेति सम्बन्ध्य । एवं गृहे स्थितो द्वादशविधं श्रावकधर्ममनुपाल्य पञ्चानुव्रतानि स्थूलप्राणातिपातविरत्यादीनि इच्छापरिमाणान्तानि, त्रीणि गुणव्रतानि दिक्परिमाण[२]मुपभोगपरिभोगपरिमाणमनर्थदण्डविरतिश्च, शिक्षाव्रतानि चत्वारि सामायिकं देशावकाशिकं पौषधोपवासोऽतिथिसंविभागश्चेति द्वादशप्रकारमप्यनुपाल्य संलेखनां चाराध्य ॥३०७॥

---

पूर्वक्रियाणां सिद्धिमेष्यतीत्युत्तरक्रियया सम्बन्धः । [१]चाः समुच्चयार्थाः । कथं ?-शक्तितः प्रयतः-आदरवान्, पूजाश्च कृत्वेति सम्बन्धः । कीदृशीः ?-गन्धमाल्याधिवासधूपप्रदीपाः कृतद्वन्द्वाः आद्या यासां तास्तथा ताः कर्मतापन्ना इति ॥३०६॥

**( ३०७ ) ( वि० ) प्रशमेति** । कीदृशः ?-प्रशमरतिनित्यतृषितः-उपशमे नित्यं पिपासितः, तथा जिनादीनां कृतद्वन्द्वानां वन्दनाभिरतः स तथा। तथा संलेखनां च-शरीरोपकरणकषायसङ्कोचरूपां च काले-अवसरे योगेन-व्यापारेणाराध्य-आसेव्य सुविशुद्धां-शास्त्रोक्तामिति ॥३०७॥

---

**( ३०७ ) ( अव० )—उपशमे नित्यं पिपासितः काले जीवितच्छेदे । संलेखनां शरीरोपकरणकषायसङ्कोचरूपां योगेन व्यापारेण आराध्य विशुद्धां शास्त्रोक्तामिति ॥३०७॥**

**प्राप्तः कल्पेष्विन्द्रत्वं वा सामानिकत्वमन्यद्वा ।**
**स्थानमुदारं तत्रानुभूय च सुखं तदनुरूपम् ॥३०८॥**
**नरलोकमेत्य सर्वगुणसम्पदं दुर्लभां पुनर्लब्ध्वा ।**
**शुद्धः स सिद्धिमेष्यति भवाष्टकाभ्यन्तरे नियमात् ॥३०९॥**
**इत्येवं प्रशमरतेः फलमिह स्वर्गापवर्गयोश्च शुभम् ।**
**सम्प्राप्यतेऽनगारैरगारिभिश्चोत्तरगुणाढ्यैः ॥३१०॥**

---

**( ३०८ ) टीका—प्राप्तः कल्पेष्विन्द्रेत्यादि** । कल्पाः सौधर्मादयस्तेष्विन्द्रत्वमधिपतित्वमवाप्य । कदाचिद्वा सामानिकत्वमिन्द्रतुल्यत्वम्, इन्द्रत्वरहितास्तु सामानिका भवन्ति, शेषं स्थित्यादि तुल्यम् । अन्यद्वा स्थानमुदारं विशिष्टं सामान्यदेवत्वं प्राप्य वैमानिकेषु । तत्र च देवजन्मसुखं स्थानानुरूपमनुभूय जघन्यमध्यमोत्कृष्टम् ॥३०८॥

**( ३०९ ) टीका—नरलोकेत्यादि** । स्थितिक्षयात्ततः प्रच्युतो मनुष्यलोके[१] गुणवत्सु मनुष्येषु आर्यदेशादिषु जातिकुलविभवरूपसौभाग्यादिकां सम्पदं सम्यक्त्वादिगुणसम्पदं च लब्ध्वा । शुद्धः सकलकर्मकलङ्कनिर्मुक्तः । स एवं सुखपरम्परया सिद्धिमेष्यति [२]मोक्षं प्राप्स्यति । अष्टानां भवानामर्वागभ्यन्तरे नियमेनैवेति । तस्मादादरवता गृहस्थधर्मोऽप्यनुपाल्यः, पर्यन्ते च साधुधर्म इति ॥३०९॥

**( ३१० ) टीका—इत्येवं प्रशमरतेरित्यादि** । इतिशब्दः प्रकरणपरिसमाप्तिप्रदर्शनार्थः ।

---

**( ३०८ ) ( वि० ) प्राप्त इति** । ततः प्राप्तः । केषु[१] ?-कल्पेषु-सौधर्मादिषु इन्द्रत्वं सामानिकत्वमन्यद्वा स्थानमुदारं-प्रधानम् । तत्र-तेषु स्थानेषु अनुभूय च-संवेद्य च सुखं-शर्म तदनुरूपं-निजस्थानकानुसदृशमिति ॥३०८॥

**( ३०९ ) ( वि० ) नरेति** । ततोऽपि च्युतः नरलोकमेत्य-आगत्य सर्वगुणसम्पदं-विषयसुखसमृद्धिं दुर्लभां पुनः लब्ध्वा शुद्धः सन् स सिद्धिमेष्यति । क्व ?-भवाष्टकाभ्यन्तरे नियमात्-नियमेनेति । आर्यासप्तकस्य श्रावकधर्मविधिप्रतिपादकस्यायं सङ्क्षेपार्थ इति ॥३०९॥

**( ३१० ) ( वि० )** इदानीं यदिमां प्रशमरतिं श्रुत्वा प्राप्यते तदार्याद्वयेनाह—**इत्येवमिति** ।

---

**( ३०८ )[१] ( अव० )—सौधर्मादिष्विन्द्रत्वं सामान्यदेवत्वं वा विशिष्टमुदारम् अन्यद्वा स्थानं अवाप्य तत्र स्थानाऽनुरूपं सुखम् ॥३०८॥**

**( ३०९ ) ( अव० )—[१]आर्यदेशजातिकुलविभवरूपसौभाग्यादिकां सम्यक्त्वादिगुणसम्पदं च ॥३०९॥**

**( ३१० ) ( अव० )—मनुष्येषु ॥३१०॥**

**जिनशासनार्णवादाकृष्टां धर्मकथिकामिमां श्रुत्वा ।**
**रत्नाकरादिव जरत्कपर्दिकामुद्धृतां भक्त्या ॥३११॥**

---

एवमिति वर्णितेन न्यायेन । इहेति मनुष्येष्वेव बाहुल्येन स्वर्गफलम् । तिर्यग्गतौ च केषाञ्चित्स्वर्गावाप्तिर्नान्यत्र । अपवर्गफलं पुनर्मनुष्येष्वेव । शुभमिति वैषयिकस्वाभाविकभेदादुभयमपि फलं शुभमिति । तदेव तदपवर्गाख्यं फलं प्राप्यतेऽनगारैः साधुभिः । अगारिभिश्च स्वर्गफलं [1]प्राप्यते । अपवर्गफलं तु पारम्पर्येणावाप्यते गृहाश्रमिभिरिति । कीदृशैरनगारैरगारिभिश्च[2] ? उत्तरगुणाढ्यैः प्रधानगुणयुक्तैः मूलोत्तरगुणसम्पन्नैराढ्यैर्निरव[3]द्याशेषसंयमानुष्ठायिभिरिति ॥३१०॥

**( ३११ ) टीका—**उक्तो योऽर्थः प्रकरणप्रारम्भात् प्रभृति स सर्व एव प्रवचने, न मया स्वमनीषिकया किञ्चित्कल्पितमत्र प्रवचनस्य च महानुभावत्वमनयार्यया दर्शयति— **जिनशासनेत्यादि** । जिनशासनमर्णव इव जिनशासनार्णवः । बहुत्वादनेकाश्चर्यनिधानं[1] च । उपमानोपमेयभावः । तस्माज्जिनशासनसाग[2]रान्निष्कृष्टामाक्षिप्तां जिनशासनोदधौ निहितानर्थानुपादाय [3]लघ्वी धर्मकथा [4]कथिता, न तु [5]विस्तरेणोदिता । सङ्क्षिप्तार्थामिमामाकर्ण्य श्रुत्वाऽवधार्य रत्नाकरादिव जरत्कपर्दिकामित्यात्मन औद्धत्यं परिहरति । रत्नाकरादनेकरत्ननिधेः । तस्माद्यथा जरत्कपर्दिकेति, [6]मृजैवाति शोभना भवति जरत्कपर्दिका तु परिपेलवा निःसारा च । मयाल्पमतिना, तद्वदियं जरत्कपर्दिकास्थानीया आकृष्टा तां जरत्कपर्दिकावदुद्धृताम् । भगवत्सु साधुषु [7]च भक्तिर्या प्रीतिस्तया प्रेरितेनाकृष्टामिति । आकृष्टेति प्रशमरतिः सम्बध्यते, उद्धृतेति कपर्दिका सम्बध्यते इति[8] ॥३११॥

---

इह चतुर्थगणः पञ्चमात्र इति । एतत्फलं–जन्यं । कुतः ?–प्रशमरतेः सकाशात् । कीदृशम् ?–शुभमिह स्वर्गापवर्गयोश्च प्राप्यते । कैः ?–अनगारैः–साधुभिः, तथा अगारिभिः–गृहिभिश्च उत्तरगुणाढ्यैः–निजभूमिकापेक्षया पिण्डविशुद्ध्यादिदिग्व्रतादिसमृद्धैरिति ॥३१०॥

**( ३११ ) ( वि० ) जिनशासनेति** । जिनशासनार्णवात्–तीर्थकृदागमसिन्धोराकृष्टाम्–आनीतां धर्मकथिकां–द्विविधधर्मप्रतिपादिकामिमां–प्रशमरतिमेतच्छास्त्रं कर्मतापन्नं । किं कृत्वा ?–श्रुत्वा–आकर्ण्य । कस्मादिव काम् ?–रत्नाकरादिव [1]समुद्रादिव जरत्कपर्दिकां–जीर्णवराटिकां, समुद्धृतां–समाकृष्टाम् । कया ?–भक्त्या–प्रशमप्रीत्या । अयमर्थः–आकृष्टामिति जिनशासनादित्यत्र योज्यम् । उद्धृतामिति रत्नाकरादित्यत्र सम्बन्धनीयम् । अत्रार्याद्वयक्रियाकारकघटनैवं बोद्धव्या–इमां धर्मकथिकां श्रुत्वा फलं शुभं [2]प्रशमरतेः सम्प्राप्यतेऽनगारैरगारिभिरिति[3] ॥३११॥

---

**( ३११ ) ( अव० )—कविरात्मन औद्धत्यं परिहरति—धर्मकथिकां द्विविधधर्मप्रतिपादिकाम् इमां प्रशमरतिं रत्नाकरादिव जीर्णकपर्दिकामिव प्रशमप्रीत्या ॥३११॥**

**सद्‌भिर्गुणदोषज्ञैर्दोषानुत्सृज्य गुणलवा ग्राह्याः ।**
**सर्वात्मना च सततं प्रशमसुखायैव यतितव्यम् ॥३१२॥**

**यच्चासमञ्जसमिह छन्दःशब्दसमयार्थतो मयाभिहितम् ।**
**पुत्रापराधवत्तन्मर्षयितव्यं बुधैः सर्वम् ॥३१३॥**

---

**( ३१२ ) टीका—**निस्साराप्येषा प्रशमरतिः**—सद्‌भिर्गुणेत्यादि** । सन्तः साधवस्तैर्गुण-दोषज्ञैर्गुणांश्च दोषांश्च अवगच्छन्ति ये ते गुणदोषज्ञास्तैः सद्भिरत्र दोषानुत्सृज्य शब्दच्छन्दोऽर्थादिकान् परित्यज्य गुणलवा ग्राह्याः । लवग्रहणादल्पगुणत्वं दर्शयति, कियतो गुणान् वक्तुं शक्नोत्यस्मदादिः ? । सर्वात्मना सर्वप्रयत्नेन । सततं सदैव । वैषयिकसुखनिरभिलाषेण प्रशमसुखार्थमेव श्रुत्वा प्रयतितव्यमिति ॥३१२॥

**( ३१३ ) टीका—यच्चेत्यादि** । असमञ्जसमघटमानम् । यदिह प्रशमरतौ । केनाकारेणासमञ्जसं ? छन्दसा, शब्दशास्त्रेण, प्रवचनप्रसिद्धस्यार्थस्यान्यथा[१] वा प्ररूपणेन । पुत्रापराधवत्तत् मर्षयितव्यम् । यथा पुत्रस्य शिशोरपराधं पिता मृष्यति क्षमते, तथा प्रवचनवृद्धैः [२]सद्भिः बुधैः सर्वमशेषं क्षन्तव्यमिति ॥३१३॥

---

**( ३१२ ) ( वि० )** साम्प्रतं सत्पुरुषैर्यादृग्गुणोपेतैर्ये त्याज्या ये च ग्राह्या यन्निमित्तश्च यत्नो विधेयस्तदेतत्सर्वमाह**—सद्भिरिति** । सद्भिः-सत्पुरुषैर्गुणदोषज्ञैः-यथावस्थितगुणदोषविद्‌भिः, किं कार्यं ?-दोषानुत्सृज्य-परित्यज्य गुणलवा ग्राह्या-गुणांशा ग्राह्याः प्रकटनीयाः । केन ?-सर्वात्मना च-अशेषप्रकारैरपि सततम्-अनवरतम् । [१]तथा प्रशमसुखायैव यतितव्यं-यत्नः कार्य इति ॥३१२॥

**( ३१३ ) ( वि० )** साम्प्रतमौद्धत्यं परिहरन् छद्मस्थत्वात् स्वस्य सदोषतां पश्यन् अन्यैश्च यद्विधेयं तद्दर्शयन्नाह**—यच्चेति ।** यत्पुनरिह-अत्र प्रशमरतिप्रकरणेऽसमञ्जसम्-असङ्गतं तन्मम मर्षयितव्यमिति योगः । छन्दो-रचनाविशेषः, शब्दः-संस्कृतादिभेदभिन्नः, समयः-सिद्धान्तः, तस्यार्थः-अभिधेयस्तेषां द्वन्द्वः तेभ्यस्ततः-तानाश्रित्य अभिहितं-प्रतिपादितं पुत्रापराधवत्-तनयविनाशवत्पित्रेव तन्मर्षयितव्यं-सोढव्यं बुधैः-विद्वद्‌भिः सर्वमिति ॥३१३॥

---

**( ३१२ ) ( अव० )—सर्वात्मनाऽशेषप्रकारैः सततमनवरतं यत्नः कार्यः ॥३१२॥**

**( ३१३ ) ( अव० )—इह प्रशमरतिप्रकरणेऽसमञ्जसमसङ्गतं, छन्दो=रचनाविशेषः, शब्दः= संस्कृतादिभेदभिन्नः, समयः=सिद्धान्तः, तस्यार्थोऽभिधेयं मर्षयितव्यं=क्षन्तव्यम् ॥३१३॥**

**सर्वसुखमूलबीजं सर्वार्थविनिश्चयप्रकाशकरम् ।**
**सर्वगुणसिद्धिसाधनधनमर्हच्छासनं जयति ॥३१४॥**[१]

---

**( ३१४ ) टीका–सर्वसुखेत्यादि** । सर्वमेव सुखं सर्वसुखं दुःखलेशाकलङ्कितं मुक्तिसुखं, तस्य मूलमाद्यं प्रथमं बीजमर्हच्छासनम् । अथवा वैषयिकाणां सुखानां मुक्तिसुखस्य च सर्वेषां सुखानां मूलबीजं जिनशासनम् । सर्वे च तेऽर्थाश्च सर्वार्थाः पञ्चास्तिकायाः ससमयाः [१]सर्वेषु सर्वार्थेषु यो विनिश्चयः परिच्छेदः । [२]एवं संसारस्थितिघटना मुक्तिमार्गश्चेति तं

---

**( ३१४ ) ( वि० )** साम्प्रतमवसानमङ्गलमाह–**सर्वेति** । जयति–अतिशेते । किं तत् ?–अर्हच्छासनम् । कीदृशं ?–सर्वसुखानामैहिकामुष्मिकाणां मूलं कारणमिति समासः । सर्वार्थानां विनिश्चयो–निर्णयस्तस्य प्रकाशः–प्रकटनं तं करोतीति समासः । सर्वगुणानां–क्षान्त्यादीनां सिद्धिः–निष्पत्तिस्तस्याः साधने–निष्पादने धनमिव धनं, यथा धनेन सता सर्वाणि कार्याणि सिद्ध्यन्ति तथा क्षान्त्यादिगुणावाप्तिसाधने धनकल्पमर्हच्छासनं–जैनागमो जयति–विजयमनुभवतीति ॥३१४॥

यत्यालये मन्दगुरूपशोभे सन्मङ्गले सद्बुधराजहंसे ।
तारापथे वाऽऽशुकविप्रचारे श्री**मानदेवा**भिधसूरिगच्छे ॥१॥

भव्या बभूवुः शुभशस्यशिष्याः, अध्यापकाः श्री**जिनदेव**सञ्ज्ञाः ।
तेषां विनेयैर्बहुभक्तियुक्तैः, प्रज्ञाविहीनैरपि शास्त्ररागात् ॥२॥

**श्रीहरिभद्राचार्यै** रचितं प्रशमरतिविवरणं किञ्चित् ।
परिभाव्य वृद्धटीकाः सुखबोधार्थं समासेन ॥३॥

अणहिलपाटकनगरे श्रीमज्**जयसिंहदेव**नृपराज्ये ।
बाणवसुरुद्र(११८५)सङ्ख्ये विक्रमतो वत्सरे व्रजति ॥४॥

श्री**धवल**भाण्डशालिकपुत्र**यशोनाग**नायकवितीर्णे ।
सदुपाश्रये स्थितैस्तैः समर्थितं शोधितं चेति ॥५॥

यदिहाशुद्धं किञ्चित् छद्मस्थत्वेन लिखितमस्माभिः ।
तच्छोध्यं धीमद्भिः सम्यक् सञ्चिन्त्य समयज्ञैः ॥६॥

---

**( ३१४ ) ( अव० )–ऐहिकामुष्मकसुखमूलकारणं सर्वभावानां विनिश्चयो=निर्णयस्तस्य प्रकटनकरं क्षान्त्यादि[१] गुणसिद्धिसाधने धनमिव [२]जयति विजयमनुभवति ॥३१४॥★**

**★ <u>ड. प्रतेः पुष्पिका</u>–इति श्रीप्रशमरतिप्रकरणमवचूरितम् । श्रीमानदेवसूरिशिष्यश्रीहरिभद्राचार्यसूरिभिः ॥ संवत् ११८५ विरचितमेतत्प्रकरणं लघुवृत्तेरिति ।।छ।। पंडितलाभसागरगणिना लिखिता ।।छ।।**

प्रकाशयति प्रतिपादयति जैनमेव शासनम् । सर्वे च ते गुणाश्च सर्वगुणाः, सर्वगुणानां सिद्धिर्निष्पत्तिः सर्वगुणसिद्धिः । [३]सिद्धिर्येन धनेन, तच्च धनमिदमेव प्रवचनम् । अतः सर्वगुणसिद्धिसाधनधनमर्हच्छासनं द्रव्यपर्याय[४]नयप्रपञ्चात्मकमन्यशासनन्यग्भावेन जयति [५]इति ॥३१४॥★

**( वि० )** शास्त्रस्य पीठबन्धः[१] कषाय[२]रागादि[३]कर्म[४]करणा[५]र्थाः[६] ।
अष्टौ च मदस्थाना[७]न्याचारो[८] भावना[९] धर्मः[१०] ॥७॥

तदनु कथा[११] जीवाद्या[१२] उपयोगा[१३] भाव[१४]षड्विधद्रव्यम्[१५] ।
चरणं[१६] शीलाङ्गानि[१७] च ध्यान[१८]श्रेणी[१९]समुद्घाताः[२०] ॥८॥

योगनिरोधः[२१] क्रमशः शिवगमनविधान[२२]मन्तफलमस्याः ।
द्वाविंशत्यधिकारा मुख्या इह धर्मकथिकायाम् ॥९॥

व्याख्यामेतस्य शास्त्रस्य, कृत्वा पुण्यं यदर्जितम् ।
तेन भव्यो जनः सर्वो, लभतां शममुत्तमम् ॥१०॥

धात्री धात्रीधरा याव[१]द्यावच्चन्द्रदिवाकरौ ।
तावदज्ञानविध्वंसान्नन्द्यादेषा सुवृत्तिका ॥११॥

ग्रन्थाग्रमत्र जातं प्रत्यक्षरगणनतः ससूत्रायाः ।
सद्वृत्तेरष्टादश शतानि सच्छ्लोकमानेन ॥१२॥ (ग्रन्थाग्रं अङ्कतः १८००)

---

★ ह. प्रतेः पुष्पिका । इति प्रशमरतिवृत्तिः समाप्ता । संवत् १४८७ वर्षे कार्तिक शुदि १० गुरौ श्रीदेवलवाटकनगरे । श्रीचण्ड(चन्द्र)गच्छे श्रीपूर्णचन्द्रसूरिपट्टकमलहंसैः श्रीहेमहंससूरिभिः स्वयं पुण्यमेरुगणिना च मुद्गलभङ्गे पं० हेमसारगणिमीलितपर्ण.....पुस्तकस्याभ्य(?) हेममेरूगणिदर्शितादर्शकेन त्रुटिपूर्तिः कृता । चिरं नन्दतु साधुसाध्वीभिर्वाच्यमाना कल्याणमालां करोतु ॥ ससूत्रस्यास्य ग्रन्थस्य ग्रन्थाग्रं श्लोक २५०० ॥ अत्र तु पुस्तकेऽसूत्रा वृत्तिरस्ति । एतद् ग्रंथाग्रं सूत्रप्रमाणरहितं विचार्य कार्यं बुद्धि....॥

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
शुभं भवतु ॥ श्रेयो भवतु ॥

इति श्रीबृहद्गच्छीयश्रीहरिभद्रसूरिविरचिता प्रशमरतिवृत्तिः समाप्ता ॥[1]

**संवत् १८२३ वर्षे पौसमासि पूर्णिमायां १५ कर्मवाट्यां परमगुरुभट्टारक श्री १०८ श्रीविजयदेवसूरीश्वरशिष्यपण्डित शिरोरत्नपण्डित श्री १९ श्रीवरसिंगर्षिगणिविनेय-सकल-तार्किकशिरोरत्नायमानप्राज्ञश्री १९ श्रीलब्धिविजयगणि-शिष्य-लुंपाकादि-निखिल-मत-वन-गहन-धूमध्वजायमान-सकल-मण्डलाखण्डलायमान-पण्डितश्रीरत्नविजयगणिशिष्य-सकलविद्वज्जन-सभा-भामिनी-भाल-स्थल-तिलकायमान पण्डितश्रीविवेकविजयगणि-चरणाम्भोजचञ्चरीकतुल्येन पण्डितश्रीअमृतविजयेन प्रशमरतिवृत्तिर्लिपीकृता स्वयं श्रीमुणि-सुव्वयप्रसादात् । शुभम् । ॥ भवन्तु श्रेयःश्रेणयः ।**

• • •

१. कै. (त्रिपाठ) प्रतेः पुष्पिका

**मूलस्य पुष्पिकाः**-प्रशमस्थितेन येनेयं कृता वैराग्यपद्धतिः ।

तस्मै वाचकमुख्याय नमो भूतार्थभाषिणे ॥३७५॥

इति प्रशमरतिप्रकरणम् । उमास्वातिवाचकविरचितम् । श्रीः । जयक्षेमगणिना लिखितम् ॥ शुभं भवतु ॥ ठ ॥

**वृत्तेः पुष्पिकाः**- संवत १६४७ वर्षे पोषमासे कृष्णपक्षे चतुर्दश्यां तिथौ रविवासरे मूलनक्षत्रे श्रीनागपुरमध्ये लिपीकृतेयं श्रीप्रशमरतिप्रकरणवृत्तिः ॥ छ ॥ छ ॥ श्री ॥

# परिशिष्टाणि

## परिशिष्ट-१
## प्रशमरतिः मूलम्

नाभेयाद्याः सिद्धार्थराजसूनुचरमाश्चरमदेहाः ।
पञ्चनवदश च दशविधधर्मविधिविदो जयन्ति जिनाः ॥१॥
जिनसिद्धाचार्योपाध्यायान् प्रणिपत्य सर्वसाधूंश्च ।
प्रशमरतिस्थैर्यार्थं वक्ष्ये जिनशासनात् किञ्चित् ॥२॥
यद्यप्यनन्तगमपर्ययार्थहेतुनयशब्दरत्नाढ्यम् ।
सर्वज्ञशासनपुरं प्रवेष्टुमबहुश्रुतैर्दुःखम् ॥३॥
श्रुतबुद्धिविभवपरिहीणकस्तथाऽप्यहमशक्तिमविचिन्त्य ।
द्रमक इवावयवोञ्छकमन्वेष्टुं तत्प्रवेशेप्सुः ॥४॥
बहुभिर्जिनवचनार्णवपारगतैः कविवृषैर्महामतिभिः ।
पूर्वमनेकाः प्रथिताः प्रशमजननशास्त्रपद्धतयः ॥५॥
ताभ्यो विसृताः श्रुतवाक्पुलाकिकाः प्रवचनाश्रिताः काश्चित् ।
पारम्पर्यादुच्छेषिकाः कृपणकेन संहृत्य ॥६॥
तद्भक्तिबलार्पितया मयाऽप्यविमलाल्पया स्वमतिशक्त्या ।
प्रशमेष्टतयाऽनुसृता विरागमार्गैकपदिकेयम् ॥७॥
यद्यप्यवगीतार्था न वा कठोरप्रकृष्टभावार्था ।
सद्भिस्तथापि मय्यनुकम्पैकरसैरनुग्राह्या ॥८॥
कोऽत्र निमित्तं वक्ष्यति निसर्गमतिसुनिपुणोऽपि वा ह्यन्यत् ।
दोषमलिनेऽपि सन्तो यद् गुणसारग्रहणदक्षाः ॥९॥
सद्भिः सुपरिगृहीतं यत् किञ्चिदपि प्रकाशतां याति ।
मलिनोऽपि यथा हरिणः प्रकाशते पूर्णचन्द्रस्थः ॥१०॥
बालस्य यथा वचनं काहलमपि शोभते पितृसकाशे ।
तद्वत् सज्जनमध्ये प्रलपितमपि सिद्धिमुपयाति ॥११॥
ये तीर्थकृत्प्रणीता भावास्तदनन्तरैश्च परिकथिताः ।
तेषां बहुशोऽप्यनुकीर्तनं भवति पुष्टिकरमेव ॥१२॥
यद्वदुपयुक्तपूर्वमपि भैषजं सेव्यतेऽर्त्तिनाशाय ।
तद्वद्रागार्तिहरं बहुशोऽप्यनुयोज्यमर्थपदम् ॥१३॥

यद्वद्विषघातार्थं मन्त्रपदे न पुनरूक्तदोषोऽस्ति ।
तद्वद्रागविषघ्नं पुनरुक्तमदुष्टमर्थपदम् ॥१४॥
वृत्त्यर्थं कर्म यथा तदेव लोकः पुनः पुनः कुरुते ।
एवं विरागवार्ताहेतुरपि पुनः पुनश्चिन्त्यः ॥१५॥
दृढतामुपैति वैराग्यभावना येन येन भावेन ।
तस्मिंस्तस्मिन् कार्यः कायमनोवाग्भिरभ्यासः ॥१६॥
माध्यस्थ्यं वैराग्यं विरागता शान्तिरुपशमः प्रशमः ।
दोषक्षयः कषायविजयश्च वैराग्यपर्यायाः ॥१७॥
इच्छा मूर्च्छा कामः स्नेहो गार्ध्यं ममत्वमभिनन्दः ।
अभिलाष इत्यनेकानि रागपर्यायवचनानि ॥१८॥
ईर्ष्या रोषो दोषो द्वेषः परिवादमत्सरासूयाः ।
वैरप्रचण्डनाद्या नैके द्वेषस्य पर्यायाः ॥१९॥
रागद्वेषपरिगतो मिथ्यात्वोपहतकलुषया दृष्ट्या ।
पञ्चाश्रवमलबहुलार्त्तरौद्रतीव्राभिसन्धानः ॥२०॥
कार्याकार्यविनिश्चयसङ्क्लेशविशुद्धिलक्षणैर्मूढः ।
आहारभयपरिग्रहमैथुनसञ्ज्ञाकलिग्रस्तः ॥२१॥
क्लिष्टाष्टकर्मबन्धनबद्धनिकाचितगुरुर्गतिशतेषु ।
जन्ममरणैरजस्त्रं बहुविधपरिवर्तनाभ्रान्तः ॥२२॥
दुःखसहस्त्रनिरन्तरगुरुभाराक्रान्तकर्षितः करुणः ।
विषयसुखानुगततृषः कषायवक्तव्यतामेति ॥२३॥
स क्रोधमानमायालोभैरतिदुर्जयैः परामृष्टः ।
प्राप्नोति याननर्थान् कस्तानुद्देष्टुमपि शक्तः ? ॥२४॥
क्रोधात् प्रीतिविनाशं मानाद् विनयोपघातमाप्नोति ।
शाठ्यात् प्रत्ययहानिं सर्वगुणविनाशनं लोभात् ॥२५॥
क्रोधः परितापकरः सर्वस्योद्वेगकारकः क्रोधः ।
वैरानुषङ्गजनकः क्रोधः क्रोधः सुगतिहन्ता ॥२६॥
श्रुतशीलविनयसन्दूषणस्य धर्मार्थकामविघ्नस्य ।
मानस्य कोऽवकाशं मुहूर्तमपि पण्डितो दद्यात् ॥२७॥
मायाशीलः पुरुषो यद्यपि न करोति किञ्चिदपराधम् ।
सर्प इवाविश्वास्यो भवति तथाप्यात्मदोषहतः ॥२८॥
सर्वविनाशाश्रयिणः सर्वव्यसनैकराजमार्गस्य ।
लोभस्य को मुखगतः क्षणमपि दुःखान्तरमुपेयात् ? ॥२९॥
एवं क्रोधो मानो माया लोभश्च दुःखहेतुत्वात् ।
सत्त्वानां भवसंसारदुर्गमार्गप्रणेतारः ॥३०॥

ममकाराहङ्कारावेषां मूलं पदद्वयं भवति ।
रागद्वेषावित्यपि तस्यैवान्यस्तु पर्यायः ॥३१॥
मायालोभकषायश्चेत्येतद्रागसञ्ज्ञितं द्वन्द्वम् ।
क्रोधो मानश्च पुनर्द्वेष इति समासनिर्दिष्टः ॥३२॥
मिथ्यादृष्ट्यविरमणप्रमादयोगास्तयोर्बलं दृष्टम् ।
तदुपगृहीतावष्टविधकर्मबन्धस्य हेतू तौ ॥३३॥
स ज्ञान-दर्शनावरण-वेद्य-मोहायुषां तथा नाम्नः ।
गोत्रान्तराययोश्चेति कर्मबन्धोऽष्टधा मौलः ॥३४॥
पञ्चनवद्व्यष्टाविंशतिकश्चतुःषट्कसप्तगुणभेदः ।
द्विपञ्चभेद इति सप्तनवतिभेदस्तथोत्तरतः ॥३५॥
प्रकृतिरियमनेकविधा स्थित्यनुभावप्रदेशतस्तस्याः ।
तीव्रो मन्दो मध्य इति भवति बन्धोदयविशेषः ॥३६॥
तत्र प्रदेशबन्धो योगात् तदनुभवनं कषायवशात् ।
स्थितिपाकविशेषस्तस्य भवति लेश्याविशेषेण ॥३७॥
ताः कृष्णनीलकापोततैजसीपद्मशुक्लनामानः ।
श्लेष इव वर्णबन्धस्य कर्मबन्धस्थितिविधात्र्यः ॥३८॥
कर्मोदयाद् भवगतिर्भवगतिमूला शरीरनिर्वृत्तिः ।
देहादिन्द्रियविषया विषयनिमित्ते च सुखदुःखे ॥३९॥
दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः ।
यां यां करोति चेष्टां तया तया दुःखमादत्ते ॥४०॥
कलरिभितमधुरगान्धर्वतूर्ययोषिद्विभूषणरवाद्यैः ।
श्रोत्रावबद्धहृदयो हरिण इव विनाशमुपयाति ॥४१॥
गतिविभ्रमेङ्गिताकारहास्यलीलाकटाक्षविक्षिप्तः ।
रूपावेशितचक्षुः शलभ इव विपद्यते विवशः ॥४२॥
स्नानाङ्गरागवर्तिकवर्णकरूपाधिवासपटवासैः ।
गन्धभ्रमितमनस्को मधुकर इव नाशमुपयाति ॥४३॥
मिष्टान्नपानमांसौदनादिमधुररसविषयगृद्धात्मा ।
गलयन्त्रपाशबद्धो मीन इव विनाशमुपयाति ॥४४॥
शयनासनसम्बाधनसुरतस्नानानुलेपनासक्तः ।
स्पर्शव्याकुलितमतिर्गजेन्द्र इव बध्यते मूढः ॥४५॥
एवमनेके दोषाः प्रणष्टशिष्टेष्टदृष्टिचेष्टानाम् ।
दुर्नियमितेन्द्रियाणां भवन्ति बाधाकरा बहुशः ॥४६॥
एकैकविषयसङ्गाद् रागद्वेषातुरा विनष्टास्ते ।
किं पुनरनियमितात्मा जीवः पञ्चेन्द्रियवशार्तः ? ॥४७॥

न हि सोऽस्तीन्द्रियविषयो येनाभ्यस्तेन नित्यतृषितानि ।
तृप्तिं प्राप्नुयुरक्षाण्यनेकमार्गप्रलीनानि ॥४८॥
कश्चिच्छुभोऽपि विषयः परिणामवशात्पुनर्भवत्यशुभः ।
कश्चिदशुभोऽपि भूत्वा कालेन पुनः शुभीभवति ॥४९॥
कारणवशेन यद्यत् प्रयोजनं जायते यथा यत्र ।
तेन तथा तं विषयं शुभमशुभं वा प्रकल्पयति ॥५०॥
अन्येषां यो विषयः स्वाभिप्रायेण भवति तुष्टिकरः ।
स्वमतिविकल्पाभिरतास्तमेव भूयो द्विषन्त्यन्ये ॥५१॥
तानेवार्थान् द्विषतस्तानेवार्थान् प्रलीयमानस्य ।
निश्चयतोऽस्यानिष्टं न विद्यते किञ्चिदिष्टं वा ॥५२॥
रागद्वेषोपहतस्य केवलं कर्मबन्ध एवास्य ।
नान्यः स्वल्पोऽपि गुणोऽस्ति यः परत्रेह च श्रेयान् ॥५३॥
यस्मिन्निन्द्रियविषये शुभमशुभं वा निवेशयति भावम् ।
रक्तो वा द्विष्टो वा स बन्धहेतुर्भवति तस्य ॥५४॥
स्नेहाभ्यक्तशरीरस्य रेणुना श्लिष्यते यथा गात्रम् ।
रागद्वेषाक्लिन्नस्य कर्मबन्धो भवत्येवम् ॥५५॥
एवं रागो द्वेषो मोहो मिथ्यात्वमविरतिश्चैव ।
एभिः प्रमादयोगानुगैः समादीयते कर्म ॥५६॥
कर्ममयः संसारः संसारनिमित्तकं पुनर्दुःखम् ।
तस्माद्रागद्वेषादयस्तु भवसन्ततेर्मूलम् ॥५७॥
एतद्दोषमहासञ्चयजालं शक्यमप्रमत्तेन ।
प्रशमस्थितेन घनमप्युद्वेष्टयितुं निरवशेषम् ॥५८॥
अस्य तु मूलनिबन्धं ज्ञात्वा तच्छेदनोद्यमपरस्य ।
दर्शनचारित्रतपःस्वाध्यायध्यानयुक्तस्य ॥५९॥
प्राणवधानृतभाषणपरधनमैथुनममत्वविरतस्य ।
नवकोट्युद्गमशुद्धोञ्छमात्रयात्राधिकारस्य ॥६०॥
जिनभाषितार्थसद्भावभाविनो विदितलोकतत्त्वस्य ।
अष्टादशशीलाङ्गसहस्रधारण कृतप्रतिज्ञस्य ॥६१॥
परिणाममपूर्वमुपागतस्य शुभभावनाऽध्यवसितस्य ।
अन्योऽन्यमुत्तरोत्तरविशेषमभिपश्यतः समये ॥६२॥
वैराग्यमार्गसम्प्रस्थितस्य संसारवासचकितस्य ।
स्वहितार्थाभिरतमतेः शुभेयमुत्पद्यते चिन्ता ॥६३॥
भवकोटीभिरसुलभं मानुष्यं प्राप्य कः प्रमादो मे ।
न च गतमायुर्भूयः प्रत्येत्यपि देवराजस्य ॥६४॥

आरोग्यायुर्बलसमुदयाश्चला वीर्यमनियतं धर्मे ।
तल्लब्ध्वा हितकार्ये मयोद्यमः सर्वथा कार्यः ॥६५॥
शास्त्रागमादृते न हितमस्ति न च शास्त्रमस्ति विनयमृते ।
तस्माच्छास्त्रागमलिप्सुना विनीतेन भवितव्यम् ॥६६॥
कुलरूपवचनयौवनधनमित्रैश्वर्यसम्पदपि पुंसाम् ।
विनयप्रशमविहीना न शोभते निर्जलेव नदी ॥६७॥
न तथा सुमहार्घ्यैरपि वस्त्राभरणैरलङ्कृतो भाति ।
श्रुतशीलमूलनिकषो विनीतविनयो यथा भाति ॥६८॥
गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि ।
तस्माद् गुर्वाराधनपरेण हितकाङ्क्षिणा भाव्यम् ॥६९॥
धन्यस्योपरि निपतत्यहितसमाचरणघर्मनिर्वापी ।
गुरुवदनमलयनिसृतो वचनसरसचन्दनस्पर्शः ॥७०॥
दुष्प्रतिकारौ मातापितरौ स्वामी गुरूश्च लोकेऽस्मिन् ।
तत्र गुरूरिहामुत्र च सदुष्करतरप्रतीकारः ॥७१॥
विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् ।
ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ॥७२॥
संवरफलं तपोबलमथ तपसो निर्जरा फलं दृष्टम् ।
तस्मात् क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ॥७३॥
योगनिरोधाद् भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः ।
तस्मात्कल्याणानां सर्वेषां भाजनं विनयः ॥७४॥
विनयव्यपेतमनसो गुरुविद्वत्साधुपरिभवनशीलाः ।
त्रुटिमात्रविषयसङ्गादजरामरवन्निरुद्विग्नाः ॥७५॥
केचित्सातर्द्धिरसातिगौरवात् साम्प्रतेक्षिणः पुरुषाः ।
मोहात्समुद्रवायसवदामिषपरा विनश्यन्ति ॥७६॥
ते जात्यहेतुदृष्टान्तसिद्धमविरुद्धमजरमभयकरम् ।
सर्वज्ञवाग्रसायनमुपनीतं नाभिनन्दन्ति ॥७७॥
यद्वत् कश्चित् क्षीरं मधुशर्करया सुसंस्कृतं हृद्यम् ।
पित्तार्दितेन्द्रियत्वाद्वितथमतिर्मन्यते कटुकम् ॥७८॥
तद्वन्निश्चयमधुरमनुकम्पया सद्भिरभिहितं पथ्यम् ।
तथ्यमवमन्यमाना रागद्वेषोदयोद्वृत्ताः ॥७९॥
जातिकुलरूपबललाभबुद्धिवाल्लभ्यकश्रुतमदान्धाः ।
क्लीबाः परत्र चेह च हितमप्यर्थं न पश्यन्ति ॥८०॥
ज्ञात्वा भवपरिवर्ते जातीनां कोटिशतसहस्रेषु ।
हीनोत्तममध्यत्वं को जातिमदं बुधः कुर्यात् ? ॥८१॥

नैकान् जातिविशेषानिन्द्रियनिर्वृत्तिपूर्वकान् सत्त्वाः ।
कर्मवशाद् गच्छन्त्यत्र कस्य का शाश्वती जातिः ॥८२॥
रूपबलश्रुतमतिशीलविभवपरिवर्जितांस्तथा दृष्ट्वा ।
विपुलकुलोत्पन्नानपि ननु कुलमानः परित्याज्यः ॥८३॥
यस्याशुद्धं शीलं प्रयोजनं तस्य किं कुलमदेन ? ।
स्वगुणाभ्यलङ्कृतस्य हि किं शीलवतः कुलमदेन ॥८४॥
कः शुक्रशोणितसमुद्भवस्य सततं चयापचयिकस्य ।
रोगजरापाश्रयिणो मदावकाशोऽस्ति रूपस्य ? ॥८५॥
नित्यपरिशीलनीये त्वङ्मांसाच्छादिते कलुषपूर्णे ।
निश्चयविनाशधर्मिणि रूपे मदकारणं किं स्यात् ? ॥८६॥
बलसमुदितोऽपि यस्मान्नरः क्षणेन विबलत्वमुपयाति ।
बलहीनोऽपि च बलवान् संस्कारवशात् पुनर्भवति ॥८७॥
तस्मादनियतभावं बलस्य सम्यग् विभाव्य बुद्धिबलात् ।
मृत्युबले चाबलतां मदं न कुर्याद्बलेनापि ॥८८॥
उदयोपशमनिमित्तौ लाभालाभावनित्यकौ मत्वा ।
नालाभे वैक्लव्यं न च लाभे विस्मयः कार्यः ॥८९॥
परशक्त्यभिप्रसादात्मकेन किञ्चिदुपयोगयोग्येन ।
विपुलेनापि यतिवृषा लाभेन मदं न गच्छन्ति ॥९०॥
ग्रहणोद्ग्राहणनवकृतिविचारणार्थावधारणाद्येषु ।
बुद्ध्यङ्गविधिविकल्पेष्वनन्तपर्यायवृद्धेषु ॥९१॥
पूर्वपुरुषसिंहानां विज्ञानातिशयसागरानन्त्यम् ।
श्रुत्वा साम्प्रतपुरुषाः कथं स्वबुद्ध्या मदं यान्ति ? ॥९२॥
द्रमकैरिव चटुकर्मकमुपकारनिमित्तकं परजनस्य ।
कृत्वा यद्वाल्लभ्यकमवाप्यते को मदस्तेन ? ॥९३॥
गर्वं परप्रसादात्मकेन वाल्लभ्यकेन यः कुर्यात् ।
तद्वाल्लभ्यकविगमे शोकसमुदयः परामृशति ॥९४॥
माषतुषोपाख्यानं श्रुतपर्यायप्ररूपणां चैव ।
श्रुत्वातिविस्मयकरं च विकरणं स्थूलभद्रमुनेः ॥९५॥
सम्पर्कोद्यमसुलभं चरणकरणसाधकं श्रुतज्ञानम् ।
लब्ध्वा सर्वमदहरं तेनैव मदः कथं कार्यः ? ॥९६॥
एतेषु मदस्थानेषु निश्चये न च गुणोऽस्ति कश्चिदपि ।
केवलमुन्मादः स्वहृदयस्य संसारवृद्धिश्च ॥९७॥
जात्यादिमदोन्मत्तः पिशाचवद्भवति दुःखितश्चेह ।
जात्यादिहीनतां परभवे च निःसंशयं लभते ॥९८॥

सर्वमदस्थानानां मूलोद्घातार्थिना सदा यतिना ।
आत्मगुणैरुत्कर्षः परपरिवादश्च सन्त्याज्यः ॥९९॥
परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म ।
नीचैर्गोत्रं प्रतिभवमनेकभवकोटिदुर्मोचम् ॥१००॥
कर्मोदयनिर्वृत्तं हीनोत्तममध्यमं मनुष्याणाम् ।
तद्विधमेव तिरश्चां योनिविशेषान्तरविभक्तम् ॥१०१॥
देशकुलदेहविज्ञानायुर्बलभोगभूतिवैषम्यम् ।
दृष्ट्वा कथमिह विदुषां भवसंसारे रतिर्भवति ? ॥१०२॥
अपरिगणितगुणदोषः स्वपरोभयबाधको भवति यस्मात् ।
पञ्चेन्द्रियबलविबलो रागद्वेषोदयनिबद्धः ॥१०३॥
तस्माद् रागद्वेषत्यागे पञ्चेन्द्रियप्रशमने च ।
शुभपरिणामावस्थितिहेतोर्यत्नेन घटितव्यम् ॥१०४॥
तत्कथमनिष्टविषयाभिकाङ्क्षिणा भोगिना वियोगो वै ।
सुव्याकुलहृदयेनापि निश्चयेनागमः कार्यः ॥१०५॥
आदावत्यभ्युदया मध्ये शृङ्गारहास्यदीप्तरसाः ।
निकषे विषया बीभत्सकरुणलज्जाभयप्रायाः ॥१०६॥
यद्यपि निषेव्यमाणा मनसः परितुष्टिकारका विषयाः ।
किम्पाकफलादनवद् भवन्ति पश्चाददतिदुरन्ताः ॥१०७॥
यद्वच्छाकाष्टादशमन्नं बहुभक्ष्यपेयवत् स्वादु ।
विषसंयुक्तं भुक्तं विपाककाले विनाशयति ॥१०८॥
तद्वदुपचारसम्भृतरम्यकरागरससेविता विषयाः ।
भवशतपरम्परास्वपि दुःखविपाकानुबन्धकराः ॥१०९॥
अपि पश्यतां समक्षं नियतमनियतं पदे पदे मरणम् ।
येषां विषयेषु रतिर्भवति न तान् मानुषान् गणयेत् ॥११०॥
विषयपरिणामनियमो मनोऽनुकूलविषयेष्वनुप्रेक्ष्यः ।
द्विगुणोऽपि च नित्यमनुग्रहोऽनवद्यश्च सञ्चिन्त्यः ॥१११॥
इति गुणदोषविपर्यासदर्शनाद्विषयमूर्च्छितो ह्यात्मा ।
भवपरिवर्तनभीरुभिराचारमवेक्ष्य परिरक्ष्यः ॥११२॥
सम्यक्त्वज्ञानचारित्रतपोवीर्यात्मको जिनैः प्रोक्तः ।
पञ्चविधोऽयं विधिवत् साध्वाचारः समधिगम्यः ॥११३॥
षड्जीवकाययतना लौकिकसन्तानगौरवत्यागः ।
शीतोष्णादिपरीषहविजयः सम्यक्त्वमविकम्प्यम् ॥११४॥
संसारादुद्वेगः क्षपणोपायश्च कर्मणां निपुणः ।
वैयावृत्त्योद्योगस्तपोविधिर्योषितां त्यागः ॥११५॥

विधिना भैक्ष्यग्रहणं स्त्रीपशुपण्डकविवर्जिता शय्या ।
ईर्याभाषाऽम्बरभाजनैषणाऽवग्रहाः शुद्धाः ॥११६॥
स्थाननिषद्याद्युत्सर्गशब्दरूपक्रियाः परान्योऽन्याः ।
पञ्चमहाव्रतदार्ढ्यं विमुक्तता सर्वसङ्गेभ्यः ॥११७॥
साध्वाचारः खल्वयमष्टादशपदसहस्त्रपरिपठितः ।
सम्यगनुपाल्यमानो रागादीन् मूलतो हन्ति ॥११८॥
आचाराध्ययनोक्तार्थभावनाचरणगुप्तहृदयस्य ।
न तदस्ति कालविवरं यत्र क्वचनाभिभवनं स्यात् ॥११९॥
पैशाचिकमाख्यानं श्रुत्वा गोपायनं च कुलवध्वाः ।
संयमयोगैरात्मा निरन्तरं व्यापृतः कार्यः ॥१२०॥
क्षणविपरिणामधर्मा मर्त्यानामृद्धिसमुदयाः सर्वे ।
सर्वे च शोकजनकाः संयोगा विप्रयोगान्ताः ॥१२१॥
भोगसुखैः किमनित्यैर्भयबहुलैः काङ्क्षितैः परायत्तैः ? ।
नित्यमभयमात्मस्थं प्रशमसुखं तत्र यतितव्यम् ॥१२२॥
यावत् स्वविषयलिप्सोरक्षसमूहस्य चेष्ट्यते तुष्टौ ।
तावत् तस्यैव जये वरतरमशठं कृतो यत्नः ॥१२३॥
यत् सर्वविषयकाङ्क्षोद्भवं सुखं प्राप्यते सरागेण ।
तदनन्तकोटिगुणितं मुधैव लभते विगतरागः ॥१२४॥
इष्टवियोगप्रियसम्प्रयोगकाङ्क्षासमुद्भवं दुःखम् ।
प्राप्नोति यत्सरागो न संस्पृशति तद्विगतरागः ॥१२५॥
प्रशमितवेदकषायस्य हास्यरत्यरतिशोकनिभृतस्य ।
भयकुत्सानिरभिभवस्य यत्सुखं तत्कुतोऽन्येषाम् ? ॥१२६॥
सम्यग्दृष्टिर्ज्ञानी ध्यानतपोबलयुतोऽप्यनुपशान्तः ।
तं न लभते गुणं यं प्रशमगुणमुपाश्रितो लभते ॥१२७॥
नैवास्ति राजराजस्य तत्सुखं नैव देवराजस्य ।
यत्सुखमिहैव साधोर्लोकव्यापाररहितस्य ॥१२८॥
सन्त्यज्य लोकचिन्तामात्मपरिज्ञानचिन्तनेऽभिरतः ।
जितलोभरोषमदनः सुखमास्ते निर्ज्वरः साधुः ॥१२९॥
या चेह लोकवार्त्ता शरीरवार्ता तपस्विनां या च ।
सद्धर्मचरणवार्तानिमित्तकं तद्द्वयमपीष्टम् ॥१३०॥
लोकः खल्वाधारः सर्वेषां ब्रह्मचारिणां यस्मात् ।
तस्माल्लोकविरुद्धं धर्मविरुद्धं च सन्त्याज्यम् ॥१३१॥
देहो नासाधनको लोकाधीनानि साधनान्यस्य ।
सद्धर्मानुपरोधात्तस्माल्लोकोऽभिगमनीयः ॥१३२॥

दोषेणानुपकारी भवति परो येन येन विद्वेष्टि ।
स्वयमपि तद्दोषपदं सदा प्रयत्नेन परिहार्यम् ॥१३३॥
पिण्डैषणानिरुक्तः कल्प्याकल्प्यस्य यो विधिः सूत्रे ।
ग्रहणोपभोगनियतस्य तेन नैवामयभयं स्यात् ॥१३४॥
व्रणलेपाक्षोपाङ्गवदसङ्गयोगभरमात्रयात्रार्थम् ।
पन्नग इवाभ्यवहरेदाहारं पुत्रपलवच्च ॥१३५॥
गुणवदमूर्च्छितमनसा तद्विपरीतमपि चाप्रदुष्टेन ।
दारूपमधृतिना भवति कल्प्यमास्वाद्यमास्वाद्यम् ॥१३६॥
कालं क्षेत्रं मात्रां स्वात्म्यं द्रव्यगुरुलाघवं स्वबलम् ।
ज्ञात्वा योऽभ्यवहार्यं भुङ्क्ते किं भेषजैस्तस्य ॥१३७॥
पिण्डः शय्या वस्त्रैषणादि पात्रैषणादि यच्चान्यत् ।
कल्प्याकल्प्यं सद्धर्मदेहरक्षानिमित्तोक्तम् ॥१३८॥
कल्प्याकल्प्यविधिज्ञः संविग्नसहायको विनीतात्मा ।
दोषमलिनेऽपि लोके प्रविहरति मुनिर्निरुपलेपः ॥१३९॥
यद्वत्पङ्काधारमपि पङ्कजं नोपलिप्यते तेन ।
धर्मोपकरणधृतवपुरपि साधुरलेपकस्तद्वत् ॥१४०॥
यद्वत्तुरगः सत्स्वप्याभरणविभूषणेष्वनभिसक्तः ।
तद्वदुपग्रहवानपि न सङ्गमुपयाति निर्ग्रन्थः ॥१४१॥
ग्रन्थः कर्माष्टविधं मिथ्यात्वाविरतिदुष्टयोगाश्च ।
तज्जयहेतोरशठं संयतते यः स निर्ग्रन्थः ॥१४२॥
यज्ज्ञानशीलतपसामुपग्रहं निग्रहं च दोषाणाम् ।
कल्पयति निश्चये यत् तत् कल्प्यमकल्प्यमवशेषम् ॥१४३॥
यत्पुनरुपघातकरं सम्यक्त्वज्ञानशीलयोगानाम् ।
तत्कल्प्यमप्यकल्प्यं प्रवचनकुत्साकरं यच्च ॥१४४॥
किञ्चिच्छुद्धं कल्प्यमकल्प्यं स्यात्स्यादकल्प्यमपि कल्प्यम् ।
पिण्डः शय्या वस्त्रं पात्रं वा भेषजाद्यं वा ॥१४५॥
देशं कालं पुरुषमवस्थामुपयोगशुद्धिपरिणामान् ।
प्रसमीक्ष्य भवति कल्प्यं नैकान्तात् कल्प्यते कल्प्यम् ॥१४६॥
तच्चिन्त्यं तद्भाष्यं तत्कार्यं भवति सर्वथा यतिना ।
नात्मपरोभयबाधकमिह यत्परतश्च सर्वाद्धम् ॥१४७॥
सर्वार्थेष्विन्द्रियसङ्गतेषु वैराग्यमार्गविघ्नेषु ।
परिसङ्ख्यानं कार्यं कार्यं परमिच्छता नियतम् ॥१४८॥
भावयितव्यमनित्यत्वमशरणत्वं तथैकताऽन्यत्वे ।
अशुचित्वं संसारः कर्माश्रवसंवरविधिश्च ॥१४९॥

निर्जरणलोकविस्तरधर्मस्वाख्याततत्त्वचिन्ताश्च ।
बोधेः सुदुर्लभत्वं च भावना द्वादश विशुद्धाः ॥१५०॥
इष्टजनसम्प्रयोगर्द्धिविषयसुखसम्पदस्तथारोग्यम् ।
देहश्च यौवनं जीवितञ्च सर्वाण्यनित्यानि ॥१५१॥
जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।
जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ॥१५२॥
एकस्य जन्ममरणे गतयश्च शुभाशुभा भवावर्ते ।
तस्मादाकालिकहितमेकेनैवात्मनः कार्यम् ॥१५३॥
अन्योऽहं स्वजनात् परिजनाच्च विभवाच्छरीरकाच्चेति ।
यस्य नियता मतिरियं न बाधते तं हि शोककलिः ॥१५४॥
अशुचिकरणसामर्थ्यादाद्युत्तरकारणाशुचित्वाच्च ।
देहस्याशुचिभावः स्थाने स्थाने भवति चिन्त्यः ॥१५५॥
माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे ।
व्रजति सुतः पितृतां भ्रातृतां पुनः शत्रुतां चैव ॥१५६॥
मिथ्यादृष्टिरविरतः प्रमादवान् यः कषायदण्डरुचिः ।
तस्य तथाश्रवकर्मणि यतेत तन्निग्रहे तस्मात् ॥१५७॥
या पुण्यपापयोरग्रहणे वाक्कायमानसी वृत्तिः ।
सुसमाहितो हितः संवरो वरददेशितश्चिन्त्यः ॥१५८॥
यद्वद्विशोषणादुपचितोऽपि यत्नेन जीर्यते दोषः ।
तद्वत् कर्मोपचितं निर्जरयति संवृतस्तपसा ॥१५९॥
लोकस्याधस्तिर्यग् विचिन्तयेदूर्ध्वमपि च बाहल्यम् ।
सर्वत्र जन्ममरणे रूपिद्रव्योपयोगांश्च ॥१६०॥
धर्मोऽयं स्वाख्यातो जगद्धितार्थं जिनैर्जितारिगणैः ।
येऽत्र रतास्ते संसारसागरं लीलयोत्तीर्णाः ॥१६१॥
मानुष्यकर्मभूम्यार्यदेशकुलकल्पतायुरुपलब्धौ ।
श्रद्धाकथकश्रवणेषु सत्स्वपि सुदुर्लभा बोधिः ॥१६२॥
तां दुर्लभां भवशतैर्लब्ध्वाऽप्यतिदुर्लभा पुनर्विरतिः ।
मोहाद्रागात्कापथविलोकनाद् गौरववशाच्च ॥१६३॥
तत् प्राप्य विरतिरत्नं विरागमार्गविजयो दुरधिगम्यः ।
इन्द्रियकषायगौरवपरीषहसपत्नविधुरेण ॥१६४॥
तस्मात् परीषहेन्द्रियगौरवगणनायकान् कषायरिपून् ।
क्षान्तिबलमार्दवार्जवसन्तोषैः साधयेद्धीरः ॥१६५॥
सञ्चिन्त्य कषायाणामुदयनिमित्तमुपशान्तिहेतुं च ।
त्रिकरणशुद्धमपि तयोः परिहारासेवने कार्ये ॥१६६॥

सेव्यः क्षान्तिर्मार्दवमार्जवशौचे च संयमत्यागौ ।
सत्यतपोब्रह्माकिञ्चन्यानीत्येष धर्मविधिः ॥१६७॥
धर्मस्य दया मूलं न चाक्षमावान् दयां समादत्ते ।
तस्माद्यः क्षान्तिपरः स साधयत्युत्तमं धर्मम् ॥१६८॥
विनयायत्ताश्च गुणाः सर्वे विनयश्च मार्दवायत्तः ।
यस्मिन् मार्दवमखिलं स सर्वगुणभाक्त्वमाप्नोति ॥१६९॥
नानार्जवो विशुद्ध्यति न धर्ममाराधयत्यशुद्धात्मा ।
धर्मादृते न मोक्षो मोक्षात्परं सुखं नान्यत् ॥१७०॥
यद् द्रव्योपकरणभक्तपानदेहाधिकारकं शौचम् ।
तद् भवति भावशौचानुपरोधाद्यत्नतः कार्यम् ॥१७१॥
पञ्चाश्रवाद्विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः ।
दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः ॥१७२॥
बान्धवधनेन्द्रियसुखत्यागात् त्यक्तभयविग्रहः साधुः ।
त्यक्तात्मा निर्ग्रन्थस्त्यक्ताहङ्कारममकारः ॥१७३॥
अविसंवादनयोगः कायमनोवागजिह्मता चैव ।
सत्यं चतुर्विधं तच्च जिनवरमतेऽस्ति नान्यत्र ॥१७४॥
अनशनमूनोदरता वृत्तेः सङ्क्षेपणं रसत्यागः ।
कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम् ॥१७५॥
प्रायश्चित्तध्याने वैयावृत्त्यविनयावथोत्सर्गः ।
स्वाध्याय इति तपः षट्प्रकारमाभ्यन्तरं भवति ॥१७६॥
दिव्यात्कामरतिसुखात् त्रिविधं त्रिविधेन विरतिरिति नवकम् ।
औदारिकादपि तथा तद् ब्रह्माष्टादशविकल्पम् ॥१७७॥
अध्यात्मविदो मूर्च्छां परिग्रहं वर्णयन्ति निश्चयतः ।
तस्माद् वैराग्येप्सोराकिञ्चन्यं परो धर्मः ॥१७८॥
दशविधधर्मानुष्ठायिनः सदा रागदोषमोहानाम् ।
दृढरूढघनानामपि भवत्युपशमोऽल्पकालेन ॥१७९॥
ममकाराहङ्कारत्यागादतिदुर्जयोद्धतप्रबलान् ।
हन्ति परीषहगौरवकषायदण्डेन्द्रियव्यूहान् ॥१८०॥
प्रवचनभक्तिः श्रुतसम्पदुद्यमो व्यतिकरश्च संविग्नैः ।
वैराग्यमार्गसद्भावभावधीस्थैर्यजनकानि ॥१८१॥
आक्षेपणीं विक्षेपणीं विमार्गबाधनसमर्थविन्यासाम् ।
श्रोतृजनश्रोत्रमनःप्रसादजननीं यथा जननी ॥१८२॥
संवेजनीं च निर्वेदनीं च धर्म्यां कथां सदा कुर्यात् ।
स्त्रीभक्तचौरजनपदकथाश्च दूरात् परित्याज्याः ॥१८३॥

यावत्परगुणदोषपरिकीर्तने व्यापृतं मनो भवति ।
तावद्वरं विशुद्धे ध्याने व्यग्रं मनः कर्तुम् ॥१८४॥
शास्त्राध्ययने चाध्यापने च सञ्चिन्तने तथात्मनि च ।
धर्मकथने च सततं यत्नः सर्वात्मना कार्यः ॥१८५॥
शास्विति वाग्विधिविद्भिर्धातुः पापठ्यतेऽनुशिष्ट्यर्थः ।
त्रैङिति पालनार्थे विनिश्चितः सर्वशब्दविदाम् ॥१८६॥
यस्माद् रागद्वेषोद्धतचित्तान् समनुशास्ति सद्धर्मे ।
सन्त्रायते च दुःखाच्छास्त्रमिति निरुच्यते सद्भिः ॥१८७॥
शासनसामर्थ्येन तु सन्त्राणबलेन चानवद्येन ।
युक्तं यत्तच्छास्त्रं तच्चैतत् सर्वविद्वचनम् ॥१८८॥
जीवाजीवाः पुण्यं पापाश्रवसंवराः सनिर्जरणाः ।
बन्धो मोक्षश्चैते सम्यक् चिन्त्या नवपदार्थाः ॥१८९॥
जीवा मुक्ताः संसारिणश्च संसारिणस्त्वनेकविधाः ।
लक्षणतो विज्ञेया द्वित्रिचतुःपञ्चषड्भेदाः ॥१९०॥
द्विविधाश्चराचराख्यास्त्रिविधाः स्त्रीपुंनपुंसका ज्ञेयाः ।
नारकतिर्यङ्मानुषदेवाश्च चतुर्विधाः प्रोक्ताः ॥१९१॥
पञ्चविधास्त्वेकद्वित्रिचतुःपञ्चेन्द्रियाश्च निर्दिष्टाः ।
क्षित्यम्बुवह्निपवनतरवस्त्रसाश्चेति षड्भेदाः ॥१९२॥
एवमनेकविधानामेकैको विधिरनन्तपर्यायः ।
प्रोक्तः स्थित्यवगाहज्ञानदर्शनादिपर्यायैः ॥१९३॥
सामान्यं खलु लक्षणमुपयोगो भवति सर्वजीवानाम् ।
साकारोऽनाकारश्च सोऽष्टभेदश्चतुर्धा च ॥१९४॥
ज्ञानाऽज्ञाने पञ्चत्रिविकल्पे सोऽष्टधा तु साकारः ।
चक्षुरचक्षुरवधिकेवलदृग्विषयस्त्वनाकारः ॥१९५॥
भावा भवन्ति जीवस्यौदयिकः पारिणामिकश्चैव ।
औपशमिकः क्षयोत्थः क्षयोपशमजश्च पञ्चैते ॥१९६॥
ते चैकविंशति-त्रि-द्वि-नवाष्टादशविधाश्च विज्ञेयाः ।
षष्ठश्च सान्निपातिक इत्यन्यः पञ्चदशभेदः ॥१९७॥
एभिर्भावैः स्थानं गतिमिन्द्रियसम्पदः सुखं दुःखम् ।
सम्प्राप्नोतीत्यात्मा सोऽष्टविकल्पः समासेन ॥१९८॥
द्रव्यं कषाययोगावुपयोगो ज्ञानदर्शने चेति ।
चारित्रं वीर्यं चेत्यष्टविधा मार्गणा तस्य ॥१९९॥
जीवाजीवानां द्रव्यात्मा सकषायिणां कषायात्मा ।
योगः सयोगिनां पुनरुपयोगः सर्वजीवानाम् ॥२००॥

ज्ञानं सम्यग्दृष्टेर्दर्शनमथ भवति सर्वजीवानाम् ।
चारित्रं विरतानां तु सर्वसंसारिणां वीर्यम् ॥२०१॥
द्रव्यात्मेत्युपचारः सर्वद्रव्येषु नयविशेषेण ।
आत्मादेशादात्मा भवत्यनात्मा परादेशात् ॥२०२॥
एवं संयोगाल्पबहुत्वाद्यैर्नैकशः स परिमृग्यः ।
जीवस्यैतत् सर्वं स्वतत्त्वमिह लक्षणैर्दृष्टम् ॥२०३॥
उत्पादविगमनित्यत्वलक्षणं यत्तदस्ति सर्वमपि ।
सदसद्वा भवतीत्यन्यथार्पितानर्पितविशेषात् ॥२०४॥
योऽर्थो यस्मिन्नाभूत् साम्प्रतकाले च दृश्यते तत्र ।
तेनोत्पादस्तस्य विगमस्तु तस्माद्विपर्यासः ॥२०५॥
साम्प्रतकाले चानागते च यो यस्य भवति सम्बन्धी ।
तेनाविगमस्तस्येति स नित्यस्तेन भावेन ॥२०६॥
धर्माधर्माकाशानि पुद्गलाः काल एव चाजीवाः ।
पुद्गलवर्जमरूपं तु रूपिणः पुद्गलाः प्रोक्ताः ॥२०७॥
द्व्यादिप्रदेशवन्तो यावदनन्तप्रदेशिकाः स्कन्धाः ।
परमाणुरप्रदेशो वर्णादिगुणेषु भजनीयः ॥२०८॥
भावे धर्माधर्माम्बरकालाः पारिणामिके ज्ञेयाः ।
उदयपरिणामि रूपं तु सर्वभावानुगा जीवाः ॥२०९॥
जीवाजीवा द्रव्यमिति षड्विधं भवति लोकपुरुषोऽयम् ।
वैशाखस्थानस्थः पुरुष इव कटिस्थकरयुग्मः ॥२१०॥
तत्राधोमुखमल्लकसंस्थानं वर्णयन्त्यधोलोकम् ।
स्थालमिव च तिर्यग्लोकमूर्ध्वमथ मल्लकसमुद्गम् ॥२११॥
सप्तविधोऽधोलोकस्तिर्यग्लोको भवत्यनेकविधः ।
पञ्चदशविधानः पुनरुर्ध्वलोकः समासेन ॥२१२॥
लोकालोकव्यापकमाकाशं मर्त्यलौकिकः कालः ।
लोकव्यापि चतुष्टयमवशेषं त्वेकजीवो वा ॥२१३॥
धर्माधर्माकाशानि एकैकमतः परं त्रिकमनन्तम् ।
कालं विनास्तिकाया जीवमृते चाप्यकर्तृणि ॥२१४॥
धर्मो गतिस्थितिमतां द्रव्याणां गत्युपग्रहविधाता ।
स्थित्युपकृच्चाधर्मोऽवकाशदानोपकृद् गगनम् ॥२१५॥
स्पर्शरसगन्धवर्णाः शब्दो बन्धश्च सूक्ष्मता स्थौल्यम् ।
संस्थानं भेदतमश्छायोद्योतातपश्चेति ॥२१६॥
कर्मशरीरमनोवाग्विचेष्टितोच्छ्वासदुःखसुखदाः स्युः ।
जीवितमरणोपग्रहकराश्च संसारिणः स्कन्धाः ॥२१७॥

परिणामवर्तनाविधिः परापरत्वगुणलक्षणः कालः ।
सम्यक्त्वज्ञानचारित्रवीर्यशिक्षागुणाः जीवाः ॥२१८॥
पुद्गलकर्म शुभं यत् तत् पुण्यमिति जिनशासने दृष्टम् ।
यदशुभमथ तत्पापमिति भवति सर्वज्ञनिर्दिष्टम् ॥२१९॥
योगः शुद्धः पुण्याश्रवस्तु पापस्य तद्विपर्यासः ।
वाक्कायमनोगुप्तिनिराश्रवः संवरस्तूक्तः ॥२२०॥
संवृततपउपधानं तु निर्जरा कर्मसन्ततिर्बन्धः ।
बन्धवियोगो मोक्षस्त्विति सङ्क्षेपान्नव पदार्थाः ॥२२१॥
एतेष्वध्यवसायो योऽर्थेषु विनिश्चयेन तत्त्वमिति ।
सम्यग्दर्शनमेतच्च तन्निसर्गादधिगमाद्वा ॥२२२॥
शिक्षागमोपदेशश्रवणान्येकार्थिकान्यधिगमस्य ।
एकार्थः परिणामो भवति निसर्गः स्वभावश्च ॥२२३॥
एतत्सम्यग्दर्शनमनधिगमविपर्ययौ तु मिथ्यात्वम् ।
ज्ञानमथ पञ्चभेदं तत् प्रत्यक्षं परोक्षं च ॥२२४॥
तत्र परोक्षं द्विविधं श्रुतमाभिनिबोधिकं च विज्ञेयम् ।
प्रत्यक्षं चावधिमनःपर्यायौ केवलं चेति ॥२२५॥
एषामुत्तरभेदविषयादिभिर्भवति विस्तराधिगमः ।
एकादीन्येकस्मिन् भाज्यानि त्वाचतुर्भ्य इति ॥२२६॥
सम्यग्दृष्टेर्ज्ञानं सम्यग्ज्ञानमिति नियमतः सिद्धम् ।
आद्यत्रयमज्ञानमपि भवति मिथ्यात्वसंयुक्तम् ॥२२७॥
सामायिकमित्याद्यं छेदोपस्थापनं द्वितीयं तु ।
परिहारविशुद्धिकं सूक्ष्मसम्परायं यथाख्यातम् ॥२२८॥
इत्येतत् पञ्चविधं चारित्रं मोक्षसाधनं प्रवरम् ।
नैकैरनुयोगनयप्रमाणमार्गैः समनुगम्यम् ॥२२९॥
सम्यक्त्वज्ञानचारित्रसम्पदः साधनानि मोक्षस्य ।
तास्वेकतराभावेऽपि मोक्षमार्गोऽप्यसिद्धिकरः ॥२३०॥
पूर्वद्वयसम्पद्यपि तेषां भजनीयमुत्तरं भवति ।
पूर्वद्वयलाभः पुनरुत्तरलाभे भवति सिद्धः ॥२३१॥
धर्मावश्यकयोगेषु भावितात्मा प्रमादपरिवर्जी ।
सम्यक्त्वज्ञानचारित्राणामाराधको भवति ॥२३२॥
आराधनाश्च तेषां तिस्रस्तु जघन्यमध्यमोत्कृष्टाः ।
जन्मभिरष्टत्र्येकैः सिध्यन्त्याराधकास्तासाम् ॥२३३॥
तासामाराधनतत्परेण तेष्वेव भवति यतितव्यम् ।
यतिना तत्परजिनभक्त्युपग्रहसमाधिकरणेन ॥२३४॥

स्वगुणाभ्यासरतमतेः परवृत्तान्तान्धमूकबधिरस्य ।
मदमदनमोहमत्सररोषविषादैरधृष्यस्य ॥२३५॥
प्रशमाव्याबाधसुखाभिकाङ्क्षिणः सुस्थितस्य सद्धर्मे ।
तस्य किमौपम्यं स्यात् सदेवमनुजेऽपि लोकेऽस्मिन् ॥२३६॥
स्वर्गसुखानि परोक्षाण्यत्यन्तपरोक्षमेव मोक्षसुखम् ।
प्रत्यक्षं प्रशमसुखं न परवशं न च व्ययप्राप्तम् ॥२३७॥
निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम् ।
विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम् ॥२३८॥
शब्दादिविषयपरिणाममनित्यं दुःखमेव च ज्ञात्वा ।
ज्ञात्वा च रागद्वेषात्मकानि दुःखानि संसारे ॥२३९॥
स्वशरीरेऽपि न रज्यति शत्रावपि न प्रदोषमुपयाति ।
रोगजरामरणभयैरव्यथितो यः स नित्यसुखी ॥२४०॥
धर्मध्यानाभिरतस्त्रिदण्डविरतस्त्रिगुप्तिगुप्तात्मा ।
सुखमास्ते निर्द्वन्द्वो जितेन्द्रियपरीषहकषायः ॥२४१॥
विषयसुखनिरभिलाषः प्रशमगुणगणाभ्यलङ्कृतः साधुः ।
द्योतयति यथा सर्वाण्यादित्यः सर्वतेजांसि ॥२४२॥
सम्यग्दृष्टिर्ज्ञानी विरतितपोबलयुतोऽप्यनुपशान्तः ।
तं न लभते गुणं यं प्रशमगुणमुपाश्रितो लभते ॥२४३॥
सम्यग्दृष्टिर्ज्ञानी विरतितपोध्यानभावनायोगैः ।
शीलाङ्गसहस्राष्टादशकमयत्नेन साधयति ॥२४४॥
धर्माद्भूम्यादीन्द्रियसञ्ज्ञाभ्यः करणतश्च योगाच्च ।
शीलाङ्गसहस्राणामष्टादशकस्य निष्पत्तिः ॥२४५॥
शीलार्णवस्य पारं गत्वा संविग्नसुगमपारस्य ।
धर्मध्यानमुपगतो वैराग्यं प्राप्नुयाद्योग्यम् ॥२४६॥
आज्ञाविचयमपायविचयं च सद्ध्यानयोगमुपसृत्य ।
तस्माद्विपाकविचयमुपयाति संस्थानविचयं च ॥२४७॥
आप्तवचनं प्रवचनं चाज्ञाविचयस्तदर्थनिर्णयनम् ।
आश्रवविकथागौरवपरीषहाद्येष्वपायस्तु ॥२४८॥
अशुभशुभकर्मपाकानुचिन्तनार्थो विपाकविचयः स्यात् ।
द्रव्यक्षेत्राकृत्यनुगमनं संस्थानविचयस्तु ॥२४९॥
जिनवरवचनगुणगणं सञ्चिन्तयतो वधाद्यपायांश्च ।
कर्मविपाकान् विविधान् संस्थानविधीननेकांश्च ॥२५०॥
नित्योद्विग्नस्यैवं क्षमाप्रधानस्य निरभिमानस्य ।
धुतमायाकलिमलनिर्मलस्य जितसर्वतृष्णस्य ॥२५१॥

तुल्यारण्यकुलाकुलविविक्तबन्धुजनशत्रुवर्गस्य ।
समवासीचन्दनकल्पनप्रदेहादिदेहस्य ॥२५२॥
आत्मारामस्य सतः समतृणमणिमुक्तलोष्ठकनकस्य ।
स्वाध्यायध्यानपरायणस्य दृढमप्रमत्तस्य ॥२५३॥
अध्यवसायविशुद्धेः प्रशस्तयोगैर्विशुद्ध्यमानस्य ।
चारित्रशुद्धिमग्र्यामवाप्य लेश्याविशुद्धिं च ॥२५४॥
तस्यापूर्वकरणमथ घातिकर्मक्षयैकदेशोत्थम् ।
शुद्धिप्रवेकविभववदुपजातं जातभद्रस्य ॥२५५॥
सातर्द्धिरसेष्वगुरुः सम्प्राप्य विभूतिमसुलभामन्यैः ।
सक्तः प्रशमरतिसुखे न भजति तस्यां मुनिः सङ्गम् ॥२५६॥
या सर्वसुरवरर्द्धिर्विस्मयनीयाऽपि साऽनगारर्द्धेः ।
नार्घति सहस्रभागं कोटिशतसहस्रगुणितापि ॥२५७॥
तज्जयमवाप्य जितविघ्नरिपुर्भवशतसहस्रदुष्प्रापम् ।
चारित्रमथाख्यातं सम्प्राप्तस्तीर्थकृत्तुल्यम् ॥२५८॥
शुक्लध्यानाद्यद्वयमवाप्य कर्माष्टकप्रणेतारम् ।
संसारमूलबीजं मूलादुन्मूलयति मोहम् ॥२५९॥
पूर्वं करोत्यनन्तानुबन्धिनाम्नां क्षयं कषायाणाम् ।
मिथ्यात्वमोहगहनं क्षपयति सम्यक्त्वमिथ्यात्वम् ॥२६०॥
सम्यक्त्वमोहनीयं क्षपयत्यष्टावतः कषायांश्च ।
क्षपयति ततो नपुंसकवेदं स्त्रीवेदमथ तस्मात् ॥२६१॥
हास्यादि ततः षट्कं क्षपयति तस्माच्च पुरुषवेदमपि ।
सञ्ज्वलनानपि हत्वा प्राप्नोत्यथ वीतरागत्वम् ॥२६२॥
सर्वोद्घातितमोहो निहतक्लेशो यथा हि सर्वज्ञः ।
भात्यनुपलक्ष्यराह्वंशोन्मुक्तः पूर्णचन्द्र इव ॥२६३॥
सर्वेन्धनैकराशीकृतसन्दीप्तो ह्यनन्तगुणतेजाः ।
ध्यानानलस्तपःप्रशमसंवरहविर्विवृद्धबलः ॥२६४॥
क्षपकश्रेणिमुपगतः स समर्थः सर्वकर्मिणां कर्म ।
क्षपयितुमेको यदि कर्मसङ्क्रमः स्यात् परकृतस्य ॥२६५॥
परकृतकर्मणि यस्मान्न क्रामति सङ्क्रमो विभागो वा ।
तस्मात् सत्त्वानां कर्म यस्य यत्तेन तद्वेद्यम् ॥२६६॥
मस्तकसूचिविनाशात्तालस्य यथा ध्रुवो भवति नाशः ।
तद्वत् कर्मविनाशो हि मोहनीयक्षये नित्यम् ॥२६७॥
छद्मस्थवीतरागः कालं सोऽन्तर्मुहूर्तमथ भूत्वा ।
युगपद् विविधावरणान्तरायकर्मक्षयमवाप्य ॥२६८॥

शाश्वतमनन्तमनतिशयमनुपममनुत्तरं निरवशेषम् ।
सम्पूर्णमप्रतिहतं सम्प्राप्तः केवलं ज्ञानम् ॥२६९॥
कार्त्स्न्याल्लोकालोके व्यतीतसाम्प्रतभविष्यतः कालान् ।
द्रव्यगुणपर्यायाणां ज्ञाता द्रष्टा च सर्वार्थैः ॥२७०॥
क्षीणचतुष्कर्मांशो वेद्यायुर्नामगोत्रवेदयिता ।
विहरति मुहूर्तकालं देशोनां पूर्वकोटिं वा ॥२७१॥
तेनाभिन्नं चरमभवायुर्दुर्भेदमनपवर्तित्वात् ।
तदुपग्रहं च वेद्यं तत्तुल्ये नामगोत्रे च ॥२७२॥
यस्य पुनः केवलिनः कर्म भवत्यायुषोऽतिरिक्ततरम् ।
स समुद्घातं भगवानथ गच्छति तत् समीकर्तुम् ॥२७३॥
दण्डं प्रथमे समये कपाटमथ चोत्तरे तथा समये ।
मन्थानमथ तृतीये लोकव्यापी चतुर्थे तु ॥२७४॥
संहरति पञ्चमे त्वन्तराणि मन्थानमथ पुनः षष्ठे ।
सप्तमके तु कपाटं संहरति ततोऽष्टमे दण्डम् ॥२७५॥
औदारिकप्रयोक्ता प्रथमाष्टमसमययोरसाविष्टः ।
मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु ॥२७६॥
कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च ।
समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात् ॥२७७॥
स समुद्घातनिवृत्तोऽथ मनोवाक्काययोगवान् भगवान् ।
यतियोग्ययोगयोक्ता योगनिरोधं मुनिरुपैति ॥२७८॥
पञ्चेन्द्रियोऽथ सञ्ज्ञी यः पर्याप्तो जघन्ययोगी स्यात् ।
निरुणद्धि मनोयोगं ततोऽप्यसङ्ख्यातगुणहीनम् ॥२७९॥
द्वीन्द्रियसाधारणयोर्वागुच्छ्वासावधो जयति तद्वत् ।
पनकस्य काययोगं जघन्यपर्याप्तकस्याधः ॥२८०॥
सूक्ष्मक्रियमप्रतिपाति काययोगोपगस्ततो ध्यात्वा ।
विगतक्रियमनिवर्तित्वमुत्तरं ध्यायति परेण ॥२८१॥
चरमभवे संस्थानं यादृग् यस्योच्छ्रयप्रमाणं च ।
तस्मात् त्रिभागहीनावगाहसंस्थानपरिणाहः ॥२८२॥
सोऽथ मनोवागुच्छ्वासकाययोगक्रियार्थविनिवृत्तः ।
अपरिमितनिर्जरात्मा संसारमहार्णवोत्तीर्णः ॥२८३॥
ईषद्ह्रस्वाक्षरपञ्चकोद्गिरणमात्रतुल्यकालीयाम् ।
संयमवीर्याप्तबलः शैलेशीमेति गतलेश्यः ॥२८४॥
पूर्वरचितं य तस्यां समयश्रेण्यामथ प्रकृतिशेषम् ।
समये समये क्षपयत्यसङ्ख्यगुणमुत्तरोत्तरतः ॥२८५॥

चरमे समये सङ्ख्यातीतान् विनिहत्य चरमकर्मांशान् ।
क्षपयति युगपत् कृत्स्नं वेद्यायुर्नामगोत्रगणम् ॥२८६॥
सर्वगतियोग्यसंसारमूलकरणानि सर्वभावीनि ।
औदारिकतैजसकार्मणानि सर्वात्मना त्यक्त्वा ॥२८७॥
देहत्रयनिर्मुक्तः प्राप्यर्जुश्रेणिवीतिमस्पर्शाम् ।
समयेनैकेनाविग्रहेण गत्वोर्ध्वमप्रतिघः ॥२८८॥
सिद्धिक्षेत्रे विमले जन्मजरामरणरोगनिर्मुक्तः ।
लोकाग्रगतः सिद्ध्यति साकारेणोपयोगेन ॥२८९॥
सादिकमनन्तमनुपममव्याबाधसुखमुत्तमं प्राप्तः ।
केवलसम्यक्त्वज्ञानदर्शनात्मा भवति मुक्तः ॥२९०॥
मुक्तः सन्नाभावः स्वालक्षण्यात् स्वतोऽर्थसिद्धेश्च ।
भावान्तरसङ्क्रान्तेः सर्वज्ञाज्ञोपदेशाच्च ॥२९१॥
त्यक्त्वा शरीरबन्धनमिहैव कर्माष्टकक्षयं कृत्वा ।
न स तिष्ठत्यनिबन्धादनाश्रयादप्रयोगाच्च ॥२९२॥
नाधो गौरवविगमादशक्यभावाच्च गच्छति विमुक्तः ।
लोकान्तादपि न परं प्लवक इवोपग्रहाभावात् ॥२९३॥
योगप्रयोगयोश्चाभावात्तिर्यङ् न तस्य गतिरस्ति ।
सिद्धस्योर्ध्वं मुक्तस्यालोकान्ताद् गतिर्भवति ॥२९४॥
पूर्वप्रयोगसिद्धेर्बन्धच्छेदादसङ्गभावाच्च ।
गतिपरिणामाच्च तथा सिद्धस्योर्ध्वं गतिः सिद्धा ॥२९५॥
देहमनोवृत्तिभ्यां भवतः शारीरमानसे दुःखे ।
तदभावात् तदभावे सिद्धं सिद्धस्य सिद्धिसुखम् ॥२९६॥
यस्तु यतिर्घटमानः सम्यक्त्वज्ञानशीलसम्पन्नः ।
वीर्यमनिगूहमानः शक्त्यनुरूपप्रयत्नेन ॥२९७॥
संहननायुर्बलकालवीर्यसम्पत्समाधिवैकल्यात् ।
कर्मातिगौरवाद्वा स्वार्थमकृत्वोपरमेतेति ॥२९८॥
सौधर्मादिष्वन्यतमकेषु सर्वार्थसिद्धिचरमेषु ।
स भवति देवो वैमानिको महर्द्धिद्युतिवपुष्कः ॥२९९॥
तत्र सुरलोकसौख्यं चिरमनुभूय स्थितिक्षयात् तस्मात् ।
पुनरपि मनुष्यलोके गुणवत्सु मनुष्यसङ्घेषु ॥३००॥
जन्म समवाप्य कुलबन्धुविभवरूपबलबुद्धिसम्पन्नः ।
श्रद्धा-सम्यक्त्व-ज्ञान-संवर-तपोबलसमग्रः ॥३०१॥
पूर्वोक्तभावनाभावितान्तरात्मा विधूतसंसारः ।
सेत्स्यति ततः परं वा स्वर्गान्तरितस्त्रिभवभावात् ॥३०२॥

यश्चेह जिनवरमते गृहाश्रमी निश्चितः सुविदितार्थः ।
दर्शन-शील-व्रतभावनाभिरभिरञ्जितमनस्कः ॥३०३॥
स्थूलवधानृतचौर्यपरस्त्रीरत्यरतिवर्जितः सततम् ।
दिग्व्रतमिह देशावकाशिकमनर्थविरतिं च ॥३०४॥
सामायिकं च कृत्वा पौषधमुपभोगपारिमाण्यं च ।
न्यायागतं च कल्प्यं विधिना पात्रेषु विनियोज्यम् ॥३०५॥
चैत्यायतनप्रस्थापनानि कृत्वा च शक्तितः प्रयतः ।
पूजाश्च गन्धमाल्याधिवासधूपप्रदीपाद्याः ॥३०६॥
प्रशमरतिनित्यतृषितो जिन-गुरु-साधुजनवन्दनाभिरतः ।
संलेखनां च काले योगेनाराध्य सुविशुद्धाम् ॥३०७॥
प्राप्तः कल्पेष्विन्द्रत्वं वा सामानिकत्वमन्यद्वा ।
स्थानमुदारं तत्रानुभूय च सुखं तदनुरूपम् ॥३०८॥
नरलोकमेत्य सर्वगुणसम्पदं दुर्लभां पुनर्लब्ध्वा ।
शुद्धः स सिद्धिमेष्यति भवाष्टकाभ्यन्तरे नियमात् ॥३०९॥
इत्येवं प्रशमरतेः फलमिह स्वर्गापवर्गयोश्च शुभम् ।
सम्प्राप्यतेऽनगारैरगारिभिश्चोत्तरगुणाढ्यैः ॥३१०॥
जिनशासनार्णवादाकृष्टां धर्मकथिकामिमां श्रुत्वा ।
रत्नाकरादिव जरत्कपर्दिकामुद्धृतां भक्त्या ॥३११॥
सद्भिर्गुणदोषज्ञैर्दोषानुत्सृज्य गुणलवा ग्राह्याः ।
सर्वात्मना च सततं प्रशमसुखायैव यतितव्यम् ॥३१२॥
यच्चासमञ्जसमिह छन्दःशब्दसमयार्थतो मयाभिहितम् ।
पुत्रापराधवत्तन्मर्षयितव्यं बुधैः सर्वम् ॥३१३॥
सर्वसुखमूलबीजं सर्वार्थविनिश्चयप्रकाशकरम् ।
सर्वगुणसिद्धिसाधनधनमर्हच्छासनं जयति ॥३१४॥

• • •

## परिशिष्ट-२
## प्रशमरतिगताऽऽर्याणामकारादिक्रमेण सूची ।[1]


| | आर्याङ्कः |
|---|---|
| [ अ ] | |
| अध्यवसायविशुद्धेः | २५४ पू |
| अध्यात्मविदो मूर्च्छां | १७८ पू |
| अनशनमूनोदरता | १७५ पू |
| अनेकानुयोगनय | २२९ उ |
| अन्येषां यो विषयः | ५१ पू |
| अन्योऽन्यमुत्तरोत्तरविशेष | ६२ उ |
| अन्योऽहं स्वजनात् | १५४ पू |
| अपरिगणितगुणदोषः | १०३ पू |
| अपरिमितनिर्जरात्मा | २८२ उ |
| अपि पश्यतां समक्षं | ११० पू |
| अभिलाष इत्यनेकानि | १८ उ |
| अविसंवादनयोगः | १७४ पू |
| अशुचिकरणसामर्थ्या | १५५ पू |
| अशुचित्वं संसारः | १४९ उ |
| अशुभशुभकर्मपाकानुचिन्त | २४९ पू |
| अष्टादशशीलाङ्गसहस्र | ६१ उ |
| अस्य तु मूलनिबन्धं | ५९ पू |
| [ आ ] | |
| आक्षेपणीं विक्षेपणीं | १८२ पू |
| आचाराध्ययनोक्तार्थ | ११९ पू |
| आज्ञाविचयमपायविचयं | २४७ पू |
| आत्मगुणैरूत्कर्षः | ९९ उ |
| आत्मादेशादात्मा | २०२ उ |
| आत्मारामस्य सतः | २५३ पू |
| आदावत्यभ्युदया | १०६ पू |
| आद्यत्रयमज्ञानमपि | २२७ उ |
| आप्तवचनं प्रवचनं | २४८ पू |
| आराधनाश्च तेषां | २३३ पू |
| आरोग्यायुर्बलसमुदया | ६५ पू |
| आश्रवविकथागौरव | २४८ उ |
| आहारभयपरिग्रह | २१ उ |
| [ इ ] | |
| इच्छा मूर्च्छा कामः | १८ पू |
| इति गुणदोषविपर्यास | ११२ पू |
| इत्येतत् पञ्चविधं | २२९ पू |
| इत्येवं प्रशमरतेः | ३०९ पू |
| इन्द्रियकषायगौरव | १६४ उ |
| इष्टजनसम्प्रयोगर्द्धि | १५१ पू |
| इष्टवियोगप्रियसम्प्रयोग | १२५ पू |
| [ ई ] | |
| ईर्याभाषाऽम्बरभाजनै | ११६ उ |
| ईर्ष्या रोषो दोषो | १९ पू |
| ईषदह्रस्वाक्षरपञ्चको | २८३ पू |
| [ उ ] | |
| उत्पादविगमनित्यत्व | २०४ पू |


---

१. पू = पूर्वार्द्धः । उ = उत्तरार्द्धः ।

उदयपरिणामि रूपं २०९ उ
उदयोपशमनिमित्तौ ८९ पू

**[ ए ]**

एकस्य जन्ममरणे १५३ पू
एकादीन्येकस्मिन् २२६ उ
एकार्थः परिणामो २२३ उ
एकैकविषयसङ्गाद् ४७ पू
एतत्सम्यग्दर्शनमनधि २२४ पू
एतद्दोषमहासञ्चयजालं ५८ पू
एतेषु मदस्थानेषु ९७ पू
एतेष्वध्यवसायो २२२ पू
एभिः प्रमादयोगानुगैः ५६ उ
एभिर्भावैः स्थानं १९८ पू
एवं क्रोधो मानो ३० पू
एवं रागो द्वेषो ५६ पू
एवं विरागवार्तहेतुरपि १५ उ
एवं संयोगाल्पबहुत्वाद्यै २०३ पू
एवमनेकविधानामेकैको १९३ पू
एवमनेके दोषाः ४६ पू
एषामुत्तरभेदविषयादि २२६ पू

**[ औ ]**

औदारिकतैजस २८६ उ
औदारिकप्रयोक्ता २७६ पू
औदारिकादपि तथा १७७ उ
औपशमिकः क्षयोत्थः १९६ उ

**[ क ]**

कर्ममयः संसारः ५७ पू
कर्मवशाद् गच्छन्त्यत्र ८२ उ
कर्मविपाकान् विविधान् २५० उ
कर्मशरीरमनोवाग्वि २१७ पू
कर्मातिगौरवाद्वा २९७ उ
कर्मोदयनिर्वृत्तं १०१ पू
कर्मोदयाद् भवगति ३९ पू
कलरिभितमधुरगान्ध ४१ पू
कल्पयति निश्चये १४३ उ
कल्प्याकल्प्यं १३८ उ
कल्प्याकल्प्यविधिज्ञः १३९ पू
कश्चिच्छुभोऽपि विषयः ४९ पू
कश्चिदशुभोऽपि भूत्वा ४९ उ
कः शुक्रशोणितसमुद्भ ८५ पू
कार्त्स्न्याल्लोकालोके २७० पू
कायक्लेशः संलीनतेति १७५ उ
कारणवशेन यद्यत् ५० पू
कार्याकार्यविनिश्चय २१ पू
कालं क्षेत्रं मात्रां १३७ पू
कालं विनास्तिकाया २१४ उ
किञ्चिच्छुद्धं कल्प्यम १४५ पू
किम्पाकफलादनवद् १०७ उ
किं पुनरनियमितात्मा ४७ उ
कुलरूपवचनयौवन ६७ पू
कृत्वा यद्वाल्लभ्य ९३ उ
केचित्सातर्द्धिरसाति ७६ पू
केवलमुन्मादः ९७ उ
केवलसम्यक्त्वज्ञान २८९ उ
कोऽत्र निमित्तं वक्ष्यति ९ पू
क्रोधः परितापकरः २६ पू
क्रोधात् प्रीतिविनाशं २५ पू
क्रोधो मानश्च ३२ उ
क्लिष्टाष्टकर्मबन्धनबद्ध २२ पू
क्लीबाः परत्र चेह ८० उ
क्षणविपरिणामधर्मा १२१ पू
क्षपकश्रेणिमुगपतः २६५ पू
क्षपयति ततो २६१ उ
क्षपयति युगपत् २८५ उ

क्षपयितुमेको यदि २६५ उ
क्षान्तिबलमार्दवा १६५ उ
क्षित्यम्बुवह्निपवनतरवस्त्र १९२ उ
क्षीणचतुष्कर्मांशो २७१ पू

[ ग ]

गतिपरिणामाच्च तथा २९४ उ
गतिविभ्रमेङ्गिताकार ४२ पू
गन्धभ्रमितमनस्को ४३ उ
गर्वं परप्रसादात्मकेन ९४ पू
गलयन्त्रपाशबद्धो ४४ उ
गुणवदमूर्च्छितमनसा १३६ पू
गुरुवदनमलयनिसृतो ७० उ
गुर्वायत्ता यस्माच्छा ६९ पू
गोत्रान्तराययोश्चेति ३४ उ
ग्रन्थः कर्माष्टविधं १४२ पू
ग्रहणोद्ग्राहणनव ९१ पू
ग्रहणोपभोगनियतस्य १३४ उ

[ च ]

चक्षुरचक्षुरवधिकेवल १९५ उ
चरमभवे संस्थानं २८१ पू
चरमे समये २८५ पू
चारित्रं विरतानां २०१ उ
चारित्रं वीर्यं १९९ उ
चारित्रमथाख्यातं २५८ उ
चारित्रशुद्धमग्र्यामवाप्य २५४ उ
चैत्यायतनप्रस्थापनानि ३०५ पू

[ छ ]

छद्मस्थवीतरागः २६८ पू

[ ज ]

जन्म समवाप्य ३०० पू
जन्मजरामरणभयैर १५२ पू
जन्मभिरष्टत्र्येकैः २३३ उ
जन्ममरणैरजस्रं बहु २२ उ
जातिकुलरूबललाभ ८० पू
जात्यादिमदोन्मत्तः ९८ पू
जात्यादिहीनतां ९८ उ
जितलोभरोषमदनः १२९ उ
जिनभाषितार्थसद्भाव ६१ पू
जिनवरवचनगुणगणं २५० पू
जिनवरवचनादन्यत्र १५२ उ
जिनशासनार्णवादाकृष्टां ३१० पू
जिनसिद्धाचार्योपाध्यायान् २ पू
जीवस्यैतत् सर्वं २०३ उ
जीवा मुक्ताः संसारिण १९० पू
जीवाजीवाः पुण्यं १८९ पू
जीवाजीवा द्रव्यमिति २१० पू
जीवाजीवानां द्रव्यात्मा २०० पू
जीवितमरणोपग्रहकराश्च २१७ उ
ज्ञात्वा च रागद्वेषा २३९ उ
ज्ञात्वा भवपरिवर्ते ८१ पू
ज्ञात्वा योऽभ्यवहार्यं १३७ उ
ज्ञानं सम्यग्दृष्टेर्दर्शनमथ २०१ पू
ज्ञानमथ पञ्चभेदं २२४ उ
ज्ञानस्य फलं ७२ उ
ज्ञानाऽज्ञाने पञ्चत्रि १९५ पू

[ त ]

तच्चिन्त्यं तद्भाष्यं १४७ पू
तज्जयमवाप्य २५८ पू
तज्जयहेतोरशठं १४२ उ
तत् प्राप्य विरतिरत्नं १६४ पू
तत्कथमनिष्टविषया १०५ पू
